संस्कारमीमांसा ।

UNIVERSITY OF TORONTO
LIBRARY

WILLIAM H. DONNER
COLLECTION

purchased from
a gift by

THE DONNER CANADIAN
FOUNDATION

28

संस्कारमीमांसा

Samskāramīmāṃsā

सरस्वतीभूषणकिंजवडेकरोपनामकवामनशास्त्रिणा

विरचिता

Vamana Rama-Chandra
Kinjavdekar

SANSKRIT SERIES OFFICE

[illegible] २ ।

LIBRARY
SEP 9 1970
UNIVERSITY OF TORONTO
PK
3057
A72V3
1918

Printed and Published by S. N. Joshi, at the " Chitra Shala Press, " 818 Sadashiv Peth, Poona-City.

समर्पणम्

श्रीशङ्करः शरणम् ।

या नाम्ना विभवैश्च निस्तुलतमैर्बाभाति जिष्णोः पुरीम् ।
न्यक्कुर्वन्त्यमरावतीति नगरी देशे विदर्भाह्वये ॥
मूर्तो धर्म इवापरोऽत्र वसति श्रीकृष्णराजात्मजः ।
खापर्डेकुलवाधिपार्वणशशी श्रीमान् गणेशः सुधीः ॥ १॥

श्रीवाण्यौ नियतं विहाय कदनं यस्मिन्समं खेलतः ।
ख्यातं यस्य च राजकीयनियमप्रावीण्यमत्यद्भुतम् ॥
दाता चाप्रतिमः प्रसिद्धविभवो वक्ता च लोकोत्तरः ।
मित्र–क्षेत्र–कलत्र–पुत्रसहितः सोऽयं चिरं मोदते ॥ २ ॥

तस्याग्नित्रितयीव भाति विमलं सत्पुत्ररत्नत्रयम् ।
ज्यायाँस्तत्र च योगमार्गनिरतः श्रीबालकृष्णाभिधः ॥
देवीदास इति श्रुतस्तदनुजो गीर्वाणवाणीस्वयं—
दत्ताश्लेषविधिस्तथा कविवरः श्रीबालनामान्तिमः ॥ ३ ॥

तेषां प्रेरणया प्रयोगकुसुमैः संस्कारपूर्वा मया ।
मीमांसास्रगियं विरच्य भगवत्पादेऽर्प्यते सादरम् ॥
ऋग्वेदं पठताश्वलायनमुनेः सूत्रक्रमालम्बिना ।
श्रीमद्रामसुधीन्द्रलब्धजनुषा श्रीवामनाख्याजुषा ॥ ४ ॥

यो धृत्वा च विजित्य तारकरिपुं मत्वा गणानां पतिम् ।
प्रत्याख्याऽविरतं चकास्ति भुवने गंगाधरापत्यताम् ॥
भूदेव्या रमणीयभालतिलको सद्राष्ट्रकार्योद्यतम् ।
श्लाघेऽहं बलवन्तनामकममुं तं लोकमान्यं मुदा ॥ ५ ॥

॥ इति ॥

सर्वाणि ह वा अस्य नामधेयानि आ. गृ. ४।९।२७॥

सर्वाः सेनाः आ. गृ. ४।९।२८॥

सर्वाण्युच्छ्रयणानि— आ. गृ. ४।९।२९॥

इत्येवं विद्यजमानं प्रीणाति—आ. गृ. ४।९।३०॥

यस्य प्रसादविभवादगमत्समाप्तिं ग्रन्थो मितंपचमतेरपि मे यथास्वम् ।
तस्यार्प्यते भगवतः कमलेश्वरस्य सश्रद्धमेष मयका चरणाब्जयुग्मे ॥

अनुक्रमणिका

विषयः	पत्रांकः
प्रास्ताविकम्	**१–५२**
सद्यःस्थितिः	१–५
सद्यःस्थितेः प्रमाणानि	५–७
तत्त्वजिज्ञासा	७–४३
तत्प्रामाण्यम्	४३–४७
संस्कारप्रकाराः	४७–५२
संस्कारप्रयोगपरिभाषाप्रकरणम्	**५३–६७**
सामान्यपरिभाषा	५३–५६
उपवेशनविचारः, कृतनित्यविचारः, आचमनविचारः	५६–५७
संकल्पविचारः, स्थंडिलविचारः ...	५७–५९
अन्वाधानाविचारः	५९–६०
परिस्तरणार्थवादः, अप्प्रणयनविचारः ...	६०–६१
निर्वापविचारः, इध्माविचारः, आघारविचारः, अवदानविचारः	६१–६७
समिद्विषयकसूत्राणि	६७
विवाहसंस्कारः	**६८–११३**
सूत्राणि	६८–७९
प्रयोगः	७९–८४
मंत्रभाष्यम्	८४–९०
उपयमविचारः	९०–९७
गृह्यपरिचरणसूत्राणि	९७–९९
प्रयोगः	९९–१००
स्थालिपाकसूत्राणि	१००–१०८
स्थालिपाकसामग्री	१०८–१०९
प्रयोगः	१०९–१११
मंत्रभाष्यम्	१११–११३

पुंसवनानवलोभने ११४–११८
सूत्राणि ११४–११६
प्रयोगः ११६–११७
मंत्रभाष्यम् ११६–११८
सीमन्तसंस्कारः ११८–१२४
सूत्राणि ११८–११९
प्रयोगः १२०–१२१
मंत्रभाष्यम् १२१–१२३
शास्त्रार्थः १२३–१२४
जातकर्मसंस्कारः १२४–१२९
सूत्राणि १२४–१२६
प्रयोगः १२६
मंत्रभाष्यम् १२७–१२८
शास्त्रार्थः १२८–१२९
नामकरणसंस्कारः १३०–१३२
सूत्राणि १३०–१३१
प्रयोगशास्त्रार्थौ १३१–१३२
अन्नप्राशनसंस्कारः १३२–१३६
सूत्राणि १३२–१३३
प्रयोगः १३३
मंत्रभाष्यम् १३३–१३४
मीमांसा १३४–१३६
चौलसंस्कारः १३६–१४३
सूत्राणि १३६–१३९
प्रयोगः १३९–१४१
मंत्रभाष्यम् १४२–१४३
उपनयनसंस्कारः १४३–१६८
सूत्राणि १४३–१५१
प्रयोगः १५१–१५५
मंत्रभाष्यम् १५५–१५८

विचारः	१५८–१६२
संध्यासूत्राणि	१६२–१६३
प्रयोगः	१६३
मंत्रभाष्यम्	१६३–१६४
विचारः	१६४–१६५
यज्ञोपवीतविचारः	१६५–१६८
समावर्तनसंस्कारः	**१६८–१७९**
सूत्राणि	१६८–१७२
प्रयोगः	१७२–१७८
शास्त्रार्थः	१७८–१७९
उपाकर्मोत्सर्जनसंस्कारौ	**१७९–१८६**
सूत्राणि	१७९–१८३
प्रयोगः	१८३–१८५
सामग्री	१८५–१८६
मंत्रभाष्यम्	१८६
विचारः	१८६
पंचयज्ञाः	**१८७–२०१**
देवयज्ञ-भूतयज्ञ-पितृयज्ञ-मनुष्ययज्ञसूत्राणि ...	१८७–१९०
प्रयोगः	१९०–१९२
मंत्रभाष्यम्	१९२
शास्त्रार्थः	१९२–१९४
ब्रह्मयज्ञसूत्राणि	१९५–१९९
प्रयोगः	१९९–२००
मंत्रभाष्यम्	२००
पंचयज्ञलक्षणानि	२००
ब्रह्मयज्ञशास्त्रार्थः	२००–२०१
पार्वणश्राद्धम्	२०१–२३०
सूत्राणि	२०१–२११
प्रयोगः	२११–२१४
मंत्रभाष्यम्	२१५–२२०

मीमांसा	२२०–२२९
पिण्डपितृयज्ञविचारः	२२९–२३०
परिशिष्टानि	२३१
(अ) पुनर्गृह्योत्पादनाविचारः ...	२३१–२३४
(आ) क्षौरानिर्णयः	२३४–२३६
(इ) स्वस्त्ययनप्रयोगः ...	२३६–२३७
(ई) मधुपर्कः	२३८–२४६
सूत्राणि	२३८–२४१
प्रयोगः	२४२–२४३
मंत्रभाष्यम्	२४४–२४६
शास्त्रार्थः	२४६
(उ) आभ्युदयिकम्	२४६
सूत्राणि	२४६–२४७
प्रयोगः	२४७
मंत्रभाष्यम्	२४८

INTRODUCTION.

Religious rites, ceremonies, practices and regulations of the followers of the Vedic religion are broadly divided, according to the terminology usually employed in this behalf, into (1) S'rauta rites, (2) Grihya rites and (3) Dharma regulations. The first of these groups gives the rules, prescriptions, or descriptions of the sacred ceremonial known as S'rauta Yajñas or Vedic sacrifices, the main object of which is to propitiate the Vedic deities and to attain one's welfare in the world of Gods i. e. in the next world. If we define religion to mean rules for securing our welfare in the next world, then S'rauta ceremonies may very properly be called the Vedic religious ritual in the strict sense of the word. Sacrifice or Yajña, to be performed with the aid of the three sacred fires, *viz*. Gârhapatya, Dakshina and Ahavanîya, is the main characteristic of the ritual. It is the most ancient of Vedic sacred rites, and it is fully treated in the Yajurveda Samhitâ, Brâhmanas and the different S'rauta Sûtras belonging to the different Shakhas of the four Vedas. These Vedic rites or sacrifices have, however, now fallen into disuse, and though we may now and then hear of the S'rauta Yajñas performed at some religious centres, we may safely say that, whatever be the respect and veneration entertained for these rites by the Hindus of the present day, these S'rauta sacrifices have practically become obsolete at present. Nor does the present treatise called Samskâra Mîmânsa, by Sarasvatibhushana Vamanshastri Kinjâvdekar, deal with them. It is a practical treatise on the Grihya or the domestic rites according to the A'shvalâyana Sûtra and is intended for the benefit of those who would like to perform these domestic ceremonies according to the simplest rules contained in that Sûtra without caring to follow in detail the additions made to these *samskâras* or ceremonies by the later Smritis, Purânas or religious or semi-religious works. We shall, therefore, confine our attention to these ceremonies in the present introduction.

Now the first question that raises itself in this connection is : What is the difference between the S'rauta and Grihya rites? The old Mîmânsakas, who busied themselves principally with the discussion of the S'rauta sacrifices, have tried to answer this question by reference to the sacred fires employed in these rites. They say that a S'rauta Yajna or a S'rauta sacrifice must be performed by one who has established the five fires in the house, *viz.* Gârhapatya, Dakshina, Ahavaniya, Sabhya and Avasathya, and that the first three of these are required for the performance of the S'rauta scrifices. In their technical language they would say that a S'hrouta sacrifice is to be performed only by an Agnihotri with the aid of the first three out of the five fires mentioned above (अग्नित्रयसाध्य), and that it is a Daiva sacrifice intended to secure for the sacrificer what may be called the status of the Gods in the next world; while a Grihya *samskâra* or rite is to be performed by every house-holder with the aid of only one sacred fire, *viz.* Grihyâgni, and that it is intended for securing to the sacrificer the status of the Rishis and is therefore called a Brâhma *samskara* or rite. These definitions are correct so far as they go but they do not fully explain the purpose and the objects for which these rites were performed by the followers of the Vedic religion. It is therefore necessary to enter into a short discussion of the nature of these rites and the purposes for which they were intended to be performed.

A comparative study of different religions will show that every religion enjoins certain rites and ceremonies without the performance of which no one can claim to be included amongst the community of the followers of that religion. In other words no one who wishes to adopt a particular religion or join a particular religious sect can do so without observing certain rules and regulations or without performing certain ceremonies prescribed in that behalf. For instance, a man does not become a Christian without undergoing baptism, or a Mahomedan without undergoing circumcision, whatever faith he may have in the Bible or Koran notwithstanding, and it was once a disputed question whether circumcision was a necessary

ceremony for the Christians. Even the secular or non-religious societies have accepted these rules, and in all such societies, clubs, associations or communities, specific rules and ceremonies are laid down for the admission of a member therein and for the continuation of that membership afterwards. This practice is no doubt based on the sacred rites prescribed in this behalf by different religions, but it is certainly not a mere imitation. It recognizes the principle that each community, whether religious or secular, must have some peculiar rites and ceremonies of its own in order to distinguish it from other sects, and that in the absence of such rules, there will result a general confusion. Augustus Comte, the great founder of the Positive religion, was no dogmatic believer in what is generally understood to be the religious efficacy of sacraments and rites prescribed in the sacred books of the different religions. But, in the private worship which he prescribes for the followers of his Religion of Humanity, he has included nine different sacraments to be performed in all the great epochs of private life from the cradle to the grave (See Comte's System of Positive Polity, English Translation, Vol. IV. pp. 109 to 115). These sacraments include in their natural order (1) Presentation, (2) Initiation, (3) Admission, (4) Destination, (5) Marriage, (6) Maturity, (7) Retirement, (8) Transformation and (9) Incorporation. It is not possible to quote here in full Comte's description of the ceremonies, but we may remark that they closely resemble the Vedic ceremonies from *Nâmakarana* to *Sapindikarana*, and, what is still more important, that Augustus Comte would dispense with the three sacraments which precede marriage and the two which follow it in the case of women, as the Vedic writers have done. Possibly Comte may have had before him the Vedic system of domestic ritual; but there is little doubt that he was much influenced in this matter by the ritual of the Roman Catholic Christianity.

It will be evident from the above that every religious community requires that its members should lead a particular

kind of domestic life in order to obtain admission into that religious community and maintain their social and religious status therein. The rites and the acts prescribed in this behalf have thus a clear socio-religious purpose in view. To belong to a particular religion a man must live in a particular way, marry in a particular way, pray in a particular way and be initiated into that community in a specific manner; and that there must also be a definite set of rules about these rites so as to secure uniformity of practice in that community or sect. According to the terminology of the Vedic writers these constitute our Grihya *samskâras* orwhat is loosely expressed by translating that phrase into " domestic rites. " The oldest text-books on the subject are the Grihya Sûtras of the different writers. But it must not be supposed that the authors of these Sutras introduced these rites anew on their own authority or that they themselves invented them. They were mere recorders of the immemorial customs of the Society in this respect and that they felt the necessity of defining the ritual when they found that the local divergences in the customs might in the long run impair their uniformity. This is clear from the directions contained in certain Sûtras regarding the observance of the local and family customs (As'valâyana Grihya-Sûtra I. 7. 1 and 2). It cannot therefore be denied that the writers of the different Grihya Sûtras must have imparted some rigidity to these Vedic practices and customs by first attempting to codify and define them. But there is not the slightest doubt that the practices so codified and defined were handed down from generation to generation from times immemorial. Thus we find that the marriage ceremony is expressly referred to in the the Rigveda, and Jâtakarma, Nâmakarana Upanayana and Garbhâdhâna in the S'atapatha Brâhmana of the White Yajurveda. Many of the Mantras used in the Grihya *samskâras* are also found in the Atharvaveda Samhitâ. This proves that the domestic ceremonies defined and described in the different Grihya Sûtras were no new innovations, but were the domestic customs of the Vedic communities from times immemorial and that in consequence they

created obligations as much binding on the Vedic society as the S'hrauta rites prescribed in the S'hrauta Sûtras.

But though the rites in the Grihya Sûtras are as old and binding as those in the S'rauta Sûtras the former do not possess the same importance from a strictly religious point of view as the latter. This distinction is expressed by designating the former as *Smârta* in opposition to the latter which are called *S'rauta* Sûtras. We may further note that Grihya rites with several additions and modifications have always formed a part of the recognised Smritis and are described therein along with many other social rights, duties and obligations regarding Châturvarnya or As'ramas which are included under the general word *Dharma*. So the later writers on Samskâras generally give a compendium of all the precepts contained in the Grihya Sûtras, Smritis and other works, reconciling contradictions, if any, and laying down a procedure which will satisfy all the conditions laid down in the Sûtras and other works. These writers, however, all agree in holding that though different procedures are prescribed in different Smritis and Purânas, yet it is enough if one performs all the ceremonies prescribed in the Grihya Sûtra belonging to his S'âkhâ of the Veda. In short it is recognised that the Grihya Sûtras are the main authorities on the subject and that if one performs a domestic ceremony according to the presentation contained in his Grihya Sûtra, nothing more need be done to make the Saṁskâra so to say legally complete. This view of the Dharma Shâstra, so far as these Samskâras are concerned, has, of late, created a desire in many to have the domestic rites in their houses performed in the manner laid down in the Grihya Sûtras, and the present treatise is an attempt to supply this desideratum, so far as the followers of the As'valâyana branch of the Rigveda are concerned. There are other Grihya Sûtras for other vedic sects; for instance, Sânkhyâyana for the Kaushîtaki branch of the Rigveda, Apastamba, Satyâshâdha and Baudhâyana for the followers of the Krishna Yajurveda. Kâtyâyana for those of the White Yajus, Mânava for Atharva,

Veda and Khâdira and Gobhila for the Sâmavedins; and the writers of Prayogas for these different branches of the Veda have based their works upon the Sutras specifically belonging to their branch of the Veda. It is no doubt very interesting and instructive to compare the different prescriptions for the domestic rites laid down in the different Sûtras, to find reasons for differences therein and thus compile, if possible, a common practical manual for all. But the work cannot be undertaken until all the different Sutras are critically studied and compared with the best Prayoga works written for the different S'âkhâs. The present treatise does not pretend to be so ambitious. It confines itself to the As'valâyana and Grihya Sûtra and describes in brief the domestic rites mentioned therein with the explanation of the Mantras to be recited in performing said ceremonies. We may mention that the English translations of most of these Sûtras are published in the Sacred Books of the East Series (Vol. XXIX and XXX), and in the introductions to these an attempt has been made to determine, as far as possible, the chronological order of these Sûtrakâras and their relation with one another. But as this is not the subject-matter of the present treatise, we pass it over in this place ; nor do we believe that a proper settlement of the question is possible in the present state of our knowledge of the Grihya Sûtra literature.

We have stated above that the domestic rites described in the Grihya Sûtras were no new innovations introduced by the Sûtrakâras. They were the customary rites of the Vedic community from times immemorial intended to qualify a person to become a member of that religious community. Now if we turn to history we find that this ancient Vedic community was, at first, exclusively an Aryan community and it was only in course of time that the non-Aryans obtained admission therein. It is not surprising therefore to find that the domestic rites described in the Grihya Sûtras are, in the first instance, prescribed for Brahmans, Kshatriyas and Vaishyas. Yâjñyavalkya in his Smriti (I. 10) expressly lays

down that though there are four Varnas—Brahman, Kshatriya, Vaishya and Shudra,—only the first three of these are called Dvijas or twice-born and that their Samskâras from the cradle to the grave are performed with the Vedic Mantras. To us this seems to be an advance or improvement on the original position. The Samskâras are obviously of Aryan origin. But when the Aryans and non-Aryans came in contact it was inevitable that these Samskâras should be extended to non-Aryan people also. Thus even in the S'rauta rites and sacrifices we find a place assigned to *Rathakâra* and *Nishâdasthapati* (Jaimini VI. 144 ! 51) and the reasons for which the S'rauta restrictions were so relaxed, applied with greater force in the case of Grihya rites, as the Aryan community absorbed into its fold the non-Aryan communities in India. The growing and expanding custom in this behalf is found fully recognised in the Smritis and the Purânas which consequently are justly regarded as the authoritative and religious text for the Shudras. We do not mean here to enter into the discussion as to whether the Shudras are or are not exclusively non-Aryans. A mixed descent is more probable; for in the Smritis we find intermarriages between the different Varnas fully recognised even in old times. It is further stated thérein to be the main cause of the existence of different castes or sects. What is pertinent to the question in hand however is that the later Smriti and Prayoga writers have fully recognised the extension of Grihya rites, excepting Upanayana, to the Shudra class provided no Vedic Mantras are used. And the Hindu Law, as administered in our courts at present, holds that these Samskâras are fully binding on the members of the Shudra community. In the Grihya Sûtras themselves most of the Samskâras are in most Cases mentioned without any special qualification as Varna or caste, and according to Jaimini a Shudra cannot participate in the Vedic rites because a Shudra cannot study the Vedas. Carried to its logical conclusion this means that a Shudra may have all the Samskâras if Vedic Mantras are not used or if the study of the Veda is not their object, as in the case of Upanayana. This reason of Jaimini applies with equal force to women of all classes.

and consequently women are also said to be excluded from some Samskâras, and in cases where Samskâras are allowed for them they must be performed without the use of Vedic Mantras. It is strange to find that Augustus Comte had introduced similar exceptions, though in a more general and less sectarian form, in the private worship he prescribed in his work on the Religion of Humanity.

There are many other questions connected with the Grihya ritual a discussion of which from a social, religious, or historical point of view is desirable, but it presupposes a good deal of study and research which it will yet take some time to accomplish. The present book is merely an introduction to such a study, an incentive to it, if we may so call it, and we trust that it would lead to more and more attention being bestowed on the subject so that in time to come we shall, if possible, be able to formulate a Grihya ritual which will be applicable to all the followers of Vedic religion in India.

POONA.
18th, March, 1918.

B. G. TILAK.

ॐ भूधरभूजानिर्विजयतेतमाम् ।

प्रास्ताविकं किंचित् ।

अयि भूमण्डलमण्डनायमाना मीमांसादिदर्शनकृतपरिश्रमा विद्वांसः ! इह खलु लौकिकफलाप्तिपूर्वकं परमश्रेयोऽवाप्तुकामैरधिकारिभिर्वैदिकं कर्मानुष्ठेयमिति वैदिकघण्टापथः । तत्र वैदिककर्माण्येतावत्कालपर्यन्तं कया विधया संपादयांचाक्रिरे जनैस्तत्पूर्वं मीमांस्यते । तत्र च वैदिकविधिः पूर्वमालोचनीयः । विधिश्च लिङ्-लोट्तव्यदादिप्रत्ययान्तपदबोध्यः । यजेत, वेदमधीष्व, कर्तव्यमित्यादीन्युदाहरणानि । एतादृशपदघटिताविध्यनुसारेण वैदिककर्माण्यनुष्ठेयानीति राद्धान्तः ।

अयि पण्डिताः ! **मन्त्रब्राह्मणयोर्वेदनामधेयमिति** कातीयसूत्रानुसारं यद्यपि संहिताभागस्य ब्राह्मणभागस्यापि च वेदसंज्ञा; उभयोरप्यप्रतिहतं प्रामाण्यं, तथापि संहिताभागे विधिवाक्यानि नोपलभ्यन्ते किन्तु ब्राह्मणभाग एव। किंच संहिताभागस्थ-मन्त्राणां विनियोगोऽपि ब्राह्मणभाग एव व्यधायि । अत्रार्थे निदर्शनम् । अहरहः सन्ध्यामुपासीतेत्यादि ब्राह्मणवाक्यानि. उपनिषदि गर्भलंभनमित्यपि च सूत्रयांचकार भगवानाश्वलायनः । इयंचोपनिषद् बृहदारण्याख्या । इयं च शतपथब्राह्मणे समाम्नायत इति सर्वविद्वत्प्रथितचरम् । एतान्येव विधिवाक्यानि शास्त्रपदभाञ्जि. **‘ प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा । पुंसां येनोपदिश्येते तच्छास्त्रमभिधीयते ’** इति निरुक्तेः ।एवं च **‘तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ’** इति भगवद्गीतासु श्रीकृष्णबोधितवाक्येनापि यन्मूलककार्याकार्यव्यवस्थितिर्बोध्यते तद्ब्राह्मणवाक्यजातमेव । तथा च ब्राह्मणवाक्यकलापैर्विहितानि वैतानिकानि कर्माणि । तदनुष्ठित्यर्थमवश्यं पुरुषेण संस्कृतेन भाव्यम् । यथा प्रसिद्धेयं सरणिः; ब्राह्मणोद्देश्यकवासन्तिकोपनयनपूर्वकमग्निहोत्रेणेष्टं भावयेदिति । तदर्थं विहितत्वादेवाग्निहोत्राद्यनुतिष्ठापयिषुः संचिस्कीर्षुः कुमारं **‘ वसन्ते ब्राह्मणमुपनयीत ’** इत्यादिसंस्कारविधायकानि वचांस्युपलेभे । तदनुरोधेनाध्यापक उपनयनेन संस्कारयामास माणवकम् । एवमेवासीत्परिपाटी सर्वसंस्काराणाम् इयं स्थितिः कात्यायनाश्वलायनादिसूत्रकृद्भ्यः प्रागासीत्।ततः परं तैस्तैः सूत्रकृद्भिर्ब्राह्मणभागस्थवेदवाक्यानीतस्ततः पर्यस्तानि बहुशोऽर्थवादघटितानि क्रमशः संगृह्यार्थवादांशं च परित्यज्य ग्रथितानि । अयि विचारचातुरीचतुराः ! इयानेव भेदो

ब्राह्मणेषु सूत्रेषु च। यदर्थवादसाहित्यं प्रायस्तद्राहित्यं च। एतत्तु सूत्रब्राह्मणकृतपरिश्रमाणां नानधिगतचरम्। एवं कात्यायनाश्वलायनादिभिः श्रौतस्मार्तप्रयोगा यथाक्रमं व्यरच्यन्त। तत्र प्रथमं श्रौतप्रयोगाः। अथ च गृह्याः। एतच्च '**उक्तानि वैतानिकानि। गृह्याणि वक्ष्यामः** १।१।१ इति आश्वलायनसूत्रे। '**अथातो गृह्यस्थालीपाकानां कर्म**' इति पारस्करसूत्रे निर्दिश्यते। अयं पारस्करसूत्रोक्तोऽथशब्दः सर्वैरपि भाष्यकृद्भिरानन्तयार्थकत्वेनैवैकमत्येन व्याख्यातस्तेन पूर्वं श्रौतसूत्राणि ततो गृह्याणि। कैश्चिदाचार्यैर्गृह्यं मध्येऽपि सूत्र्यत इत्यन्यदेतत्। किंच श्राद्धकर्माणि '**पिण्डपितृयज्ञवदुपचारः**' तथा '**पिण्डैर्व्याख्यातं**' '**पिण्डपितृयज्ञकल्पेन**' इत्यादि श्रौतातिदेशकथनमप्यत्र मानम्। यदि पूर्वं श्रौतानि नाभविष्यंस्तर्हि तदतिदेशो गृह्येष्वसंगत एवाभविष्यत्। स्वविवाहे स्वसुतस्यापेक्षेति न्यायमनुकुर्याच्च। एवं चाग्निमतः सर्वासां चतुर्दशानां सोमादिसंस्थानामनुष्ठानाय प्रयोगान् विरचय्य गृह्याग्निसाध्यानि कर्माणि संपिपादयिषूणामनुग्रहार्थं करुणावरुणालयैस्तैः कात्यायनादिमहर्षिभिर्गृह्यप्रयोगाः स्वसूत्रेष्वग्रथ्यन्त। तथैव च प्रयोगाः संपादनीयाः। तेनैव साक्षादभ्युदयस्य परम्परया निःश्रेयसस्य चाधिगमः।

अयि कालैतिह्यविदः! । बहुकालपर्यन्तं सूत्रानुसारं संस्कारप्रयोगान् संपादयन्ति स्म विद्वांसस्तत्तद्देशेषु। यत ईदृशी प्रयोगपरिपाटी सूत्रेषु व्यधायि यथा मुख्याःश्रुत्युक्तविधयो न लुप्येरन्। अनपेक्षिताः शोभाभासाश्च न संगृह्येरन्। अहो अनुग्रहः सूत्रकृताम्। परं दूयते स्वान्तमधुनातनसंस्कारप्रयोगान् समालोचयतां विदुषाम्। यतस्तत्र बह्वो मन्त्राः पुराणवाक्यानि शोभाभासाः समाचाराश्च पण्डितैरपि गुणोपसंहार इति शोभननामविलुभितान्तैः संकीर्यन्ते। अयमेतादृशो गुणोपसंहारः श्रौतकर्मसु स्वल्पकलयापि न संमिश्रित इति परमं सौभाग्यास्पदं, कालेयकालेऽपि प्रमोदास्पदं च। एवं गुणोपसंहारः शास्त्रसंमतो नवेति विचार्यते। अयि क्षमाशीलाः! यथा पूर्वमीमांसाव्याख्यानावसरेऽगाधपाण्डित्यैः स्वग्रन्थोदधिनाखिलं भूमण्डलं प्लावयद्भिर्माधवाचार्यैस्तत्तदाधिकरणं सौलभ्यतोऽधिगन्तुं विषयसंशयादिद्योतकं श्लोकजातं व्यराचि तद्वन्मयाल्पमतिना विषयस्य सुलभतो ज्ञानायैव श्लोकद्वयमुपनिबद्धम्। तदेतद् धार्ष्ट्यं क्षन्तुमर्हन्ति तत्रभवन्तो भवन्तः।

---

१ कात्यायनस्यैव पारस्करेत्यपरं नामधेयमिति साम्प्रदायः। किंच पारक्यं करोतीति पारस्करः। कात्यायनेन ऋग्वेदस्य सर्वानुक्रमणिका व्यरचीति षड्गुरुः

स्मार्तानां संग्रहो न्याय्यो नो वा संस्कारकर्मसु ।
स्मृत्यादीनां प्रमाणत्वात्संग्रहः कार्य एव च ॥ १ ॥

चारितार्थ्ये स्वकल्पेन संग्रहो नैव संभवी ।
स्मृत्यादीनां विरुद्धत्वाच्चान्यत्र विनियोगतः ॥ २ ॥

अधिकरणश्लोकार्थः । संस्कारकर्मसु सूत्रोक्ततत्तद्विधौ स्मृतिपुराणादिवाक्यविहिताङ्गानामुपसंहारः कर्तव्यो न वा । गुणोपसंहारो विषयः । कर्तव्यो न वेति संशयः । कर्तव्य इति पूर्वपक्षः । न कर्तव्य इति सिद्धान्तः । स्मृत्यादयः प्रमाणमिति पूर्वपक्षे युक्तिः । तथाहि स्मृतिपुराणवचांसि प्रमाणम् । श्रुत्यनुसारिण स्मृत्यादिवाक्यानां प्रामाण्यमध्वरमीमांसायां भगवता जैमिनिना स्पष्टमुक्तं ‘ विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम् ’ १।३।३ इति सूत्रयता । अन्यैश्च शास्त्रकृद्भिरविवादमनुमतम् । गृह्यासंग्रहेपि

आत्मतन्त्रेषु यन्नोक्तं तत्कुर्यात्पारतन्त्रिकम् ।
विशेषाः खलु सामान्या ये चोक्ता वेदवादिभिः ॥ १ ॥

यन्नाम्नातं स्वशाखायां पारक्यमविरोधि च ।
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत् ॥ २ ॥

अग्निहोत्रादिकं कर्म यथा ऋग्वेदेऽनुक्तमपि तदध्यायिभिर्यजुर्वेदोक्तं गृह्यते तद्वत्सर्वत्रोक्तानां गुणानामुपसंहारः कार्यः । किंचानुक्तमन्यतो ग्राह्यमितिवचो जागर्त्येव सांप्रदायिकानां मुखतो निस्सियमाणम् । **यद्वैकिञ्चमनुरवदत्तद्भेषजमिति** च श्रुतिः। अतस्तदुक्तांगजातं संस्कारकर्मस्वन्तर्भाव्यमेव ।

अधुना गुणोपसंहारो न कर्तव्य इति सिद्धान्ते हेतुचतुष्टयम् । असम्भवात् । स्मृत्यादीनां सूत्रेण सह विरोधात् । स्मृत्यादीनामन्यत्र विनियोगात् । स्मृतिषु प्रयोगशास्त्रत्वाभावाच्च । तथाहि १ **असंभवादिति** प्रथमो हेतुः। गुणानामुपसंहारः सर्वस्मृत्युक्तानां कर्तव्यः केषांचिद्वा? । यदि सर्वस्मृत्युक्तानामिति गृह्येत तर्ह्येकोऽपि संस्कारो दिनत्रयमात्रं कालं तदाधिकं वा व्याप्नुयात् । भवतु कालहापनं तथापि गुणा उपसंह्रियन्त एवेति चेत् तदप्यशक्यम् द्वितीयहेतोः । **तथाहि २ स्मृत्यादीनां सूत्रेण सह विरोधादिति** द्वितीयहेतुः सूत्रविरुद्धा बहवोंऽशाः स्मृतिषु प्रतिपादिताः । तेन विशिष्टगुणोपसंहारार्थे प्रवृत्तानां प्रधानमेव परिहापितं भवेत् । **एवं च सुतमभीप्सन्ती प्रमदा भर्तारमेव नाशयामासेति** न्यायमनुढौकेतैतत्कार्यम् । यतः स्मृत्यादीनां प्रवृत्तिः प्रायः सर्वशाखीयान् पुरस्कृत्य सूत्राणां न

सा तत्तच्छाखयिनामनुग्रहाय । नन्वविरुद्धानामेव सूत्रबहिर्भूतगुणानामुपसंहारोऽविरोधि चेति वाक्यात् । इत्यपि न । यतः संस्काराणामुत्पत्त्यादिविधयः सूत्रेषु यथोपलभ्यन्ते न तथा स्मृतिषु । एवं च सूत्राणि विना केवलस्मृत्यादिभिर्नैकोऽपि संस्कारः सांगतामियात् । अन्यच्च सर्वत्र गुणोपसंहारः कर्तव्य इति चेत्पिण्डपितृयज्ञादौ गणपत्याराधनप्रसंगः । किं च स्मृतयः सूत्रेण विरुध्यन्ते । किंचैवं श्रीमद्राघवेंद्राचार्याणां वैष्णवधुरीणानामपि मतम् तथाहि—पिष्टपशुनिर्णयप्रसङ्गे तैरेवमभ्यधायि । "किंच कल्पसूत्राणां विश्रृंखलशाखाक्रोडीकार—रूपत्वेन स्मृतिभ्यः प्राबल्यात् हिंसायज्ञपरैः कल्पसूत्रैः स्मृतीनां बाध एव युक्तः " इति । अत्रोदाहरणद्वयम् ।

१ '**केशश्मश्रून्वापयते वाऽशिखम्**' इति कातीयसूत्रे सशिखमशिखं वा वपनामिति पक्षद्वयं तत्र प्रथमे पक्षे सशिखवपनात्मकेंऽगीकृते स्मृतिर्विरुध्यते सा चेत्थम् ।

सदोपवीतिना भाव्यं सदा बद्धशिखेन च ।
विशिखो व्युपवीती च यत्करोति न तत्कृतम् ॥ १ ॥

इयं च स्मृतिः शिखाबन्धनं विदधाति । एवं च सूत्रोक्तप्रथमपक्षमनुसृत्य कृतमग्निहोत्रादि कर्म विफलमेव भवेत् । तथा तु कस्याप्यनिष्टम् ।

२ भुक्तवत्स्वनाचान्तेषु पिण्डान्निदध्यात् ॥ ४–८–१२ इत्याश्वलायनसूत्रे ब्राह्मणभोजनानन्तरं पिण्डनिपरणं विधीयते । तथानुष्ठिते मनुस्मृतिर्विरुध्यते । साचेत्थम् ।

पिण्डेभ्यस्त्वल्पिकां मात्रां समादायानुपूर्वशः ।
तेनैव विप्रानासीनान्विधिवत्पूर्वमाशयेत् ॥ १ ॥ म. स्मृ. ३।२१९

इयं च स्मृतिर्भोजनात्पूर्वं पिण्डनिपरणं पिण्डांशेन ब्राह्मणभोजनं च विदधाति। एवमेव भिन्नशाखीयसूत्रस्थगुणानामभ्युपसंहारः कर्तुमशक्यः । विरोधादेव ।

बव्हल्पं वा स्वगृह्योक्तं यस्य यावद्विधीयते ।
तस्य तावति शास्त्रार्थे कृते सर्वं कृतं भवेत् ॥

इति स्मृत्याज्ञाया जागरूकत्वाच्च ।

३ स्मृत्यादीनामन्यत्र विनियोगादिति तृतीयो हेतुः ।

स्मृत्यादयः संस्कारानुष्ठानं विधातुं नैव प्रवृत्ताः। धर्माचरणेन पुरुषः संस्कृतो भवतु तेन च शोभनाचारवता भाव्यं तदर्थं चाचारस्वरूपमेतत्। निपुणतरं नृपेण व्यवहारा द्रष्टव्याः। तदर्थं व्यवहारस्वरूपं तत्प्रकारश्चेत्थम्। संस्कारेतरकर्मण्युत्पन्नपापपरिहारार्थं प्रायश्चित्तानि चेदृशि। एतैरेव विधिभिः स्मृत्यादीनामुपक्षयात्। मध्य एव संस्काराणां कियन्ति चिंदगान्युपवर्णितानि प्रसक्तानुप्रसक्त्या। संस्कारांगानि मुख्यतः सूत्रेष्वेव कथितानि। एवं च यथा गृह्याग्निसाध्यसंस्कारा एव प्राधान्येन सूत्राणां विषयः'**गृह्याणि वक्ष्यामः**'१।१।१ आ.सू. इति प्रतिज्ञानात्। तथाचारव्यवहारप्रायश्चित्तादिविधानाय पुरुषार्थमेव प्रवृत्ताः स्मृतयः। '**वर्णाश्रमेतराणां नो ब्रूहि धर्मानशेषतः**' इति प्रार्थनानन्तरं प्रवृत्तत्वात्। पुरुषार्थार्थैः कर्मभिः संस्कृतो भवति क्रत्वर्थानुष्ठानाधिकारीत्यन्यदेतत्।

४ प्रयोगशास्त्रत्वाभावाच्चेति चतुर्थो हेतुः।

सूत्राणामेव प्रयोगशास्त्रत्वमध्वरमीमांसायां स्वीक्रियते नान्येषाम्। तथाहि–

'**प्रयोगशास्त्रमिति चेन्नासन्नियमात्**' १।३।११ इति सूत्रयामास भगवाञ्जैमिनिः। एतत्सूत्रस्थप्रयोगशास्त्रमिति पदमेवं व्याख्यायते श्रीवासुदेवाध्वरीन्द्रैः कुतूहलवृत्तौ। प्रयोगस्य क्रत्वनुष्ठानस्य बोधकं शास्त्रं प्रयोगशास्त्रं बोधायनापस्तम्बादिकल्पसूत्रजालम्।

किंचाध्वरमीमांसायां गुणोपसंहारस्यानित्यत्वं प्रतिपादितं तथाहि–' एकत्वेऽपि पराणि '२।४।२१ इति जैमिनीयसूत्रे कुतूहलवृत्तौ–सत्यामपि शक्तौ शाखान्तरगतविधीनामुपसंहार ऐच्छिक एव। न त्वावश्यकः। शाखान्तराध्ययनानित्यत्वस्य प्रतिपादितत्वात्। क्वचिच्छाखासु तेषामनाम्नानबलाच्च। अन्यथाङ्गान्तरविधीनामिवाधिकविधीनामपि सर्वशाखास्वाम्नानापत्तेः। अतो यथा श्रौतप्रयोगाणां गुणोपसंहारमन्तरेणैवानुष्ठानं तथैव गृह्याणामप्यस्तु। अन्यथार्धजरतीयप्रसक्तिः। ननु ' आत्मतन्त्रेषु यन्नोक्तं ' इत्यादि वाक्यानां का गतिरिति चेदत्र ब्रूमहे। ये च पदार्थाः स्वसूत्रेषु प्रतिपादितास्तेषां लक्षणं च तत्र नोक्तं तदन्यस्मात्सूत्रात्स्मृतेर्वा ग्राह्यम्। तत्र यावच्छक्यं प्रथमतः श्रुतेस्ततः श्रौतसूत्रात् ततः सूत्रान्तरात् ततश्च स्मृत्यादिभ्यः। यथा ग्रन्थलापने कोशप्रामाण्यम्। एवं संकोचे किं मानमिति चेत्सैव स्मृतिः। यतस्तत्र ' अग्निहोत्रादिकर्मवत् ' इति दृष्टान्तो गृहीतः। तदर्थश्चायं–परशाखोक्तमाग्निहोत्रं बह्वृचैर्ग्राह्यम्। तच्चाधानाग्निसाध्यम्। आधानं च पारशाखिकम्। आधानाद्विना तत्साध्यानि तच्छाखाविहितानि कर्माणि न संभवेयुः।

प्रसंगान्निबन्धस्थविप्रतिपत्तीः प्रदर्शयामः।

१ अघमर्षणमेके नेच्छान्ति । मार्जनेनैव तस्य व्यपोह इति परिशिष्टात् इति दिवाकरभट्टयाम् । एके नेच्छन्तीत्येतेनापर इच्छन्तीति सिद्धम् ।

२ केचिद्वस्त्रोपसंहरणं गायत्रीसन्ध्यातर्पणं चेच्छन्ति । तज्जयन्तस्मृत्यर्थसारादि-स्मृतिष्वान्हिकेषु चालिखितत्वान्नावश्यकमिति गृह्यविदः ।

३ अत्र न्यासादिविधिविशेषोऽवैदिक इति प्रयोगपारिजातः । तथाच न्यासा-दितंत्रमृग्विधाने स्मृत्यर्थसारादौ च नैव दृश्यते। अन्यत्र तु ' एता मुद्रा न जानाति गायत्री निष्फला भवेत् ' इति निषेधवचनान्यपि गायत्रीपुरश्चरणपराणीत्यव-गन्तव्यम् ।

४ एषोंऽगन्यास एतमेके नेच्छन्ति । स हि विधिरवैदिक इति गृह्यपरि-शिष्टाच्च ।

५ उपस्थानं त्वाश्वलायनस्मृतावन्यत् । शौनकीये त्वन्यत् । परिशिष्टेऽपीतरत्। वैश्वदेवान्ते देवपूजां कुर्यादिति बहवः । आदौ वैश्वदेवस्ततो देवपूजेति युक्तमि-त्याचारदीपे कमलाकरः । तथा माधवीयेऽप्यर्चनात्प्रागेव वैश्वदेवक्रिया ।

७ पितृतर्पणे रूपं वक्तव्यमिति प्रयोगपारिजाते नेति हेमाद्रिः ।

एवं विप्रतिपत्तितमोजलधिमग्ननिबन्धानुसरणाद्वरं स्वशाखासूत्रानुसरणम् ।

एवं चैतावता सिद्धं यत्संस्कारादिसूत्रोक्तकर्मसु सूत्रमेव प्रमाणम् । परं त्वधुना गुणोपसंहारग्रहग्रहिलतया प्रयोगरत्नप्रभृतिप्रयोगपद्धतयो निरमीयन्त । यत्र च शिष्टाचारं पुरस्कृत्य सुलभतयानुष्ठानसिद्धये सूत्रविरुद्धमपि समग्राहि । यथा—प्रयोगरत्ने—' इदानीन्तनशिष्टानुसारिसंकल्पिकनान्दीश्राद्धप्रयोगः । धर्माब्धौ—ग्रहप्रवेशनीयहोमप्रसंगे ' शिष्टास्तु श्वशुरगृह एव कुर्वन्ति '। इत्यादिशिष्टाचारास्त्वसंगता एवाचार्यैरसूत्रितत्वात् । विरुद्धत्वाच्च । इदानीन्तनविशेषणविशिष्टाः शिष्टा यदि शिष्टत्वमाप्नुयुस्तर्हि शिष्टत्वस्यानवस्थापातः । मनुव्यासप्रभृतीनामेव शिष्टत्वं भग-वत्पूज्यपादश्रीशंकराचार्यादिभिरभ्युपेयते । ' विवाहश्मशानयोर्ग्रामं प्रविशतात् ' इति पारस्करसूत्रोक्तश्रुत्या यद्यपि कुलाचारवृद्धस्त्रीणां विवाहश्मशानयोः प्रामाण्यं तथा च ' यथाकुलधर्मं केशवेशान् कारयेत् ' इत्याश्वलायनसूत्रोक्त्या चौलकर्मणि कुलाचारप्रामाण्यं च तथापि तत् सूत्रोक्तप्रयोगाविरुद्धत्वे सति ज्ञेयम्। कुलाचारानु-सरणाभावे प्रत्यवायाभावश्चापि । यद्यपि नारायणपद्माकरप्रभृतयः प्रयोगपद्धतिकृतो मान्यास्तथापि तैः केवलसूत्रानुसारी नैकोऽपि प्रयोगो निरमायि । बहुधा संकरः कृतः । एवं च तत्तद्देशेषु बहुधा स्वीकृतो ग्रन्थसमुच्चयः । एतेन प्रयोगशास्त्र-

विहितं कर्म न भवति, पद्धत्यनुसारि कर्म तु युक्तिपथातीतमिति बहुधा प्रपंचितम्। अतः केवलसूत्रानुसारिपद्धत्यभावात्सूत्रविहितप्रयोगमनुष्ठातुकामानामेव कृतेऽयं ग्रन्थो निरमायि । अत्र च यायातथ्येन कल्पसूत्रप्रमुखाधिकरणानि संगृह्य प्रत्यपादि प्रकरण-पंचकमुपोद्घातरूपम् । ततः प्रतिसंस्कारं सूत्रनिर्देशप्रयोगमन्त्रभाष्याणि प्रदर्श्य मीमांसितमप्यल्पमतिना मया । अयि भूमण्डलमण्डनायमानपण्डिताखण्डलाः ! यन्मया प्रयतितं तत्र मानुषशेमुषीसुलभावकाशा दोषाः संभवेयुरेव तथापि यथा-सूत्रं संस्कारान् मीमांसितुं प्रवृत्त इति क्षन्तव्यं श्रीमद्भिः स्वशेमुषीगोचरं स्ख-लितं ज्ञापयद्भिः । प्रियमहाशयाः? ग्रन्थस्यास्यप्रणयने यदेतदतिमात्रमेव सूत्रार्थ-प्रतिपादनप्रयोगप्रदर्शनपुरःसरं साहाय्यमन्वष्ठायि तत्रभवद्भिर्न्याय—व्याकरण—श्रौतगृह्यसूत्रतद्भाष्यादिविविधदर्शनपर्यालोडननिशातधिषणैरमरावतीनगरवास्तव्यैःप्र-थितपण्डितप्रकाण्डैर्मराठे इत्युपाह्वैः श्रीवामनशास्त्रिभिः तमेनममीषामुपकार-भरं नाहमाजीवितं विस्मरिष्यामि समुपहरामि च तेभ्यो भूयसो धन्यवादान् । तथा-स्य पुस्तकस्य प्राथितिविषये विदर्भदेशालंकरणभूतैर्वाजमाध्यन्दिनशाखीयकर्मानु-ष्ठाननिष्ठागरिष्ठैः खापर्डेकुलकमलदिवाकरैः श्रीकृष्णतनूजनुर्भिर्गणेशमहोदयैर्विविधं साहाय्यमाचरितमतस्तेषामनुग्रहसंमाननं विना प्रास्ताविकावसानमेवानर्हमिति मन्ये । किंच यैरिदं पुस्तकमालोच्य स्वसंमत्यादिप्रदर्शनं व्यधायि तदनुग्रहभराक्रान्तोऽहमि-त्यपि सविनयं विज्ञापयति

विद्वद्वशंवदः
किंजवडेकरोपाह्वो वामनशास्त्री ।

॥ संस्कारमीमांसा ॥

स्वस्ति नो दिवो अग्ने पृथिव्या विश्वायुर्धेहि यजथाय देव ॥
सचेमहि तव दस्म प्रकेतैरुरुष्या ण उरुभिर्देव शंसैः ॥

ऋ० १० मं० १ अ० ७ सू० १ ऋक्

मां प्रावेशयदन्तर्भाषाकोषं मनाक्समुद्धाट्य ।
पणशीकरं तमादौ दत्तात्रेयं नतोऽस्मि बाल्यगुरुम् ॥१॥
निगुडकरोपाह्वयश्रीगुरुदत्तात्रेयचरणकामदुहाम् ॥
वन्दे भाषाशास्त्रस्तन्यं याऽदापयत्कृपालुतया ॥२॥
मीमांसाख्यसुरद्रुमस्य महतश्चाभ्रंलिहो यत्फलं
ज्ञानाख्यं ह्यतिदूरलंव्यथ धिया यो वामनस्तेन यत् ॥
दुष्प्रापं त्वपि तन्महाशयतया यैः प्रापितं मत्करे
तान्वन्देऽविरतं गुरूनिह विरूपाक्षाह्वयान् वामनः ॥३॥

॥ सद्यः स्थितिः ॥ १ ॥

विदितं स्यादेव तत्रभवद्भिः कलिकालोऽयमिति। को नाम स्वीयत्वेनाभिमते काले स्वमाहात्म्यं न प्रख्यापयेत्। तन्माहात्म्येऽस्मिन्दुर्गमे पथि संचरितुं न प्रभवाम इति नापन्होतुं शक्यमिति सत्यं, तथापि तदेव मनुष्याणां मनुष्यत्वं यद्दुर्गमोऽपि पन्थाः सुगमः करणीय इति ॥ सुप्रसिद्धतमं चैतन्नः समेषां यदासुरी संपात्तिरस्मान् मोहं गमयतीति। न खल्विदानीमस्मदीयैषावस्था प्रयत्नं विना सुफला स्यादित्याशास्महे। अविछिन्नपरम्पराप्रातं, मुनिभिर्ग्रथितं, आचार्यैः परिष्कृतं, शिष्टैः परिगृहीतमिमं धर्मं परिरक्षितुं, वस्वसुशरीरादीनां व्ययो भूयान् भवतीति प्रत्यक्षमेव न तत्र वृत्तपत्रिकापेक्षा। तथाप्यन्यस्मिँल्लौकिकराष्ट्रीयवैयक्तिकवृत्तपरिज्ञानायास्माभिरपेक्ष्यते वृत्तपत्रिकेत्यन्यदेतत्। भवितव्यं चास्माभिरपि यया कया वा परिपाट्या कल्यनुसारिभिः। अनुसृते च तस्मिन्न खल्वस्मान् स परित्यजेत्। अहो! न वयमिदानीं कलया कलावन्तः, विद्यया विद्यावन्तः, श्रिया श्रीमन्तः, आचारेणाचारवन्तः, अपि त्वनुसृत एव कलिरस्माभिः। का खल्वत्रास्माकमनुकूलता न तावद्दशरथधर्मराज–विक्रमादित्य–भोजसदृशा राजानः। नापि भगवत्पादसदृशा आचार्याः। नाप्यन्यत्किमपि यदस्मान् दैवीसंपत्तिं प्रापयेत्। इतः परमपि चिन्तनीयोऽयं कालमहिमा विचारिभिः सुधीभिः। न खलु यत्र क्वापि गैर्वाण्या विरचितो मीमांसा-

घटितो ग्रन्थो धर्मब्रह्मविचारविषयकः समुपलभ्यते। माहाराष्ट्र्यां तु ग्रन्थप्रतिपादनशैली पण्डितवामनादारभ्य प्रागपि ततोऽपि बहुभिरङ्गीकृता तैरपि वेदान्तज्ञानभक्तिकर्मकाण्डप्रभृतिसमुच्चयः प्रत्यपादि स्वग्रन्थे। न खल्वतिशुद्धं वैदिकमार्गानुसारि कर्मकाण्डं कुमारिलभट्टादितः केनापि नोपपादि, " विद्यां चाविद्यां चे " त्यादिनाप्युपासनाकर्मकाण्डयोः समुच्चय एवोपोद्बलितः। अयि भागधेयमस्माकं यत्किल पाश्चात्यैः सहाभिनवपरिपाट्या व्युद्य, आर्यधर्मस्यैव प्राचीनत्वं महाशयैः प्रत्यपादि। कः खल्वत्र विवदेत। नान्तरीयकतया व्यवहारे यया कया वा परिपाट्या स्थीयतेऽस्माभिः, प्रपंचार्थे यद्वा क्रियते, ज्ञानसम्पादनार्थं देशान्तरं वा गम्यते, ऐहिकसुखोपभोगार्थं यथेष्टं पदार्थाः संपाद्यन्ते, किं बहुनोक्तेन यदशक्यमयोग्यं तदपि क्रियते॥

अस्यामेवान्तरायबहुलायां स्थितौ का नु कथा वैदिककर्मणाम्। द्वैविध्यं हि कर्मणां सामान्यतः प्रतिपादयन्त्याम्नायविदः। श्रौतं स्मार्तं चेति काठिन्यमप्येतेषामनुष्ठानायेति प्रवदन्ति मनीषिणः।

" नो शक्यं स्मार्तकर्म प्रतिपदगहनप्रत्यवायाकुलाढ्यं।
श्रौते वार्ता कथं मे द्विजकुलविहिते ब्रह्ममार्गे सुसारे॥ "

अनुतिष्ठासया प्रवर्तितः स्वात्मा चेत् विक्षिप्तानि किलैतानि भूयःसु प्रदेशेषु। अथ वेदमपि संभवेत्। यदा किल वेदः कर्माणि विधत्ते ततः प्रभृत्यविच्छिन्नपरम्पराप्राप्तेयमाघातपरम्परा वैदिककर्मस्विति नूनम्। प्रथमतस्तावद्बौद्धानां मते नास्त्येव कश्चन स्थिरः कर्मणां भोक्तेति। ततश्चार्वाकविवसनप्रभृतयो नास्त्येव परलोकादीति प्रतिपन्नाः। यावदेतानि मतान्तराणि निरस्य सर्वे समीकुर्वन्ति भट्टपादास्तावदौपनिषदुदयः। तत्रापि दशरथादिवत्स्थितानि कर्माण्याविर्भवन्ति तावद्यावनोदयः। तत्रापि स्थितानां प्रादुर्भावप्रसङ्गे भक्त्युदयः। तत्रापि यथाकथंचित्स्थितानामाविर्भावसमये पाश्चात्यराष्ट्रीयसुखायमानवैभवं पुरो वरीवर्तीति सर्वजनीनम्। कृतत्रेतादिष्वप्येतादृश एवासुरः समयः। अत एव निनाय मखसंरक्षणाय रामलक्ष्मणौ भगवान् कौशिक इति गीयते कुशीलवाभ्यां रामायणे। स्मर्यते चायमर्थः प्रामाणिक इत्यपि शिष्टैः। इत्थं वैदिककर्मविप्रतिपत्तिस्तत्र तत्र श्रूयमाणा न शक्यते नास्तीति वदितुम्। एतदेवाभिप्रेत्य श्रौतस्मार्तकर्मानुष्ठानजन्यापूर्वपूर्वकं प्रारब्धकर्मेति विज्ञायाहुरभियुक्तशिखामणयः " गहना कर्मणो गति " रिति। यथा वा संकटबहुले काले प्रसूतं बालं वदतः पितरौ का न्वस्य बालस्य गतिरिति॥ अतोऽत्र कर्मानुष्ठानज्ञानकाठिन्यमवगत्येतः सुलभमार्गान्वेषीतस्ततोऽटाट्यमानेन मयाधिगता वेदान्तिनः। ते च सर्वे स्ववृत्तमूचुः॥

इह खलु निसर्गत एव प्राणिमात्रमिष्टमभिलाषुकमनिष्टं व्युदसिसिषु च भवतीतीष्टानिष्टप्राप्तिपरिहारोपायप्रकाशनैदम्पर्येण भगवानाम्नायश्चातुर्वर्ण्यचातुराश्रम्य-

प्रभृतिविभागप्रविभागभक्तान्यभ्युदयसाधनानि समष्टिव्यष्टिफलानि नानाविधानि विदधदभिदधौ निःश्रेयससाधनमपुनर्बोधं प्रत्यगात्मपरमात्मयाथात्म्यावबोधं प्रविरलेभ्योऽपि धीरधौरेयेभ्यः। क्रिया हि नाम विकल्पनास्पदं भवति न तु वस्त्वित्येकरूपमप्यात्मयाथात्म्यमतिलौकिकतया च परमतमगहनमूर्तितया च पुरुषबुद्धिवैविध्याच्च, भगवल्लीलावैभवमियत्तया चेदत्तया च दुष्परिच्छेदमापेदे परःशतरूपताम्। तथाहि—आत्मनः कर्तृत्वभोक्तृत्वादिकमातिष्ठन्ते तार्किकाः। भोक्तृत्वमेव तस्य न परं कर्तृत्वमपीति संगिरन्ते कपिलकमलासनाद्यनुगामिनः। आसतां तावत्परेषां कथाः। औपनिषदा एव परस्परविलक्षणनानाविधसिद्धान्तेषु समासते समर्पितसमादराः। अर्वाञ्चस्तु स्वरूपत एव जगदभावं वदन्तो मिथ्यैवेदं दरीदृश्यमानं विश्वमिति प्रतिपन्नाः, ज्ञानादेव मोक्षः, अभावश्च ज्ञानोत्तरं कर्मणः। ज्ञानादेव तु मोक्षः, अनुपयोगश्च किल कर्मणां मोक्षाय। अतः सुलभानुष्ठानानि वा भवन्तु कर्माणि कठिनानुष्ठानानि वा। न तेष्वस्माकमादरः। अतो भवद्भिरपि न प्रवेष्टव्यं कर्मस्विति प्रतिजानीमः। आहुश्च भगवत्पादा अपि, "न ब्राह्मणोऽहं न चे" त्यादिना सुलभमेव पन्थानं, स एवास्माकं गरीयान्। क्रियतामुदरभरणाय यद्वा नो नो हानिः। समाश्रयणीयश्चायं पन्थाः कर्मानुष्ठानाचिन्तां त्यक्त्वेत्येतावद्वयं ब्रूमः। इति यावच्छ्रूयते

जिगमिषामि च तमेव पन्थानं तावत्समागताः केऽपि मालां गृहीत्वा दासबोध—भागवत—गुरुचरित्रादि सम्यगनधीत्य रामरामेति, दत्तदत्तेति, विठ्ठलेति प्रवदन्तः। उद्घोषयामासुश्च, अयि तिष्ठ समाश्वसिहि, मा तावद्गच्छतु तत्र भवान् वेदान्तमार्गं, अस्मदीय एव पन्थास्त्वयानुसर्तव्यः। को नामेमानि कठिनानि कर्माणि गोमयपिण्डान् गृहीत्वाऽग्निहोत्रादिन्यनुतिष्ठासेत्, अतिगंभीरार्थानि स्वरसहितानि, गुरुपरतन्त्राणि वेदाक्षराण्यधीयीत, यज्ञे पशुं विशसेत्, यज्ञादेव जगदुत्पत्तिरिति विश्वसेत्। यथाकालं संध्याद्यनुतिष्ठेत्, अतएव नामग्रहमात्रेणैव मोक्ष इति सुलभम्॥

यावच्चानुसरामि तांस्तावदेवागत्योचुः पुरोधसः। अयि महाभाग, अधीतवेदवेदाङ्ग किमपि नाज्ञासीस्त्वं यतः किमपि नास्ति मदधीनामिति भगवानेव प्राह " नादत्ते कस्ये"ति अतः किं तन्नामग्रहेण, यद्वा कुर्मः क्रियातन्त्रा वयमिति। इत्थं च बह्व्यां चर्चायां किमपि नाज्ञासिषम्? उक्तास्ते, अयि पुरोधसः! ब्रूत कास्ताः क्रियाः, कथं वानुष्ठातव्याः कथयत सर्वं, आहुश्च ते केचन सांप्रदायिकोऽयमस्माकं व्यवसायो, यद्वेदाध्ययनमध्यापनं च। न तत्रार्थज्ञानेऽस्माकमाग्रहः। अपि ये शास्त्रमधीयते त एव खल्वार्थिका भवितुमीशते। न वयं प्रष्टव्यास्तद्विषये। अयि भोः प्रथमं तावद्वेदाक्षरोच्चारणं गुरुमुखाद्गृहीत्वा ततः शास्त्राध्ययनमिति हि सुप्रसिद्धमत इयं प्रथमसोपानिकेति विभावनीयम्। अयि, अप्यत्र विद्यते शास्त्रशाला। ओम्। शास्त्रिणः? अपि किमियं शास्त्रशाला? एवम्। किमत्रेदानीं शास्त्रमध्याप्यते?

व्याकरणम्। अपि त्वेतच्छास्त्रम् ? " अथ शब्दानुशासम् " इति पातञ्जले भाषितत्वात् भवतीदं शास्त्रम्। सत्यमेतत्परं भट्टपादैस्तु श्लोकवार्तिके।

प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा।
पुंसां येनोपदिश्येते तच्छास्त्रमभिधीयते॥

इत्युक्तत्वात् मीमांसयोरेव शास्त्रशब्दो वाचकः। 'पाणिनीयं च काणादं सर्वशास्त्रोपकारकम्' अनयाऽभियुक्तोक्त्योपकारकत्वमेव व्याकरणस्य न तु शास्त्रत्वमपि युक्तमेतत् परमन्यदप्यध्यवसेयम्। उत्तरतन्त्रे " शास्त्रयोनित्वात् " इति (ब्र० सू० १।१।३।) सूत्रभाष्ये शास्त्रशब्दो वेदवाचकस्तेन मीमांसादिष्वपि गौण एव शास्त्रशब्दः। प्रवृत्तिर्वेति लक्षणमपि वेद एव विधिनिषेधरूपे वाक्ये घटते। महानानन्दः समजनि व्याकरणादन्यदप्यत्र किंचिद्विचार्यत इति। परमत्र चेखिद्यते मे स्वान्तं, अयि महाशया नात्र यत्र क्वापि मैमांसिकी शाला साक्षात्कृता। सत्यमेतदस्माकमपि नोपलभ्यते यद्युपलभ्येत स्याम वयमवश्यं पिपठिषवः। परं भाग्यन्यूना वयम्। अन्येऽप्यूचुः कर्माणि यथा कथंवा भवन्तु वयं अनुतिष्ठाम एव न सर्वथा परित्यजामः। किं कुर्मः 'अकरणान्मन्दकरणं श्रेय' इति न्यायेन यद्यपि नास्माकं याथार्थ्येन कश्चनोपदेष्टोपलब्धस्तथापि प्रयोगरत्नप्रमुखान् ग्रन्थानवलोक्य यथामति यावच्छक्यमनुतिष्ठाम एव कर्मजातम्। यदत्र स्यान्न्यूनाधिक्यं तज्ज्ञापनीयं तज्ज्ञैरिति नामं नामं भूयो भूयो विज्ञापयामः॥

अपरे त्वेवमाहुः—कलिकालमलिमानमुररीकृत्यैव सर्वे व्याचख्युस्तदेवं, अयि महाभागाः। किमेतदाश्चर्यकरं, अनधीत्यापि, अर्थमज्ञात्वापि कर्माणि कुर्महे, कारयामोऽप्यहो खल्वयमुपकारकारी कलिः। यत्खलु किमपि कृतं कर्म यथाकथंचिदनुष्ठितमपि न पृच्छन्त्यस्मान् गृहस्था यजमानाः। अहो इति पुनः पुनरुच्चार्य प्रलपन्त एव आसते भोजनोत्तरम्। किमर्थं यजमानः कर्मकथां ब्रूयात् ? पर्णपुटकादिकार्यजातं यावच्छक्यं वयमेव तत्र कुर्मः। तदेव नः प्रियम्। तैः पृष्टं चेत् शास्त्राध्ययनप्रसङ्गः, विचार्यैवानुष्ठानप्रसङ्ग आपतेदतो न पृच्छन्तीतीष्टमेव। मा भूदेवाध्ययनाध्यापनादिकथा, तद्विनापि यथेच्छं द्रव्यं संपाद्यत एवास्माभिः। न च व्ययोऽपि तस्य विशेषतः। नांग्लाध्येतृसहायकरणं यत्किंचिदप्यस्मदधीनं, वेदशास्त्राध्येतॄणामपि कुर्वन्ति त एव सहायम्। तैः करणीयमेवेति प्रतिपादितं चेदलमस्माभिः। किं बहुना शालाया व्यवस्था परीक्षाकरणमित्यादि तैरेव करणीयमिति प्रतिज्ञया संस्थापयामः। यर्हि स्यात्कश्चन प्रतिरोद्धा यजमानोऽस्मांस्तर्हि वयं यतामहे स्वाभ्युदयाय। यावच्चास्माकं शौकज्ञानमिवानुष्ठानोपयोगिज्ञानं ग्रथितञ्च कैरपि शब्दैः प्रयोगकृद्भिर्नारायणभट्टप्रभृतिभिः। उपकृतं खल्वस्माकं तेन, भो भो आकर्णयत, अन्यदप्यलंकारास्पदं कृतं कलिना यदधीतशास्त्रैरपि नावलोक्यतेऽ-

स्मन्निकटे तद्गृहेऽपीत्थमेवानुष्ठीयन्तेऽस्माभिः कर्माणि परं न पृच्छन्ति, अतो विग्रहे संमतं चैतेषामिति । इत्थं परस्परभाषणोत्सुकानवलोक्य श्रावं श्रावं तदीयमालापं स्मारं स्मारं मुनिचारित्र्यं, शोधं शोधमार्षेयविचारं वस्तुतत्त्वान्वेष्यभूवम् । पृष्टाश्च कर्मानुष्ठातारः सम्यक्, अहो किं नाम प्रामाण्येनाभिमतो भवतां ग्रन्थः, यमालंब्य प्रचालयन्ति तत्रभवन्तोऽनुष्ठानम् । कानि च कर्माणि, कया परिपाट्याऽनुष्ठीयन्त इति किंचिज्जिज्ञासास्पदमस्तीति मत्वा पृच्छामि मा भूत् क्रोधावसरः ॥

॥ सद्यःस्थितेः प्रमाणानि ॥२॥

सर्वप्रमाणमूर्धन्यं कलिकालः । अन्यच्चेमे तावदस्माभिरिदानीं परिपाल्यन्ते ग्रन्थाः । तदनुसारमनुतिष्ठामः धर्मसिंधुः, प्रयोगरत्नं, माहेश्वरी, नारासिंही, आभरणं, मन्वादिस्मृतयः, गादाधरी, ब्रह्मकर्म, आन्हिकचद्रिका, प्रासङ्गिकाश्चान्येऽपि, निर्णयसिन्धुः, पुरुषार्थचिन्तामणिः, प्रयोगपारिजातः, स्मृतिकौस्तुभप्रभृतयः । एत एवास्माकं प्रमाणभूता ग्रन्थाः । कर्मप्रक्रिया चेत्थम् । पुंसवनादि-ओपनयं संस्कार-जातं न कुर्मः प्रायः । अथवा माभूत्प्रायो, न कुर्म एव । कुत इति चेत्, आह च प्रयोगरत्ने मनुश्चूडाकर्मप्रस्तावे ।

" जातकर्मादिसंस्काराः स्वकाले न भवन्ति चेत् ॥
चौलादर्वाक् प्रकुर्वीत प्रायश्चित्तादनन्तरम् ॥१॥

अन्ये त्वेवमाहुः । कृते प्रायश्चित्ते न कर्मकरणाकाङ्क्षेति न कुर्मः ।

" प्रायश्चित्ते कृते पश्चादतीतमपि कर्म वै ॥
कार्यमित्येक आचार्या नेत्यन्ये तु विपश्चितः ॥२॥

इति तत्रैव प्रयोगरत्ने । गर्भाधानसंस्कारं चावश्यं सूत्रेऽनुक्तमपि कुर्महे । अस्मदीय-प्रमाणग्रन्थे विहितत्वात् तद्यथा—

" गर्भाधानस्याकरणात्तस्यां जातस्तु दुष्यति ॥
अकृत्वा गां द्विजे दत्वा कुर्यात्पुंसवनं पतिः ॥३॥

इति प्रयोगरत्ने गर्भाधानप्रयोगसमाप्तौ धर्माब्धावपि " गर्भाधानलोपे तत्प्रायश्चित्तार्थं विप्राय गां दत्वा पुंसवनादि कार्यं " इति । वैश्वदेवं तन्त्रेणैव कथाकथंचित्तण्डुलादिभिः समापयामस्तत्र मानं धर्माब्धौ

" प्रातर्वैश्वदेवं सायं वैश्वदेवं च सह तन्त्रेण करिष्य " इति । मधुपर्के भोज-नादि न दीयते तत्र मानं प्रयोगरत्ने तदनुक्तिः । धर्माब्धौ तु भोजनार्थं माषविकारो-पहारो देय इत्युक्तं तदपि न कुर्मः संध्यादौ मार्जनाद्यावश्यकतां संसाध्य तदेवा-नुष्ठायार्घ्याद्यनुष्ठानं न कुर्मः, प्रसङ्गे त्रीण्याचमनान्येवालमित्यपि साधयामः ।

उक्तश्चायमाचमनमारभ्य सर्वः कलापो धर्माब्धौ । विवाहे गृहप्रवेशनीयहोमं वधूगृह एव कुर्मः कारयामश्च तथा " अयं च गृह्यकृता प्रयाणविधेरनन्तरमुक्तत्वात्, समाख्यावशाच्च स्वगृह एव गत्वा कर्तव्य इति मुख्यः कल्पः, शिष्टास्तु श्वशुरगृह एव कुर्वन्ति, अत्र यथाचारं व्यवस्था, पारिजातेऽप्येवमितीति प्रयोगरत्ने विवाहप्रयोगे । धर्माब्धावपि, गृहप्रवेशनीयहोमः—"वध्वा सह गृहं गतस्य विहितस्तथापि शिष्टाः श्वशुरगृह एव कुर्वन्ति " महेश्वरीया अप्येवमेवाचरन्ति । वधूवस्त्रदानं प्रथमदिने एव कुर्मस्तत्र मानमभावात्मकम् । उपाकर्मोत्सर्जन एकस्मिन्दिने एव कुर्मस्तत्र मानं धर्माब्धिः " उत्सर्जनकालस्तु नेह प्रपंच्यते, उपाकर्मदिनेऽथवेति वचनानुसारेण सर्वशिष्टानामिदानीमुपाकर्मदिन एवोत्सर्जनकर्मानुष्ठानाचारेणैतन्निर्णयस्यानुपयोगात्" इति

श्रावण्यां यज्ञोपवीतहवनधारणादि कुर्मस्तत्र मानमभियुक्तोक्तिः " हुत्वा दत्वा च धारयेदिति " ब्रह्मकर्मणि श्रावणीप्रयोगे । सांवत्सरिके श्राद्धे दैवब्राह्मणभोजनं कुर्मस्तत्र मानं मनुस्मृतिः ॥ " द्वौ दैवे पितृकृत्ये त्रीनेकैकमुभयत्र वा" ॥ ३।१२५

इत्येतानि निदर्शनायोपन्यस्तानि, परमपीतः प्रमाणमनुसंधेयं प्रयोगरत्नं तावत्प्रधानतममिति निर्विवादमस्माकम् । अन्यच्च विवाहादौ यो यो विशेषोऽस्माभिः क्रियते सर्वोऽपि स सप्रमाण एव । आह च भगवानाश्वलायनः । आ० गृ० १।७।१

" अथ खलूच्चावचा जनपदधर्मा ग्रामधर्माश्च तान् विवाहे प्रतीयात् " " विवाहस्मशानयोर्ग्रामः प्रमाणं " इति च पा० गृ० सू० भाष्ये। " ब्राह्मण्यश्च वृद्धा जीवपत्यो जीवप्रजा यद्यदुपदिशेयुस्तत्तत्कुर्युः " आ० गृ० १।४।८। ' अनुक्तमन्यतो ग्राह्यं ' इति च जागर्त्येव वचनम् । गृह्यासंग्रहेऽपि गोभिलगृहभाष्ये २ प्र०

आत्मतन्त्रेषु यन्नोक्तं तत्कुर्यात्पारतन्त्रिकम् ॥
विशेषाः खलु सामान्या ये चोक्ता वेदवादिभिः ॥१॥

यन्नाम्नातं स्वशाखायां परोक्तमविरोधि च ॥
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत् ॥२॥

सोमनाथीयेऽपि—अनेनैव विरुद्धानां विकल्पोऽविरुद्धानां तु भिन्नशाखागतानामपि समुच्चय इति प्रयोजनमपि सूचितं शा. दी. २।४।२ इतिहासपुराणेषु पठितानामङ्गानां वैयर्थ्याच्च, पूर्वेषां निबन्धग्रन्थग्रथयितॄणामपि स्याद्वैयर्थ्यमिति महाननर्थः। शिष्टत्वसंपादनार्थं च, यथा ये श्वशुरगृहे गृहप्रवेशनीयं द्रव्यं होष्यन्ति त एव शिष्टा इति ।

यत्र तु सूत्रे विकल्पा उक्तास्तत्र सर्वत्र प्रथमकल्प एवांगीकार्य इत्यपि

नूनम् । संमतं चैतन्मन्वादीनाम् । आचेरुश्च तथा पूर्वे, सौत्राः प्रदर्श्यन्ते विकल्पाः । आश्वलायनगृह्यस्था एते ।

द्वादशवर्षाणि वेदब्रह्मचर्यं ग्रहणान्तं वा १।२२।३४ भवान् भिक्षां ददात्विति, अनुप्रवचनीयमिति वा ॥ १।२२।८ न सर्वं प्राश्नीयात्सर्वं वा ॥ १।२४।१७–२०

विद्यान्ते गुरुमर्थेन निमन्त्र्य कृत्वानुज्ञातस्य वा स्नानं ॥ ३.८।४ अग्न आयूंषि पवस इति तिसृभिः प्रजापते न त्वदेतान्यन्य इति च व्याहृतिभिर्वा ॥ १।४.४

दध्नः प्राश्य प्रतिप्रयच्छेदाज्यशेषेण वानक्ति हृदये ॥ १।८।९

कृताकृतमाज्यहोमेषु परिस्तरणम् ॥ १।३।४

तथाज्यभागौ (कृताकृतौ) पाकयज्ञेषु ॥ १।३।५

पाणिग्रहणादिगृह्यं परिचरेत्स्वयं पत्न्यपि वा पुत्रः कुमार्यन्तेवासी वा ॥ १।९।१

अत ऊर्ध्वं त्रिरात्रं, द्वादशरात्रं, संवत्सरं वा, ॥ १।८।११–१२

अष्टमे वर्षे ब्राह्मणमुपनयेद्गर्भाष्टमे वा ॥ १।१९।१।२

तेषां दण्डाः पालाश इत्युपक्रम्य सर्वे वा सर्वेषाम् ॥ १।१९

इत्यादि बहवो वर्तन्ते विस्तरभियोपरम्यते । अत्र प्रथमकल्प एवास्माभिरङ्गीक्रियते न द्वितीयः । आह च मनुः ॥ ११।३०

प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते ।
स नाप्नोति फलं तस्य परत्रेति श्रुतिः स्मृतिः ॥

अन्यत्रापि यज्ञोपवीतविषये, क्षौरविषये, बह्वीं चर्चामश्रौषं तदेतत्सर्वं वस्तुस्थित्या विचारणीयमिति मत्वा, सर्वानेतान् पूर्वोक्तान् दूरीकृत्य तत्त्वजिज्ञासार्थमेव प्रवृत्तोऽस्मि । न च याथार्थ्येन यैः कैरपि पूर्वैरुक्तैः प्रत्यपाद्यपि संप्रदाय एवास्माकमित्युद्घोषयामासुः ॥

॥ तत्त्वजिज्ञासा ॥३॥

" हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ॥ स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ १२१।१ ऋ० पूर्वं तावज्जगत्सत्यासत्यविषयमुपपादयामः । स्थापिते च तस्मिन्ननन्तरं धर्मानुष्ठानविचारं प्रवर्तयामः । जगन्मिथ्या नाम स्वरूपत एवाभावं वदन्तोऽत्र वादिनः । तानधिकृत्योच्यते । भाट्टमतीयोऽयं प्रपंचः ।

जगन्मिथ्येति वदन्तो नेदं विचारयन्ति । यादृशं मिथ्यात्वं जगतो वदन्ति श्रुतयः । यादृशी च मिथ्याप्रतिपादनशैली जैमिनीप्रभृतीनां तयैवेदानीं चिन्त्यते ।

१ पूर्वमीमांसायां मतत्रयम् । प्राभाकरमतं भाट्टमतं मुरारिमतं चेति ॥

किमिदानीमसन्नेवायं प्रपंचः ? ओमिति चेत्, न प्रत्यक्षविरोधात् । यथा च प्रत्यक्षं प्रपंचसद्भावग्राहकं तथोक्तं प्रत्यक्षसूत्रे "सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात्" १।१।४ जै० इत्यत्र । न चागमेन प्रत्यक्षबाधः सम्भवति । प्रत्यक्षस्य शीघ्रप्रवृत्तत्वेन सर्वेभ्यो बलीयस्त्वात्, प्रपंचो मिथ्या दृश्यत्वात् इत्यत्र तु कार्याकारित्वमेवोपाधिरस्तीत्येवं नान्यैरपि प्रमाणैः प्रपंचमिथ्यात्वं सम्भवति न च पौर्वापर्यन्यायेन प्रवृत्तमेव प्रत्यक्षमागमेन पश्चाद्बाध्यत इति वाच्यम् । आगमस्य प्रत्यक्षेण विरोधात्, आगमप्रवृत्तिसमयेऽपि हि भेदप्रपंचमुपदर्शयत् प्रत्यक्षमागमप्रवृत्तिमेव निरुणद्धि यथा खलूत्पत्तुमुपक्रममाण एव घटो दण्डेनाहन्यमानो नोत्पत्तुं प्रभवति तथाऽगमोपि । किंच प्रपंचाभावं प्रतियताऽवश्यमागमोऽपि प्रपंचान्तर्गतत्वात् असद्रूपतया प्रत्येतव्यः, कथं चागमेनैवागमस्याभावः प्रतीयेत ? असद्रूपतया हि प्रतीयमानो न कस्यचिदप्यर्थस्य प्रमाणं स्यात् । प्रामाण्ये वा नासत्त्वं, कश्चित्पुनराह । नासत्त्वं प्रपंचस्य भ्रमः प्रत्यक्षादिप्रमाणतः सिद्धत्वात्, नापि परमार्थतः सत्त्वमात्मज्ञानेन बाध्यमानत्वात् । तस्मात्सदसद्भ्यामनिर्वाच्योऽयं प्रपंच इति तदुक्तं चित्सुखाचार्यैः ॥

प्रत्येकं सदसत्त्वाभ्यां विचारपदवीं न यत् ॥
गाहते तदनिर्वाच्यमाहुर्वेदान्तवेदिनः ॥

तदिदमसारम्—सतोऽन्यत्वमेवासत्त्वं तद्यदि प्रपंचः सन्न भवति व्यक्तमसन्नेवायम् । असत्त्वाभावे वा सत्त्वापत्तिः सदसत्त्वयोरेकनिषेधस्येतरविधिनान्तरीयकत्वात् । न च विधाद्वयरहिते विधान्तरं सम्भवति । अथापि यन्न कदाचित्प्रतीयते तदसत् यथा शशविषाणम् । यत्प्रतीतं न बाध्यते तत्सत् यथात्मतत्त्वम् । प्रपंचस्तु प्रतीयमानत्वाद्बाध्यमानत्वाच्च भावाभावाभ्यामनिर्वाच्य इति मतम् ? तदनुपपन्नम् । लोकविरोधात् यद्धि प्रतीतं बाध्यते मृगतोयरज्जुसर्पादि तदसदेवेति लौकिकी प्रसिद्धिः । न हि शशविषाणादीनां मृगतोयादीनां च कश्चिद्विशेषो लोके सोयं प्रपंचोऽपि बाध्यते चेत्, असन्नेवेति नानिर्वाच्यत्वं, अथापि लोकप्रसिद्धिमनादृत्य वृध्यादिवत्परिभाषारूपेणानिर्वाच्य इत्युच्यते ? तथाप्ययुक्तं प्रपंचस्य बाधाभावात् । न तावत्संसारावस्थायामागमेन बाधः सम्भवतीत्युक्तं मुक्तस्य तु बाधकज्ञानं नाशंकनीयमेव प्रलीनसर्वकारणत्वात् करणाभावे च ज्ञानासम्भावात् । न चास्मर्यमाणस्य प्रपंचस्याभावः शक्यते प्रत्येतुम् । न च तस्यामवस्थायां सम्भवति स्मरणम् । सर्वसंस्काराणामुच्छिन्नत्वात् । तस्मान्न बाधसम्भवः । यच्चाविद्याकृतोऽयं प्रपंच इति का पुनरियमविद्या किं भ्रान्तिज्ञानं ? किंवा भ्रातिज्ञानकारणभूतं वस्त्वन्तरम् ? यदि भ्रान्तिः सा कस्य ? न ब्रह्मणस्तस्य स्वच्छविद्यारूपत्वात् । न हि भास्करे तिमिरस्यावकाशः सम्भवति । न च जीवानां तेषां ब्रह्मातिरेकेणाभावात् । भ्रान्त्यभावादेव च तत्कारणभूतं वस्त्वन्तरमप्यनुपपन्न-

मेव। ब्रह्मातिरेकेण भ्रान्तिज्ञानं तत्कारणञ्चाभ्युपगच्छतामद्वैतहानिः। किङ्कृताच ब्रह्मणोऽविद्या? नहि कारणान्तरमस्ति, स्वाभाविकीति चेत् कथं विद्यास्वभावमविद्यास्वभावं स्यात् स्वाभाविकत्वे चास्याः केन विनाशः स्यात्। आगमिकं ध्यानादि तज्जन्यं वा स्वरूपज्ञानं ब्रह्माविद्यां नाशयतीति चेत्। न ह्यागमो वा ध्यानादयो वा तज्जन्यं वा ज्ञानं नित्यज्ञानात्मकब्रह्मातिरिक्तमस्ति यदविद्यां नाशयेत् तद्वरमस्मान्मायावादान्माहायानिकवाद एव यत्र नीलपीतादिवैचित्र्यं, कार्यकारणभावो, बद्धमुक्तादिव्यवस्था च सन्तानभेदेन समर्थ्यते। नित्यमेकरसं निष्प्रपञ्चमात्मानमुपेयुषान्तु समस्तलोकवेदव्यवहारोच्छित्तिरेव स्यात्। यदप्याहुरज्ञानजन्यः प्रपञ्चो ज्ञानेन विनाश्यते मृगतोयवत् स्वप्नप्रपञ्चवच्चेति। तदप्ययुक्तम्। यदि कुलालादिव्यापारस्थानीयेनाऽज्ञानेन घटवदुत्पन्नः प्रपञ्चो मुसलस्थानीयेन ज्ञानेन नाश्यते तथापि नासत्त्वं प्रपञ्चस्य स्यात्, उत्पत्तिविनाशयोगादनित्यतामात्रं स्यान्नात्यन्ताभावः। केचित्त्वौपनिषदाः—परमार्थत एवात्मा प्रपञ्चरूपेण स्वेच्छया परिणमतीति मन्यन्ते तथा च 'सदेव सोम्येदमग्र आसीत्' 'एकमेवाद्वितीयं' 'तदैक्षत बहुस्यां प्रजायेय' इत्येकस्यैव सन्मात्ररूपतया प्रागवस्थितस्यात्मनोऽनेकव्योमादिभेदभिन्नप्रपञ्चरूपेण बीजस्येव वृक्षरूपेण परिणामो दर्शितः। 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः'' इत्यौपनिषदा वादाः पुराणवादाश्चास्मिन्नर्थे शतशो दृश्यन्ते ''पुरुष एवेदं सर्वं'' ''नेह नानास्ति किञ्चन'' इत्यादि तु धर्मिभेदभावाभिप्रायम्। तद्यथैको वृक्षः प्रादेशमात्रादूर्ध्वं नानाशाखोऽवस्थितो दूरस्थैर्नानावृक्षा इति गम्यते तद्वेदिनश्चान्ये तेभ्यः कथयन्ति—'नेमे नानावृक्षाः किन्त्वेक एवायं वृक्षो नानाशाखोऽवस्थित' इति तथा नामरूपप्रपञ्चं नानारूपं पश्यतां मूलकारणस्यैकस्यात्मनोऽयं नानारूपपरिणाम इत्येवमजानतां तत्त्वकथनार्था एवंविधा वादाः सर्वमेकस्यैव विस्तारो न किंचिदत्र नानास्तीति। ये च पुनरसत्त्ववादाः प्रपञ्चविषया अविद्यावादा भ्रान्तिवादा मायावादाश्च ते सर्वे प्रपञ्चस्यानित्यत्वादौपचारिकाः। यस्त्वेवंविधान् वादान् यथाश्रुतार्थान् गृह्णाति स पश्वन्तेरष्वपशुत्ववादम् 'आदित्यो यूप' इत्यादि च यथाश्रुतं गृह्णीयात्। अथ तत्र प्रमाणान्तरविरोधः सोत्राऽपि समानः। अयथार्थवादत्वात्तत्र न यथाश्रुतार्थग्रहणम्? तदपि समानं प्रपञ्चस्याप्यसत्त्वं वैराग्यजननार्थम्, आत्मनश्च परमार्थत्वं मुमुक्षूणामुत्साहजननार्थम्। इति हि भाट्टानां प्रपञ्चमिथ्याप्रतिपादनश्रुतिसम्मताशैली लक्ष्यते, प्रपञ्चितैषा सर्वापि सुव्यवस्थितं पार्थसारथिमिश्रैस्तर्कपादे। जगतः स्वरूपत एवाभावो नास्तीति सिद्धं। सिद्धे च जगतो नित्यत्वे कार्याकार्यविचारणां प्रस्तौमि एतेन जगतो मिथ्यात्व (स्वरूपत एवाभावं) मिति कर्मानुष्ठानाभावं वदन्तः प्रत्युक्ताः॥

द्विविधा तावत्कार्याकार्यविचारणा भवति, ऐहिकी, आमुष्मिकी च, तत्रै-

हिककार्यविचारणाया नायमवसरः । अन्यदपि सा च बहुभिः पटुभिस्तत्र तत्र समये प्रदर्शयिष्यते महाशयैरिति । नापि च तावदस्मासु पाटवं यावत्तामपि व्यवस्थापयामः । आमुष्मिक्यामपि न सर्वथा वयं पटव इति मन्तव्यम् । परन्त्वस्मांस्तत्र वक्तुं मूकीभाव एव प्रेरयति । अवश्यं चैतदत्राध्यवसातव्यं यदामुष्मिकफलेप्सया क्रियमाणं कर्म किमाधारीकृत्य कार्यमिति ॥

बह्वीचेयमत्र विप्रतिपत्तिरसकृदनुश्रूयतेऽतोऽत्र सावधानतया मीमांसामहे । किं स्मृतयः प्रमाणं, पुराणं, इतिहासः, निबन्धाः, निर्णयसिन्ध्वादयो वा, भट्टैः प्रतिपादिता नारायणीयसदृशा वेति संदिह्यते नेयमभिनवमीमांसा स्वादुदियायेति मन्तव्यम्। लोके तावद्विचारेण सन्देहनिवृत्तिः प्रसिद्धा वेदेऽपि तत्र तत्र तत्त्वविचारपूर्वकं सन्देहापनयमुपलभामहे । यथा ऐतरेयब्राह्मणेऽष्टाविंशाध्याय उद्गातृविषये प्रश्नोत्तरप्रसक्तौ प्लुतिद्वयं विचारार्थं कृतम् " अथाहास्त्युद्गातृणां प्रैषा३ः नाँ३ इति अस्तीति ब्रूयादिति सिद्धान्तः" । तथैव द्वात्रिंशाध्यायेऽष्टमे खण्डे सप्तत्रिंशपर्याये कश्चिद्विचारमुद्भावयति 'तदाहुरपत्नीकोऽप्यग्निमाहरे३त् नाहरे३त् आहरेदित्याहुरयं सिद्धान्तः' । वेदान्तरेऽप्येतादृशो विचारः कृतः, यथा यजुर्वेदे "उपस्थेयोऽग्नी३र्नोपस्थेया३उपस्थेयः" इति सिद्धान्त इत्यादिबहुषु स्थलेषु वरीवर्तीति विस्तरभियोपरम्य प्रकृतमनुसरामः । सिद्धे जगतो नित्यत्वे, भवितव्येयं मीमांसेति निष्पन्ने इतः कार्यविचारणा ॥

आमुष्मिककार्ये सर्वप्रमाणमूर्धन्यभूताः श्रुतय एव प्रमाणम् । एता एव वेदत्वेन व्यवह्रियन्ते । श्रवणाच्छ्रुतिर्गुरूच्चारणानूच्चारणपूर्वकं श्रूयत एव न च कर्तृत्वेन कमप्युपलभामहे । ननु कोऽसौ वेदशब्दार्थः कथं वा तस्य प्रामाण्यमिति जिज्ञासास्पदम्। वेदो नाम-इष्टानिष्टप्राप्तिपरिहारयोरलौकिकमुपायं वेदयतीति, अलौकिकपदेन प्रत्यक्षानुमाने व्यावर्त्येते । अनुभूयमानस्रक्चन्दनवनितादेरिष्टप्राप्तिहेतुत्वमौषधसेवादेरनिष्टपरिहारहेतुत्वञ्च प्रत्यक्षतः सिद्धम् । स्वेनानुभविष्यमाणस्य पुरुषान्तरगतस्य च तथात्वमनुमानगम्यम् । एवं तर्हि भाविजन्मगतसुखादीनामप्यनुमानगम्यतेति चेन्न । तद्विशेषस्यानवगमात् । न खलु ज्योतिष्टोमादिरिष्टप्राप्तिहेतुः कलञ्जभक्षणवर्जनादिरनिष्टपरिहारहेतुरित्यमुमर्थं वेदव्यतिरेकेणानुमानसहस्रेणापि तार्किकशिरोमणिरप्यनुमातुं शक्नोति । तस्मादलौकिकोपायबोधको वेद इति न लक्षणस्यातिव्याप्तिः । अवगतश्चायं वेदशब्दार्थः । भवति तावदितः परं प्रामाण्यविचारः । तत्र तावच्छास्त्रं वेदो मानं नवेति संशये प्राप्ते तं निरस्यन्नाह प्रसिद्धानि हि प्रत्यक्षादीनि प्रमाणानि तदन्तर्गतञ्च शास्त्रमतस्तदपि प्रसिद्धमेव, न च प्रसिद्धस्य प्रमाणस्य प्रामाण्यमन्येन परीक्षितव्यम् । स्वत एव तस्य स्वविषयोपस्थापनसामर्थ्यात्, यदि च परीक्ष्येत तस्याप्यन्येन परीक्ष्येत तस्याप्यन्येनेत्यनवस्था

स्यात् तस्मात्, प्रसिद्धत्वात् प्रामाण्यस्य चोदनाघटितशास्त्रमपि प्रमाणं प्रामाण्यं स्वतस्तस्येत्यन्यदेतत् । ननु किं नाम प्रामाण्यम् । प्रमाकरणं प्रमाणमिति केचित् । अनधिगतार्थगन्तृत्वमेवेति भाट्टाः । तथा च प्रथमप्रमाणलक्षणे दोषमाहुः। प्रमात्वं नाम यथार्थानुभवत्वम्। याथार्थ्यञ्च तद्विशेष्यकत्वावाच्छिन्नतत्प्रकारकत्वं, अनुभवत्वम् त्वनुभवामीति प्रतीतिसिद्धः साक्षात्कारानुमित्युपमितिशाब्दबोधसाधारणः स्मृतिव्यावृत्तो जातिविशेषः । न त्वगृहीतग्राहित्वं धारावाहिकेऽव्याप्तेरित्याहुः । तदेतदयुक्तम् । अनुभवामीतिप्रतीतिसिद्धानुभवत्वस्य साक्षात्कार एव सत्त्वेनानुमित्यादौ अव्याप्तेः । स्वर्गमनुभवामि, पर्वते वन्हिमनुभवामीतिप्रतीत्यभावेनानुमित्यादौ तत्सत्त्वे मानाभावात् । तस्मादनधिगतार्थगन्तृत्वमेवानुभवत्वम् । न च धारावाहिकेऽव्याप्तिः । तत्तत्क्षणविशिष्टघटादेः पूर्वपूर्वज्ञानागृहीतस्यैवोत्तरोत्तरज्ञानविषयत्वात् । "इदानीं स्पृशामि इदानीं पश्यामी" त्यादिप्रतीत्या कालस्यापि षडिन्द्रियवेद्यत्वात् कालान्यद्रव्यचाक्षुषत्वस्यैव कार्यतावच्छेदकत्वादनुभवानुसारेण कार्यकारणभावकल्पनादन्यथा लाघवाच्चाक्षुषत्वस्यैव कार्यतावच्छेदकत्वापत्तेः । न च कालोऽतिसूक्ष्मत्वात् कथं प्रत्यक्षग्राह्य इति वाच्यम् । ज्ञानधारायां ह्युपरतायां, किमत्र घटोऽवस्थित इति पृष्टः सन् कथयति । अस्मिन् क्षणे मयोपलब्ध इति प्रातरारभ्यैतावन्तं कालं मयोपलब्ध इति च । कालभेदेत्वगृहीते कथमेवं भवेत्। शतपत्रपत्रशतं मया सूच्या युगपद्भिन्नमिति तु स्थूलकालविषयकम्, वस्तुतस्तु धारावाहिकस्थले तावत्कालव्यापिन्येकैवज्ञानव्यक्तिः कारणभेदाभावात्, तद्भेदकल्पने मानाभावात्, योग्यविभुविशेषगुणानां त्रिक्षणावस्थायित्वस्य परिभाषामात्रत्वात् । यथार्थन्तु, स्वसमानविषयकज्ञानानपेक्षोत्पत्तिकज्ञानत्वमेवानधिगतार्थगन्तृत्वम् । अतः कालभेदस्येन्द्रियवेद्यत्वाभावेऽपि न क्षतिः । दिनान्तरे गृहीतस्य घटादेर्दिनान्तरे पुनर्ज्ञानमपि प्रमैव । याथार्थ्यमपि प्रमालक्षणे देयम् । तच्च तद्वति तत्प्रकारकत्वं विशेष्यावृत्त्यप्रकारकत्वं वा । अनुमितेरपि वन्हिविशिष्टः पर्वतो विषय इत्यनधिगतार्थगन्तृत्वम्। नच पर्वतस्यानुमितिविषयत्वे पर्वतमनुमिनोमीत्यनुव्यवसायापत्तिः । विधेयताख्यविषयताशालिन एवानुमिनोमीत्यनुव्यवसायभाननियमात् । एवमुपमितावप्यनधिगतार्थगन्तृत्वं बोध्यम् । लौकिकशब्दजन्यज्ञानन्तु न प्रमा, अनधिगतार्थगन्तृत्वाभावात्। नच लौकिकशब्दःप्रमाणं, उक्तप्रमाकरणत्वाभावात् । लौकिकशब्दे तज्जन्यज्ञाने च प्रमाणव्यवहारस्तु तद्वति तत्प्रकारकत्वांशमादाय गौणः । आप्तत्वं चात्रैवोपयुज्यते । वेदस्तु प्रमाणं तस्योक्तलक्षणाक्रान्तत्वात् । व्रीहिभिर्यजेतेत्यादिवाक्येषु यागादिपदार्थविषयेऽप्रामाण्यमिष्टमेव । तदुक्तं—

"ब्राह्मणार्थो यथा नास्ति कश्चिद्ब्राह्मणकम्बले ।
देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः ॥ इति ।

प्रामाण्यञ्च स्वतः, अप्रामाण्यं तु परतः, स्वतस्त्वञ्च कारणगुणसंवाद्यर्थक्रिया-ज्ञानानधीनत्वम्, याथार्थ्यघटितप्रामाण्यस्य स्वतस्त्वम्, अयाथार्थ्यरूपप्रामाण्यस्य च परतस्त्वम्, परतस्त्वन्तु बाधकज्ञानकारणदोषविसंवादज्ञानाधीनत्वं ज्ञानग्राह्यत्वं कारणदोषादिज्ञानग्राह्यत्वञ्च क्रमेण बोध्यम् ॥

ननु पुरुषप्रणीतोऽयं वेदो न प्रमाणपदवीमर्हति । तथाहि जैमिनिः पूर्वपक्षत्वेनासुसूचत् । "वेदांश्चैके सन्निकर्षं पुरुषाख्या" इति जै० १।१।७

अस्यार्थः—एके अन्ये तार्किकाः वेदान् सन्निकर्षं गमयन्ति सन्निकृष्टकालान्वदन्तीति यावत् । यतस्ते वेदाः पुरुषाख्याः, पैप्पलादं, कालापं, काठकमित्याधुनिकपुरुषेण समाख्यायमाना भवन्ति, अनया हि समाख्यया पुरुषविशेषसम्बन्धो वेदानामवगम्यते । न चेयं प्रवचननिमित्ता भवितुमर्हति, प्रवचनस्य साधारणत्वेन समाख्यानिमित्तत्वायोगात् । कर्तृत्वे तु सा घटते । स्वातन्त्र्येण वाक्यरचयितृत्वं हि कर्तृत्वं तद्रचकस्यैव, अन्येषां तु तादृक्शब्दोच्चारयितृत्वेऽपि न स्वातन्त्र्यम् । अत एव भारतरघुवंशादिवाक्योच्चारयितृष्वस्मासु न तत्कर्तृत्वव्यवहारः । एवञ्च वर्णानां नित्यत्वेऽपि, तदानुपूर्वीविशेषविशिष्टवेदस्य पौरुषेयत्वादप्रामाण्यमिति प्राप्ते राद्धान्तमाह ।

"कृते वा विनियोगः स्यात्कर्मणः समत्वादि" त्यत्र १।१।३२ तथा चानुमानप्रयोगः—वेदः पौरुषेयः, वाक्यत्वात्, भारतादिवदित्यनुमानं त्वेवं निराकर्तव्यं, किमिदं पौरुषेयत्वं, पुरुषाधीनोत्पत्तिकत्वं वा, मानान्तरेणार्थमुपलभ्य रचितत्वं वा । नाद्यः सिद्धसाधनत्वात् । आकाशवन्नित्यानां सर्वगतानां कालतो देशतश्च क्रमशून्यानां वर्णानामनित्योच्चारणप्रतिपत्तिक्रमविशिष्टानां पूर्वपूर्वक्रमानुस्मृतिनिमित्ततत्तत्सदृशोत्तरोत्तरक्रमवतां वेदशब्दवाच्यानां पुरुषाधीनोत्पत्तिकत्वात् । न द्वितीयः कालिदासादिकृतरघुवंशादिसाधारण्यापत्तेः । किञ्च पुरुषोऽपि कस्तवाभिमतः, कश्चिन्मनुष्यो वा योगी वा ईश्वरो वा । नाद्यः । मनुष्ये धर्मादिज्ञानस्य वेदजन्यत्वेन तत्र तस्य कर्तृत्वासम्भवात् । न द्वितीयः । योगिनोऽपि हि धर्माधर्मादिप्रमापकं न तावद्बाह्येन्द्रियं धर्मादेस्तदयोग्यत्वात् । नापि मनः, तज्जनितज्ञानस्यात्मयोग्यतद्गुणातिरिक्ताविषयत्वात् । नन्वस्मदादिज्ञानस्य तथात्वेऽपि विवेकवैराग्यादिबहुगुणशालिनां योगिनां तादृशज्ञानमस्त्विति चेन्न । एवं सति वेदस्यानादित्वेनास्मदिष्टापौरुषेयत्वासिद्धेः । नहि तेषां तादृशसम्पत्तिर्वेदाध्ययनतदर्थाचरणमन्तरेण सम्भवत्याकस्मिकत्वापातात् । न तृतीयः । वेदादीश्वरसिद्धौ अन्योन्याश्रयात् । न च काठकादिसमाख्या कर्तृनिबन्धनैवोपपाद्येति वाच्यम्, तस्याः प्रवचनातिशयनिबन्धनतायाः, पदविभागक्रमपाठतदर्थख्यापनादिकमेव तदतिशयः । न च वेदा अनाप्तप्रणीतत्वादाप्तप्रणीता इदानीन्तनवाक्यविशेषवदिति वाच्यम् । आ-

त्माकाशादौ व्यभिचारात् । अशब्दत्वे सतीति विशेषणमिति चेन्न, आप्तप्रणीतत्वमात्रस्योक्तविधया वेदेऽप्यङ्गीकारात् । वेदा अपौरुषेयाः, संप्रदायाविच्छेदे सत्यस्मर्यमाणकर्तृकत्वादात्मवदिति सत्प्रतिपक्षत्वाच्च, न च सत्यन्तासिद्धिः, संसारचक्रप्रवर्तकत्वेन संप्रदायविच्छेदाभावात् । नन्वाप्तप्रणीतत्वाभावे बालोन्मत्तादिवाक्यवदप्रामाण्यं स्यादिति चेन्न, प्रमाणानां स्वतः प्रामाण्याभ्युपगमात् । एवञ्चापौरुषेयो वेदो नित्यः कार्यविषये प्रमाणम् ॥

वेदो नाम=प्रवर्तनाबोधकलिङादिसमभिव्याहृतं वाक्यम् ॥

अपौरुषेयत्वं नाम=मानान्तरेणार्थमुपलभ्य रचितत्वाभाववत्त्वम् ॥

प्रमाणत्वं नाम=यथार्थमगृहीतग्राहिज्ञानम् ॥

नित्यत्वं नाम=यत्स्वरूपसद्भावे सति उत्पत्तिविनाशराहितत्वम् ॥

अनुमीयतेऽपि—नित्यः शब्दः, श्रावणत्वात्, शब्दत्ववत् तत्सर्वमेतत्सूत्रयामास तत्रभवान् भगवान् जैमिनिः । १।१।५।

"औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः......अव्यतिरेकश्च......अर्थेऽनुपलब्धे" इति विशेषणत्रयम् ।

प्रामाण्ये कारणदोषराहित्यापेक्षास्तीति प्रथमविशेषणेन प्राप्तम् ।

बाधकज्ञानराहित्यापेक्षास्तीति द्वितीयविशेषणेन प्राप्तम् ।

अगृहीतग्राहित्वापेक्षास्तीति तृतीयविशेषणेन प्राप्तम् ।

सन्ति चात्र चत्वारः पक्षाः प्रामाण्यविषये प्राचीनानाम् ।

सांख्याः—प्रामाण्याप्रामाण्ये उभयमपि स्वत एवेत्याहुः ।

तार्किकाः—उभयमपि परत एवेति ।

बौद्धाः—अप्रामाण्यं स्वतः, प्रामाण्यञ्च परतः ।

मीमांसकाः—प्रामाण्यं स्वतः, अप्रामाण्यं च परतः ।

एवं तत्र तत्र विषये प्राचीनैः सूक्ष्मदर्शिकया रीत्या पराक्रान्तं वेदशब्दविषयेऽपि ।

वेदान्तिनः—धर्मब्रह्मप्रतिपादकमपौरुषेयं वाक्यम् ।

पौराणिकाः—ब्रह्ममुखनिर्गतं धर्मज्ञापकशास्त्रम् ।

तार्किकाः—मीनशरीरावच्छेदेन भगवद्वाक्यम् ।

इतःपरमपि नवीनैरिदानीन्तनैः सर्वविचारनावीन्यमवगम्य सर्वं सम्भावनीयमित्यलमतिविस्तरेण ॥

इतःपरमामुष्मिकफलाप्तयेऽनुष्ठीयमानानि कर्माणि वेदमूलकान्येवेति मन्यामहे । तत्र तावदहमहमिकया प्राप्स्यमानानां ग्रन्थानां किञ्चिद्विचारः क्रियते । अभ्यवगतं वेदमूलकमेव सर्वेषां प्रामाण्यमिति, परं तादृशा अपि ग्रन्था बहवः समुपलभ्यन्ते । तत्रेदानीं करिष्यमाणायाश्चर्चायाः संस्कारमीमांसायास्तावदुपयोगिनो ग्रन्थाः सूत्र-

रूपा एव, तत्र तावत्सूत्रस्यापि द्वैविध्यं यथा श्रौतसूत्रं, गृह्यसूत्रञ्चेति। श्रौते तावदग्नित्रयसाध्यानि कर्माण्युच्यन्ते "वैतानिकस्य योगापत्तिं वक्ष्यामः" श्रौ. सू. १।१।१। इत्यारभ्य, गृह्यसूत्रे तावदेकाग्निसाध्यानि कर्माणि प्राय उच्यन्ते, अन्यदपि प्रासङ्गिकं संध्याब्रह्मयज्ञादि, " गृह्याणि वक्ष्याम " इत्यारभ्य। तानि च प्रतिशाखं भिन्नानि, कासुचिच्छाखास्वेकमपि, यथाकाण्वमाध्यन्दिनीयानां कात्यायनगृह्यं, शाकलबाष्कलानामाश्वलायनसूत्रम्। अतः संस्कारानुष्ठाने तदेव प्रमाणं वा स्मृत्याद्यपि ? ब्रूमः, यथा वाग्निसाध्यकर्माणि वक्तुमुपक्रान्तस्य सूत्रस्यानग्निसाध्यं गौणं तथैव स्मृतिष्वप्यनग्निसाध्यकर्मविधानं प्रधानमग्निसाध्यं गौणम्। इतरत्सर्वं पुरुषार्थमेवोच्यते राजधर्मादि तथैव श्रौते राष्ट्रभृदादि। एतान्येव कल्पसूत्राणीत्युच्यन्ते। अनादित्वं चैतेषामाम्नायते मुण्डकोपनिषदि " तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदः शिक्षा कल्पो व्याकरणं निरुक्तमि "ति। प्रतिकल्पं स्मर्यमाणत्वात्तत्तदृषीणां भिन्नत्वस्योपपत्तिरिति ध्येयम्। कल्पो नाम क्रतुप्रयोगं पाठमात्रेण स्पष्टं कल्पयन्ति ये बौधायनीयादयो ग्रन्थास्ते कल्पाः। " एतत्तीर्थमित्याचक्षते ऋचं पादग्रहण " इत्यादि स्वकृतसंज्ञापरिभाषादिभिः प्रयोगस्य सूचकान्याश्वलायनीयादीनि सूत्राणीति विवेकः। इत्थञ्च कल्पसूत्राधिकरणपृथक्करणवैयर्थ्यात् वर्तते कश्चित्स्मृत्यधिकरणापेक्षया विशेषः। तस्मादप्यवश्यं तदनुसारेणैवानुष्ठेयमापतति, स विशेषो नाम, वेदाङ्गमिति, यथा वाविच्छिन्नपरम्पराप्राप्तं सूत्राणां वेदाङ्गत्वं न तथा स्मृतीनाम्। अतः सूत्रानुष्ठानप्रामाण्यं सन्निकृष्टं, स्मृत्यादीनान्तु विप्रकृष्टमित्यध्यवसायैवायमुपक्रमः। कथंचनाभिनवसामाजिकीं व्यवस्थां सम्पादयितुमेव स्मृतयः प्रवृत्ता इत्यप्यभिजानीमः। वदन्ति च सर्वेऽपीदानीमाश्वलायनसूत्रानुयायिनः संध्योपासनसमाप्तौ गुर्वभिवादनवेलायां, 'आश्वलायनसूत्रशाकलशाखाध्यायी' इति। तदनुसारेणैवाहमामुष्मिककर्मकर्तेति यावत्। यत्र तु नास्त्यङ्गांगिभावस्तानि कर्माणि स्वप्रधानतयानुतिष्ठन्तु कामम्। यथा बौधायनसूत्रोक्तामुदकशान्तिं कुर्वन्त्यप्यन्ये। अत एवेतः परं कल्पसूत्रस्मृत्याचारप्रामाण्यविषये प्राच्यां मीमांसायां सूत्रितानि सूत्राणि व्याख्यास्यामः। सा परिपाटी ज्ञाता चेद्विचाराय स्यात्सुलभं समेषामित्ययं यत्नः॥

कल्पसूत्राणां तावद्वेदमूलकतया प्रामाण्यमवगतम्। तदाक्षिप्य समाधातुमिदमारभ्यते। कल्पसूत्राणि किं स्वतन्त्रतया प्रमाणमुत परन्त्रतयेति संशयः, तदर्थं चेदं चिन्त्यते किमिमानि पौरुषेयाणि, उतापौरुषेयाणीति। अपौरुषेयाणीति ब्रूमः, कल्पसूत्रतो हि जायमाना धर्मावगतिः स्वत एव प्रमाणतया ज्ञायते। पौरुषेयत्वेच पुरुषदोषादप्रामाण्यापत्तेर्ज्ञातं प्रामाण्यं व्याहन्येत। तस्मादपौरुषेयत्वं कल्पसूत्राणाम्। एवञ्च शाक्यादिग्रन्थानामप्यपौरुषेयत्वं साधितं भवति। किञ्च कल्पसूत्राणां वैदिक-

परिग्रहाद्धर्मप्रामाण्यमविवादम् । तद्देषामेवापौरुषेयतया नित्यत्वं कल्पनीयम् । न तु मूलभूतं वाक्यान्तरं कल्पयित्वा तस्याः पौरुषेयतया नित्यत्वं कल्पयितुमुचितं, गौरवात् । एतेन मन्वादिस्मृतीनामप्यपौरुषेयत्वमुपक्षिप्तं भवति, किञ्च ' मन्त्रब्राह्मणयोर्वेदनामधेयं षडङ्गमेके ' इतिस्मरणात्कल्पसूत्राणामपौरुषेयत्वं स्पष्टमेवावगतम्। एतेन शिक्षाव्याकरणादीनामप्यपौरुषेयत्वमुपक्षिप्तं भवति । किञ्च यानि वाक्यानीदानीं वेदेष्वध्यापकपरम्परया प्रत्यक्षाणि पठ्यमानानि ' प्राचीनवंशं करोति ' इत्यादीनि तान्येव बहुलं कल्पसूत्रेषूपलभ्यन्ते । न हीदं पौरुषेयत्वे घटते, प्रत्यक्षवेदवाक्यनिबन्धनवैयर्थ्यात् । अतः शाखान्तरवदपौरुषेयत्वमेषां युक्तम् । न चैवं सति ' बौधायनीयम् ' ' आपस्तम्बीयम् ' इत्यादिसमाख्याविरोधः शङ्कनीयः । ' शाकलम् ' ' बाष्कलम् ' ' तैत्तिरीयम् ' इतिवदुपपत्तेः । ' यदृचोऽधीते ' इत्युपक्रम्य ' पुराणानि कल्पान् ' इति कल्पानामप्यध्ययनविधिदर्शनाच्चापौरुषेयत्वम् । अन्यथा पौरुषेयतयानित्यत्वे नित्यविधिविषयत्वं न घटेत । एतेनेतिहासादीनामप्यपौरुषेयत्वमुपक्षिप्तं भवति । तथा चापौरुषेयत्वेन नित्यत्वादेषां स्वतन्त्रतया प्रामाण्यमिति पूर्वपक्षमुपक्षिप्य निराकरोति ।

प्रयोगशास्त्रमिति चेन्नासन्नियमात्। १।३।१०

प्रयोगस्य क्रत्वनुष्ठानस्य बोधकं शास्त्रं प्रयोगशास्त्रं बोधायनापस्तम्बादिकल्पसूत्रजालं स्वतन्त्रतया प्रमाणमस्त्विति चेन्न, कुतः, असन्नियमात्, पूर्वमसद्भिरविद्यमानैर्जनिमद्भिर्बोधायनादिभिर्नियमान्निबन्धनात् पौरुषेयत्वादित्यर्थः । ' बौधायनीयम् ' ' आपस्तम्बीयम् ' इत्यादिसमाख्याबलात्पौरुषेयाण्येव कल्पसूत्राणि । 'इति बोधायनकृते,' 'इत्यापस्ताम्बकृते,' 'इति भरद्वाजकृते,' 'इत्याश्वलायनकृते,' 'सूत्रे प्रथमोऽध्यायः,' 'प्रथमः पटलः' इत्येवं तेष्वेव ग्रन्थेषु कर्तृनिबन्धनेन तन्मूलकर्तृस्मृतिपरम्परया भ्रान्तिमूलकत्वस्य सम्भावयितुमशक्यत्वात्। ततश्च दृढकर्तृस्मरणात्समाख्या एताः कर्तृनिबन्धना एव, न प्रवचननिबन्धनाः । अतः पौरुषेयत्वादेषां न स्वतन्त्रतया प्रामाण्यं, किंतु वेदमूलकतयैव । एतेन मन्वादिस्मृतिशिक्षादीनां शाक्यादिनिबन्धनानामपि स्वतन्त्रतया प्रामाण्यं निरस्तम् । तत्र वैदिकपरिग्रहवशात्स्मृत्यादीनां वेदमूलकतया प्रामाण्यं निर्बाधम् । शाक्यादिनिबन्धनानान्तु वेदविद्वेषिजनप्रणीतपरिगृहीतानां वेदमूलकत्वासंभवाप्रामाण्यमेव परिशिष्यते । यत्तु प्रत्यक्षशाखागतवाक्यनिबन्धनानर्थक्यमुक्तं, तन्न । श्रुतिलिङ्गादिप्रमाणदुर्बोधानन्तशाखागतवाक्यान्युपसंहृत्य सुबोधकैः शब्दैस्तदर्थग्रथनाय तदावश्यकत्वात् । यच्च कल्पानां नित्यब्रह्मयज्ञविधिविषयत्वान्यथानुपपत्त्या पौरुषेयत्वमनुपपन्नमिति तन्न । ' पञ्चावत्तं जमदग्नीनाम् ' ' बबरः प्रावाहणिरकामयत ' इत्यादिवत्प्रवाहनित्यतया तदुपपत्तेस्तर्कपादे । ' परंतु श्रुतिसामान्यमात्रम् ' इत्यत्रार्थवादाधिकरणे । ' अन्त्ययोर्यथोक्तम् '

इत्यत्र, मन्त्राधिकरणे' 'उक्तश्चानित्यसंयोगः' इत्यत्र च प्रपञ्चितत्वात्। यच्च 'षडङ्गमेके' इति वेदत्वं कल्पसूत्राणामिति, तन्न। तस्य स्वानभिमतपरमतोपन्यासमात्रत्वात्। न च मतान्तरे वेदत्वं स्वमतेऽवेदत्वञ्च युज्यते, वस्तुद्वैविध्यासम्भवादङ्गशब्दविरोधाच्च।

अत्रैव युक्त्यन्तरमाह—

अवाक्यशेषात्। १।३।११

वाक्यस्य विधिवाक्यस्य शेषोऽर्थवादः। तस्य विध्यपेक्षितप्राशस्त्यसमर्पकत्वात्। तस्याभावादवाक्यशेषात्। अर्थाभावेऽव्ययीभावः। 'अपञ्चम्या' इति पर्युदासादम्भावो न। वेदेषु हि वाक्यानि सर्वाण्यर्थवादबहुलान्येव पठ्यन्ते। कल्पसूत्रेषु तु प्रायेण विधिवाक्यान्येव पठ्यन्ते। अर्थवादास्तु 'समुद्रो वा एष यदहोरात्रस्तस्यैते गाधे तीर्थे यत्संधी तस्मात्संधौ होतव्यम्' इत्यादयः क्वचिदेव पठ्यन्ते। अतो वैलक्षण्यान्न वेदत्वं कल्पसूत्राणाम्, किंतु वेदमूलकतयैव प्रामाण्यम्।

ननु वेदतया वेदमूलकतया वा कल्पसूत्राणां प्रामाण्ये कः फलभेद इत्याशङ्क्य प्रत्यक्षश्रुतिविरोधेऽप्रामाण्यमेवैषां वेदमूलकत्वे फलतीत्याह—

"सर्वत्र च प्रयुक्तत्वात्संनिधानशास्त्राच्च" नेत्यनुवर्तते। निदानसूत्रे 'सर्वोऽपरपक्षः पूर्णमासस्य कालः सर्वः पूर्वपक्षो दर्शस्य' इति पूर्वपक्षापरपक्षतिथिषु सर्वत्रापि दर्शपूर्णमासयागत्रिकद्वयस्य प्रयुक्तत्वात् प्रयोगविधानात्, न तदंशे प्रमाणं कल्पसूत्रमिति शेषः। कुतः। संनिधानशास्त्रात्, संनिधाने दर्शपूर्णमासविधिसन्निधौ विद्यमानं प्रत्यक्षं श्रुतिवाक्यं सन्निधानशास्त्रम्। 'अमावास्यायाममावास्यया यजेत' पौर्णिमास्यां पौर्णमास्या यजेत' इत्यादिप्रत्यक्षश्रुतिविरोधादिति यावत्। चकारो ह्यर्थो हेतौ,—यतो वेदमूलकतयैव कल्पसूत्राणि प्रमाणं न स्वतन्त्रतया, तानि च प्रत्यक्षश्रुतिविरोधेऽप्रमाणमिति। द्वितीयश्चकारस्तु 'अविशेषादुभौ वा' इत्यादिविषयान्तरसमुच्चयार्थः। अत्रेदं चिन्त्यम्—'सर्वोऽपरपक्षः पूर्णमासस्य सर्वः पूर्वपक्षो दर्शस्य' इति कल्पसूत्रम्। 'अमावास्यायाममावास्यया यजेत' इत्यादिप्रत्यक्षश्रुतिविरोधादप्रमाणमित्यनुपपन्नम्, पूर्वपक्षापरपक्षयोरपि दर्शपूर्णमासकर्मकालत्वस्य प्रत्यक्षश्रुतिसिद्धत्वात्। एवं ह्युदाहरन्ति श्रुतिवाक्यं बोधायनापस्तम्बसत्याषाढभारद्वाजाः—'अथैकेषां वि वा एतस्य यज्ञश्छिद्यते। यस्य यज्ञे प्रततेऽन्तरेतामिष्टिं निर्वपन्ति। य एवासावाग्नेयोऽष्टाकपालः पौर्णमास्यां योऽमावास्यायां तमग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेद्यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वातिपादयेत्' इत्यादिना दर्शपूर्णमासयोः स्वकालातिक्रमे पाथिकृतीष्टिः प्रायश्चित्तत्वेन विहिता तैत्तिरीयादिशाखासु। तस्यास्तावदतिपन्नेन पूर्णमासेन दर्शेन च समानतन्त्रता शाखान्तरे विहिता। तन्निन्दापूर्वकं दार्शपूर्णमासिकाग्नेययागस्यैव

पाथिकृद्गुणकत्वं शाखान्तरे विधीयते, 'यस्य यज्ञे' इत्यादिना, यस्य यजमानस्य दर्शपूर्णमासयोरन्यतरस्मिन्नतिपन्ने यज्ञे प्रतते कालान्तरे प्रक्रान्ते सत्यन्तर्मध्य एतां पाथिकृतीमिष्टिं निर्वपन्ति कुर्वन्ति ऋत्विजः, एतस्य यजमानस्योपक्रान्तो यज्ञो विच्छिद्यते विगुणः स्यात्, अतः योऽयमाग्नेययागोऽमावास्यायां च पौर्णमास्यां चाच्युतो विहितस्तमग्नये पथिकृते कुर्यात्। तेन पथिकृत्त्वगुणेन पन्थानं कालातिक्रमतः प्रच्युतं स्वर्गस्य पन्थानं पुनरवैति न चोपक्रान्तं यज्ञं विच्छिनत्ति न विगुणीकरोतीत्यन्येषां शाखिनां श्रुतिवाक्यं विज्ञायते प्रत्यक्षं ज्ञायत इति। अत्र शाखान्तरे समानतन्त्रता निन्दा 'नहि निन्दा' न्यायेन पथिकृत्वगुणविधिप्रशंसार्थैव न त्वेतन्निषेधार्था। समानतन्त्रता ह्यत्र शाखान्तर विद्यते वा न वा। न द्वितीयः, अप्रसक्तत्वेन तन्निषेधयोगात्। नाद्यः, शाखान्तरे विहितत्वेन नित्यवत्प्रतिषेधानुपपत्तेः। पाक्षिकनिषेधे च पक्षान्तरे तत्सद्भावात्तन्निन्दानुपपत्तेः। न हि विहितत्वे निन्दा युज्यते अतः प्रशंसार्थैव सा। तया च निन्दया समानतन्त्रताऽपि शाखान्तरेऽनुमीयते। अतो विकल्पः। तदाहुर्बौधायनादयः कल्पकाराः 'समानतन्त्रे वा मुख्यः कार्य' इति। यदि च स्वकालातिक्रमे सति कालान्तरेऽतिपन्नयोर्दशपूर्णमासयोरनुष्ठानमेव न स्यात्, तर्हीदं सर्वमभित्तिचित्रायितमेव स्यात्। अतो बोधायनादिबहुमुनिदृष्टश्रुत्यन्यथानुपपत्त्या कालान्तरेऽपि दर्शपूर्णमासयोः करणमनुमीयते किञ्च 'अथातोऽनुग्राहान्व्याख्यास्याम' इत्युपक्रम्य 'सायं होमं वोपोदयं जुहुयात्। प्रातर्होमं वोपास्तमयं कालेन कालमनतिक्रम्य दर्शपूर्णमासयोरग्निहोत्रस्य च न स्कंदते न व्यथत इति विज्ञायत' इति संक्षेपश्रुतिमुदाहृत्य तां व्याकुर्वन्नुदाहरणेषु विस्तारयामास बोधायनः।

'आ प्रातराहुतिकालात् सायमाहुतिकालो नातीयात्' इत्यादिना 'ओत्तरवसन्तंज्योतिष्टोमस्य कालात्पूर्ववसन्तज्योतिष्टोमस्य कालो नातीयात् इत्यन्तेन पूर्वस्य कर्मणः कालेनोत्तरस्य कर्मणः कालमनतिक्रम्यान्तरालकाले दर्शपूर्णमासयोरग्निहोत्रस्य चकारात्तज्जातीयानामाग्रयणवैश्वदेववरुणप्रघाससाकमेधशुनासीरीयनिरूढपशुबन्धज्योतिष्टोमानां चानुष्ठानं शाखान्तरे विज्ञायत इत्यर्थः। अतः सर्वोऽपरपक्षः पूर्णमासस्य' इति कल्पसूत्रमिदं प्रत्यक्षश्रुतिविरोधादप्रामाण्ये कथमुदाहृतं भाष्यकृता। यच्च वार्तिकादिग्रन्थेषु—'अविशेषादुभौ वा' इति कात्यायनसूत्रे सर्वपुरोडाशानां चतुर्धाकरणवचनम्। 'आग्नेयं चतुर्धा करोति' इति प्रत्यक्षश्रुतिविरोधात्। 'शेषस्तु गुणसंयुक्तः साधारणः प्रतीयेत' इति तृतीयाद्यपादीयान्त्याधिकरणपूर्वपक्षन्यायाभासमूलकप्रमाणम्; तथा 'स कृताकृत' इत्यापस्तम्बादिसूत्रे सवनीयपशौ पशुपुरोडाशविकल्पवचनं सवनीये छिद्रापिधानार्थत्वात्पुरोडाशो न स्यात्, अन्येषामेवमर्थत्वात्' इति द्वादशिकद्वितीयपादीयद्वितीयाधिकरणपूर्वपक्षमूलकप्रमा-

णम्, 'वपया प्रातःसवने चरन्ति पुरोडाशेन माध्यन्दिने सवनेऽङ्गैस्तृतीयसवने' इति प्रत्यक्षश्रुतिविरोधात्, तथा तीव्रसुति 'यावद्यूपं वेदिमुद्धन्ति ।' इत्यापस्तम्बादिसूत्रे वेदेर्यूपाङ्गत्ववचनन्, 'अर्धमन्तर्वेदि अर्धं बहिर्वेदि' इति प्रत्यक्षश्रुतिविरोधात् 'तथा यूपस्य वेदिः' इति तार्तीयीकसप्तमपादीयाधिकरणपूर्वपक्षन्यायाभासमूलकप्रमाणम्; तथा यूपैकादशिन्याम् 'जाघनीभिश्च पत्नीः संयाजयन्ति,' इत्यापस्तम्बादिवचनं 'जाघन्या पत्नीः संयाजयन्ति' इति प्रत्यक्षश्रुतिविरोधात् 'द्रव्यविकारात्तु पूर्ववदर्थकर्म स्यात्' द्वादशीकचतुर्थपादीयाधिकरणपूर्वपक्षन्यायाभासमूलकप्रमाणमित्यादि प्रपञ्चितम्

इतः परं स्मृतिप्रमाणविचारः ।

तत्राष्टकादिस्मृतिः प्रमाणं न वेति संशये, पूर्वपक्षयति ।

धर्मस्य शब्दमूलत्वादशब्दमनपेक्ष्यं स्यात् । १।३।१

स्मृतिवाक्यजातं धर्मप्रमाणतयानादरणीयं स्यात् । कुतः । धर्मस्य शब्दमूलत्वात् धर्मस्य वेदैकप्रमाणकत्वात् स्मृतिवाक्यानां च पौरुषेयत्वात् । ननु तेषां वेदमूलकतया धर्मे प्रामाण्यमस्तु तत्राह अशब्दमिति । स्मृतिवाक्यजातं मूलभूतवेदवाक्यरहितम्, अतो वेदमूलकतयापि न तेषां प्रामाण्यसंभवः, तन्मूलभूतवेदवाक्यानां श्रावणान्यप्रत्यक्षागोचरत्वात्, श्रावणप्रत्यक्षस्य चापठ्यमानेषु तेष्वप्रसरात्, पठ्यमानत्वे च स्मृतिप्रणयनवैयर्थ्यात् । स्मृतयस्तु न तल्लिङ्गं भवितुमर्हन्ति, तासां श्रुत्यविनाभावाभावात् । स्मृतयः प्रमाणमित्येवंविधागमोपि कृतकश्चेन्न विस्रम्भणीयः । नित्यस्तु नोपलभ्यते उपमानन्त्वदृष्टदृष्टासदृशे चार्थे न प्रसर्तुमीष्टे । अर्थापत्तिरपि स्मर्तॄणां मन्वादीनां संभवद्भ्रमप्रमादकतयाप्रामाण्यस्याप्युपपत्तेरन्यथानुपपत्यभावान्न संभवत्प्रसरा । अतः षष्ठप्रमाणगोचरत्वमेव स्मृतीनां धर्मे प्रामाण्यस्य ।

इति प्राप्ते, सिद्धान्तयति—

अपि वा कर्तृसामान्यात्प्रमाणमनुमानं स्यात् । १।३।२

अपि वेति पूर्वपक्षव्यावृत्तौ । श्रुतिमूलकतया स्मृतिः प्रमाणं स्यात्, यतः स्मृतिमूलभूतश्रुतावनुमापकं लिङ्गमस्ति स्मृतिरेव । ननु सम्भवद्भ्रमप्रमादमूलकत्वात्स्मृतेः कथं तथाविधश्रुत्यनुमापकता; तत्राह कर्तृसामामान्यादिति । 'धन्वन्निव प्रपा असि' 'स्थलयोदकं परिगृह्णन्ति' इत्यादिमन्त्रार्थवादात्मकास्मदादिप्रत्यक्षवेदमूलकस्मृतिविहितकर्मस्वस्मदाद्यनुपलब्धवेदमूलकस्मृतिविहितकर्मसु च तत्कर्तॄणां सकलवैदिकशिष्टानां वेदमूलकतया दृढपरिगृहीतस्मृतिविहितत्वस्य समानत्वादित्यर्थः । न हि वेदमूलकतया सकलवैदिकशिष्टपरिग्रहणं स्मृतेर्भ्रान्त्यादिमूलकतया वेदमूलकत्वाभावे घटते । तथा चाष्टकादिकर्म वेदमूलकं भवितुमर्हति, वेदमूलकतया वैदिकदृढपरिगृहीतस्मृतिविहितत्वादस्मदादिप्रत्यक्षवेदमूलकस्मृतिविहितप्रपादिवदिति प्रयोगो बोध्यः एवमितिहासपुराणाद्यप्युदाहार्यम् । इति स्मृत्यधिकरणम् ।

'औदुंबरीं स्पृष्ट्वोद्गायेत्' इति प्रत्यक्षश्रुतिविरुद्धा 'औदुम्बरी सर्वा वेष्टयितव्या' इति स्मृतिः प्रमाणमप्रमाणं वेति संशयः । प्रत्यक्षश्रुतिविरुद्धापि स्मृतिः प्रमाणम्, पूर्वाधिकरणन्यायेन अनुमितवेदमूलवत्त्वात् । न ह्यनुमितेत्येवानुमिता श्रुतिर्दुर्बला प्रत्यक्षेत्येव प्रत्यक्षा प्रबला । बाधिताबाधितार्थकत्वमेव हि तत्र बीजम् । न चेहान्यतरत्र तत्संभवः, उभयोरपि प्रत्यक्षानुमितयोः श्रुतित्वाविशेषात् । तथा च षोडशिग्रहणाग्रहणवद्व्रीहियववच्च विकल्प इति प्राप्ते, सिद्धान्तयति ।

विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम् १।३।३

तुरष्टकादिस्मृतिवैषम्ये । प्रत्यक्षश्रुतिविरोधे सत्यनपेक्षं मूलप्रमाणानपेक्षं श्रुतिवाक्यमेव प्रमाणं स्यात् न तु स्मृतिवाक्यम्, तस्य मूलश्रुत्यपेक्षत्वात् तथाविधश्रुतौ च प्रमाणाभावात्। ननु स्मृत्या श्रुतिरनुमीयताम्, तत्राह असति ह्यनुमानमिति । असति हि प्रत्यक्षविरोधेऽनुमानमुदेति । अस्ति चात्र प्रत्यक्षश्रुतिविरोधः । तथा च वह्नावौष्ण्यप्रत्यक्षेणेव शैत्यानुमानस्य स्पर्शनश्रुतिप्रत्यक्षेण सर्ववेष्टनश्रुत्यनुमानस्य बाधिततया सर्ववेष्टनश्रुतेर्गगनकुसुमायमानत्वात् स्पर्शनसर्ववेष्टनयोरभित्तिचित्रायितो विकल्पः । ग्रहणादिविषये तु तच्छास्त्रयोः प्रत्यक्षत्वाद्विकल्पो युक्तः ।

इतोऽपि सर्ववेष्टनश्रुतिरप्रमाणमित्याह ।

हेतुदर्शनाच्च १।३।४

लोभादिना हेतुना सर्ववेष्टनस्मृतेः प्रवृत्तिसंभवादित्यर्थः । सर्ववेष्टनस्य महतैव वाससा साध्यत्वात् तद्ग्रहणलोभेन सर्ववेष्टनस्मृतिः प्रवृत्ता स्यात् । अतो लोभादिमूलिकैवंजातीयका स्मृतिरप्रमाणम् । चकारोऽभ्युच्चये । प्रत्यक्षश्रुतिविरोधे सति स्मृत्यनुमानस्यानुन्मेषे पूर्वसूत्रेण वर्णिते परिशेषादेव यथोचितं लोभादिमूलकत्वकल्पनस्य सिद्धेः ।

अतएव वा धिकरणान्तरपरमस्तु । तथाहि सन्ति ज्योतिष्टोमे वैसर्जनाख्या होमाः 'वैसर्जनानि जुहोति' इति । तत्र 'अध्वर्युं यजमानोऽन्वारभते यजमानं पत्नी पत्नीमितरे पुत्रभ्रातरोऽहतेन वाससा सम्प्रच्छन्ना भवन्ति' इति विहितं वासः प्रकृत्य स्मरन्ति 'वैसर्जनीयं वासोऽध्वर्युर्गृह्णाति' इति । तदिदं वैदिकपरिगृहीतत्वात्प्रत्यक्षश्रुतिविरोधाभावाच्च प्रमाणम् । न च सर्ववेष्टनादिस्मृतिवल्लोभादि मूलकल्पनसंभवः । तत्र हि प्रत्यक्षविरोधात्तथा कल्पनम् । न चात्र तद्विरोधोऽस्ति येन तथा कल्प्येत । संभावनामात्रेण च लोभादिमूलकत्वकल्पनायां दानविषयस्मृतिमात्रस्य प्रामाण्योच्छेदापत्तिः । अत एवं जातीयकं स्मरणं प्रमाणमिति प्राप्ते सिद्धान्तयति ।

हेतुदर्शनाच्च १।३।४

चोऽप्यर्थे । प्रत्यक्षश्रुतिविरुद्धा स्मृतिरप्रमाणमित्युक्तम् । एषा स्मृतिस्तदविरुद्धापि न प्रमाणम् । कुतः। हेतुदर्शनात् । उक्तोऽर्थः । प्रकीर्णकतया पठ्यमानत्वेन वैसर्जनस्मृतेर्लोभादिमूलकत्वकल्पनसम्भवेऽपि मन्वादिप्रणीताष्टकादिसहपठितत्वा दानादिस्मृतीनां न लोभादिमूलकत्वावकाशः । ततश्च वस्त्रलोलुपेन केनाचिदध्वर्युणा प्रवर्तितेयं स्मृतिरप्रमाणम् । तदेवं प्रत्यक्षश्रुतिविरुद्धं लोभादिमूलकमपि स्मरणमप्रमाणमिति भाष्यानुयायी पन्थाः ।

तत्र प्रत्यक्षश्रुतिविरुद्धं स्मरणमप्रमाणमिति प्रथमाधिकरणमनुपपन्नम् । तथा हि औष्ण्यशैत्ययोः स्वरूपेण परस्परविरोधित्वाद्वह्नावौष्ण्यप्रत्यक्षेण शैत्यानुमानबाधो

युज्यते । स्पर्शनश्रुतिप्रत्यक्षेण तु सर्ववेष्टनश्रुत्यनुमानस्य बाधो न संभवति, तयोः श्रुत्योः स्वरूपेण विरोधाभावात्। अर्थतो विरोधस्तु सर्ववेष्टनश्रुत्यनुमानोत्तरकालिकस्फूर्तिको न तदनुमानप्रवृत्तिं बाधितुं क्षमते, विरोधस्य तदानीमलब्धात्मकत्वात्। प्रवृत्ते तु तदनुमाने प्रत्यक्षानुमितश्रुत्योरुभयोरपि श्रुतित्वाविशेषात्सन्नप्यर्थतो विरोधे युगपदेव तदनुष्ठानद्वयं बाधते स्पर्शनसर्ववेष्टनयोर्युगपत्कर्तुमशक्यत्वात्। कस्मिंश्चित्प्रयोगे स्पर्शनं प्रयोगान्तरे सर्ववेष्टनमित्येवं कालभेदेन तदुभयानुष्ठानन्तु निर्बाधमेव, विरोधाभावात् । तथा च व्रीहियवादिशास्त्रवत्कालभेदेन स्पर्शनसर्ववेष्टनश्रुत्योरपि प्रामाण्यं निर्बाधमिति सर्वदा तदप्रामाण्यवर्णनमनुपपन्नम्। तथा द्वितीयाधिकरणमप्यनुपपन्नम्, प्रकीर्णस्मृतीनामपि सकलवैदिकशिष्टैर्धर्मबुद्ध्या तदर्थानुष्ठानस्याद्रियमाणतया दानादिस्मृतिवत्प्रामाण्यस्यावश्याङ्गीकार्यत्वादित्यादिदूषणान्युद्भाव्य सूत्रद्वयमिदमन्यथा योजितं वार्तिके। तद्यथा —प्रथमसूत्रेऽनुष्ठाने इत्यध्याह्रियते। प्रमाणामिति पूर्वसूत्रादनुवर्तते । श्रुतिस्मृत्योर्विस्रम्भाविस्रम्भाभ्यामनुष्ठानविरोधे सति विस्रम्भानपेक्षं प्रत्यक्षश्रुतिवाक्यमेवानुष्ठाने प्रमाणं; न तु स्मृतिः, तस्या मूलभूतश्रुत्यपेक्षत्वात्। मूलभूतश्रुतिप्रत्यक्षस्य च परकीयतया तद्विस्रम्भविषये मूलानुसंधानापेक्षत्वात्। विस्रम्भणीयस्वप्रत्यक्षश्रुतिवाक्येऽसति स्मृतिमूलश्रुतिप्रत्यक्षस्य परकीयस्य विस्रम्भविषयेऽनुमानं मूलानुसंधानं क्लिष्टमपेक्ष्यते। स्वप्रत्यक्षस्य हि विस्रम्भणीयत्वात्तस्मिन्सत्यनुष्ठानप्रतीतिः स्वारसिकी ; परकीयप्रत्यक्षस्य तु विस्रम्भमूलानुसंधानसापेक्षत्वात्तस्मिन्सति नैवम् । अस्ति चात्र विस्रम्भणीया स्वप्रत्यक्षा श्रुतिः। अतः सैवानुष्ठाने प्रमाणं यावत्स्मृतिमूलश्रुतिः प्रत्यक्षतो नोपलभ्यते। तदुपलम्भोत्तरं तु द्वयोरपि व्रीहियवादिश्रुतिवद्विकल्प आदर्तव्यः ततश्च कदाचित्फलतोऽप्रामाण्यं प्रत्यक्षश्रुतिविरुद्धस्मृतेरिति सिद्धम् । हेतुदर्शनादिति सूत्रमप्यत्रैवार्थं युक्त्यन्तरपरं योज्यं स्मर्तॄणां सर्ववेष्टनश्रुतिप्रत्यक्षे सत्यपि न्यायाभासात्मकहेतुदर्शनसंभावनया विस्रम्भः प्रतिबध्यत इति ।

तदेवं योजनायामनुष्ठानपदाध्याहारे गौरवं मत्वा वर्णकान्तरं वर्णितं वार्तिके। तद्यथा —यानि वैदिकैः शिष्टैरपरिगृहीतानि शाक्यादिनिबन्धनानि त्रयीविपरीतार्थान्यहिंसासत्यवचनशमदमदानादिप्रतिकञ्चुकच्छायाबहुलानि सांख्ययोगपाञ्चरात्रादीनि च धर्मशास्त्राभासानि तेषां प्रत्यक्षादिमूलकतया प्रामाण्यं निराकृतं तर्कपादे ' सत्संप्रयोगे पुरुषस्येन्द्रियाणाम् १।१।४ ' इत्यादिसूत्रे वार्तिके। इदानीं संभावितवेदमूलतया प्रामाण्यं तेषां निराकर्तुमधिकरणमिदमारभ्यते । मन्वादिस्मृतिवत्तेषामप्यस्ति वेदमूलकतया प्रामाण्यम्। न च तन्मूलश्रुतीनां मन्वाद्यदृष्टतया कथं तत्प्रामाण्यमिति वाच्यम्। मन्वादिदृष्टवेदचतुष्टयाद्भिन्नप्रस्थानानामेव वेदानां तत्र मूलत्वसंभवात्। न च ' चत्वारो वेदा ' इति लोकवेदप्रसिद्धिविरोधः, प्रसिद्धेर्मन्वादिदृष्टमात्राभि-

प्रायकत्वात् । सर्वदा च प्रवाहनित्यतया मन्वादिस्वीकारान्नानित्यसंयोगः । अत एव ' यद्वै किञ्च मनुरवदत् ' इत्यादि संगच्छते । अस्तु वा चत्वार एव वेदा इति; तथापि वेदमूलकत्वमेषां न विरुध्यते । ऋग्यजुःसामवेदेषु हि धर्मबोधकेष्वसंख्येयाः शाखाः सन्ति । तत्र काश्चिदेव ऋषिभिर्दृष्टाः । नहि सर्वा अपि शाखाः पुरुषायुषेणापि कथमपि केनचिद्द्रष्टुं शक्याः, आनन्त्याच्छाखानामल्पत्वाच्च पुरुषायुषस्य । अत एव भरद्वाजस्य महानुभावस्यापि सर्ववेदाध्ययनाय सगर्वं प्रवृत्तस्य कतिपयशाखाध्ययनमात्रेण जराप्रवृत्तिमनधीतानाञ्च शाखानामानन्त्यादशक्याध्ययनत्वञ्च दर्शयति काठकश्रुतिः “ भरद्वाजो ह त्रिभिरायुर्भिर्ब्रह्मचर्यमुवास । त ँ ह जीर्णि ँ स्थविर ँ शयानमिन्द्र उपव्रज्यो वाच भरद्वाज यत्ते चतुर्थमायुर्दद्यां किमनेन कुर्या इति ब्रह्मचर्यमेवैनेन चरेयमिति होवाच । त ँ ह त्रीन् गिरिरूपान विज्ञातानिव दर्शयाञ्चकार । तेषां ँ हैकैकस्मान्मुष्टिमाददे । स होवाच । भरद्वाजेत्यामन्त्र्य वेदा वा एते । अनन्ता वै वेदाः । एतद्वा एतैस्त्रिभिरायुर्भिरन्ववोचथाः अथ त इतरदननूक्तमेव ' इति । अन्ववोचथाः—अधीतवानसि । अननूक्तमनधीतम् । स्पष्टमन्यत् । तथा च मन्वाद्यदृष्टमूलवेदकत्वसंभवादेषामस्ति प्रामाण्यम् । यद्यपि वेदा अप्रामाणमित्यभ्युपगच्छद्भिः शाक्यादिभिस्तद्ग्रन्थानां वेदमूलकतया प्रामाण्यानङ्गीकारात्ते कथं वेदमूलकत्वमाशङ्केरन् तन्निराकरणाय वा किमर्थमधिकरणप्रवृत्तिः । तथापि न शाक्यादीनामियं शङ्का । किन्तु वैदिकानामेव मध्ये केषांचिन्मन्दानामष्टकादिस्मृतिवत्तेषामपि वेदमूलकतया प्रामाण्यशङ्कया तत्परिग्रहः प्रसज्येतेति तामिमां शङ्कां मन्दविषन्यायेन निराकरोति विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम् । प्रमाणमित्यनुवर्तते । तु शब्दः शङ्काव्यावृत्तौ शाक्यादिग्रन्थानां वैदिकशिष्टपरिगृहीतप्रत्यक्षश्रुतिविरोधे सति मूलान्तरानपेक्षं श्रुतिवाक्यजातमेव प्रमाणं न तु तद्विरुद्धशाक्यादिग्रन्थजातम्, पौरुषेयत्वात् । न च श्रुतिमूलकतया प्रामाण्यं, मूलश्रुतौ प्रमाणाभावात् ॥ ननु स्मृत्यैव श्रुतिरनुमीयतां, तत्राह—असति ह्यनुमानमिति । असति हि प्रत्यक्षश्रुतिविरोधे मूलश्रुत्यनुमानमुदेतुमुत्सहेत । अयं भावः—वेदेषु दृढविश्रब्धमन्वादिस्मृतीनाम् । तथाविधवैदिकदृढपरिग्रहान्यथानुपपत्त्या मूलश्रुतिकल्पकत्वं युज्यते । शाक्यादिग्रन्थेषु त्विदं विपरीतं, वैदिकपरिग्रहाभावात् वेदविद्वेषिपरिग्रहाच्च । न च वैदिकपरिग्रहाभावेऽपि अहिंसादिकतिपयवैदिकार्थगन्धवासितत्वेन हेतुना मूलश्रुत्यनुमानं स्यादिति वाच्यम् । वेदविद्वेषिजनपरिग्रहेण वेदमूलकत्वव्यतिरेकस्य निश्चिततया हेत्वन्तरेणापि मूलश्रुत्यनुमानाप्रवृत्तेः । सांख्ययोगादिशास्त्रेषु वैदिकपरिग्रहो यदंशेऽस्त्युपासनादिविषये तदंशे प्रामाण्यमिष्टमेव । यदंशे तु प्रपञ्चसत्यत्वमिथ्यात्वद्वैताद्वैतादिविषये विहितस्य हिंसादोषास्तित्वादिविचारविषये च प्रत्यक्षश्रुतिविरोधोऽस्ति तदंशेऽप्रामाण्यमेव ।

पाञ्चरात्राद्यागमानां तु वैदिकविरुद्धत्वामागमप्रचुरत्वात्सर्वथैवाप्रामाण्यम् । ‘ भरद्वाजो ह त्रिभिः ’ इत्यादि सावित्रार्थवादः । तत्रानन्तपदमेकविंशतिबाह्वृच्यमित्यादिशाखापरिमाणस्यातिविस्तृतत्वपरमित्यदोषः । अतएव श्वेतकेतुं प्रकृत्य ‘ सर्वान्वेदानधीत्य ’ इति छान्दोग्यश्रुतिः संगच्छते । यद्यपि शाक्यादिनिबन्धनेषु पाञ्चरात्राद्यागमेषु च क्वचित्क्वचिद्वेदबोधितमेवाहिंसादिकमुपासनादिकं चोपनिबद्धं तदागमप्रचारसिध्यर्थमेवोपनिबद्धमिति तदनुष्ठानं वैदिकानां न तन्मूलकतया, किन्तु वेदमूलकतयैवेति । तदेवं शाक्यादिग्रन्थानामविगीतवैदिकशिष्टपरिग्रहाभावाद्वेदाविद्वेषिजनपरिग्रहाच्च न वेदमूलकतया प्रमाण्यम् । इतोपि तेषामप्रामाण्यमित्याह हेतुदर्शनाच्च । असद्धेतुदर्शनाच्चेत्यर्थः । शाक्यादिभिर्हि स्वप्रतिपाद्यानि सर्वाणि हेतुभिरेव प्रायेणोपन्यस्यन्ते ।

“ अष्टका पितृदैवत्या इत्ययं प्रसृतो जनः ।
अन्नस्योपद्रवं पश्य मृतो हि किमशिष्यति ॥
यदि भुक्तमिहान्येन देहमन्यस्य गच्छति ।
दद्यात्प्रवसतः श्राद्धं न तत्पथ्यशनं भवेत् ॥
विहितस्य पशोर्यज्ञे स्वर्गप्राप्तिर्यदीष्यते ।
स्वपिता यजमानेन किं नु तेन न हन्यते ॥
जीवस्यावरणं देहो देहस्यावरणं कुतः ।
यदि तस्यापि कार्यं स्यात्तस्यापि ह्यनवस्थितिः ॥
मलभाण्डं शुचि भवेद्बहिः क्षालनतः कथम् ।
गव्यं पयश्चेत्पीयेत मांसैः किमपराध्यते ॥ ”

इत्यादिना । न च मन्वादयः स्वप्रतिपाद्ये सर्वत्र हेतूनुपन्यस्यन्ति । न चैवं हेतुमूलकतयैव शाक्यादिग्रन्थानां प्रामाण्यं किं न स्यादिति वाच्यम् । तदीयहेतूनामसद्धेतुत्वेनासाधकत्वात् । अतोऽपि शाक्यादिग्रन्थानामप्रामाण्यमिति स्थितम् । इति विरोधाधिकरणम् ।

प्रत्यक्षश्रुतिविरोधे स्मृतीनां स्वरूपेणैवाप्रामाण्यं भाष्यकारमते, वार्तिकारमते त्वननुष्ठानलक्षणमप्रामाण्यमिति स्थितम् ; संप्रति स विरोधः क्वास्ति नास्तीति विचार्यते । इदं स्मरन्ति ‘ क्षुतजृम्भणादिनिमित्ते आचान्तेन कर्म कर्तव्यम् ’ इति । तथा च कर्ममध्येऽपि निमित्ते सत्याचमनं प्राप्यते । तथा ‘ यज्ञोपवीतिना कर्तव्यम् ’ इति स्मरन्ति । तथा च कर्ममध्ये यज्ञोपवीतस्य स्रंसनच्छेदादौ पुनर्धारणं प्राप्यते । तथा ‘ दक्षिणाचारेण कर्तव्यम् ’ इति स्मरन्ति । दक्षिणेन हस्तेनाचरतीति दक्षिणाचारः । कर्तृविशेषणस्यापि लोहितोष्णीषादिवद्विधिः । तथा च कर्मणि सव्यहस्तो निवर्तते । तदेवंजातीयकानि स्मरणानि किं प्रत्यक्षश्रुत्या विरुध्यन्ते न वा

विरुध्यन्त इति संशये सिद्धान्तमुपक्षिप्य निराकुर्वन्पूर्वपक्षी प्रत्यवतिष्ठते—

शिष्टाकोपेऽविरुद्धमिति चेन्न शास्त्रपरिमाणत्वात् १।३।५

अहिनकुलवन्न श्रुतिस्मृत्योः स्वरूपेण विरोधः। किन्तु तदर्थानुष्ठानयोरन्यतरेणान्यतरस्य बाधादेव तयोर्विरोधः। कर्ममध्ये च स्मार्ताचमनाद्यनुष्ठाने सति न कस्यचिच्छ्रौतपदार्थस्यान्वाधानादिकस्य बाधोऽस्ति। अबाधाच्च न श्रुतिविरोधः। तथाच शिष्टस्य श्रुतिविहितस्याकोपे स्मार्तपदार्थैरनुष्ठीयमानैरबाधे सति श्रुत्या विरुद्धं भवत्याचमनादिस्मरणम्। अविरोधाच्च तत्प्रमाणमिति सिद्धान्तो मन्येत चेत्, तन्न। कुतः। शास्त्रपरिमाणत्वात्। परिमीयते अवगम्यत इति परिमाणम्। कर्मणि ल्युट्। श्रुत्यवगतत्वादित्यर्थः। स्मार्ताचमनादिविरुद्धानां क्रमकालपरिमाणानामिति शेषः। तत्र क्रमस्तावत् 'वेदं कृत्वा वेदिं कुर्यात्' इत्यादिश्रुतिगम्य इति निर्विवादम्। वेदो नाम शयानवत्सजान्वाद्याकृतिविशिष्टो दर्भमुष्टिविशेषः। वेदिस्तु संमार्जनखननोद्धननादिसंस्कारविशेषैः परिष्कृता भूमिः। कालस्तु त्रिविधः प्रधानसंनिकर्षलक्षणः, प्रयोगप्राशुभावलक्षणः, पूर्वाह्णादिलक्षणश्च। तत्र पूर्वाह्णादिकालः 'पूर्वाह्णो वै देवानाम्' इत्यादिश्रुतिगम्य इति निर्विवादम्। इतरौ तु प्रयोगविधिना सर्वाङ्गसहितप्रयोगानुष्ठापकेनैकस्मिन्क्षणेऽसंभवात्साहित्यनिर्वाहार्थमाक्षिप्तत्वात्प्रयोगविधिगम्यौ। परिमाणं नाम प्रयोज्यपदार्थयत्तारूपं तत्पदार्थविधिसंघातावगतम्। तच्च किं कश्चित्पदार्थो विस्मृतः किं वा सर्वमनुष्ठितमिति संशयनिराकरणाय प्रयोगविधिरपेक्षमाणः स्वीकरोति। अतस्तदपि प्रयोगविधिगम्यम्। तत्र यदि वेदवेद्यनुष्ठानमध्ये स्मार्तं क्षुतादिनिमित्तमाचमनमनुष्ठीयेत तदा क्रमः प्रधानसंनिकर्षश्च विरुध्येत, आचमनेन व्यवधानात्। तथानुष्ठेयपदार्थाधिक्याच्छ्रौतः पूर्वाह्णादिकालः परिमाणञ्च विरुध्येत। एवं वेदवेद्यनुष्ठानमध्ये दैवाद्यज्ञोपवीतच्छेदनस्रंसनादिनिमित्ते सति तस्य यथापूर्वकरणे क्रियमाणे क्रमकालौ विरुध्येते। तथा दक्षिणहस्तेनैव कर्मकरणे प्रयोगप्राशुभावो विरुध्येत इत्येवं यथायथमूह्यम्। तथा च श्रुतिविरोधादाचमनादिस्मृतिरप्रमाणमिति पूर्वः पक्षः। अत्र भाष्यादौ व्याख्यासौकर्याय सूत्रमिदं छित्वा चेदन्तं पृथगुपात्तम्। 'तदर्थशास्त्रात्' इत्यादिवत्। चेदन्तस्य साकाङ्क्षत्वेन वाक्यत्वानुपपत्तेः सूत्रान्तरत्वासंभवात्। अत एव 'विकारशब्दान्नेति चेन्न प्राचुर्यात्' इत्यादिबादरायणसूत्रं चेदन्तेनाविभक्तमेव पठित्वा व्याचख्युर्भगवत्पादाः। एवमग्रेऽपि द्रष्टव्यम्।

सिद्धान्तयति—

अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन् १।३।६

अपि वेति पूर्वपक्षव्यावृत्तौ विरोध—कारणस्यानुष्ठानबाधस्याग्रहणे अदर्शने सति शिष्टैः प्रयुक्तान्याचमनादीनि श्रौतक्रमाद्यविरुद्धत्वेन प्रतीयेरन्। विरोधबीजस्याच-

मनादिभिः क्रमादिबाधस्याभावान्न विरोधोऽत्रेत्यर्थः। तथा हि—क्रमस्तावत्तत्तत्पदार्थ. गोचरप्रातिस्विकविधिभिर्न संबध्यते, अनाकाङ्क्षितत्वात्। किन्तु प्रयोगविधिना। स हि सर्वपदार्थाननुष्ठापयन्क्रममपेक्षते। प्रयोगविधिश्चोत्पत्तिविध्युत्पादितान्विनियुक्तांश्च पदार्थाननुष्ठापयंस्तेषु सर्वेषु प्राप्तेष्वात्मानं लभत इति निर्विवादम्। ततश्च श्रौतेषु स्मार्तेषु च पदार्थेषु सर्वेषु प्रवृत्तेषु प्रयोगविधिः प्रवर्तते। तस्मिंश्च प्रवृत्ते तदपेक्षितः क्रमः प्रवर्तमानो न तैः पदार्थैर्विरुध्यते। न च प्रयोगविधिः श्रौतसकलपदार्थ-प्राप्त्यैव लब्धात्मको न जघन्यप्रमाणकस्मार्तपदार्थप्राप्तिमपेक्षत इति वाच्यम्। स-माख्यादिदुर्बलप्रमाणकानारभ्याधीतशाखान्तरविहितयावदङ्गकलापप्राप्त्युत्तरमपि प्र-योगविधिप्रवृत्तेः शाखान्तराद्यधिकरणे वार्तिकादिषु व्यवस्थापयिष्यमाणत्वात्। एवं च स्मार्तपदार्थप्राप्तिमपि प्रयोगविधिरपेक्षत इत्यभ्युपेयम्। तथा प्रयो-गप्राशुभावरूपस्य प्रधानसंनिकर्षरूपस्य च कालस्य प्रयोगविधिलभ्यत्वादविप्रतिपन्नं प्रयोगाङ्गत्वम्। पूर्वाह्णादिकालस्य चाकाङ्क्षावशात्प्रयोगविधिनैवान्वयो न तु तत्तत्पदार्थविधिभिरिति तस्यापि प्रयोगाङ्गत्वमित्येकादशद्वितीयाद्याधिकरणे व्यवस्था भविष्यति ततश्च त्रिविधस्यापि कालस्य प्रयोगाङ्गत्वात्सकलपदार्थप्राप्त्यपेक्षत्वं सिद्धम्। परिमाणस्यापि प्रयोगविधिलभ्यत्वात्सकलपदार्थप्राप्त्यपेक्षत्वमविवादम्। न चैवं स्मार्तानामपि पदार्थानामनुष्ठाने पूर्वाह्णाद्यतिक्रमापत्तिः, तदनति-क्रमस्यापि कथंचित्संपाद्यत्वात्। अन्यथा भिन्नस्कन्नहोमादौ का गतिः। ततश्च क्रमकालपरिमाणानां श्रौतस्मार्तसकलपदार्थप्रवृत्त्युत्तरकालप्रवृत्तिकत्वात्कथं तैर्वि-रोधः? अविरोधाच्च कर्ममध्ये क्षुतादिनिमित्ते आचमनादिस्मरणं प्रमाणम् इति प्रथमं वर्णकम्।

अत्र क्रमादेः पदार्थगुणस्य पदार्थापेक्षया दुर्बलतया प्रबलैः पदार्थैर्दुर्बलक्रमादि-बाधेन शाखान्तरोपसंहारस्य शाखान्तराधिकरणे व्यवस्थापयिष्यमाणत्वात्तेनैव गतार्थ-मिदमित्यस्वरसाद्विरोधमभ्युपगम्य प्रकारान्तरेण संशयमुद्भाव्याधिकरणमिदमुत्प्रेक्षित-माकरे। तद्यथा—श्रौतानि क्रमकालपरिमाणानि प्रबलप्रमाणगम्यतया स्मार्ताच-मनाद्यर्थापेक्षया प्रबलानि, स्वरूपेण तु दुर्बलानि पदार्थान्प्रति गुणभूतत्वात्‌ स्मार्ता-स्त्वाचमनादिपदार्था दुर्बलप्रमाणगम्यतया श्रौतक्रमाद्यपेक्षया दुर्बलत्वेऽपि पदार्थ-त्वात्स्वरूपेण प्रबलाः। तदेवं प्रमाणप्रमेयबलाबलविसंवादे किं प्रमाणबलं ज्याय उत प्रमेयबलमिति संशयः। तत्र सिद्धान्तमुपक्षिप्य पूर्वपक्षी प्रत्यवतिष्ठते—शिष्टा-कोपेऽविरुद्धमिति चेन्न शास्त्रपरिमाणत्वात्। प्रमेयबलस्य ज्यायस्त्वाद्दुर्बलप्रमाण-गम्यस्याप्याचमनादिपदार्थस्य स्वरूपतो बलवत्तरस्य श्रौतैरपि क्रमादिभिर्विरोधो न युज्यते ततश्च शिष्टैः श्रुतिविहितैः क्रमादिभिः पदार्थगुणैः स्मार्ताचमनादिपदार्थस्य अकोपेऽबाधे सति तत्स्मरणं श्रुतिप्रमाणेनाविरुद्धं प्रतीयते बलवतैव हि विरोधः

श्रुतिप्रमाणं चात्र दुर्बलमिति सिद्धान्ती मन्यते चेत् तन्न। कुतः शास्त्रपरिमाणत्वात् क्रमादीनां श्रुतिसिद्धत्वात् श्रुतेश्च प्रबलप्रमाणत्वात् प्रमेयबलापेक्षया च प्रमाणबलस्य ज्यायस्त्वात्। स्वरूपतो दुर्बलैरपि प्रबलतरप्रमाणश्रुतिगम्यैः क्रमादिभिराचमनादि बाध्यत इति न तत्स्मरणं प्रमाणम् तथा हि—प्रमेयबलात्प्रमाणबलं ज्यायः प्रमेयावगमस्य प्रमाणाधीनत्वात्। न चैवमपि प्रमेयबलापेक्षया प्रमाणबलस्योपस्थित्यलाभात्कथं तस्य ज्यायस्त्वमिति वाच्यम् श्रुतिस्मृतिलक्षणं हि प्रमाणं न चक्षुरादिवदनवगतमपि प्रमेयावगतिहेतुः किंत्ववगतमेव। ततश्च प्रमेयावगमात्पूर्वमेव श्रुतिलक्षणप्रमाणावगमावश्यंभावेन तदवगमदशायामेव तद्गतबलाबलावगमात् श्रुतिस्मृतिप्रमाणबलाबलं प्रमेयबलावगमात्पूर्वमेवावगम्यते। ततश्चासंजातविरोधिप्रथमोपस्थितिकेन श्रुतिबलेन स्मृत्यबलेन च क्रमादिप्राबल्ये आचमनादिदौर्बल्ये च निर्णीते सत्याकाङ्क्षाशान्तेः पश्चात्स्मार्तप्रमेयबलस्यानादरः फलति। तस्मादाचमनादिस्मरणमप्रमाणमिति पूर्वपक्षः। सिद्धान्तयति—अपि वा कारणाग्रहणे। प्रयुक्तानि प्रतीयेरन्। अपि वेति पूर्वपक्षव्यावृत्तौ स्मार्तप्रमेयाचमनादिबाधे कारणस्य प्रमाणबलस्य स्मार्तप्रमेयाचमनाद्यवगमात्पूर्वमग्रहणेऽनवगमे सति तस्य ज्यायस्त्वाभावात् कर्ममध्ये स्मर्तृभिः प्रयुक्तान्याचमनादीन्यादरणीयतया प्रतीयेरन् तथा हि—श्रुतिस्मृतिप्रमाणयोर्न स्वरूपेणाहिनकुलवद्विरोधः, किन्तु विरुद्धप्रमेयप्रमापकतयैव। ततश्च प्रथमं प्रमाणस्वरूपालोचनेऽपि प्रमेयस्वरूपावगमवेलायां तद्गतबलस्यावगततया तेनासंजातविरोधिप्रथमोपस्थितिकतयाधिकेन स्मृतिप्रमेयबलेनाचमनादीनां श्रौतक्रमादिभिरबाध्यत्वे प्रत्युत तद्बाधकत्वे तत्स्मरणस्य च प्रामाण्ये निश्चिते सति तत एवाकाङ्क्षाशान्तेस्तदुत्तरमवगम्यमानमपि प्रमाणबलमाकिंचित्करमेव भवति। न चैवमाचमनादिभिः क्रमादिबाधे श्रुतेरत्यन्तबाधापत्तिरिति वाच्यम्। तस्याचमनादिनिमित्तोपनिपाताभावे सावकाशत्वात् तस्मात्सत्यपि विरोधे बलवद्विरोधाभावाद्युक्तमाचमनादिस्मृतीनां प्रामाण्यम् इति द्वितीयं वर्णकम्।

तदिदमप्यनुपपन्नम्, क्रमादीनामाचमनादीनाञ्च विरोधाभावस्य स्फुटमनुपदमुपपादितत्वेनाभ्युपगम्य विरोधं पूर्वपक्षप्रवर्तनायोगात्। एवमन्यान्यपि दूषणानि भाष्योत्प्रेक्षिते शिष्टाकोपाधिकरणद्वयेऽस्मिन्नुद्भाव्य वार्तिककारः सूत्रद्वयमन्यथा व्याचष्ट। तत्राद्यं सूत्रं पूर्वाधिकरणचोद्यनिराकरणपरगुणसूत्रतया व्याचख्यौ। 'अपि वा कारण' इत्यादि द्वितीयसूत्रं चाधिकरणान्तरपरतयायोजयत्। यथा 'विरोधे त्वनपेक्षं स्यादिति' सूत्रे शाक्यादिग्रन्थानां वेदवादविरोधादप्रामाण्यमुपक्षितम्। तत्राक्षिप्य समाधत्ते—शिष्टाकोपेऽविरुद्धमिति चेन्न शास्त्रपरिमाणत्वात्। शाक्यादिग्रन्थेषु योंऽशः वेदवादैर्विरुध्यते तत्राप्रामाण्यमस्तु। शिष्टाकोपे शिष्टं वेदोप-

दिष्टं न कोपयति न बाधते यस्तस्मिन्नंशे त्वाहिंसासत्यवचनशमदयावैराग्यध्यानाभ्या-सादिधर्मबोधके प्रामाण्यमविरुद्धम्। तत्र वैदिकशिष्टपरिग्रहस्य मुख्यस्य प्रामाण्यहेतोः सत्त्वेन मन्वादिस्मृतिवत्प्रामाण्यावश्यंभावादिति चेत्, तन्न कुतः शास्त्रपरिमाणत्वात्। परिमाणेति कर्मणि ल्युट्। धर्मप्रतिपादकशास्त्राणां परिमितत्वात्। याज्ञवल्क्यादिभिर्हि धर्मस्थानानि परिगणितानि 'पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः। वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश' इत्यादिना। न च तदन्तर्गताः शाक्यादिग्रन्थाः। अतस्तत्राहिंसादिवादा अपि श्ववराहादिचर्मदृतिनिक्षिप्तक्षीरघृतादिवद्धर्मप्रमाणतया नादर्तव्याः। ततश्च शाक्यादिग्रन्थेषु निबद्धमप्यहिंसादिकं न ततो ज्ञातं सदनुष्ठितं श्रेयसे भवति, किन्तु वेदतस्तन्मूलकस्मृत्यादितो वा परिगणितादेव प्रमाणात्। न चाहिंसादिविषये तेषां संवादादेव प्रामाण्यं किं न स्यादिति वाच्यम्। एवं सत्यधिगतार्थविषयतया शाक्यादिग्रन्थानां सुतरां प्रामाण्यानुपपत्तेः। अत एवेदानीन्तनसंग्रहवाक्यावगतमपि वेदाविरुद्धमनुष्ठितं न श्रेयसे भवति। तदाहुर्भट्टपादाः — 'यथैवान्यायविज्ञाताद्वेदाल्लेख्यादिपूर्वकात्। श्रमेणाधिगताद्वापि धर्मज्ञानं न संमतम्। तथातिक्रान्तवेदोक्तमर्यादाव्यवहारिणाम्। संवादिष्वपि वाक्येषु नेष्यते धर्महेतुता' इति। एतेन वेदाविरुद्धेष्वपि पाञ्चरात्रादिभागेषु धर्मप्रामाण्यं दूरत एव निरस्तम्, पाञ्चरात्रादीनां परिगणितेषु धर्मस्थानेष्वनन्तर्भावात्। तथा च मन्वादिस्मरणं 'या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः। सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः' इत्यादि। वेदबाह्याः वेदेषु तन्मूलकस्मृत्यादिषु परिगणितेष्वनन्तर्भूताः। तथा च पौराणिकाः—

'स्वतन्त्रा आगमाः सर्वे निर्मूलाः परिकीर्तिताः।
पाञ्चरात्रादिमार्गाणां वेदमूलत्वमास्तिके॥
नहि स्वतन्त्रास्ते तेन भ्रान्तिमूला निरूपणे।
तथापि योंऽशःस्तन्त्रेषु वेदैस्तु न विरुध्यते॥
सोंऽशः प्रमाणमित्युक्तं केषांचिदधिकारिणाम्।
तस्माद्धि वेदबाह्यानां रक्षणार्थाय पापिनाम्॥
विमोहनाय शास्त्राणि करिष्यावो वृषध्वज।
पाञ्चरात्रादयो मार्गाः कुण्डादीनां हितावहाः॥'

इत्यादि। तदेवं पाञ्चरात्रादीनां वैदिकान्प्रत्यननुष्ठापकत्वान्न धर्मे प्रामाण्यम्।

इतः परमाचारविषयः।

वसन्तोत्सवादिसदाचाराः प्रमाणमप्रमाणं वेति संशयः । तत्राचाराणां स्मृतिवदेव वैदिकपरिग्रहादेः प्रामाण्यहेतोः सत्त्वेऽपि स्मृतिवन्मन्वादिभिरनिबद्धत्वादप्रामाण्यम् । यदि हि वसन्तोत्सवादिमूलश्रुतयो मन्वादीनां प्रत्यक्षाः स्युस्तदाष्टकादिवदेव निबध्येरन् । यदि तेषामप्यप्रत्यक्षास्तर्हि तत्सत्त्वे प्रमाणाभावः । 'आचारश्चैव साधूनाम्' इत्यादि सामान्यतो निबन्धनं तु श्रुतिसंवाद्याचारप्रामाण्यपरं भविष्यति । किञ्च श्रुतिस्मृतिविरुद्धस्याप्यर्थस्य शिष्टैः पूर्वैरिदानींतनैश्चाचरणान्न तदाचाराणां प्रामाण्यसंभवः । तथा हि —'प्रजापतिरुषसमभ्यैत्स्वां दुहितरम्' इति प्रजापतेः स्वदुहितृगमनम्, इन्द्रस्याहल्यागमनम्, नहुषस्य शचीवाञ्छा, वसिष्ठस्य पुत्रशोकार्दितस्यात्महत्योपक्रमः, पुरूरवस उर्वशीवियोगादात्महत्योपक्रमः, विश्वामित्रस्य चण्डालयाजनम्, भीष्मस्यानाश्रमिणोऽवस्थितिः, तस्य दाशरथेश्चापत्नीकस्य क्रतुहरणम्, धृतराष्ट्रस्यान्धस्य यागः, युधिष्ठिरस्यार्जुनभार्यापरिणयः, तस्यैवाचार्यविप्रद्रोणवधार्थमनृतभाषणम्, अर्जुनस्य मातुलदुहितृसुभद्रापरिणयः, व्यासस्य गृहीतब्रह्मचर्यस्य भ्रातृभार्ययोरम्बिकाम्बालिकयोर्विधवयोर्धृतराष्ट्रपाण्डूत्पादनम्, तस्यैव दास्यां विदुरोत्पादनम्, इदानींतनानामप्याहिच्छत्रमथुरानिवासिब्राह्मणानां सुरापानम्, उदीच्यानां केसर्यश्वतरखरोष्ट्रोभयतोदत्क्रयविक्रयभार्यानुपनीतसहभोजनम्, दाक्षिणात्यानां मातुलदुहितृपरिणयः, आसन्दीस्थभोजनादीनि च । एवं प्रतिपुरुषजातिकुलावस्थितान्यधर्माचरणान्यनन्तानि । ततश्च श्रुतिस्मृतिविरुद्धान्याचरतां वसन्तोत्सवाद्याचारविषये कथं प्रामाण्यम् । किञ्च सदाचारानुष्ठातारः शिष्टाः शिष्टानुष्ठिताश्च सदाचारा इत्यन्योन्याश्रयात्सदाचारस्वरूपमेव दुर्निरूपम् । तस्मान्न सदाचाराणां धर्मप्रामाण्यमिति प्राप्ते सिद्धान्तयति—

अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन् ।१।३।६

अपि वेति पूर्वपक्षव्यावृत्तौ । आचारप्रामाण्यविरोधकारणस्योक्तदोषसमूहस्याग्रहणे । निमित्तसप्तम्येषा । अग्रहणाद्धेतोः शिष्टैः प्रयुक्तानि वसन्तोत्सवाद्याचरणानि प्रमाणतया प्रतीयेरन् पूर्वपक्षोक्तदोषाभावात् । आचारस्य प्रामाण्यमविरुद्धमिति यावत् । तथा हि – यदुक्तं मन्वादिभिर्विशिष्यानिबद्धाः सदाचारा इति तन्न । मन्वादिभिर्हि लाघविकैर्मूलश्रुतीर्विशिष्य दृष्ट्वैव 'सदाचारः प्रमाणम्' इति सामान्यतो निबद्धम् । न चैतावता कश्चिद्विरोधः । यदपि सामान्यनिबन्धनं प्रत्यक्षश्रुतिसंवाद्याचारविषयं भविष्यतीति, तदपि न । तथा सति श्रुत्यैव तदवगमसंभवेन निबन्धनवैयर्थ्यात्,

'वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनाम्' ......

इति पृथगुपादानवैयर्थ्यात्, चकारवैयर्थ्याच्च । यत्तु प्रजापत्यादेर्विरुद्धाचरणमुपन्यस्तं

तत् ' प्रजानां पतिरादित्यः उषसं प्रातःसंध्याम् आदित्यादुद्भूतत्वेन स्वां दुहितरम् उद्यन्नैभ्यत्, इत्येवमर्थान्तरपरतया, अमनुष्यत्वेन शास्त्रीयविधिनिषेधाविषयत्वाद्वा तेजोविशेषाद्वा तेषां न दोषावहम्, इतरेषां तु दोषावहमेवेति नातिप्रसङ्गः । उक्तं च भट्टपादैः—

' श्रुतिसामान्यमात्राद्वा न दोषोऽत्र भविष्यति ।
मनुष्यप्रतिषेधाद्वा तेजोबलवशेन वा
यथा वा न विरुद्धत्वं तथैतद्गमयिष्यते ' १।३।७ त. वा.

इति । प्रजापतीन्द्रनहुषाद्याचरणेषूदाहृतेषु विशिष्य दोषोद्धारस्तु वार्तिकादावेवानुसंधेयः । प्रत्यक्षवेदादिविहितानुष्ठातृत्वेन च शिष्टत्वस्यान्यतः सिद्धेर्नान्योन्याश्रयः । अतः सदाचारोऽपि धर्मे प्रमाणम् ।

सन्ति देशाचाराः प्राच्यानां होलाकादयः, दाक्षिणात्यानामाह्नीनैबुकादयः, प्रतीच्यानां गणपूजादयः, उदीच्यानामुद्वृषभादयः । ते किमाचारविशेषा यथादेशं व्यवतिष्ठन्ते उत सर्वे सर्वत्रेति संशयः । तत्र पूर्वपक्षयति—

अनुमानव्यवस्थानात्तत्संयुक्तं प्रमाणं स्यात् १।३।१३

अनुमीयते श्रुतिरनेनेत्यनुमानं लिङ्गम् आचारः । तस्य व्यवस्थानात् देशभेदेन व्यवस्थितत्वात् तत्संयुक्तं देशभेदसंयुक्तमेव श्रुतिरूपं प्रमाणं मूलभूतं कल्पनीयं स्यात् ।

सिद्धान्तयति—

अपि वा सर्वधर्मः स्यात्तन्न्यायत्वाद्विधानस्य १।३।१४

अपि वेति पूर्वपक्षव्यावृत्तौ । न देशविशेषेणाचाराणां व्यवस्था, किन्तु सर्वधर्मः स्यात् सर्वे आचाराः सर्वेषां स्युः । कुतः । विधानस्य तन्न्यायत्वात् । विधीयते अनुमीयते यत्तद्विधानं मूलभूतश्रुतिवाक्यम्, तस्य तन्न्यायत्वात् । नीयते प्राप्यते अनेनेति न्यायः । सर्वधर्मत्वप्रापकत्वादित्यर्थः । कल्पिता मूलभूता हि श्रुतिः न प्राच्यत्वादिकर्तृविशेषणमादाय होलाकाद्यधिकारं व्यवस्थापयितुं शक्नोति । आकृतिव्यक्तिगुणसंस्थानक्रिया हि कर्तृपरिच्छेदिकाः । प्राच्यत्वादि च ' ब्राह्मणो बृहस्पतिसवेन यजेत ' इत्यत्रेव न जातिः, नापि 'भार्गवो होता भवति' इत्यत्रेव व्यक्तिः ' शुक्लो होता ' इतिवच्च न गुणः, 'अन्यूनानतिरिक्ताङ्गा ऋत्विजः' इत्यत्रेव च नावयवसंनिवेशः 'सोमयाजी संनयेत् ' इत्यत्रेव क्रिया च न भवति ।

ननु तर्हि एकद्वित्रिपञ्चशिखाचाराणामपि कुलभेदेन व्यवस्था न स्यादित्यत आह—

दर्शनाद्विनियोगस्य १।३।१५

उपपत्तिरिति शेषः । विविधं व्यवस्थया नियुज्यत इति विनियोगः । ' यत्र बाणाः संपतन्ति कुमारा विशिखा इव ' ' यथर्षिशिखा निदधाति ' इति

शिखार्थवादस्मृतिदर्शनात् । ‘ पञ्चावत्तं जमदग्नीनाम् ’ इत्यवदानकल्पवद्गोत्रभेदेन व्यवस्थितस्य शिखाकल्पनस्योपपत्तिः, गोत्रभेदस्य व्यवस्थितत्वात् । न हि प्राच्य-त्वादिकं व्यवस्थितम्, तद्व्यवस्थापकलिङ्गाभावात् ।

ननु दाक्षिणात्यादौ बृहत्व-श्यामत्व-लोहिताक्षत्वादिलिङ्गमस्तीत्यत आह––

लिङ्गाभावाच्च नित्यस्य १।३।१६

नित्यस्य व्यवस्थितस्य कर्तुः यत् लिङ्गं व्यवस्थापकं तस्याभावात् । अदाक्षि-णात्यादिष्वपि बृहत्त्वादिसत्त्वादिति भावः ।

आख्या हि देशसंयोगात् १।४।१७

प्राच्यत्वादिसमाख्यापि न कर्तृविशेषणम् । हि यतः देशविशेषसंयोगात्प्राच्या-दिसमाख्या प्रवर्तते । नह्येवंविधा समाख्या कर्तृविशेषणं भवितुमर्हति, देशसंयो-गस्याव्यवस्थितत्वात् ।

ननु प्राच्यादिसमाख्याया देशनिमित्तत्वे दक्षिणदेशादिगतेषु प्राच्यादिषु प्राच्या-दिव्यवहारो न स्यात् । अतो निमित्तान्तरप्रयुक्तैव समाख्या वाच्या सा कर्तृविशे-षणं भवत्वित्याशङ्क्य परिहरति––

न स्याद्देशान्तरेष्विति चेत्स्याद्योगाख्या हि माथुरवत् । १।३।१८

चेदन्तं व्याख्यातम् । दक्षिणदेशादिगतेष्वपि प्राच्यादिषु प्राच्यादिव्यवहारः संभ-वति । कुतः । हि यस्मात्कारणात् योगाख्या ‘ सोऽस्य निवासः ’ ‘ तत्र जातः ’ ‘ तत आगतः ’ इति व्याकरणसिद्धेषु योगेष्वन्यतमयोगयुक्ता प्राच्यादिसमाख्या देशान्तरगतेष्वपि न विरुद्धा देशसंयोगं न व्यभिचरति माथुरवत् । यथा मथुराने-वासनिमित्तः माथुरशब्दस्तद्वत् । अतो देशविशेषप्रयुक्तैव प्राच्यादिसमाख्या न त्वेषा कर्तृविशेषणमाचारान्व्यवस्थापयितुमीष्टे, यः प्राच्यो दक्षिणदेशादिगतः तस्य कथंचित् ‘ तत आगतः ’ इत्यादियोगसंभवेऽपि तत्पुत्रपौत्रप्रपौत्रादीनां कथमपि प्राच्यादिसमाख्याया असंभवेन तदाचारस्य दर्शनेन व्यभिचारात् । अतः प्राच्य-त्वादिकं न कर्तृविशेषणमिति न तत आचारस्य व्यवस्था युज्यते ।

ननु मास्तु प्राच्यत्वादिकं कर्तृविशेषणतया आचारव्यवस्थापकम्, कर्मधर्म-तया तद्व्यवस्थापकमस्तु इति शङ्कते––

कर्मधर्मो वा प्रवणवत् १।३।१९

वाशब्दः शङ्कायाम्। प्राच्यदेशो होलाकादेः दक्षिणदेश आह्नीनैबुकादे इत्येवं देशविशेषः कर्मधर्मः तस्य तस्याचारस्य व्यवस्थितमङ्गम्, प्रवणवत् यथा ‘ प्राचीनप्रवणे वैश्वदेवेन यजेत ’ इति वैश्वदेवाङ्गम्। प्राचीनप्रवणो देशस्तद्वत् प्राचनिप्रवणः प्राचीनावनतः ।

परिहरति––

तुल्यं तु कर्तृधर्मेण १।३।२०

तुशब्दः शङ्कानिवृत्तौ। न प्रागादिदेशजातमाचारव्यवस्थापकमङ्गं भवितुमर्हति। तद्धि कर्तृधर्मेण श्यामत्वादिना तुल्यमव्यवस्थापकत्वे तन्निवासिभिस्तदनाचरचरणात् ततो निर्गतैश्चाचरणात्। तस्माद्धोलाकाद्याचारः सर्वधर्मः।

इदमेव हि शास्त्रस्य निशातीकरणं नाम। न मयेदानीमेवैषा कल्पना तत्रभवतां पुरतः स्थाप्यते। अपि तु मन्वादिभिरप्येवमेव शास्त्रस्य निशातनं समीकृत्य व्यवस्थापितो धर्मः परं मीमांसाशास्त्रं नोपदेशशास्त्रम् "वेदोऽखिलो धर्ममूल" मित्यादिवत्, अपित्विदं परीक्षाशास्त्रमिति ज्ञापयितुं तत्रभवान् जैमिनिः "तस्य निमित्तपरीष्टि" रिति सूत्रयांबभूव। स्थापिते त्रयाणां व्यवस्थया प्रामाण्ये तयैव परिपाट्या सूत्रवदेवानुष्ठातव्यमिति मे मतं निश्चितम्। अन्यदपि विद्यत एव कश्चन महान्भेदः। यथा वा मीमांसया मीमांसितं प्रमेयम् अनुष्ठेयसूत्रविरोधश्चेत् तदेवोपेक्ष्यमिति हि शास्त्रडिण्डिमः। परं न ह्येतावता अमीमांसितव्यं। भवति—

"धर्मे प्रमीयमाणे हि वेदेन करणात्मना।
इतिकर्तव्यताभागं मीमांसा पूरयिष्यति॥
आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना।
यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः"॥ १२।१०६ मनुः।

आर्षं ब्रह्मज्ञानं, धर्मोपदेशं धर्मज्ञानम्, तयोर्मीमांसा जैमिनिबादरायणाभ्यां प्रवर्तिता। संदेहनिवृत्तिरेव मीमांसायाः फलं येषां संदेहस्तैरवश्यं सा कर्तव्येत्यपि नूनम्। मनुरप्यस्मरत्।

" सर्वं तु समवेक्ष्येदं निखिलं ज्ञानचक्षुषा।
श्रुतिप्रामाण्यतो विद्वान् स्वधर्मे निविशेत वै"॥२।८

अत्र कुल्लूकभट्टा अपि="सर्वं शास्त्रजातं वेदार्थावगमोचितं मीमांसाव्याकरणादिकं ज्ञानमेव चक्षुस्तेन निखिलं तद्विशेषेण पर्यालोच्य वेदप्रामाण्येनानुष्ठेयार्थमवगम्य स्वधर्मेऽवतिष्ठेत भगवत्पादैरपि। १।२ ब्र० सू० भा०। "सत्सु तु वेदान्तवाक्येषु जगतो जन्मादिकारणवादिषु तदर्थग्रहणदार्ढ्यायानुमानमपि वेदान्तवाक्याविरोधि प्रमाणं भवन्न निवार्यते। श्रुत्यैव च सहायत्वेन तर्कस्याभ्युपगतत्वात्" न चायं न्यायो वेदान्ते इत्येव मन्तव्यम्। न्यायस्य सर्वत्र समानत्वात्। अतो विचारेणैतदेव सिध्यति संस्कारानुष्ठानविषये गृह्यसूत्रं तत्तच्छाखीयं नः प्रमाणमिति। अन्यदपि न चैषां संस्काराणामुत्पत्तिविधिं सूत्रे प्रतिजानीमहे। यत्किंचिदङ्गजातं हि तमेव विधिमाश्रित्य स्मरति मनुः। किंबहुना तमेव संस्कारमनुवदति यथा जातकर्म तथैव यथासूत्रमेवावादीत्—

" प्राङ् नाभिवर्धनात्पुंसो जातकर्म विधीयते ।
मन्त्रवत्प्राशनं चास्य हिरण्यमधुसर्पिषाम्"॥ म-२।२९

तमेवानूद्य तत्रत्यामेवेतिकर्तव्यतां मनसि निधाय अवश्यकर्तव्यतामनुजनांतो । निदर्शनमात्रमिदम्। अतःसूत्रोक्तामेवेतिकर्तव्यताङ्गजातं चालमिति मन्वानोऽहमस्मिन्कर्माणि उद्युक्त इति सारम् । इयं हि ब्राह्मण्यसरणिरुत्तरोत्तरं विचार्यैवानुष्ठानं ग्रन्थकरणं च । पश्यत विद्यमानेष्वपि निर्णयसिंधुप्रभृतिग्रन्थजातेषु रचयां बभूवैव धर्मसिंधुम् । भूयांश्च मतभेदस्तत्र, वेदस्य समकालिकत्वात्सूत्राणाम् । तत्सूत्रितानि ह्यङ्गानि श्रुताविव स्युर्यथा संस्कारा अपि पंचयज्ञादयस्तैत्तिरीये श्रूयन्ते, स्वाध्यायाद्यपि । नात्र प्रकृतिविकृतिभावोऽस्ति । यदि स्यात्प्रकृतिविकृतिभावस्तर्हि स्याद्गार्ह्ये कर्मण्यतिदेशः सर्वसाधारणमेवेदं कर्म न ह्यस्य कर्मणः कुतश्चित्प्रकृतेः कस्यांचिद्विकृतावतिदेशोऽस्ति । यत्प्रधानविधिरङ्गविध्यान्वितः पठ्यते सा प्रकृतिः । यथा दर्शपूर्णमासौ । यत्प्रधान विधिरङ्गविधिरहितः पठ्यते सा विकृतिः । यथा सौर्यः । न च दर्शपूर्णमासविधौ प्रयाजविधेरिव एतत्कर्मविधेः कस्मिंश्चित् प्रधानविधौ शेषभावोऽस्ति । यतः सर्वाण्येवकर्माणि प्रकृत्य धर्मविधानम् । इतः परमतिदेशविचारः प्रस्तूयते ।

प्रकर्षेणाङ्गोपदेशो यत्र क्रियते सा प्रकृतिः । कृत्स्नाङ्गविषयत्वमुपदेशस्य प्रकर्षः । विकृतिषु तु विशेषाङ्गोपदेश एव क्रियते । अङ्गांतराणि तु प्रकृतेरतिदिश्यन्ते तथा हि विधायकं वाक्यमुपदिशन्ति । उपदेशकं, अतिदेशकं चेति । इत्थमिदं कर्तव्यमित्युपदेशः, यथा लोके दधिघृतसूपशाल्यादिभिर्देवदत्तो भोजयितव्य इति । तथा वेदेऽपि प्रयाजावघातादिप्रकारेण दर्शपूर्णमासाभ्यां स्वर्ग—सुखविशेषं—कुर्यादिति । तद्वदिदं कर्तव्यमित्यतिदेशः । यथा लोके देवदत्तवद्यज्ञदत्तो भोजयितव्य इति वेदेऽपि सौर्येण कुर्याद्यथा आग्नेयेनेति दर्शपूर्णमासयोर्हि — ऐन्द्राग्नः आग्नेयः, उपांशुयाजः· आग्नेयः, अग्नीषोमीयः, उपांशुयाजः इति षड्यागाः सन्ति तेषु कस्येति कर्तव्यतया सौर्यः कार्य इत्याशङ्कायामाग्नेयस्येत्यतिदेशस्तत्रोक्तः। अयमुपदेशः शब्दान्तरादिभिः श्रुतिलिङ्गादिभिः श्रुत्यर्थादिभिश्च विचित्रः भेदविनियोगक्रमानवबोधयति । शब्दान्तरादिभिः कर्मभेदः द्वितीयाध्यायद्वितीपादे पूर्वतन्त्रे द्रष्टव्यः । तथापि सामान्यतः जिज्ञासूनामुपयोगायात्र लिख्यते ।

" शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात् "

इत्यत्र 'सोमेन यजेत हिरण्यमात्रेयाय ददाति, दाक्षिणानि जुहोति,' इत्यादौ यजतिददातिजुहोत्यादिशब्दात्कर्मभेद उक्तः । तथा

" एकस्यैव पुनः श्रुतिविशेषादनर्थकं हि स्यात् "
" पृथक्त्वविशेषात्संख्यया कर्मभेदः स्यात् "

" संज्ञा चोत्पत्तिसंयोगात् । "

इत्यादिसूत्रैरपि कर्मभेदः प्रतिपादितः ।

" श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां
समवाये पारदौर्बल्यमर्थविप्रकर्षात् । "

इत्येवं श्रुत्यादिभिर्विनियोग उक्तः । यथा ' कदाचनस्तरीरसि नेन्द्र ' इत्यस्य मन्त्रस्य लिंगेन इंद्रस्योपस्थानाङ्गत्वं प्राप्तं, ऐन्द्या गार्हपत्यम् उपतिष्ठत इति द्वितीयया तृतीयया वा श्रुत्या गार्हपत्योपस्थाने विनियोगः कृतः । एवं लिंगादिभिरपि कृतो विनियोगस्तृतीयाध्याये द्रष्टव्यः । पंचमाध्याये च, श्रुत्यर्थपाठस्थानादिभिः कर्मक्रमः प्रतिपादितः । तथा च सूत्रं " श्रुतिलक्षणमानुपूर्व्यं तत्प्रधानत्वात् " । " अर्थाच्च " क्रमेण वा नियम्येत क्रत्वेकत्वे तद्गुणत्वात् । " स्थानाच्चोत्पत्तिसंयोगात् " " मुख्यक्रमेण वाङ्गानां तदर्थत्वात् " । प्रवृत्या कृतकालानां " इत्यादि उदाहरणानि च पंचमाध्याये पूर्वतंत्रे द्रष्टव्यानि । इत्थं उपदेशविचारसंक्षेपः । अयम् उपदेशः पूर्वतंत्रे पूर्वषट्के विचारितः । अतिदेशस्तु उत्तरषट्के । स तत एवावगन्तव्यः । विस्तरभिया नेह तन्यते । लक्षणं च तस्येत्थं—

" अन्यत्रैव प्रणीतायाः कृत्स्नाया धर्मसन्ततेः ।
अन्यत्र कार्यतः प्राप्तिरतिदेशोऽभिधीयते ॥
प्रकृतात्कर्मणो यस्मात् तत्समानेषु कर्मसु ।
धर्मोपदेशो येन स्यात् सोऽतिदेश इति स्मृतः " ॥

स च वचनातिदेशः—नामधेयातिदेशः - चोदनालिङ्गातिदेशः—इत्यादिप्रकारकस्तत्रैव द्रष्टव्यः । समानमितरच्छ्येनेनेति वचनातिदेशः । मासमग्निहोत्रं जुहोतीति—नामधेयातिदेशः । सौर्यं चरुं निर्वपेत् इत्युक्तसौर्यचरौ चोदनालिङ्गेन आग्नेयधर्मातिदेशः । तथाच परिष्कृतं अतिदेशलक्षणम्—यः पदार्थो यादृशोपकारद्वारा यदङ्गत्वेनावधारितस्तस्य पदार्थस्य तत्संबंधित्वेन रूपेण तादृशोपकारद्वारैवान्याङ्गताबोधकं प्रमाणम् । भवति हि प्रकृतिवद्विकृतिः कर्तव्येत्येवमादिकं वाक्यं प्रयाजादिपदार्थानां यादृशोपकारद्वारा आग्नेयाङ्गत्वेन अवधारितानाम् आग्नेयादि संबन्धित्वेन रूपेण तादृशोपकारद्वारा सौर्याद्यङ्गत्वबोधकमिति । एतावता इदं सिद्धं भवति— उपदेशेन वा पदार्थाः प्राप्नुवन्ति, अतिदेशतो वा । विकृत्यभावात् उक्तसंस्कारेषु अतिदेशतः पदार्थप्राप्त्यभावः प्रसिद्ध एव, यथा यत्र क्वचेत्यादिना होमधर्मा उक्ताः । तद्वदेव पाकयज्ञानामेतत्तंत्रं इति नहि तावता प्रकृतिविकृतिभावः संगच्छते उपदेशस्तु यावतां कर्मणां, यावतां च तदङ्गानां स्वगृह्ये उक्तः तावान् अनुष्ठेयः । श्रौतातिदेशस्यापि स्रुक्संमार्जनादिवद्विकल्प एव श्रेयान् । यत्र तु सूत्रकारेणोक्तस्तत्र तु विचार्यानुष्ठातव्य एव ।

एतेन अग्रिमगुणोपसंहारानित्यत्ववचनजातेन च ' बह्वल्पं वा स्वगृह्योक्तमिति वचनं अशक्तविषयमिति वदन्तः परास्ता वेदितव्याः । इत्थं कर्मणामवश्यानुष्ठेयतां विदित्वा क्व नामेदं समुत्पन्नं कर्मेति विभावनायां वेद एवेत्यसुसूचत् आश्वलायनस्तत्र तत्रेति यथा— उपनिषदि गर्भलम्भनमित्यादि— अत्र भाष्यं कस्यांचिदुपनिषदि गर्भाधानमारभ्यात्मज्ञानपर्यन्ताः संस्काराः समाम्नाताः । विज्ञायते इत्युक्तिमात्रेणापि श्रुतिमूलत्वमिति आचार्यशैल्या लक्ष्यते । जातकर्मादयश्च संस्काराः समाम्नाता बृहदारण्यके । अतस्तावदशोधयं क्व नु खल्वेतानि साङ्गानि कर्माणि उपलभेयम् । स्मृताविति ज्ञात्वा स्मृतयस्तावदवालोकयम् । तर्हि तत्र तत्र तावत् अङ्गानि कानिचित् यत्र क्व वा यथाकथंचिद्विक्षितान्यवालोकयम् । पुनरप्यविचारयं तर्हि वेदोदितानि कर्मणां प्रायस्तावदग्निसाध्यानां विधायके श्रौतगृह्यसूत्रे । ते सम्यगवलोकिते गुरुमुखाच्चेत् तत्र सर्वापि अनुष्ठेयव्यवस्था सूपलब्धा । आश्वलायनादयश्च सूत्रयितार आचार्याः । तदुक्तिरेवेत्यस्माभिरनुष्ठेयानि कर्माणि इदमेव सुनिश्चितम् । आगमप्रवणैराचार्यैर्यः पन्था व्यरचि स एवास्माभिरिदानीन्तनैर्निःसंदेहं अनुसर्तव्यः। यथा वा पितृपरम्पराप्राप्तं रत्नाकरं परिरक्षन्ति, यावद्द्रव्यं व्ययीकृत्यापि भूम्यादिकं स्वमिति परिपालयन्ति, तद्वदेवायं बहोः कालादारभ्यानुवृत्तो वैदिककर्मानुष्ठानपथो रक्षितव्य इति उपदेश आचार्याणाम् ॥

यद्यपि यथाकथंचित् ये केचन स्वीयग्रन्थे प्रतिपादयेयुः परं न तथैते ऋषयः । उक्तं हि भगवत्पादैः । "यद्यपि प्राकृताः प्राणिनो न जन्मान्तरव्यवहारमनुसंदधाना दृश्यन्त इति तथापि न प्राकृतवत्—ईश्वराणां भवितव्यम् । तथाहि प्राणित्वाविशेषेऽपि मनुष्यादिस्तम्बपर्यन्तेषु ज्ञानैश्वर्यादिप्रतिबन्धः परेण परेण भूयान् भवन् दृश्यते । तथा मनुष्यादिष्वेव हिरण्यगर्भपर्यन्तेषु ज्ञानैश्वर्याभिव्यक्तिरपि परेण परेण भूयसी भवतीत्येतच्छ्रुतिस्मृतिवादेषु असकृदनुश्रूयमाणं न शक्यं नास्तीति वदितुम् । वेदेन हि प्राणिनां सुखप्राप्तये धर्मो विधीयते दुःखपरिहाराय च अधर्मः प्रतिषिध्यते । " तावेव धर्माधर्मौ अनुष्ठानाय सुकरौ यथा स्यातां तथा स्वे स्वे गृह्ये श्रौते प्रतिपादयन्त्याचार्याः । ऋषयस्तु मन्त्रद्रष्टार इत्यपि सर्वशास्त्रसम्मतम् प्रत्यक्षकृतधर्माण इति यास्कोऽपि ।

अन्यच्चैतत्— श्रौतकर्माणि (अग्नित्रयसाध्यानि) चास्मिन् कलिमालिने कले न भवन्ति । सामग्र्यभावात्, सत्यामपि सामग्र्यामास्तिक्यबुद्ध्यभावात् यत्र च सामग्री यत्र चास्तिक्यं तत्र यथाशास्त्रं कारयितॄणामभावः । ये च चिकीर्षन्ति, तत्त्वबुभुत्सापूर्वकं इतिकर्तव्यतां पृच्छन्ति ते नास्तिका इति अस्मदीया एव केचन वावदूकास्समर्थयन्ति न च तेषां संशयात्मकं ज्ञानं निरस्यन्ति । ततस्तैः किं कर-

णीयं ! भागधेयमिति तूर्णां स्थेयं कालेयोऽयं महिमेति भगवान्वा स्मर्तव्यः। यत्र मीमांसा कृता चेत् नास्तिकत्वं समायाति हन्त स देशः कालश्च!! ॥

आसीदयं कस्मिंश्चित्काले पण्डितपरिप्लुतो देशः। यस्य चाद्यापि विवेकहीनचरैः पाश्चात्यादिभिरपि जोघुष्यते सर्वविद्यासु, कलासु, सुप्रतिष्ठित आर्यदेश इति नाम महाशयाः , पश्यत कस्मिन् विषये नास्त्यत्र प्रणीतो ग्रंथः ? कानि चात्र शास्त्राणि मीमांसारहितानि, देशकालविभिन्नत्वात् भवतु नाम प्रक्रियायां कश्चन भेदः। परं प्रमेये तु नास्ति कोऽपि भेदः कथमपि तत्तद्ग्रन्थघटितः। सुप्रसिद्धं चैतन्मीमांसावाङ्मयं जैमिन्यादिभिः प्रवर्तितं, तेनैवाकार्षुः सफलं जन्मेति जेगीयते तदीयं यशः। पतञ्जलिकपिलादयः सांख्यशास्त्रं रचितवन्तः कयाचन अभिनवपरिपाट्येति तोष्टूयते तदीयं चरितम् ॥ परमाणव एव जगतः कारणमिति प्रतिष्ठापयन्तः काणादादयस्स्वात्मानं निचिक्षिपुस्तर्कशास्त्रे इति स्तूयन्ते तेऽपि महाभागाः। अपरे च विद्यारण्यवाचस्पत्यप्पय्यदीक्षितप्रभृतयो वेदवेदाङ्गवेत्तारोऽभूवन्निति भागधेयं नो राष्ट्रस्य ॥ इदानीन्तना अपि अभिनवपरिपाट्या रहस्यादिग्रन्थान्विरचय्य स्वीयान् जनान् स्वधर्ममभिन्यवीविशन्त इत्याप्यानन्दास्पदम्। गदाधर–पार्थसारथिमिश्र–नागोजीभट्टप्रभृतयः, आसेतुहिमाचलं ग्रन्थग्रथने पटव इति न केषांचिद्विमतम् ॥

सर्वशास्त्रप्रमेयेषु अभिनवपरिपाट्या प्रतिपादनपरायणाः

प्रामाण्यबुद्धिर्वेदेषु साधनानामनेकता।
उपास्यानामनियमश्चैतद्धर्मस्य लक्षणम् ॥ १ ॥

भाष्यम्—धर्मलक्षणं वक्तुमयमुपक्रमः। ननु कोऽसाविदानीं धर्मलक्षणवचनप्रसङ्गः। सूत्रयामास किल जैमिनिः प्राचीनतन्त्र "चोदनालक्षणोऽर्थो धर्म" इति। आह। बहवोऽत्र वादिनां पन्थानः श्रूयन्ते प्राचीननवीनानां—यथाहुः प्राचीनाः——

सांख्या ह्यन्तःकरणस्य मनसो वृत्तिविशेषं यागाद्यनुष्ठानजन्यं धर्ममाहुः। शाक्यास्तु चेतसो ज्ञानस्य ज्ञानान्तरजन्यां वासनाम्। आर्हतास्तु–कार्यारम्भकान् परमाणून् पुद्गलाख्यान्।

वैशेषिकास्तु–आत्मनो विशेषगुणम्। प्राभाकरास्तु अपूर्वम्। मीमांसका हि—अलौकिकश्रेयःसाधनत्वेन विहितक्रियात्वं विहितत्वं वा धर्मत्वम्। तदेतत्सर्वं श्लोकवार्तिके संगृहीतं भट्टपादैः

" अन्तःकरणवृत्त्यादौ (सां०) वासनायां च चेतसः (बौ.)
पुद्गलेषु च पुण्येषु (आर्हताः) नृगुणेऽ(वैशे.) पूर्वजन्मनि ॥

मीमांसकाः—

तस्मात्तेष्वेव धर्मत्वं धर्माणामिति च दर्शनात् ।
लिङ्गसंख्याविनिर्मुक्तो धर्मशब्दो निदर्शनम् ॥

अपूर्वनिष्ठैव सुखकारणतावच्छेदिका धर्मत्वं जातिरिति नैयायिकाः ॥ नवीनास्तु समुद्रयानमेवं धर्म इति । शिखासूत्रधारणमेवेत्यपरे, प्रार्थनासमाजं गत्वा तत्रैक एव परमेश्वरः प्रार्थनीय इत्यन्ये । केवलमन्त्रानुसारिक्रियात्वमित्येके, तीर्थाद्यटनस्नानक्षौरादीनि, । चोदनान्तर्गतत्वादिति एकदेशिनः । संन्यासमात्रं गृहीत्वेतस्ततोऽटनमेवेति केवलाः । जटाजूटिनो भूत्वा वैराग्याकाङ्क्षिणां भ्रमणमित्यपि आस्तिकंमन्यमानाः। नामस्मरणमेव परमो धर्म इत्यप्याहुः। इति विमते धर्मे ' लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति न्यायेन धर्मलक्षणे उक्ते चायं धर्म एतद्व्यतिरिक्तोऽधर्म इति जानीयुः परावर्तेरंश्च तस्मादित्ययमुपक्रमः । तत्र तावल्लक्षणान्तर्गतप्रथमपदार्थः प्रामाण्यबुद्धिर्वेदेष्विति—बहवः किलात्र विवदन्ते । वेदाः पौरुषेया, अपौरुषेया वा, प्रमाणं अप्रमाणं वा, नित्या अनित्या वा स्वतः प्रमाणं, परतः प्रमाणं वा, उभयतो वा, अनुभयतो वेति प्रामाण्यवादे प्राचीनतंत्रे निरणायि परं सर्वेषां मते प्रामाण्यबुद्धिरावश्यकीति । पौरुषेयत्वेन वा भवतु अपौरुषेयत्वेन वा सर्वथाऽस्माकं वेदः प्रमाणं इति प्रमाणत्वेन वेदा यत्रांगीक्रियन्ते । सोऽस्माकं धर्मः, तथा च साधनानामनेकता—वेदैः प्रतिपादितं यत्साध्यं परलोकगतिरिति तत्र साधनानां बहुत्वं यथा वा प्रकृतिपुरुषज्ञानादेव मोक्ष इति, आत्मस्वरूपज्ञानादेव मोक्ष इति कर्मण एव निरतिशयसुखं प्राप्यते इति । भक्तिरेव मुक्तिप्रदा इति परं नहि साध्ये केषांचिद्विप्रतिपत्तिस्तावती। यथा वा साधने। अतः साधनानामनेकत्वमस्मद्धर्मस्य लक्षणम् । सा चानेकता अस्मद्धर्मे एवोलभ्यते नान्यस्मिन् यावने हौणे, बौद्धे, आर्हते वेति । उपास्यानामनियमः—सोऽपि खल्वेतास्मिन्धर्मे एवोपलभ्यते यथावौपनिषदे काण्डे, शाण्डिल्योपासना, दहरोपासना, प्राणोपासना, सूर्योपासना, हिरण्मयपुरुषोपासना, अविद्योपासना, विद्याविद्योभयोपासना, ॐकारोपासना, इदानीमपि बह्व्य एवोत्पन्नाः साधिकाः— नान्यत्र तथा दृश्यते, यावनादिषु तु एक एवोपास्यः ।बौद्धार्हतादिष्वपि, बुद्धतीर्थकराद्येक एव भजनीयः। अतस्त्रीणि पदान्येकीभूय यं धर्मं समर्थयन्ति स एवास्माकं धर्म इति वयं ब्रूमहे व्यावर्तकं चैतल्लक्षणं—व्यावर्तयति चैतदन्यधर्मान्--यथा— पदप्रयोजनं प्रामाण्यबुद्धिरिति नोक्तं चेत्—प्रातिभे धर्मे, अतिव्याप्तिः । प्रतिभया तु साधनानामनेकत्वं उपास्यानामनियमश्च साधयितुं शक्यः, अतस्तत्पदं आवश्यकं, यत्र क्वापि साधनानां बाहुल्ये, उपासनानां अनियमे सत्यपि वेदेषु प्रामाण्यबुद्धेरभावात् न तानि साधनादीनि अस्माभिरङ्गीक्रियन्ते । इति—अत एवेदं

व्यावर्तकं लक्षणम् न स्वरूपलक्षणम् । अस्यां कालिकमर्यादायां इदमेव लक्षणम् सुस्थमिति वयमपि प्रतिजानीमहे ॥ १ ॥

धर्ममेनं समालम्ब्य विधिभिः संस्कृतस्तु यः ।
श्रुतिस्मृतिपुराणोक्तैः क्रमप्राप्तैरथापि वा ॥२॥

एनं पूर्वलक्षणलक्षितं धर्मं समालम्ब्य, सम्यगालम्बनं कृत्वा यः पुरुषो विधिभिर्गृह्यसूत्रोक्तसंस्कारैस्संस्कृतः, सम्यक्त्वमापन्नः कथंभूता विधयः श्रुतिस्मृतिपुराणोक्ताः, क्रमप्राप्ताः यथेदानीं संकल्पयन्ति, श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं, इति । तादृशक्रमेणानुष्ठितैस्संस्कारैः संस्कृतः अथापि —अथवा एकैकं वा प्रमाणीकृत्य श्रुत्युक्ताः संस्कारविधयः स्मृत्युक्ता वा पुराणोक्ता वानुष्ठेया इति तैः संस्कारैस्संकृतः पुरुषः ।

स्वे स्वे कर्मण्यभिरतः श्रद्धाभक्तिसमन्वितः ।
शास्त्रोक्ताचारशीलश्च स वै हिन्दुः सनातनः ॥३॥

स्वे, स्वीये 'स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वो स्त्रियां धने' इत्यमरः । आत्मीयवाची स्वशब्दोऽत्र ग्राह्यः । यथा वा स्वाध्यायोध्येतव्य इत्यत्र स्वशब्दं आत्मीयवाचिनं गृहीत्वा 'पितृपरंपराप्रात इत्यर्थः क्रियते तद्वदेवात्र, स्वे,–पितृपरंपराप्राप्तं यत्कर्म तत्रैवाभिरतः सन् — आसमन्तात् यद्यपि परिस्थित्यनुसारेण यथाकथं वा तिष्ठासेत् तथापि स्वे स्वे इति आदरार्थे द्विरुक्तिं कृत्वा स्वे कर्मणि अनुसंधानमावश्यकमित्येवाशयः । श्रद्धाभक्तिसमन्वितः — श्रद्धा भक्तिश्चैते द्वे पदे समानार्थके इति कश्चन ब्रूयात् तं प्रति ब्रूयात् — श्रद्धाशब्देनात्र वेदेषु प्रामाण्यबुद्धिः, विधिभिः संस्कारानुष्ठानं, शास्त्रोक्ताचारशीलत्वमित्यादि ग्राह्यम्, नाम विश्वास इत्यपरनामधेयः कश्चन प्रत्ययविशेषः । भक्तिश्च, ईश्वरोपासना अथवा तत्तत्प्रमेयघटितसिद्धान्तानुसारं प्रमेयविशेषोपासना, ताभ्यां समन्वितः सम्यगन्वितः — युक्तः । ननु किमर्थमयं प्रत्ययविशेषः, भक्तिश्च । उच्यते–प्रत्ययविशेषस्य सर्वत्र दृश्यमानत्वात्, प्राचीनैरप्यङ्गीकृतत्वात् वेदेष्वपि तत्र तत्रोक्तत्वात् यथा, तैत्तिरीयसंहितायां "देवमनुष्या इष्टाय श्रद्दधते" १।६।८। श्रद्धाभक्तिसमन्वित इतिप्रत्ययविशेषोत्पादकसाधनान्यपि स्वीकुर्महे 'प्रत्यक्षं चैतत्स्नानाचमनादियुक्तस्य देवपूजादावैकाग्र्यातिशयदर्शनात् इति–श्रत्–धा इति पदच्छेदः । भक्तिरिति उपासनोच्यते, भजनं भक्तिः भज सेवायां स्वार्थे क्तिन् । अयं मामकीन इति भगवान् यथा जानीयात्तथा सेवनामिति यावत् । शास्त्रोक्ताचारशीलश्च, शास्त्रेण उक्ता ये आचारास्त एव शीलत्वेन योऽभिमन्यते सः यद्यप्यहमिदानीमिदमाचरिष्ये तथापि नेदं मे शीलम् । हाः कष्टं, दुर्धरोऽयं समयः यत्स्वदेशे, स्थित्वापि न वयं शीलमपि परिपालयितुं पारयामहे —आस्तां अनयैव रीत्या प्रासङ्गिकोऽयमाचारो न स्वाभाविको नापि शैल इति ज्ञात्वा शैलमाचारं पारयितुं यतामहे । अहो

सुप्रसिद्धतमगीतायामपि "तस्माच्छास्त्रं प्रमाणं ते" इत्येवोच्यते व्याचख्युश्च तथैमेवं श्लोकं गीतारहस्येऽभिनवयुक्तयुक्तिजटिले ग्रन्थे । एवं च शास्त्रोक्तं शीलं आचारशीलं च, शास्त्रोक्ताचारशीलं च यस्यास्ति--स वै, स एव, वै एवकारार्थो द्रष्टव्यः । यथा --आत्मा वा अरे इत्यत्र । हिन्दुः– वैदिकः सनातनः अनादिकालमारभ्य स्थित इत्यर्थः। स्वे स्वे कर्मणीत्ययं श्लोकः पूर्वश्लोकद्वयस्य निगमनरूप इति ज्ञेयं विपश्चिद्भिः ।

वेदार्थज्ञानस्यावश्यकतां निरूपयामः ॥ तत्रैव प्राचीनानां आदरदर्शनात् । अत्र मतद्वयं – अक्षरग्रहणं गुरुमुखात्कृत्वाध्ययनसंपात्तिरिति शांकरदर्शनानुसारिणः। पाठमात्रस्याध्ययनशब्दवाच्यत्वेनार्थावबोधस्याविहितत्वाद्वेदार्थज्ञानमप्रसक्तमिति चेत् न, विधेर्बोधपर्यवसायित्वात्। एतच्च भाट्टमतानुसारिभिर्बहुधा प्रपंचितम्। आम्नायते च–

यदधीतमविज्ञातं निगदेन वै शब्द्यते ।
अनग्नाविव शुष्कैन्धो न तज्ज्वलति कर्हिचित् ॥

"स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् । योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा" ॥ "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति, एवं तर्हि ज्ञानस्य पृथग्विधानादध्ययनं तस्य पाठमात्रमिति चेत् । अस्तु नाम वर्णयन्ति चैवमेव शांकरदर्शनानुसारिणः । क्रतुविधिभिरेवानुष्ठानान्यथानुपपत्त्या वेदार्थज्ञानस्य प्रापितत्वात् नैतद्विधेयमिति चेत् । तर्हि तद्विधिबलाद्वेदनमात्रेण स्वतन्त्रं किञ्चिदपूर्वमस्तु । श्रूयते ह्यनुष्ठानज्ञानयोः स्वतन्त्रं पृथक्फलम्––

"सर्वं पाप्मानं तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेद" इति अल्पप्रयाससाध्येन वेदनेन तत्सिद्धौ बह्वायाससाध्यमनुष्ठानं व्यर्थं स्यादिति चेन्न, तरणीयाया ब्रह्महत्याया मानसवाचिकत्वादिभेदेन तारतम्योपपत्तेः । मनसा संकल्पिता वाचाऽभ्यनुज्ञाता, परहस्तेन कारिता, स्वयंकृता, पुनः पुनः कृता, चेत्येवं तारतम्येन व्यवस्थिता ब्रह्महत्यानेकविधा ! अतस्तत्तरणमप्यनेकविधम् यथा स्वर्गो बहुविधस्तद्वत् । "अग्निहोत्रं जुहुयात्स्वर्गकामः" दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्याद्युच्चावचकर्मणामेकविधफलासंभवात्स्वर्गो बहुविधः। यत्तु कर्मानुष्ठानकालीनं वेदनं तत्कर्मफल एवातिशयं जनयति, "उभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद इति विद्वदविद्वत्प्रयोगौ प्रकृत्य यदेव विद्यया करोति तदेव वीर्यवत्तरं भवति" इत्याम्नानात् । अङ्गोपास्तिविषयमेतद्वाक्यमिति चेत् न न्यायस्य समानत्वात् । अस्ति हि अस्यार्थस्योपोद्बलकं लिङ्गम् 'प्रजापतिः किल सोमयागेभ्योऽर्वाचीनानग्निहोत्रपौर्णमास्यामावास्यानामकान् परस्परमुच्चावचान् यज्ञान् ससर्ज । सोमयागांश्चाग्निहोत्रेभ्यः श्रेष्ठानग्निष्टोमोक्थ्यातिरात्रनामकान्परस्परमुच्चावचान्

सृष्ट्वा प्रथमसृष्टेष्वग्निहोत्रादिष्वभिमानविशेषेण वर्गद्वयं तुलयोदमिमीत एवं वृत्तान्तं जानतोऽग्निहोत्रादिभिरग्निष्टोमादिफलं भवति । तथा च ब्राह्मणमाम्नायते । " प्रजापतिर्यज्ञानसृजताग्निहोत्रं चाग्निष्टोमं च पौर्णिमासीं चोक्थ्यं चामावास्यां चातिरात्रं च तानुदमिमीत यावदग्निहोत्रमासीत्तावानग्निष्टोमो, यावती पौर्णमासी, तावानुक्थ्यो, यावत्यमावास्या तावानतिरात्रो य एवं विद्वानग्निहोत्रं जुहोति तावदग्निष्टोमेनोपाप्नोति तावदुपाप्नोति य एवं विद्वान् पौर्णमासीं यजते यावदुक्थ्येनोपाप्नोति य एवं विद्वानमावास्यां यजते यावदतिरात्रेणोपाप्नोति तावदुपाप्नोति इति तदेतद्वेदनस्य स्वतंत्रफलत्वे सर्वत्र लिङ्गम् । किञ्च तत्तद्विधिसमीपे य एवं वेद इति वचनानि वेदनादेव फलं ब्रुवते । तान्यर्थवाद इति चेत् अस्तु नाम सहामहे एवैतमपराधम् । तेषां वचनानां विधेयार्थप्रशंसापरत्वात् । तर्हि यत्परः शब्दः स शब्दार्थ इति न्यायेन स्वार्थे प्रामाण्यं नास्तीति चेन्न । महातात्पर्यस्य विधेयविषयत्वेऽप्यवान्तरतात्पर्यस्य स्वार्थविषयत्वानिवारणात् वेदनफलवचनानि तु नानुवादकानि नापि बाध्यानि तस्मादर्थवादत्वेऽप्यस्त्येषां स्वार्थे प्रामाण्यं इति कृष्णयजुर्वेदोपोद्घाते विद्यारण्याः । मीमांसकानां मतेऽपि अध्ययनविषये कटाक्षो विद्यते यथा ॥

" अतः पदपदार्थसंगतिमधिगम्य न्यायविचारतो यथावद्वेदार्थज्ञानमात्रं नित्यतया विधीयते । तदपि स्वस्वपित्रादिक्रमागतवेदभागशाखामात्रस्य नेतरस्य वेदभागस्य, स्वाध्यायविधौ स्वपदानर्थक्यापातात् तथा च स्वशाखाया अध्ययनं अर्थज्ञानं च नित्यम् । इतरशाखानामध्ययनमर्थज्ञानं च क्रतुविधिप्रयुक्तमार्थिकमेव न च तत्र स्वाध्यायविधेर्व्यापारः एवं च स्वशाखायामपि स्वाधिकृतकर्मविधिभागमात्रस्यार्थज्ञानेनापि कर्मसिद्धिरप्रत्यूहा । पुरुषस्तु परं प्रत्यवेष्यतीति तृतीये ज्ञाते वा वचनं न ह्यविद्वान्विहितोऽस्ति इत्यत्र भाष्यवार्तिकयोः स्पष्टम् ।

" एवंविदमेवाध्वर्युं कुर्वीत नानेवंविदं, एवंविदमेव होतारं कुर्वीतनानेवंविदम् " इत्यादि वाजसनेयकादिशाखागतानि स्रुगादानादि ब्राह्मणतदर्थविदामेवाध्वर्य्वादिवरणपराणि च कृत्स्नवेदार्थज्ञानस्यावश्यकतां गमयंति । अनुष्ठानाभावेऽपि वेदार्थावगमोऽपि न कर्तव्य इति कस्मादागतं न जानीमः । अतस्तदर्थमवश्यमनुष्ठातव्यो यत्नः ।

" अस्ति ह्यनुष्ठातुमशक्तस्य सर्वत्र भावनया तत्पूर्तिः । अत एव बृहदारण्यके सृष्टिप्रकरणे ब्रह्मचारिणो गार्हस्थ्यधर्मं वाञ्छतस्तदसम्भवे सत्युपासनया तत्पूर्तिराम्नायते । " एकाकी कामयते जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेति स यावदप्येतेषामेकैकं न प्राप्नोत्यकृत्स्न एव तावन्मन्यते तस्यो कृत्स्नता मन एवास्यात्मा, वाग्जाया, प्राणः प्रजा, चक्षुरमानुषं वित्तं, चक्षुषा हि तद्विन्दते श्रोत्रं दैवं श्रोत्रेण हि तच्छृणोत्यात्मैवास्य कर्मात्मना हि कर्मकरोति (बृ० १।४। १७) आत्मा देहः, वेदगम्यं मन्त्रादिकं दैवं वित्तम् । अनेनैतावन्निश्चेतुं शक्यम् ।

वेदानामक्षरग्रहणं गुरुमुखात्कर्तव्यम् । ततस्तदर्थावगमेऽवश्यं यत्नवता भवितव्य-मध्ययनमध्यापनं चेदानीं कर्तव्ये इत्यर्थः । ये किलात्र श्रद्धाजाड्याद्वेदविक्रयो भवतीति पाठनं न कुर्वन्ति ते सर्वथोपेक्ष्या अनादरणीयाश्च श्रद्धालवो वैदिकाः जीविकार्थे किल त्रीणि साधनानि ब्राह्मणानां धर्मसूत्रकारैस्समाम्नातानि अध्यापनं याजनं, आदानं नान्यत्किमपि तदपि न कृतं चेज्जीवनं कथं भवेत् मया वेद-शास्त्राण्यधीतानीति प्रतिगृहं गामं गामं द्रव्यं संपादनीयमपमानोवा, इति क्व विहितं तद्भगवानेव वेत्तु ।

अत्र तु पुनः विचारान्तरं उपन्यस्यते । तत्र अपूर्वार्थे स्वीकृतानामपि अंगा-नामिच्छातः करणं अभाणीत् वृत्तिकारः—जैमिनिः किल कर्मणां राशिद्वयं प्रति-ज्ञाय तयोर्लक्षणं पृथक् सूत्रयामास ॥ यथा——तानि द्वैधं गुणप्रधानभूतानि ॥ ' येषां तूत्पत्तावर्थे ' इति पूर्वसूत्रोपात्तान्याख्यातानि तच्छब्दः परामृशति । ता-न्याख्यातानि गुणप्रधानभूतानि गुणं प्रधानं च कर्म प्रकृत्यंशाभिधेयत्वेन प्राप्तानि द्वैधं । तथाच अंगत्वं नाम—परोद्देशप्रवृत्तकृतिकारकत्वेन विहितत्वम् ॥ तच्च आरा-दुपकारकं संनिपत्योपकारकं चेति द्विविधम् । तत्र कर्मांगद्रव्याद्युद्देशेन विधीयमानं कर्म सान्निपत्योपकारकम् । यथावघातप्रोक्षणादि । तच्च दृष्टार्थमदृष्टार्थं दृष्टादृष्टार्थं च दृष्टार्थमवघातादि । अदृष्टार्थं प्रोक्षणादि । दृष्टादृष्टार्थं पशुपुरोडाशयागादि । तद्धि द्रव्यत्यागांशेनादृष्टं देवतोद्देशेन च देवतास्मरणं दृष्टं करोति । इदमेव चाश्रयि कर्म इत्युच्यते ; स्रुचः संमार्ष्टि इत्यनेन विहितः स्रुचां संमार्गः अ-पूर्वार्थे स्वीकृतः—पूर्वतन्त्रे—यथा—तुल्यश्रुतित्वात् वा इतरैः स धर्मः स्यात् । ' स्रुचः ' इति द्वितीया कर्मकारके विहिता कर्मत्वं चेप्सिततमत्वे सति भवति " कर्तुरीप्सिततमं कर्म " (पा० सू० १।४।४९) इति कर्मसंज्ञाविधानात् । क्रतुसाधनत्वेन च स्रुचां युक्तमीप्सिततमत्वम् । अतः प्रधानभूताः स्रुचः । तथा सति संमार्जनक्रियाया गुणकर्मत्वमवघातवद्भविष्यति । यदि स्रुक्षु दृष्टोऽतिशयो न स्यात् तर्ह्यपूर्वं कल्पनीयम् ॥ यया कया अपि प्रक्रियया सर्वथा क्रियतामङ्गानां अपूर्वार्थत्वमेवेति मीमांसासिद्धांतः । तथा चात्रांगलक्षणानि दीयन्ते——सन्निपत्यो-पकारकं——द्रव्याद्युद्देशेन विधीयमानं कर्म । ——आरादुपकारकं द्रव्याद्य-नुद्दिश्य केवलं विधीयमानं कर्म । गुणकर्म——फलभावनाकरणयागादिसाधनद्रव्य-गतदृष्टादृष्टान्यतरसंस्कारजनकं कर्म यथा अवघातादि संमार्गादि च । प्रधानकर्म—फलभावनाकरणयागादौ द्रव्यनैरपेक्ष्येण साक्षादपूर्वाधायकं कर्म । एतानि च अंगानि गृह्यसूत्रे यावन्ति उक्तानि तावन्त्येव कार्याणि इति मतं मीमांसकानां, गृह्यविदां च अतएवोक्तं गृह्यविद्भिः——बह्वल्पं वा स्वगृह्योक्तं यस्य कर्म प्रकीर्तितम्। तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् इति ।

(कर्मणि[1] वेदमंत्रस्यैवावश्यकतानिरूपणम्)

पुरुषविद्यानित्यत्वात् कर्मसम्पत्तिर्मंत्रो वेदे ॥

" आह—यदि नामाख्यातोपसर्गनिपातानामपरिहीना शक्तिर्देवानप्यभिधातुम् अथ किमर्थं वेदे मन्त्रः समाम्नातः ? ॥ उच्यते—" पुरुषविद्यानित्यत्वात् कर्मसम्पत्तिर्मन्त्रो वेदे " । पुरुषेषु मनुष्येषु विद्यायाः विज्ञानस्यानित्यत्वात् पुरुषविद्यानित्यत्वाद्धेतोः कर्मसंपत्तिः फलेन संपादनम् अविगुणकर्मसंपत्तिः , फलसंपन्नमेव कर्म भविष्यतीत्येवमर्थं वेदे मन्त्रः समाम्नातः, इति वाक्यशेषः । इतरथा हि पुरुषेषु विज्ञानस्यानित्यत्वाद्यथार्थं नाभिदधते देवान्नामाख्यातोपसर्गनिपातैरशिक्षितत्वान्मन्दशिक्षितत्वाद्विस्मरणशीलत्वाद्वा देवानामपराध्येयुरयथावत्प्रयुंजानानामाख्यातोपसर्गनिपातान् । ततश्च सर्वार्थप्रत्यक्षदृशो देवाः स्वल्पमप्ययथावदभिधानं न मर्षयन्ति विगुणमेतदिति । विद्याऽनित्यत्वात्तदभावे नेयुः कर्मणि । ततश्च देवताहीनं कर्मफलं संपद्यते । न च केवलं फलासंपत्तिः, ॥ किं तर्हि ? दुरितहेतुको दोषोऽपि स्यात् । तस्मादेत एव नामाख्यातोपसर्गनिपाताः प्रयोगानुपरिपाटीनियमार्थं मन्त्रत्वेन वेदे समाम्नाताः । नहि नामाख्यातोपसर्गनिपातान् परित्यज्य मन्त्राः सन्ति । एतदेव चतुर्विधं पदजातं प्रयोगानुपरिपाट्या कयाचिदवस्थितं मन्त्रा इत्युच्यन्ते ॥

आह—कथमनित्यत्वं विद्यायाः पुरुषेष्विति ? । उच्यते—इह येन वाक्यविरचनानुक्रमेण अर्थवस्त्वनुप्रेक्ष्यते,— ' मनुष्य एवमेव ब्रूयात्— ' त्वं गंतु देवदत्तम् इति । स तेनैव वाक्यविरचनानुक्रमेण बद्धमपि सन्तमर्थं न शक्नोति प्रतिपादयितुम् । एवमनित्यत्वं विद्यायाः पुरुषेषु । तद्दोषं वा मनुष्यान् प्रति, सर्वेषामेव मनुष्याणामनित्यत्वाद्विद्यायाः । अयमपि हि येन वाक्यानुक्रमेण वक्ति मनुष्यः कंचिदर्थं न तेनैव श्वा शक्नोति वक्तुम् ॥ तत्र यदुक्तं— ' किमर्थं मन्त्रो वेदे समाम्नातः इति । इदं न युक्तम् ॥ पुरुषविद्यानित्यत्वात्कर्मफलसंपत्यर्थं मन्त्रो वेदे समाम्नातः ' इति । अन्ये मन्त्रविचारा आकरतोऽवगन्तव्या इति ॥

---

१ निरुक्तकारस्य भगवतो यास्कस्येदं मतम्

पाकयज्ञान्तर्गतसंस्कारपठिता मन्त्रा एकश्रुत्यैव प्रयोक्तव्याः अतोऽस्माभिः स्वरसहिता न लिखिता इत्यर्थः । ऋषिदैवतछन्दसां विनियोगस्य च ज्ञानमावश्यकं नतु तदुच्चारणमपि उक्तं च कात्यायनेन ऋग्वेदीयायां सर्वानुक्रमणिकायाम् (१) मन्त्राणां ब्राह्मणार्षेयच्छंदोदैवतविद्याजनाध्यापनाभ्यां श्रेयोऽधिगच्छतीति । एताभ्यामेवानेवंविदो यातयामानि च्छंदांसि भवन्ति । स्थाणुं वर्च्छति गर्तं वा पात्यते प्रमीयते वा पापीयान् भवतीति विज्ञायते । अयमर्थः—मन्त्राणां विहितानां पदार्थानामनुष्ठानकाले स्मारकतया मननसाधनभूतानां विनियोज्यवेदभागानां संबंधिनां, ब्राह्मणादीनां ज्ञाता । याजनाध्यापनाभ्यां, करणाभासाभ्यां श्रेयः प्रशस्यतरमन्नपुत्रादिमोक्षान्तं फलं अधिगच्छतीति पाठादाधिक्येन गच्छति लभते । अथाज्ञं निन्दति–एताभ्यां याजनाध्यापनाभ्यामनेवंविदः सर्वानुक्रमण्यज्ञस्यैव पुनर्यातयामानि । यातः प्राप्तो यामः फलरक्षाविषयमौदासीन्यं यैस्तानि यातयामानि नास्य तारका वेदा इत्यर्थः । अथवा यातयामो जीर्णे भुक्तोच्छिष्टेऽपि चेति निघण्टौ जीर्णे भुक्तोच्छिष्टे वाऽन्नादौ वर्तते । यातयामशब्दो नीरसत्वादिसाम्याच्छंदःसु वर्तते, छंदांसि वेदा भवंति संपद्यन्ते । अत एवानेवंवित् स्थाणुं वृक्षादिजातिमृच्छति प्राप्नोति । वा खलु गर्तं नरके कूपे पङ्कवारिमध्ये मत्स्यमण्डूककच्छपादिज्ञातिषु पात्यते । अवश्चाल्यते । कैः । देवैः । प्रमीयते वा कदाचिदपि वेदोक्तमायुर्न भजते । पापीयान् भवतीति दस्युम्लेच्छादिजातिषु जायते । इति विज्ञायते इत्येवं सामवेदार्षेयब्राह्मणे आम्नातम् । विज्ञायते विशेषेण ज्ञायतेऽवगम्यते सर्वमहर्षिभिः । सामवेदब्राह्मणादेव साक्षादवगतमिदं अतो नात्र सूत्रापेक्षा–तथा चैतद्ब्राह्मणं शारीरकभाष्ये १।३।८।२० भगवत्पादा ऊचुः " यो ह वा अविदितार्षेयच्छंदोदैवतब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्च्छति गर्तं वा प्रतिपद्यते – तस्मादेतानि मन्त्रे मन्त्रे विद्यात् " इति ॥ अतः सूत्रकारा अपि ऋष्यादि न सूत्रयामासुः । ज्ञानं तु सर्वानुक्रमणिकाग्रन्थजातेन सुलभमित्यन्यत्र विस्तरः । मन्त्राश्चैकश्रुत्या पठनीयाः इत्यत्र सौत्रं प्रमाणम् । " ता एकश्रुति सन्ततमनुब्रूयात् " १।२।८ श्रौतसू० आश्वला० ताः पाकयज्ञपठिता ऋचो मन्त्रा एकश्रुतिसन्ततं चानुब्रूयात् । " उदात्तानुदात्तस्वरितानां परः सन्निकर्ष ऐकश्रुत्यम् ॥ १।२।९।११ ऐकश्रुत्यलक्षणमुच्यते । उदात्तानुदात्तस्वरितानामभिव्यञ्जका ये प्रयत्ना आयामविस्रम्भाक्षेपास्तेषामन्यतमस्यैकस्यैवात्यन्तसन्निकर्षेण सजातीयप्रयत्नाव्यवधानेन यदुच्चारणं तदैकश्रुत्यमित्यर्थः । सन्ततमित्यन्यदेव । अन्यत्रापि, विभाषा छन्दसीति सूत्रे नागोजीभट्टानां मतम् । सर्वे मन्त्रा अध्ययनकालेऽपि ऐकश्रुत्यैव पठनीया न त्रैस्वर्येणेत्येव नियमः । ऋष्यादि तु यत्रोपलब्धं तत्र दत्तमेवास्माभिर्यावच्छक्यम् । इतः परं अन्यत् अग्रिमभागे प्रदीयेत । मन्त्रलक्षणमभियुक्तानां " मन्त्रोऽयम् " इति समाख्यानं ऋक्सामयजुरन्यत-

मत्वमिति वा ॥

तच्चोदकेषु मन्त्राख्या । २।१।७।३२ जै०

तेषां प्रयोगसमवेतानां पदार्थानां चोदकेषु प्रकाशकेषु मन्त्राख्या मन्त्रसंज्ञा ॥ कर्मसमवेतार्थस्मरणफलेषु वेदभागेषु मन्त्रत्वमित्यर्थः । ब्राह्मणलक्षणम् ।

शेषे ब्राह्मणशब्दः । २।१।८।३३ जै०

मन्त्रेभ्यो विशिष्टे वेदभागे ब्राह्मणमितिशब्दः ॥ लघूपायेन लक्ष्यावगम इति लक्षणप्रयोजनम् । सूत्रलक्षणम् ।

' अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥ म० भा० छा०

भाष्यलक्षणम्

सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः । म० भा० छा०

एतद्व्यतिरिक्तं वृत्तिटीकादि । इत्यादीतः परमपि प्रतिभयोह्यम् ।

इति तत्त्वजिज्ञासा ॥३॥

तत्प्रामाण्यम् ॥४॥

सूत्रोक्तांगसहितं संस्कारजातमनुष्ठेयमिति तत्त्वजिज्ञासाप्रकरणे साधितम् । परं इदानीन्तनानुष्ठानस्य यानि मतानि सप्रमाणानि प्रतिपादितानीति तथैवानुष्ठातव्यमिति भवति मनीषा तामपनेतुमयमुपक्रमः । यत्र यत्र तैर्मनुः प्रमाणत्वेनाङ्गीक्रियते तत्र वदामः । मनूक्तानि कर्माणि संस्कारान्तःपातीनीच्छात अनुष्ठेयानीति वृत्तिकृदभिमतम् आह च तथा ब्राह्मणाञ्छ्रुतशीलवृत्तसंपन्नानिति सूत्रे—

" द्वौ दैवे पितृकृत्ये त्रीनेकैकमुभयत्र वा ।
भोजयेत्सुसमृद्धोऽपि न प्रसज्येत विस्तरे ॥ मनु० ३।१२५

इति मनुनोक्तस्य एकैकमुभयत्र वेत्यस्य पक्षस्यायं प्रतिषेधः । अस्य प्रतिषेधं कुर्वता मनूक्तमन्यदनुज्ञातं भवति तेनैतत्सिद्धं भवति दैवमपि भोजनमत्र कार्यं तस्य विधिः स्मृतितोऽवगन्तव्यः । आचार्येण तु पित्र्यस्यैव विधिरुच्यते । अस्मद्गृह्योक्तेतिकर्तव्यतामात्रमेव कार्यम् न शास्त्रान्तरं दृष्ट्वा विस्तरः कार्यः ॥

सत्क्रियां देशकालौ च शौचं ब्राह्मणसम्पदम् ।
पंचैतान्विस्तरो हन्ति तस्मान्नेहेत विस्तरम् ॥ ३।१२६

इत्यन्यदपि तत्रैव मनुना भोजनात्पूर्वं पिण्डानिपरणं विहितं तन्न कार्यमित्यतो ज्ञायतेऽन्यस्य मनुप्रोक्तस्याङ्गस्येच्छातः करणमिति ।४।८।१२ गृह्ये ''अनाचान्तेषु पिण्डान्निदध्यादिति सूत्रे । इति । एतेन मनूक्तप्रमाणं व्याख्यातं वेदितव्यम् । इदानीं यत्र धर्माब्धिमानं दीयते तच्चिन्त्यते । वैश्वदेवतन्त्रानुष्ठानं सूत्रविरुद्धं, सूत्रे त्वथ सायंप्रातरित्यनेन विहितः । तन्त्रं कुत आनीतं न जानीमः । विशेषस्त्वत्रत्यो देवयज्ञशास्त्रार्थेऽवगन्तव्यः । गृहप्रवेशनीयहोमस्तु श्वशुरगृहे एव कुर्वन्ति तदपि सूत्रविरुद्धम् । शास्त्राधारेण आचरन्ति त एव किल शिष्टाः । एतत्तु सर्वथा शास्त्रविरुद्धं अतः शिष्टाचारोऽप्ययमप्रमाणं ॥ एतेन यत्र धर्माब्धिप्रमाणं दीयते तत्तत्प्रत्याख्यातं वेदितव्यं अन्यदपि --सामान्यतस्तदानीन्तनीं रूढिं गृहीत्वैवैतस्य ग्रन्थस्य प्रणयनं ये तु मीमांसकास्तैस्तु स्वत एव विचार्यमिति ग्रन्थकार एवाबभाषे ॥

मीमांसाधर्मशास्त्रज्ञाः सुधियोऽनलसा बुधाः ।
कृतकार्याः प्राङ्निबन्धैस्तदर्थं नायमुद्यमः ॥
ये पुनर्मन्दमतयोऽलसा अज्ञाश्च निर्णयम् ।
धर्मं वेदितुमिच्छन्ति रचितस्तदपेक्षया ॥ तृ०प०समा०

इति अनलसा भूत्वाऽधीत्य मीमांसादिशास्त्रं इतः परमपि जिज्ञासितव्यो धर्म इति धर्माब्धिकाराशयः । अभावात्मकमेव मानं गृहीत्वा च चतुर्थदिने विहितं वधूवस्त्रदानं तत्प्रथमदिने कुर्वन्तो धर्ममेवापलपन्तीति सुव्यक्तम् । उक्तं च सूत्रे, '' अत ऊर्ध्वं त्रिरात्रं द्वादशरात्रं, संवत्सरं वा चरितव्रतः सूर्याविदे वधूवस्त्रं दद्यात् '' १।९।१३ गृह्ये । नान्दीश्राद्धं सपिण्डकं उक्तं सूत्रे, '' अथातः पार्वण ४।७।१ गृ० इत्यादिना तत्तु सांकल्पिकमेवेदानीं कुर्वन्ति तत्र मानं नास्त्येव सूत्रे । नारायणभट्ट्यां तु इदानींतनशिष्टैः क्रियमाणो नान्दीश्राद्धप्रयोग इत्यादि वर्णितं तत्सूत्रविरोधादुपेक्ष्यम् । एतेन तत्र तत्रोदाहृतं नारायणभट्टीप्रमाणं व्याख्यातं वेदितव्यम् । अथ खलूच्चावचा इत्यनेन यस्य कस्यापि संग्रहः कृतश्चेन्न हानिः । अनुज्ञेयं न विधिर्विशेषेणानुक्तत्वात् । अकरणे प्रत्यवायाभाव इति साधयामः । अन्यच्च यथा विवाहादौ कङ्कणबन्धनादि माङ्गलिकत्वेन यत्क्रियते यां च कन्यायास्तदहर्विवाहयिष्यमाणायाः प्रख्यातवृक्षपक्षचतुष्पथादिपूजा देशभेदेन तथा चूडादिसंख्यादेशभेदश्च या चातिथ्यादीनां गुर्वादीनां चानुवृत्तिः प्रियहितवचनाभिवादनाभ्युत्थानादिरूपा तथा प्राश्निसूक्तं तृणपाणयोऽधीयते, अश्वमेधमश्वं यथा समर्पयन्तः ईदृशश्चाचारः, एषोऽपि हि स्वभावभेदेन, पुरुषाणां मनःस्वास्थ्यदौःस्थ्यादिभेदेनानेकरूपः प्रतिविशेषमानन्त्यादशक्यो ग्रन्थेनोपनिबद्धुम् । यदेव बहुशः प्रियमित्युपलक्षितं तदेवावसरान्तरे विपरीतं संपद्यते । तथा पर्युपासनं गृहस्थेनातिथेः क्रिय-

माणं कस्याचित्प्रीतिकरं ममायं भृत्यवत्तिष्ठति । अन्यस्त्वन्यथा निर्यन्त्रणया न लभ्यत आसितुमस्मिन्संनिहित इति पर्युपासनयैव विरज्यति । तत्सामान्यतः शक्यमनुष्ठानं अनुष्ठातव्यम् न तत्रैवादरं कृत्वा सूत्रोक्तं प्रधानमपि यथाकथंचिदनुष्ठातव्यमिति न तस्यार्थ एतेन शास्त्रविरुद्धमपि आचारत्वेन प्रमित्सन्तो व्याख्याताः । एतेन सूत्राद्वहिर्भूताङ्गजातं तत्तत्प्रयोगे स्वीकुर्वन्तोऽपि प्रत्याख्याता वेदितव्याः ॥

इदानीं यन्नाम्नातामित्यादि चिन्त्यते । यन्नाम्नातामिति वचनं श्रौताभिप्रायम् ।- श्रौतमेवाग्निहोत्रादिकं पारशाखिकं कर्तव्यमित्युपदिशति तदेवमादिभिर्वचनैरवगच्छामः—"श्रौतेषु पारशाखिकं करणीयं न गृह्योक्तेषु इति" यदि प्रयोगशास्त्रं गृह्यादि परैर्न समुच्चीयते परं तर्हि सामान्यं विधानमनर्थकं भवति यदि भवत्यनर्थकं किमिति वयमुपालभ्येमहि । 'न युष्मानुपालभामहे–किन्तु माभूदनर्थकमिति तदपि समुच्चिनुम इति ब्रूमहे' निरङ्कुशत्वात्ते तुण्डस्यैवं ब्रवीषि न तु प्रमाणोपेतं ब्रवीषि, प्रयोगशास्त्रविरोधाद्धि नायं समुच्चयः सेद्धुमर्हति । यो हि सामान्यविधानस्यानर्थक्यं परिजिहीर्षुस्तदपि समुच्चिनोति, स खल्वयं स्वशास्त्राचार्यमृषिं प्रमाणं सन्तमप्रमाणं करोति । क्रममपि प्रयोगशास्त्रीयं विरुणद्धि, । उत्सृजति च स्वशाखाश्रयं विधानम् । सेयं पितरमुपेक्ष्य श्वशुरे गाढा भक्तिः । कात्यायनोऽपि ।

स्वशाखाश्रयमुत्सृज्य परशाखाश्रयं तु यः ।
कर्तुमिच्छति दुर्मेधा मोघं तत्तस्य चेष्टितम् ॥ गो०सू० २।२

इत्यनेन एनं निन्दति यो हि ऋषिभिर्निन्द्यते स कथं श्रद्धेयस्तत्रभवतां शिष्टानाम्। अथ यथोभयमपि न विरोत्स्यते तथा करिष्यामः नैवं शक्यम् । कस्मात् असम्भवात् । स्वशाखाश्रयस्य खल्वन्तरान्तरा किमपि किमपि सामान्यं विधानं निवेशयन् सामान्यमपि विधानमाकुलयति । स्वशाखाश्रयमपि, सोऽयं गुणोपसंहारेणाङ्गीकृतः समुच्चयो न प्रयोगशास्त्रं नापि सामान्यं विधानमुपकरोति । क्रममन्यथयन् प्रधानमपि विगुणयति । अथ क्रमः पदार्थानामुपकारे वर्तते । पदार्थप्राप्तेरुत्तरकालं हि क्रम आपतति । यदा च पदार्थः प्राप्नोति तदा क्रम एव नास्ति । न खलु पश्चिमसिद्धेन क्रमेण विरोधात् पूर्वसिद्धः पदार्थ एव न कर्तव्यो भवति । तस्मात्, न्यायविरोधस्त्वत्पक्षे दोषः । भवेदेतदेवम् । यदि वचनमत्रार्थे प्रमाणं न स्यात् । अस्ति हि वचनं । गोभि० ।३।२।२

प्रयोगशास्त्रं गृह्यादि न समुच्चीयते परैः ।
प्रयोगशास्त्रताहानादनारम्भविधानतः ॥
बह्वल्पं वा स्वगृह्योक्तं यस्य यावत्प्रकीर्तितं ।
तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् ॥

अक्रिया त्रिविधा प्रोक्ता मुनिभिः कर्मकारिणाम् ।
अक्रिया च परोक्ता च तृतीया चायथाक्रिया ॥

इत्यादि किमिव हि वचनं न कुर्यात् न हि वचनस्य कश्चिदतिभारो नाम । भवदीयेऽपि पक्षे न्यायान्तरविरोधो जागर्ति । न च पदार्थोऽपि पूर्वसिद्धः सिसाधयिषितः खल्वेष भवता । विषमश्चायमुपन्यासः सर्वपदार्थानां शेषभूताः खल्वाचमनादयः प्राबल्यादनुष्ठीयन्ते, न सर्वे नचात्रानुतिष्ठासितानां शेषत्वं प्रामाणिकम् । भिन्नानि चेमानि कर्माणि प्रयोगशास्त्रीयाणि सामान्यानि च नाम साम्येऽपि, यथासम्भवं रूपभेदादिभ्यो हेतुभ्यः । संयोगचोदनाभेदमप्येतेषु बहुलमुपलभामहे । तत्रैवं सति कुत्र कस्य गुणानुपसंहरसि । कर्मभेदे गुणोपसंहारन्यायस्याविषयत्वात् । श्राद्धोऽसि चेत् । प्रयोगशास्त्रीयं विधानमनुष्ठाय यथासम्भवं सामान्यमपि विधानं कामं पृथगेवानुतिष्ठ । इत्यनेन गुणोपसंहारं कृत्वा कुर्वन्तः कर्माणीति जल्पन्तः परास्ताः । इदानीं पूर्वमीमांसाप्रमाणतोऽपि गुणोपसंहारो न भवतीति स्थाप्यते—

कृत्स्नवेदार्थज्ञानस्याध्ययनविधिप्रयुक्तत्वाभावादेव कल्पसूत्रप्रणयनमर्थवत् ।

भवस्वामिभाष्ये—ब्राह्मणानां बहुत्वात्, एकैकस्यां शाखायामपरिसमाप्तत्वात्, अर्थस्य च दुर्बोधत्वादसर्वजनीनत्वाच्च संहृत्य विवरणार्थं सुखं बुद्ध्वा कर्माण्यनुष्ठाय फलानि सर्वे प्राप्नुयुरिति कल्प आरब्ध आचार्येण ॥

अत एव च कल्पसूत्रेषु सर्वाङ्गोपसंहरणाय प्रवृत्तेषु कृत्स्नवेदार्थज्ञानमधिकारिविशेषणतया नोपनिबद्धम् ।

सत्यामपि शक्तौ शाखान्तराधिकविधीनामुपसंहार ऐच्छिक एव नत्वावश्यकः । शाखान्तराध्ययनानित्यत्वस्य प्रतिपादितत्वात् क्वचिच्छाखासु तेषामनाम्नानबलाच्च, अन्यथा अङ्गान्तरविधीनामिवाधिकविधीनामपि सर्वशाखास्वाम्नानापत्तेः ।

जैमिनेरप्याचार्यस्य मते अनित्य एव शाखान्तरीयाणामधिकविधीनामुपसंहारः । युक्तं च नित्यत्वे तदितराङ्गवत्प्रतिशाखमाम्नानप्रसङ्गात् । अत एव 'पशुचोदनायामनियमोऽविशेषात् । छागो वा मन्त्रवर्णात् । इति षष्ठान्त्याधिकरणमर्थवत्, । अजोऽग्नीषोमीय इति " शाखान्तरियविशेषवचने जाग्रति तदनुन्मेषात् । यत्तु भाष्यकृदादिभिः कृत्वाचिन्तया तदधिकरणप्रवृत्तिर्वर्णिता तदेतत्सर्वज्ञस्य सूत्रकारस्य मौढ्यं वर्णयद्भिस्तदपेक्षया सार्वज्ञ्यमपि स्वेषु प्रकटयद्भिः सूत्रकाराशयानभिज्ञत्वमेव स्वेषामाविष्कृतमिति तानेव वयमुपेक्षामहे । यदि हि सूत्रमनुल्लिखितवाक्यविशेषं स्यात्तर्हि स्वबुध्युत्प्रेक्षितविषयवाक्ये तदधिकरणस्यानुन्मेषे सति विषयान्तरस्य च परिस्फूर्त्यभावे सति कृत्वाचिन्तया तदधिकरणप्रवृत्तिः शक्यते वर्णयितुम् । प्रकृते च 'पशुचोदनायामनियमोऽविशेषात्' इति पशुवाक्य-

स्यैव सूत्रे कण्ठोक्त्योदाहृतत्वात् कथं कृत्वाचिन्तया प्रवृत्तिवर्णनमुपपद्येत । एतद-पेक्षया शाखान्तरीयाधिकविध्युपसंहारानित्यत्वमेव सूत्रकृदभिमतमित्येव कल्पयि-तुमुचितत्वात् । एवं तत्र तत्र वाक्यविशेषोल्लेखिसूत्रेषु परःशतेषु शाखान्तरी-याधिकविध्युपसंहारानित्यत्वं तत्र तत्र वर्णयितव्यमिति सर्वमनवद्यम् ॥

हरदत्तः—आपस्तम्बपरिभाषासूत्रे । वैकल्पिकश्चायमुपसंहारः । शाखाभेदस्यार्थ-वत्वात् । इत्यादिवचांसि न्यायश्च विपश्चिद्भिर्विचारणीय इतः परमपि । विस्तर-भियोपरम्यते । इति काल्पनिकवाक्यार्थं कृत्वा यानि प्रमाणीकृतानि वचांसि, युक्तयश्च ता अनेन निरस्ता ज्ञेयाः । सिद्धं चैतत् सूत्रोक्तं कर्मजातं सूत्रोक्ताङ्गैरेव पूर्णं भवतीति गुणोपसंहारस्यानावशक्यकत्वामिति

संस्कारप्रकाराः ।

त्रयः पाकयज्ञा इत्यनेन प्रकारानुक्त्वा पाकयज्ञत्वेन व्यवहरति सूत्रकार-स्तदन्तर्गतान् संस्कारानपि । तत्रापि द्वैविध्यमपीपदत् संस्कारचयः । ब्राह्मो दैव श्चेति । उदगयन आपूर्यमाणपक्ष इति उक्तत्वात् दैवत्वं, उदगयनादौ दैवानि कुर्वीत, तद्धि देवानां स यत्रोदङ्मुखो वर्तते देवेषु तर्हि भवति । देवानामुदगयनं तस्माद्दैवं कर्म तत्रोचितमिति गम्यते । हुताः, अग्नौ हूयमानाः, अनग्नौ प्रहुताः, ब्राह्मणभोजने ब्रह्मणि हुताः । ब्रह्मवर्चस्तेजः प्रापयतीति ब्राह्मः । दैवं तेजः प्रापयतीति दैवः । सर्वेषु संस्कारेषु प्राय उभयत्वं वर्तत इत्यनवद्यम् । व्यक्तिनिष्ठाः केचन संस्काराः प्रवर्तन्ते यथा पुंसवनं, सीमन्तोन्नयनं, चौलं, जातकर्म, अन्नप्राशनम् । सप्तसंस्थापिण्डपितृयज्ञप्रभृतयस्तु देवताप्रधानास्तत्र ब्राह्म-संस्कारसंस्कृत ऋषीणां समानतां सायुज्यतां च गच्छति । दैवेन संस्कृतो देवानां सालोक्यं सायुज्यं च गच्छति । मन्त्राणामपि मानमुदाहरन्ति आचार्याः यथा ऋग्वेदे

यः समिधा य आहुती यो वेदेन ददाश मर्तो अग्नये । यो नमसा स्वध्वरः ॥ ६।१।२९।५॥ भाष्यम्-इयं पाकयज्ञप्रशंसापरेति भगवता आश्वलायनेन व्याख्याता । यो मर्त्यः मनुष्यः समिधा पालाशादिनेध्मेनाग्नयेऽग्न्यर्थं ददाश परिचरति । यश्चाहुती, आहुत्या,आज्यादिसाध्यया परिचरति । यश्च वेदेन वेदाध्ययनेन परिचरति । यश्च स्वध्वरः शोभनेनाध्वरेण ज्योतिष्टोमादिना युक्तः सन् नमसा, अन्नेन चरुपुरोडाशादिनाग्नये ददाश अग्न्यर्थं परिचरति तस्येदर्वन्त इत्यु-त्तरत्र संबन्धः ।

तस्येदर्वन्तोरंहयन्त आशवस्तस्य द्युम्नितमं यशः । न तमंहो देवकृतं कुतश्चन न मर्त्यकृतं नशत् ॥ ६।१।२९।६ भाष्यं यः पूर्वोक्तस्तस्येत् तस्यै-

वाशवो व्यापनशीला अर्वन्तोऽश्वा रंहयन्ते वेगं कुर्वन्ति शत्रून् प्रसहंत इत्यर्थः। द्युम्नितमं दीप्तिमत्तमं यशः कीर्तिश्च तस्यैव भवति यद्वा द्युम्नामिति धननाम धनवत्तमं यशोऽन्नं च तस्य भवति । अपि च देवकृतमंहः पापं कुतश्चन कस्मादपि हेतोस्तं न नशत् न प्राप्नोति, न मर्त्यकृतं मनुष्यैः कृतं ॥

अगोरुधाय गविषे द्युक्षाय दस्म्यं वचः ।
घृतात्स्वादीयो मधुनश्च वोचत ॥ ६।२।१८

भाष्यम्—हे ऋत्विजः अगोरुधाय गाः स्तुतीः रुणद्धीति गोरुधः न गोरुधः अगोरुधः ता न विनाशयत्यादरेण शृणोतीत्यर्थः । तादृशाय गविषे स्तोत्राणीच्छते द्युक्षाय दीप्यमानायेन्द्राय दस्म्यं दर्शनीयं घृतात्स्वादुतरात् आज्यात् मधुनश्च स्वादीयोऽतिशयेन स्वादुभूतं वचः स्तोत्ररूपं वाक्यं वोचत ब्रूत ऋत्विग्भिः कृतं कर्म यजमानोऽपि कृतवान् भवतीति यदिदमिन्द्रविषयं वचो घृतान्मधुनश्च स्वादुतरं भवत्वित्याशास्ते । तदाहाश्वलायनः वच एवम इदं घृतान्मधुनश्च स्वादीयोऽस्ति प्रीतिः स्वादीयोऽस्त्वित्येव तदाह आ० गृ० १।१।५ ॥ सूत्रं च समिधमेवापि श्रद्धधान आदधन्मन्येत यज इदमिति नमस्तस्मै य आहुत्या यो वेदेनेति । विद्ययैवाप्यस्ति प्रीतिस्तदेतत्पश्यनृषिरुवाच । अगोरुधाय गविषे द्युक्षाय दस्म्यं वचः । घृतात्स्वादीयो मधुनश्च वोचतेति । वच एव म इदं घृताच्च मधुनश्च स्वादीयोऽस्ति प्रीतिः स्वादीयोऽस्त्वित्येव तदाह आ ते अग्न ऋचा हविर्हृदा तष्टं भरामसि ते ते भवन्तूक्षण ऋषभासो वशा उतेति एत एव म उक्षाणश्च ऋषभाश्च वशाश्च भवन्ति य इमं स्वाध्यायमधीयत इति यो नमसा स्वध्वर इति नमस्कारेण वै खल्वपि न वै देवा नमस्कारमति यज्ञो वै नम इति हि ब्राह्मणं भवति ॥ १।१।५॥ स्पष्टार्थमिदं सूत्रम् ॥

एतावता ऋग्वेदीयसूत्रकारादिभिः पाकयज्ञान्तर्गतसंस्काराणां फलोक्तेः करणीया इत्यध्यवसितम् । तत्र के संस्काराः कति चेति जिज्ञासायामाह सूत्रकारः । पुंसवनम् अनवलोभनम् सीमन्तोन्नयनम्, । जातकर्म, नामकरणम् अन्नप्राशनम् चौलकर्म, उपनयनम्, (संध्या) पंचयज्ञाः, महानाम्नीव्रतम्, उपनिषद्व्रतम्, गोदानव्रतम्, समावर्तनम्, उपाकर्म, उत्सर्जनम्, विवाहः, (गृह्याग्निपरिचरणम्) स्थालीपाकः, श्रवणाकर्म, सर्पबलिः, माघ्यावर्षम्, आश्वयुजीकर्म, आग्रयणम्, प्रत्यवरोहणम्, पिण्डपितृयज्ञः, अष्टकाः, शूलगवः, अन्त्यसंस्काराः, पार्वणश्राद्धम्, इति

एतेषामितिकर्तव्यतोक्तिवेलायां पूर्वमुक्ताः कस्मिंश्चित्संस्कारे विकल्पाः सूत्रिताः सूत्रकारेण . तत्रास्माभिर्योऽस्मभ्यं रोचते स एवास्माभिरुररीकृतस्तत्र मान

सूत्रकार एव उभयोः पक्षयोः सममेव फलमिति विकल्पौ असूत्रयत्। यत्र तु गौणो विकल्पस्तत्र तु अपि शब्दं प्रयुङ्क्ते तस्माज्ज्ञायते तत्कर्म केनापि प्रकारेण निर्वर्तनीयमिति। यथा "अप्यनडुहो यवसमाहारेदिति" अष्टकाप्रकरणे। अन्यदपि उभयोर्विकल्पयोः समफलत्वादेव सस्मार मनुः -

आचारश्चैव साधूनामात्मनस्तुष्टिरेव च। इति २।६

टीकायां साधूनां धार्मिकाणामात्मनस्तुष्टिश्च वैकल्पिकपदार्थविषया धर्मे प्रमाणं तदाह गर्गः वैकल्पिके आत्मतुष्टिः प्रमाणम्। केषांचिन्मते 'स्वस्य च प्रियमात्मन' इति प्रामाण्यात् आत्मनो यत्प्रियं तदपि धर्मे मानम्, उक्तं च सर्वज्ञनारायणेन 'यत्कर्म कुर्वतश्चेतसोऽलाघवापरनामा प्रसादातिशयस्तस्य साधकत्वे स एव प्रमाणम्' २।१२ मनुः। अतो गृहीतोऽस्माभिर्विकल्पः।

चौलकर्मादिषु अनादिष्टा आहुतयः स्वीकृताः ॥ १ ॥ तत्र मानम्। नैके कांचनेति सूत्रम्। वृत्तिः। यत्र होमश्चोद्यते न मन्त्रश्चौलकर्मादौ नैके कांचनपक्षे तत्रैताभ्यो देवताभ्यो जुहोति। कुमारिलभट्टाश्च।

नैके कांचन पक्षोऽयं चौलादावाश्रितो यदा।
तदाग्निरिन्द्र इत्याद्या होतव्या इति वृत्तिकृत्॥

इत्यादि। पात्रासादनादीनामपि त्यागो वृत्तिकृन्मूलकः सूत्रानुक्तेश्च। यथा कुमारिलभट्टाः।

पात्रासादनमिच्छात आज्याधिश्रयणादि च।
स्रुवादिमार्जनं चेध्मरज्जुप्रहरणं तथा॥

आज्यस्यापि उत्पवनव्यतिरिक्तसंस्कारकरणमवेक्षणादिकमन्यशास्त्रोक्तं वैकल्पिकं वृत्तिकृतोक्तम्। यथा श्रवणकर्मादौ। आज्यस्योत्पवनमात्रमेव क्रियते तदा तेषां त्रिः प्रोक्षणं भवेत्। कारिकायामपि भट्टाः--

आज्यस्य केवलोत्पूतौ तासां त्रिः प्रोक्षणं भवेत्।

इत्यादि तत्र तत्र ज्ञेयं निदर्शनं त्वत्र विवक्षितम्॥

इतः परं प्रायश्चित्ताहुतिविषये विचार्यते। इदानीं पाकयज्ञेषु प्रायश्चित्ताहुतयो या हूयन्ते ताः श्रौतसूत्रे उक्ताः। यथा २।१।११ "यत्किंचाप्रेषितो यजेदन्यत्राप्येवं भूतोऽव्यक्त होमाभ्याधानोपस्थानानि च अयाश्चाग्ने" इत्यादि। अस्मिन्सूत्रेऽन्यत्रापि इत्यस्य व्याख्यानं वृत्तिकारश्चकार तदित्थम्। अन्यत्रेति वचनं गार्ह्येष्वपि प्रापणार्थं एवं भूतो नाम—एवं प्रकारः। आहवनीयात् प्रत्यगुदक्देशे स्थित्वा आज्यं स्रुवेणावदाय आहवनीये (जुहुयात्) एवंप्रकार-

विशिष्टः कर्ता एवंभूत इति उच्यते । विशेषणपरोऽयं निर्देशः । अव्यक्तशब्देन अविहितविशेष उच्यते । यत्र होमाभ्याधानोपस्थानानि अविहितविशेषाणि विधीयन्ते तत्रानेन प्रकारेण कर्तव्यानि इत्यर्थः ॥ इदमनुसृत्य सर्वाः प्रायश्चित्ताहुतयो हूयन्ते । अस्माभिस्तु व्याहृतीनां सर्वप्रायश्चित्तत्वेन विहितत्वात् प्रशंसितत्वाच्च वैष्णव्याश्च सूत्रकारेणापि अन्यत्रप्रायश्चित्तत्वेनोक्तत्वात् ते एव गृहीते नान्यत्किमपि। वृत्तिकारोऽपि व्याचख्यौ—"एकदेशे विशेषे चापि अपेक्षितमात्रम् अस्माद् गृह्यते" इति सूत्रे च "अन्ययज्ञस्य साधनात् आपद्यातो देवा अवन्तु नो" इति जपेदपि वान्यां वैष्णवीमित्यत्र । ऐतरेयब्राह्मणेच "सर्वव्यापद्वा भूर्भुवः स्वरिति सर्वा अनुद्रुत्याहवनीय एव जुहवाथेति" इति व्याहृतिप्रायश्चित्तिविधिः । न चात्र वाच्यम् अत्र आहवनीये इति उक्तत्वात् श्रौतम् अग्नित्रयसाध्ये कर्मण्येवेदं प्रायश्चित्तमिति—प्रायश्चित्तत्वेन उभयत्र समानत्वात्। अत एव श्रौते उक्ता आश्वलायनेन गृह्ये शिष्टैरानीयन्ते । स्तूयते च अग्रे । "एतानि ह वै वेदानामन्तःश्लेषणानि यदेता व्याहृतयस्तद्यथाऽऽत्मनाऽऽत्मानं संदध्याद्यथा पर्वणा पर्व यथा श्लेष्मणा चर्मण्यं वाऽन्यद्वा विश्लिष्टं संश्लेषयेदेवमेवैताभिर्यज्ञस्य विश्लिष्टं संदधाति सैषा सर्वप्रायाश्चित्तिर्यदेता व्याहृतयस्तस्मादेषैव यज्ञे प्रायश्चित्तिः कर्तव्या" इति। या एता व्याहृतयः सन्ति एतानि ह वै त्रीण्येव व्याहृतिरूपाणि वेदानां संबन्धीन्यन्तःश्लेषणान्यन्तर्बंधनसाधनानि । तत्र दृष्टान्तोऽभिधीयते । यथा लोक आत्मनात्मानं संदध्यात्। आत्मशब्दः स्वरूपमात्रवाचित्वात्सर्वद्रव्यपरः । एकेन द्रव्येण द्रव्यान्तरं संधीयते । एतच्छन्दोगैर्विस्पष्टमाम्नातम् । तद्यथा लवणेन सुवर्णं संदध्यात्। सुवर्णेन रजतम्। रजतेन त्रपु। त्रपुणा सीसम्। सीसेन लोहम् । लोहेन दारु । दारुणा चर्मेति । क्षारादिना सुवर्णादीनां संधानं सुवर्णकारादिषु प्रसिद्धम् । तदेतदभिप्रेत्यात्मनात्मानं संदध्यादित्युक्तम् । यथा च हस्तपादादिष्वेकेन पर्वणा पर्वान्तरं संश्लिष्टम्। यथा च श्लेष्मणा धात्वंतरं संश्लिष्टं चर्मणा च चर्मण्यं पादत्राणादिकमन्यद्वा शकटादिषु किंचिद्विश्लिष्टमंगं—चर्ममय्या रज्ज्वा संश्लेषयेत् । अनेनैव प्रकारेणैताभिर्व्याहृतिभिर्यज्ञस्य विश्लिष्टमंगं संश्लिष्टं भवति या एता व्याहृतयः सैषा सर्वस्य वैकल्यस्य प्रायाश्चित्तिः । तस्माद्यज्ञे वैकल्यपरिहारार्थमेषैव प्रायश्चित्तिः कर्तव्या । अत्र न भ्रमितव्यम् । यज्ञशब्दार्थः सप्त सोमसंस्था इति ।

उद्दिश्य देवतां द्रव्यत्यागो यज्ञ इतीर्यते ।

इति पाकयज्ञानां यज्ञत्वमाचार्येण उक्तमेव त्रयः पाकयज्ञा इति । अत एव हरदत्तोऽप्याह आपस्तम्बपरिभाषासूत्रभाष्ये । "यज्ञो जात्यभिमानेन व्यपादिश्यते । सप्त सोमसंस्थाः सप्त हविर्यज्ञसंस्थाः सप्तपाकयज्ञसंस्था" इति। अग्निष्टोमोत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त सोमसंस्थाः। अग्निहोत्रं दर्शपूर्णमासावाग्र-

यणं पिण्डपितृयज्ञश्चातुर्मास्यानि निरूढपशुबन्धः सौत्रामणीति सप्त हविर्यज्ञसंस्थाः । औपासनहोमो वैश्वदेवं पार्वणमष्टका मासिश्राद्धं सर्पबलिरीशानबलिरिति सप्त पाकयज्ञसंस्थाः" । तस्मात् यत् अस्माभिः प्रायश्चित्तमुक्तमाहुतिद्वयात्मकं तत्सप्रमाणम् इति सिद्धम् । वस्तुतस्तु यत्र यत्र स्विष्टकृत् वर्तते तत्रैताः प्रायश्चित्ताहुतयो न होतव्या एव स्विष्टकृता कृतार्थत्वात्—एतच्च स्विष्टकृन्मंत्रे स्पष्टम् अत एव वृत्तिकारः कर्मान्ते वा स्विष्टकृत् इति प्रत्यवरोहे व्यान्चख्यौ । यत्र तु स्विष्टकृन्नास्ति तत्रैताः सप्त द्वे वा होतव्या अस्माभिस्तु सर्वे पक्षाः संगृहीताः सप्रमाणकास्त इत्यपि साधितम् । एतेन यत्र यत्र संस्थाजपः तत्रैताः सप्त एवाहुतयो होतव्या इति मतं परास्तमिति ज्ञेयम् । उपस्थेयश्च ॐ चमेत्यनेन मंत्रेण अग्निः । न च शंक्यम् अल्पयिसा हवनेन कथं बहु याचिंतु शक्यत इति तदेतद्विचारितं कृष्णयजुर्वेदीय—संहितोपाद्धाते विद्यारण्यैः ॥ तथा ह्यग्न्युपस्थानविषये विवादे विचारः प्रथमकाण्डे पञ्चम [प्र] पाठके नवमेऽनुवाके श्रूयते—" उपस्थेयोऽग्नी ३ नोंपस्थेया ३ इत्याहुर्मनुष्यायिन्वै योऽहरहराहृत्याथैनं याचति स इन्वै तमुपार्च्छत्यथ को देवानहरहर्याचिष्यतीति तस्मान्नोपस्थेयोऽथो खल्वाहराशिषे वै कं यजमानो यजत इत्येषा खलु वा आहिताग्नेराशीर्यदग्निमुपतिष्ठते तस्मादुपस्थेय" इति । अस्यायमर्थः प्रतिदिनं सायं प्रातरग्निहोत्रमनुष्ठाय "उप प्रयन्तो अध्वरम्" इत्यादिभिर्मन्त्रैरग्निप्रार्थनलक्षणमुपस्थानं कर्तव्यं न वेति संशयः । न कर्तव्यमिति तावत्प्राप्तम् । कुत उपस्थानेनाग्नेरुपद्रवप्रसंगात् । तथा हि—" आयुर्दा अग्नेऽस्यायुर्मे देहि वर्चोदा अग्नेऽसि वर्चो मे देहि तनूपा अग्नेऽसि तनुवं मे पाहि" इत्यादिषूपस्थानमन्त्रेष्वायुरादीनि बहूनि याच्यन्ते तत्र यजमानः स्वल्पं हविर्दत्त्वा बहूनि याचमानः कथमग्निं न बाधेत । लोके हि यः कश्चिद्दरिद्रो मनुष्यो यत्किंचिज्जम्बीरफलादिकं मनुष्यायैव राज्ञे प्रतिदिनमुपायनमानीय दत्वा तं राजानं प्रति सहस्रसंख्याकधनं याचति स याचकस्तं राजानं पीडयत्येव । स च राजा तं कुप्यति । यदा मनुष्येष्वप्येवं तदा को नामाग्न्यादिदेवानमेयप्रभावान्प्रातिदिनं याचितुं धृष्टो भवेत् । तस्मादग्निर्नोपस्थेय इति पूर्वपक्षे प्राप्ते राद्धान्तोऽभिधीयते— इदं मे भूयादिदं मे भूयादित्येवं स्वाभीष्टमखिलमाशासितुमेव यजमानः प्रजापतिरूपमिममग्निं यजते । आहिताग्नेर्यजमानस्य मन्त्रैरुपस्थानमेवाऽऽशीः । न चात्र हविषोऽल्पत्वं शंकनीयं मन्त्रसामर्थ्येन वर्धमानत्वात् । तथा च श्रूयते—" धान्यमसि धिनुहि देवानित्याह । एतस्य यजुषो वीर्येण । यावदेका देवता कामयते यावदेका तावदाहुतिः प्रथते । न हि तदस्ति । यत्तावदेव स्यात् । यावज्जुहोति" [ब्रा० का० ३ प्र० २ अ० ६] इति । तस्मात्मनुष्याणां क्रयाविक्रयाविव यजमानदेवतयोर्यागतत्फले विश्रम्भेण व्यवहर्तुं शक्येते । अतः ॐचमे इत्युपस्थाय श्रद्धेत्यादिना प्रार्थयेच्च

इति । विशेषस्तु तत्तत्प्रयोगावसरे वक्ष्याम इति शम् ॥

उपरि उपस्थानप्रायश्चित्तविचारः यः कृतः तेन " यत्र संस्थाजपोऽस्ति तत्र प्रायश्चित्त होमोऽपि भवति " इति वृत्तिकारमतं व्याख्यातम् । यदि अयं न्यायः सर्वत्र अनुसृतः स्यात्तर्हि वैश्वदेवे गृह्याग्निपरिचरणे संस्थाजपं कुर्वन्ति परंतु न तत्र सप्ताहुतिप्रायश्चित्तमपि जुव्हति । अथवा इयं वृत्तिः श्रौतकर्मविषये इति वा विभावनीयं शिष्टैर्विचार्यानुष्ठेयम् इति सर्वत्रानुसंधेयम् ॥

सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृता इति मनसि निधाय विचार्य च पुनः पुनरिदमेव निर्धारयितव्यम् । को नु खलु जगत्या निरपवादो धर्मस्तदनुष्ठानं वा निर्दुष्टमिति विदितं पूर्णप्रज्ञैः। भगवदुक्त्यैव ज्ञायते सापवादं किल जगत्, सापवादाः किल सर्वे धर्माः, सापवादं किल सर्वेषां कर्मजातमिति दरीदृश्यते इतिहासपुराणादिभिरप्यवगम्यते इति प्रसिद्धं तत्र नेदमेव वैदिककर्मानुष्ठानं ज्ञानं वा अपवदनीयं भवति नूतनप्रज्ञावद्भिः। इतोऽप्यतिशयं बहुविदां निखिलागमतत्त्वविदामग्रे किं मयाऽल्पज्ञेन वक्तव्यम्। यत्र खलु जगन्मर्यादां समीकर्तुं प्रवृत्तः साक्षाद्भगवानपि सांप्रतं मौनीभूत्वा तूष्णीं तस्थौ । का नु तत्र मादृशां कथा अतो विदांकुर्वन्तु सूत्रोक्तमार्गेणैव संस्कारानुष्ठानमवश्यमनुष्ठेयामिति ॥

प्राचीनपण्डितानामिव नाहं पण्डितः । नापि ग्रन्थस्य रचयिता तथापि कस्माच्चिन्मीमांसाकुतूहालादारब्धोऽयं ग्रन्थः ।

श्रीमद्गुरुमुखाज्ज्ञातपदार्थानां हि संग्रहः ।
स्वकीयज्ञानरक्षायै कृतोऽयं युक्तयत्नतः ॥

तादृशज्ञानाभावात् क्षम्यतामत्रत्यं न्यूनातिरिक्तामिति भूयोभूयोऽभ्यर्थये ॥

अधिकारिपरिपठितपद्यैरेव विज्ञापयामि । आहुश्च श्लोकवार्तिकावसरे प्रथमत एव भट्टपादाः

तद्विद्वांसोऽनुगृण्हन्तु चित्तश्रोत्रैः प्रसादिभिः ।
सन्तः प्रणयिवाक्यानि गृण्हन्ति ह्यनसूयवः ॥ १ ॥
न चात्रातीव कर्तव्यं दोषदृष्टिपरं मनः ।
दोषोह्यविद्यमानोऽपि तच्चित्तानां प्रकाशते ॥ २ ॥
निर्दोषत्वैकवाक्यत्वं क्व वा लोकस्य दृश्यते ।
सापवादा यतः केचिन्मोक्षस्वर्गावपि प्रति ॥ ३ ॥
आगमप्रवणश्चाहं नापवाद्यस्खलन्नपि ।
न हि सद्वर्त्मना गच्छन् स्खलितेष्वप्यपोद्यते ॥ ४ ॥

इति ॥ संस्कारप्रकारप्रकरणम् ॥ ५ ॥

संस्कारप्रयोगपरिभाषाप्रकरणम्.

उक्तानि वैतानिकानीत्युक्तत्वात्, षोडशाध्यायमिदं सूत्रमाश्वलायनप्रणीतामिति समाख्याबलाच्च परिभाषास्ता एव गृह्यन्ते । आश्वलायनश्रौतसूत्राणिमानि प्रदर्श्यन्ते ।

प्राङ्मुखो यज्ञोपवीत्याचम्यापरेण प्रणीताः प्रपद्यते ॥

वृत्तिः—अग्नेरुत्तरतः कांस्येन मृण्मयेन वा या आपः प्रणीताः तासां पश्चाद्यो देशस्तेन कर्मभूमिं प्रविशेत् ॥ १ ॥

अपरेण प्रणीता योऽध्वा तमेतमध्वानं तीर्थमित्याचक्षते ॥

तस्य नित्याः प्राञ्चश्चेष्टाः ॥ २ ॥

एतदुक्तं भवति यो यस्तीर्थेन कर्मभूमिं प्रपन्नस्तस्य तस्य प्राङ्निष्क्रमणात् मनोवाक्काययन्त्रणादयो नित्याः स्युः । कर्तुश्च प्राङ्मुखत्वं चेष्टानां च प्रागपवर्गता तत्साधनानां च प्रागग्रतेति विषमसूत्रप्रणयनेन "व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम्" । एषा परिभाषा गृहीता भवति ॥ २ ॥

अङ्कधारणा च ॥ ३ ॥

अङ्कमुरूपस्थस्तस्य करणं दक्षिणोत्तरिणोपस्थेनेति धारणेत्युच्यते सा च नित्या भवेत् । उपवेशनकालादारभ्याकर्मपरिसमाप्तेरविच्छेदेन कार्या इत्यर्थः । अङ्कधारणस्योपवेशनाङ्गत्वम् ॥ ३ ॥

एकाङ्गवचने दक्षिणं प्रतीयात् ॥ ४ ॥

एकशब्दः कैवल्यवचनः । एकं च तदङ्गं च एकाङ्गं सव्यदक्षिणभेदेन द्वित्वयोगि यदंगं हस्तादि तस्य द्वित्वेन विना वचने दक्षिणमेवाङ्गं साधनं विद्यात् । द्वित्वयोगे द्वाभ्यां कुर्यात् । एकवचनबहुवचने कर्त्रेकत्वबहुत्वापेक्षे । एकत्वादीनामन्यत्रोपयोगात् । केवलाङ्गवचनमेव दक्षिणप्रत्ययस्य निमित्तमित्यर्थः । हस्तेन वा पादेनेत्युदाहरणम् ॥

अनादेशे ॥ ५ ॥

द्वित्वयोगिनोऽङ्गस्यानादेशे क्रियामात्रविधाने इत्यर्थः । तत्रापि दक्षिणं विद्यात् । चक्षुरादेरनङ्गत्वात्तेष्वयं नियमो नास्ति अवयवविशेषात् या हि शक्तयश्चक्षुरादय उच्यन्ते नावयवा इति ॥ ६ ॥

ददाति, जुहोति, जपति, प्रायश्चित्ते, कर्तारं विद्यात् ॥६॥ स्वत्वव्यावृत्ति-पूर्वके परस्वत्वापादनपर्यन्ते ददातिविधौ, त्यक्तद्रव्यस्य प्रतिपत्तिकर्मरूपहुधात्वर्थे, उच्चारणविधौ, प्रायश्चित्तविधौ च कर्तारं विद्यात्, जानीयात् । ऋत्विजा कृतं कर्मापि यजमानस्यैव फलभाग्भवतीति निरणायि श्रौते विचारे ॥६॥

ऋचं पादग्रहणे ॥७॥

पादशब्दोऽत्र मूलवाची। ऋचो मूलग्रहणे ऋचं विद्यात्। नान्तमध्ययोर्ग्रहणे॥७।

सूक्तं सूक्तादौ हीने पादे ॥८॥

अत्र पादशब्दो गायत्र्यादीनां भागवाची, सूक्तादौ हीने पादे गृह्यमाणे सूक्तं विद्यात् ॥८॥

अधिके तृचं सर्वत्र ॥९॥

अधिके पादे गृह्यमाणे तृचं विद्यात्। सर्वत्र सूक्तादौ असूक्तादौ चेत्यर्थः॥९॥

मन्त्राश्च कर्मकरणाः ॥१०॥

चशब्देनात्र सर्वत्रेत्युपांश्विति चानुकृष्यते, मन्त्राः कर्मकरणाश्च सर्वत्रोपांशु प्रयोक्तव्याः। उपांशुत्वस्येदं लक्षणम्। "करणवदशब्दममनः प्रयोग उपांश्विति"।

जपमुच्चारणं विद्यात्क्रत्वर्थमपि तद्भवेत् ।
अर्थतः कार्यलाभश्चेदर्थ एव क्रतोर्भवेत् ॥१॥
मन्त्रमुच्चारयन्नेव मन्त्रार्थत्वेन संस्मरेत् ।
शेषिणं तन्मना भूत्वा स्यादेतदनुमन्त्रणम् ॥२॥
एतदेवाभिमन्त्रस्य लक्षणं चेक्षणाधिकम् ।
अद्भिः संस्पर्शनाधिक्यात्तदेवाप्यायनं स्मृतम् ॥३॥
उपस्थानं तदेव स्यात्प्रणतिस्थानसंयुतम् ।
बाह्यं कार्यं यदेतेषु मन्त्रकाले क्रियेत तत् ॥४॥
कर्मणः करणास्ते स्युर्विदितार्थप्रकाशनात् ।
मन्त्रेण कृत्वा मन्त्रान्ते क्रियते कर्म येषु तु ॥५॥
इदं कार्यमनेनेति न कचिद्दृश्यते विधिः ।
लिङ्गादेवेदमर्थत्वं येषां ते मन्त्रसंज्ञिताः ॥६॥

अनुमन्त्रणग्रहणेनाभिमन्त्रणमपि गृह्यते । अनुमन्त्रणाप्यायनोपस्थानानां कर्मकरणत्वाविशेषेऽपि यत्पृथग्ग्रहणं तत् तन्मन्त्रान्ते कर्मारम्भः। इति करणधर्मो यः स तेषु न भवतीत्येवमर्थम्। तेन मन्त्रोच्चारणसमकालमेव तेषु क्रिया भवति ॥१०॥

प्रसङ्गादपवादो बलीयान् ॥११॥

सामान्यविधेर्विशेषविधिर्बलीयानित्यर्थः । लोकवेदप्रसिद्धस्य न्यायस्य वचनप्रयोजनं सर्वेऽपवादाः प्रसङ्गस्यैव बाधकानामपवादाः सावकाशत्वे परस्परं बाधका इत्येवमर्थम् ॥११॥

सकृन्मन्त्रेण द्विस्तूष्णीं सर्वत्रैवं कर्मावृत्तौ ॥१२॥

सकृन्मन्त्रेण द्विस्तूष्णीमित्येतत्सर्वत्र भवति । एवम्प्रकारस्य कर्मण आवृत्तौ सत्यामिति । एवम्प्रकारशब्देन संस्कारकर्मत्वमुच्यते । एतदुक्तं भवति यत्र संस्कारकर्मणि त्रिरावृत्तिर्विधीयते तत्र सकृन्मन्त्रेण द्विस्तूष्णीमिति न प्रधानकर्मणि ॥१२॥

प्रत्यगुदगग्नेरवस्थाय स्थाल्याः स्रुवेणादाय सर्वप्रायश्चित्तानि जुहुयात्, स्वाहाकारान्तैर्मन्त्रैर्नोचेन्मन्त्रे पठितः॥ एवम्भूतोऽव्यक्तहोमाभ्याधानोपस्थानानि च ॥१३॥

अग्नेः प्रत्यगुदक् (वायव्यां) दिशि अवस्थाय आज्यस्थाल्याः स्रुवेणाज्यमादायाग्नौ स्रुवेणैव जुहुयात् । सर्वप्रायश्चित्तानीति संज्ञैषां होमानाम् । स्वाहाकारान्तैर्मन्त्रैर्मन्त्रान्ते स्वाहाकारं कृत्वेत्यर्थः । न चेन्मन्त्रे यत्र क्वापि पठितस्वाहाकारादन्ते स्वाहाकारः कर्तव्यः । यत्र क्वापि पठितश्चेत्स एव प्रदानार्थो भवति । एवम्भूतो नाम एवम्प्रकारः अग्नेः प्रत्यगुदग्देशे स्थित आज्यं स्रुवेणावदायाग्नौ इत्येवम्प्रकारविशिष्टः कर्ता एवम्भूत इत्युच्यते । विशेषणपरोऽयं निर्देशः । अव्यक्तशब्देनाविहितविशेष उच्यते । यत्र होमाभ्याधानोपस्थानान्यविहितविशेषाणि विधियन्ते तत्रानेन प्रकारेण कर्तव्यानीत्यर्थः ॥१३॥

अवदानधर्माः=स्रुवेण स्रुच्याज्यमुपस्तीर्य प्रथमप्रधानदेवताचरुभागमध्यादङ्गुष्ठपर्वमात्रं तिरश्चीनाभिरुदगग्राभिर्नखसंस्पर्शमकुर्वन् अवदाय दर्व्यामोप्य ततश्चरुपूर्वभागं प्रागग्राभिस्ताभिस्तथैवावदाय दर्व्यामोप्य पात्रस्थं हविरभिघार्य दर्वीस्थमवत्तं चाभिघार्य देवतानाम चतुर्थ्यन्तमुद्दिश्य होमः । पुनः पूर्ववदुत्तरहविर्भागादवदाय होमः ॥

होमस्थलनिर्देशः=आज्यभागयोर्मध्यदेशे तत्प्रत्यग्देशे वा ॥

पञ्चावत्ती तु दर्व्यामुपस्तीर्य मध्यात्पूर्वार्धात्पश्चार्धाच्च त्रिर्हविषोऽवदायाभिघार्य जुहुयात् । पंचावत्तिनस्तु=

जामदग्न्यावत्सबिदार्ष्टिषेणास्तथैव च ।
भार्गवच्यावना और्वाः पंचावत्तिन ईरिताः ॥

स्विष्टकृदवदानधर्मः=पुनर्दर्व्यामुपस्तीर्य प्रथमहविर्भागस्योत्तरार्धतः पूर्वावदानतो भूयोनूचीनाभिरेवाङ्गुलीभिरवदाय दर्व्यामोप्य द्वितीयहविर्भागस्य तथैवावदाय। पञ्चावत्ती तु–हविर्भागद्वयेऽपि उत्तरार्धात् पूर्वार्धाच्च द्विर्द्विरवदाय पात्रस्थमनभिघार्यावत्तं

तु द्विरभिघार्य स्विष्टकृतमग्निं जुहुयात् ।

कर्मकाण्डस्य सर्वस्य प्रधानस्य यजुर्वेदे उत्पन्नत्वात्स एव तद्विषये प्रमाणमङ्गानि तु इतरयोः यथा ऋग्वेद एव हौत्रं, सामवेद एवौद्गात्रम् । अतः सूत्राद्बहिर्भूतमपि तस्मादेव गृह्यते यावत्सूचितं सूत्रेण तत एव ग्राह्यं तत्सूत्रस्य अव्यवहितत्वात् । एवं सर्वकर्मसु ज्ञेयम् ।

उपवेशनविचारः—कर्माणि स्नात्वा शुचिवाससी धृत्वासने उपविश्य कर्माणि आरब्धव्यानि इति हि दरीदृश्यतेऽनुष्ठीयते च । किमेतत्सूत्रमूलकं नवेति विप्रतिपत्तौ आह=स्नानं तु मलनिर्यापनार्थमेकं, कर्माङ्गमेकं, तत्र मलनिर्यापनं तु अवश्यमनुष्ठेयं न वक्तव्यं तत्सूत्रकारेण । कर्माङ्गं विधत्ते यथा श्रावण्यां " अपोवगाह्येति, शुचिवासो नाम शुक्लं वास इति प्रत्यवरोहे वृत्तिकारो अवोचत् भस्मधारणं तु सर्वकर्मणोऽङ्गमिति अप्पय्यदीक्षितप्रवरैः साधितं नक्षत्रमालायाम् अंगं तत् । परं तदभावे प्रधानं न हापयितव्यम् । तदधृत्वाऽपि प्रसङ्गवशात् समापनीयमेव तत्कर्मसूत्राद्बहिर्भूतमिदम् । उपविश्येत्यपि सूत्रादेव प्राप्तं यथा—" तिष्ठन्समिधोऽभ्यादध्यात्" (गृ०सू० ३।८।१६) अत्र तिष्ठन् ग्रहणमन्यत्रासीनस्थ कर्माणि भवन्तीति ज्ञापनार्थम् ।

कृतनित्याविचारः—कृतं नित्यं येन स कृतनित्यकर्मा आचार्येण हि नैमित्तिकान्युक्त्वा नित्यकर्मप्रस्तावे संध्योपासनमुक्तम् अतः सर्वकर्मभ्योऽपि संध्या पूर्वमनुष्ठेया । ततः प्रादुष्करणं ततो जपः संध्यायां हि प्रधानतममसावादित्येति ध्यानम् । तच्च अर्घ्यदानोत्तरं । आचार्येण हि सध्यायां हि नित्योदक इत्यनेन अर्घ्यप्रदानं तैत्तिरीयश्रुतिस्थं संगृहीतम् । ततो जपः। एवं चोदनाद्वयात्मिका संध्योक्ता । श्रुतिरेव मूलं सूत्रस्याव्यवहितत्वात् । तस्मात् कृतसंध्येनोपरितनानि कर्माणि कार्याणि इत्यर्थः । सर्वेभ्योऽपि संध्यैव बलीयसीति सैवात्र नित्यपदेनोच्यते । आशौचादिषु ब्रह्मयज्ञादीनामपि नाध्ययनं विहितम् । " दानाध्ययने वर्जयेरान्निति " सूत्रेण (४।४।१७ गृ०) " अहरहः कुर्वीत् " इति सामान्यत उक्तस्यायमपवादः । न तथा संध्याया इति सैव नित्यपदेनोच्यते ।

आचमनविचारः=आचमनं तु श्रुत्युक्तमेव ग्राह्यम् । न केशवादि । अधिकारीभेदात् । ये खलु पुराणेतिहासादीनामधिकारिणस्तैरेव तद्ग्राह्यमस्माभिस्तु तैत्तिरीयारण्यके यदुक्तं तदेव गृह्यते तत्र त्वेवम् ।

" हस्ताववनिज्य, त्रिराचामेत्, द्विःपरिमृज्य, सकृदुपस्पृश्य, शिरश्चक्षुषी नासिके, श्रोत्रे हृदयमालभ्य, यत्सव्यं पाणिं पादौ प्रोक्षति " । एतदाचनम् । (तै०आ० २।११ अ०) भाष्यं=हस्तावविगिज्य=हस्तौ प्रक्षाल्य, हस्तद्वयं पूर्वं शुद्धमपि एतदङ्गत्वेन पुनः प्रक्षाल्योदकं त्रिः पिबेत् । द्विः परिमृज्य, शुद्ध्यर्थ-

मुदकेन तदा हस्तं प्रक्षालयेत् । सकृदुपस्पृश्य, शिरःप्रभृतीन् हृदयपर्यन्तानवयवान् क्रमेण स्पृष्ट्वा सव्यपाणिपादप्रोक्षणमपि कार्यम्। आचमनार्थवादस्तत्रैव। " यत्त्रिराचामति, तेन ऋचः प्रीणाति, यद्द्विः परिमृजति, तेन यजूँ्षि यत्सकृदुपस्पृशति तेन सामानि, यत्सव्यं पाणिं पादौ प्रोक्षति यच्छिरश्चक्षुषी नासिके श्रोत्रे हृदयमालभते तेनाथर्वाङ्गिरसो ब्राह्मणानीतिहासान् पुराणानि कल्पान् गाथानाराश ्सीः प्रीणाति "

भाष्यं—अथाचमनादीन् प्रशंसति ॥ यत्त्रिराचामति० प्रीणाति इति । अत्र सव्यपाणिपादयोः प्रोक्षणकथनादेव प्रोक्षणविधिरुन्नेतव्यः । " इति भाष्यम् । अत्र विचारान्तरं प्रस्तूयते । ' ब्रह्मयज्ञेन यक्ष्यमाण इत्यारभ्य विहितमाचमनं तदङ्गमेव न सर्वकर्माङ्गमिति कश्चन चोदयेत् तं प्रतिब्रूयात् । प्रकरणपठितमात्रेण न तदङ्गं भवति । यथा पूषादिमन्त्राणामुत्कर्षः क्रियते तथाऽस्मादपि प्रकरणोदितमाचमनमुत्कृष्य सर्वकर्माङ्गं साध्यते नचायमुत्कर्षो मयैव क्रियत इति—मनुनापि इत एवोत्कृष्य स्मृतम् तथाच—

" उपस्पृश्य द्विजो नित्यमन्नमद्यात्समाहितः ।
भुक्त्वा चोपस्पृशेत्सम्यगद्भिः खानि च संस्पृशेत् ॥२।५३

त्रिराचामेदपः पूर्वं द्विः प्रमृज्यात्ततो मुखम् ।
खानि चैव स्पृशेदद्भिरात्मानं शिर एव च ॥ २।६०

मेधातिथिः—आचमनोपस्पृशति शब्दौ समानार्थौ शुध्यर्थसंस्कारविशेषवचनौ शिष्टव्यवहारादवगम्येते । यद्यप्युस्पृशतिरर्थान्तरे पठितश्चमिरप्यदनमात्रे तथापि विशेष एव सोपसर्गयोः प्रयोगदर्शनात् तदर्थतैव प्रतीयत इत्यादि । उपस्पर्शनं कृत्वा खानि संस्पृशेत् इति पृथग्विधानात् त्रिरब्भक्षणमात्रमाचमनं, स्पर्शनादिकमितिकर्तव्यता इति दर्शितम् ॥

याज्ञवल्क्योऽपि—

" त्रिः प्राश्यापो द्विरुन्मृज्य खान्यद्भिः समुपस्पृशेत् ॥ इति ॥ १।२०

इत्थं तत्रत्यमेवाचमनं सेतिकर्तव्यताकं, मनुयाज्ञवल्क्याभ्यां सर्वकर्माङ्गत्वेनोत्कृष्टं स्मृतं तदेवास्माभिरङ्गीकार्यं न केशवादीति सिद्धम् ॥

संकल्पविचारः—सम्यक् कल्प्यते इति संकल्पः । इदं कर्म सम्यागिति या कल्पना । संकल्पविकल्पात्मकस्य च मनसः सत्त्वात् मानसिकमेवेदं कर्मेति वाचाऽनूद्यते । वस्तुतस्तु सूत्रकारैर्नोक्त एव । केवलं पूर्वमीमांसारीत्या संकल्प-

प्रकारोऽन्यः । स चेत्थं=अकरणे प्रत्यवायपरिहारार्थं संध्यामुपासिष्ये । एवं सर्वत्र । उत्तरमीमांसारीत्या श्रीपरमेश्वरप्रीत्यर्थं संध्यामुपासिष्ये मम यानि उपात्तानि दुरितानि तेषां क्षयद्वारा श्रीपरमेश्वरप्रीतिर्जायमाना मे ज्ञानमुत्पाद्यतामिति यावत् । अत्र यथा रोचते तथानुष्ठेयः। मया तु उत्तरमीमांसकानां अनुसारेण लिखितः । स च सूत्रकाराणां सम्मतः । न च सूत्रकारा निरीश्वरवादिनः । यदि तथा स्यात्तर्हि भगवानाश्वलायनः " सर्वाणि ह वा अस्य नामधेयानि " ४।९।२७ गृ० एवं नासूत्रयिष्यत् । असूत्रयच्च तस्मादेतन्मूलमस्माकं संकल्पस्य ॥ अन्यत्रापि " विद्ययैवाप्यास्ति प्रीतिः " १।१।५ आ० गृह्य० इत्युक्तत्वाद्देवताप्रीत्यर्थं पाकयज्ञानुष्ठानं इति कण्ठरवेण सूत्रकार एवाह " न वै देवा नमस्कारमति " १।१।५ । देवा नमस्कारं नातिक्रामन्ति, तमपि स्वीकुर्वन्ति । इत्यनेन देवताप्रीत्यर्थं संकल्पः कर्तुं शक्यः योग्यश्चेति साधितम् । मात्र, यक्ष्यमाणदेवताप्रीत्यर्थं इति वक्तव्यं कुत इति चेत् समष्टिरूपेण ईश्वर एवेति कल्पनापेक्षया इष्टकामप्रसिध्यर्थं यक्षमाणदेवताप्रीत्यर्थं अमुकं कर्म करिष्ये इत्येव संकल्पनीयम् । आह च भगवानपि, " देवान् भावयतानेन ते देवा भावयन्तु वः, " इति इंद्रवरुणाग्नयादय एव यष्टव्यत्वेन स्मरति भगवान् ॥

इति—संकल्पविचारः ॥

परमेश्वरप्रीत्यर्थमित्यस्माभिर्यत्रोक्तं तत्तु सूत्रमूलकं परं यत्र यक्ष्यमाणा देवताः प्रीयन्तामिति वक्तव्यस्थलेऽपि परमेश्वरः प्रीयतामिति उक्तमस्ति तल्लेखनानन्तरं ज्ञातं परमत्र विचारेणानुष्ठानप्रकारः । देवयज्ञादिप्रयोगेऽपि यक्ष्यमाणदेवता इतिकल्पयितव्यं—यत्रैवं तत्र शास्त्रार्थानुसारेण व्यवस्था अतः शास्त्रार्थः संगृहीतः ।

स्थण्डिलम्=मृत्तिकायाश्चतुरस्रम् इषुमात्रावरं सर्वतो होमार्थं कृता या वेदिः स स्थण्डिलशब्दार्थः । तस्यार्थवादस्त्वेवं श्रूयते । " पृथिवी देवयजनी, विषाद्वैनामासुर आसीत् सोऽबिभेत्, यज्ञेन मा देवा अभिभविष्यन्तीति, स पृथिवीमभ्यवमीत् साऽमेध्याभवत्, अथो यदिंद्रो वृत्रमहन् तस्य लोहितं पृथिवीमनुव्यधावत् साऽमेध्याभवत् । पृथिवि देवयजनीत्याह मेध्यामेवैनां देवयजनीं करोति " । तै० ब्रा० ३।२।९ तदेवात्र अनुसंधेयम् । सोऽर्थवादः पृथिवीविषये विद्यते, सत्यं परं स्थण्डिलस्य मृदधीनत्वात्, मृत्स्वरूपत्वात् पृथिव्याश्च स एवात्रार्थवादो मन्तव्यः । एतच्छ्रुतिमूलक एव स्मृतिष्वपि स्मर्यतेऽर्थवादः ॥

" वराहकूर्मनागाश्च वसन्ति वसुधातले ।
पन्नगास्तत्र तिष्ठन्ति तदर्थं स्थाण्डिलं स्मृतम् ॥

इति प्रयोगरत्ने स्मृतिसंग्रहे

इषुमात्रावरं सर्वतः स्थण्डिलमिति सूत्रम्। इषोर्मात्रेव मात्रा यस्य तत्। चतसृष्वपि दिक्षु पञ्चाशदङ्गुलः परिधिरित्युक्तं भवति " पञ्चप्रादेशा इषुर्भवतीति " शतपथब्राह्मणे श्रुतम्॥ मात्रा–प्रमाणं–उत्तरपदलोपोऽत्र द्रष्टव्य इति सिद्धान्तं कृत्वाह पतञ्जलिर्महाभाष्ये " तपरस्तत्कालस्येति सूत्रभाष्ये, उष्ट्रमुखामिव मुखं यस्य सोयं उष्ट्रमुखः "। अत्र कैय्यटः। समग्रेण चोष्ट्रेण मुखस्य सादृश्याभावादुष्ट्रशब्दोऽवयवे वर्तते, मुखेनैव मुखसादृश्यं वक्तव्यं, प्रसिद्धं चैतत्। उष्ट्रमुखमिव मुखमस्येत्यर्थो लभ्यते, गम्यत इति यावत् तद्वदिषुमात्रावरमित्यत्र ध्येयम्। प्रादेशो नाम-दशाङ्गुलः, तदुक्तं, प्रयोगरत्नाटिप्पण्याम्

"अङ्गुष्ठस्य प्रदेशिन्या व्यासः प्रादेश उच्यते "।

अग्निनामानि पावमान्यादीनि सूत्रे नोक्तानि न संगृहीतानि। स्थाण्डिलोल्लेखनं तु अदृष्टार्थं तास्वेव रेखास्वग्निस्थापनम्। अग्न्यर्थोऽयं संस्कारः यत्राग्नेः स्थापनं तत्रैते कर्तव्या रेखाकरणादयः। अन्वाधानविचारः==अन्वाधाय एतावत्सूत्रम्। अन्वाधानं नाम कर्माङ्गत्वेन द्वयोस्तिसृणां वा समिधामग्नावभ्याधानम्। इति अवीवृतत् गार्ग्यनारायणः। आ. गृ- १।२।१। तच्चान्वाधानम्। तदेतदन्वाधानं देवतापरिग्रहपूर्वकमिति श्रौते तावदवगतम्। तत्रदेवतापरिग्रहस्यार्थवादमुक्त्वानन्तरं तद्विधिमाह। तै. सं. १।६।७॥ भाष्यम्।

तामिमं देवतापरिग्रहं विधातुमादौ प्रस्तौति। " यथा वै समृतसोमा एवं वा एते समृतयज्ञा यद्दर्शपूर्णमासौ, कस्य वा ह देवा यज्ञमागच्छन्ति कस्य वा न बहूनां यजमानानाम् यो वै देवताः पूर्वे परिगृण्हाति स एनाः श्वोभूते यजते इति। "॥ भाष्यम्==एकस्मिन्नेव काले संहत्य प्राप्ताः समृतसोमाः, सोमयागाः, एकस्मिन्नेव वसन्तर्तौ, बहूनां यजमानानां सोमयागाः, संहत्य प्राप्यन्त एवमेव बहूनां यजमानानामेते दर्शपूर्णमासादियज्ञा एकस्मिन्नेव पर्वाणि संहत्य प्राप्यन्ते, देवताश्चाग्नयादयो या एकस्य यजमानस्य ताश्चान्यस्यापि, तथा सति देवानां मनसि, संकटमुत्पद्यते, तत्संकटमहशब्देन द्योत्यते। देवानां पक्षपातस्यानुचितत्वात्। कस्य यजमानस्य यज्ञं देवा आगच्छान्ति कस्य वा यज्ञं नागच्छन्तीति महदेतत्संकटम्। तस्य संकटस्यायं परिहारः। बहूनां यजमानानां मध्ये यो यज मानः, इतरेभ्यः पूर्वे प्रवृत्तो देवताः परिगृण्हाति, स यजमान एताः परिगृहीता देवताः परेद्युर्यष्टुमर्हति। न च सर्वेऽपि यजमानाः परस्परमात्सर्येण प्रथमं प्रवर्तन्त इति स दोषस्तदवस्थ इति शङ्कनीयम्। परिग्रहमन्त्रपाठेनैव देवसंकटस्य परिहृतत्वात्। यागस्योद्देशत्यागमात्रत्वाद्देवानामागमनमन्तरेणापि, सोऽनुष्ठातुं शक्यते। योगसामर्थ्येन वा बहूनि शरीराणि स्वीकृत्य तत्र सर्वत्राऽऽगमिष्यान्ति। इत्थं च परिहारं भगवान् बादरायणः देवताधिकरणे " विरोधः

कर्मणीति चेन्नानेकप्रतिपात्तिदर्शनात् '' इति सूत्रयामास । किं बहुनाऽस्य वाक्यस्य देवतापरिग्रहविध्यर्थवादत्वान्न किंचिद्देवानां संकटमस्ति । इदानीं देवतापरिग्रहं विदधाति ॥

'' अग्निं गृण्हाति स्व एवाऽऽयतने देवताः परिगृण्हाति ताः श्वोभूते यजते । स्पष्टोऽर्थः। उपरितनभाष्ये प्रदर्शित एवास्यार्थः । तदेतदन्वाधानम् । देवतापरिग्रहपूर्वकं द्वयोस्तिसृणां वा समिधामभ्याधानं पूर्वेद्युः कार्यमिति सिद्धम् । अनु—आधानम् । उल्लेखनादिसंस्कारमनु पश्चात् समिधामाधानं स्थापनमिति शब्दार्थः ।

परिस्तरणार्थवादः । परिस्तरणमुपस्तरणमित्यनर्थान्तरम् । '' उपस्तीर्य पूर्वश्चाग्निरपरश्चेत्याहुः'' १।६।७ तै०स० भाष्यम्=परोक्षकथनेन विधिः प्रशस्यते । विहितमुपस्तरणमुपपादयति । '' मनुष्या इन्वा उपस्तीर्णमिच्छन्ति किमु देवा येषां नवावसानमुपास्मिन्छ्वो यक्ष्यमाणे देवता वसन्ति य एवं विद्वानिग्निमुपस्तृणाति'' इति । तै०सं० १।६।७ इन्वा इति निपात्रयसमुदायोऽपिशब्दार्थे ब्रूते । अत्यन्त दरिद्रा मनुष्या अपि शीतवातादिपरिहाराय तृणादिभिराच्छन्नं गृहमिच्छन्ति महाप्रभावा देवा उपस्तरणमिछन्तीति किमु वक्तव्यम् । येषां देवानामिच्छानुसारेण तदा तदा तत्र तत्र नवावसानं नूतनगृहं निष्पाद्यते । यो यजमान एवंविद्वानग्निमुपस्तृणात्यस्मिन्यजमाने परेद्युर्यक्ष्यमाणे सति, पूर्वेद्युस्तत्समीपे हविर्भुजो देवता निवसन्ति । तस्मात्परिस्तीर्योऽग्निरिति सिद्धम् ।

अप्प्रणयनविचारः । आचार्येण तु निनयनमात्रमुच्यते तस्मादेव प्रणयनमपि कार्यमित्यवगम्यते इति वृत्तिकारः तत्प्रकार आध्वर्यवसूत्रे प्रदर्शितः । परमत्र पाकयज्ञेषु ब्रह्मणो वैकल्पिकत्वात् स संपूर्णो विधिरत्र नाङ्गीक्रियते केवलमग्नेरुत्तरतः पात्रं प्रपूर्य स्थापनीयम् । परमत्र बुद्धिवैशद्यार्थं तैत्तिरीयब्राह्मणस्थं सूत्रस्थमप्प्रणयनं लिख्यते । तत्र तावत् ब्राह्मणे विधीयते एतत् । तै. ब्रा. ३।२।४ भाष्यम्= प्रणयनं विधत्ते । '' अपः प्रणयति । इति तत्प्रकारः कल्पे प्रदर्शितः । '' अथोत्तरेण गार्हपत्यमुपविश्य कंसं वा चमसं वा प्रणीताप्रणयनमानीय तस्मिंस्तिरःपवित्रमप आनयन्नाह ब्रह्मन्नपः प्रणेष्यामि, यजमान वाचं यच्छेति प्रसूतः समं प्राणैर्धारयमाणोविषिञ्चन् हृत्वोत्तरेणाऽऽहवनीयं दर्भेषु सादयित्वा '' इति । प्रणयनाविधेरर्थवादमाह । ''श्रद्धा वा आपः श्रद्धामेवारभ्य प्रणीय प्रचरति । इति अपां श्रद्धाजनकत्वेन श्रद्धारूपत्वमुपचर्यते तज्जनकत्वं च श्रुत्यन्तरे समाम्नातम् । '' आपो हास्मै श्रद्धां संनमन्ते पुण्याय कर्मणे '' इति । दृश्यते च स्नानाचमनोपेतस्य श्रद्धातिशयः पूर्वोक्तमेव प्रणयनविधिं पुनः पुनरनूद्य, बहुधा स्तौति '' अपः प्रण-

यति, यज्ञो वा आपः यज्ञमेवारभ्य प्रणीय प्रचरति, अपः प्रणयति, वज्रो वा आपः । वज्रमेव भ्रातृव्येभ्यः प्रहृत्य प्रणीय प्रचरति, अपः प्रणयति । आपो वै रक्षोघ्नीः । रक्षसामपहत्यै । अपः प्रणयति, आपो वै देवानां धाम । देवानामेव प्रियं धाम प्रणीय प्रचरति । अपः प्रणयति । आपो वै सर्वा देवता देवता एवाभ्यः प्रणीय प्रचरति'' इति । यज्ञो यथाऽभीष्टस्वर्गसाधनं तद्वदपामभीष्टप्रीत्यादि-साधनत्वाद्यज्ञत्वम् । प्रणीताभिरद्भिः पिष्टस्य संयवनं प्रचरणम् । यथा वज्रो वैरिणं वारयति तद्वदापः शत्रुं वारयन्ति रक्षोघ्नीत्वं पुरैवोक्तं वृष्ट्युदकस्य देवप्रियधाम्नो द्युलोकादुत्पन्नत्वादपां तद्धामत्वम् । देवास्तावदग्निं प्रविश्य तद्भावं प्राप्ताः । तथा च श्रूयते । ''देवासुराः संयत्ता आसन् । ते देवा बिभ्यतोऽग्निं प्राविशन् । तस्मा-दाहुरग्निः सर्वा देवता इति । स चाग्निरप्सु प्रविष्टः । ''स निलायत, सोपः प्राविशत् ॥ इति श्रुतेः । तस्मादपां सर्वदेवतात्वम् । ब्राह्मणान्तरद्वारा तथात्वं द्रष्ट-व्यम् । इति सायणभाष्यम् तै. सं. १।१।४

गार्ग्यनारायणोऽपि, रक्षोहननार्थमेव अप्प्रणयनम् इत्याह । ''रक्षोहननार्थे परिधातव्या इति यदुक्तं तदप्ययुक्तम् । पूर्णपात्रेणैव रक्षोहननस्य कृतत्वात् । रक्षो-हननं च परिधिकार्यम् । तत् पूर्णपात्रेणैव कृतमिति न परिधय उपादेया'' इत्यादि ४।६।४ आ. गृ. ॥ अत्र अप्प्रणयनमीमांसा ॥ 'अपः प्रणयतीति प्रकृत्य श्रूयते 'मृण्मयेन प्रतिष्ठाकामस्य प्रणयेत्'' इति । तत्रापां प्रणयनस्य नित्येऽपि प्रयोगे मृण्मयपात्रमेव साधनम् । कुतः ? नित्येऽपि पात्रस्य आकाङ्क्षितत्वात् । न च लोकसिद्धं किंचित्पात्रमुपादीयत इति वाच्यम् । श्रौते कर्मण्यश्रुताच्छ्रुतस्य संनि-हितत्वादिति प्राप्ते ब्रूमः । कामार्थं मृण्मयमाम्नातम् । तच्च सति कामे योग्यम् । न हि पाक्षिकं कामं निमित्तीकृत्य प्रवृत्तं नित्यस्य योग्यं भवति । पात्राकाङ्क्षा तु सामान्यतो विहितेन निवर्तते 'अपः प्रणयति; इति हि पात्रमनुपन्यस्य विहितम् । तच्चान्यथानुपपत्त्या पात्रं सामान्येनाक्षिपति ॥ तस्मान्नित्यप्रयोगे तत्काम्यं मृण्मयं नान्वेति । किंन्त्वितरत्पात्रं किंचिदुपादेयम् ''चमसेनापः प्रणयेत्'' इति नित्ये पात्रं विधीयत इति चेत्तर्हि कृत्वाचिन्ता अस्तु ४।३।४

निर्वापविचारः ''तस्यै तस्यै देवतायै चतुरश्चतुरो मुष्टीन्निर्वपति पवित्रेऽन्त-र्धायाऽमुष्मै त्वा जुष्टं निर्वपामि'' इति हि सूत्रम् । एनान् व्रीहीन् प्रियं हविर्यथा भवति तथा निर्वपति । आध्वर्यवसूत्रं च ''शूर्पे पवित्रे निधाय तस्मिन्नग्निहोत्र-हवण्या हवींषि निर्वपति तया पवित्रवत्या वा'' ॥ निरुप्तानां प्रोक्षणमदृष्टार्थं संस्कृता व्रीहयो यज्ञार्हा भवन्तीत्यर्थः । अवहननं तु नियमविधिद्वारा अदृष्टार्थम् तुषविमोकद्वारा दृष्टफलार्थम् । 'व्रीहीनवहन्ति' इत्यत्र सकृन्मुसलघातमात्रेण विधि-

प्रयुक्तस्यापूर्वस्य सिद्धेर्नास्त्यावृत्तिरिति चेत् मैवम् तण्डुलनिष्पत्तेर्दृष्टप्रयोजनत्वेन तत्पर्यन्तस्याभ्यासस्याश्रुतस्यापि कल्पनीयत्वात्, एवं तण्डुलपेषणादावपि द्रष्टव्यम् ॥ एवं शास्त्रार्थे सति इदानींतनाः केवलं यन्त्रनिष्पन्नतण्डुलैः पुरोडाशं निष्पादयन्तीत्येतद्विचारणीयम् । शास्त्राविरोधादुपेक्ष्योऽयमाचार इति वयं ब्रूमहे अवघातेनैव तण्डुलान् संपाद्य पुरोडाशः संपादनीयः तथैव कृतं चेत् कर्म फलवद्भूयात् । एतेन भरद्वाजकातीयाश्च व्याख्याताः ।

इध्मविचारः । इध्मः पञ्चदशदारुकोऽस्मच्छास्त्र इति सिद्धम् । साधितश्चैषोऽर्थो महता प्रयासेन गार्ग्यनारायणेन ४।६।४ सूत्रवृत्तौ ॥ अग्निप्रज्वालनार्थं पञ्चदश काष्ठानि इन्धी दीप्तौ इति धातुः ॥ स्थण्डिलानुसारेण तत्परिमाणमूहनीयं स्मृतिकारैश्च परिदर्शितम् । तर्केणैवैतत्समधिगन्तुं शक्यं न स्मार्तवचनापेक्षा ।

आघारविचारः । "तूष्णीमाघारावाघार्य" इति सूत्रम् १।१०।१२ वृत्तिः । तूष्णींग्रहणं मन्त्रवर्जमन्ये धर्माः शास्त्रान्तरदृष्टाः कथं प्रवर्तेरन्निति । अत्र विचार्यते शास्त्रान्तरे कथमुक्तावाघारौ

"प्राञ्चावाघारौ" १।८।१२ इति कातीयसूत्रे

भाष्यम्–पूर्वाघार उत्तराघारश्चैतौ द्वावप्याघारौ प्राञ्चौ प्राक्संस्थौ होतव्यौ। ऋजू संततौ दीर्घौ च 'ऋजुमाघारयति संततमाघारयाति, दीर्घमाघारयति, प्राञ्चमाघारयति इति श्रुतेः प्राञ्चौ इति सर्वेषां धर्माणामुपलक्षणार्थम् ॥

"विदिशावेके" १।८।४३ कातीये

भाष्यम्–एके शाखिन आघारौ विदिशौ जुहृवति आहवनीयस्योत्तरश्रोणेरारभ्य दक्षिणांसपर्यंतं पूर्वाघारं दक्षिणश्रोणेरारभ्योत्तरांसपर्यन्तमुत्तराघारमिति तथा च सूत्रान्तरम् ।

'उत्तरपश्चार्धादग्नेरारभ्याविच्छिन्नं दक्षिणतो जुहोति,
तथा दक्षिणपश्चार्धादारभ्याविच्छिन्नमुत्तरतो जुहोति इति ॥

सूत्रवृत्तिकारेण तु उत्तरपश्चिमाया आरभ्येति विदिक्पक्ष स्वीकृतः स एवास्तु विचारार्थमलिखामिदं सूत्रभाष्यं कातीयम् ।

अत्र मीमांसा 'अग्निहोत्रं जुहोति' इत्यत्राग्निहोत्रस्य कर्मनामत्वे द्रव्यदेवतयोरभावाद्यागस्य स्वरूपमेव न सिध्येत् । ततोऽग्निदेवतारूपो गुणोऽनेन दर्वीहोमे विधीयते, आघारशब्दश्च "घृ क्षरणदीप्त्योः" इत्यस्माद्धातोरुत्पन्नः क्षरद्घृतमाचष्टे, तस्मिंश्च घृते द्वितीयाविभक्त्या संस्कार्यत्वं प्रतीयते तच्च संस्कृतं घृतमुपांशुयागे

द्रव्यं भवति । तस्मादग्निहोत्राघारशब्दौ गुणसंस्कारविधायका इति प्राप्ते ब्रूमः । 'अग्निरग्निर्ज्योतिरग्निःस्वाहेति सायं जुहोति' 'सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातरिति विहितेन मन्त्रेण प्राप्तत्वात् देवता न विधेया । ततोऽग्निसूर्यदेवताकस्य सायंप्रातःकालयोर्नियमेनानुष्ठेयस्य कर्मणोऽग्निहोत्रमिति यौगिकं नामधेयम् । योगश्च बहुव्रीहिणा दर्शितः । चतुर्गृहीतं वैतदभूत्तस्याघारमाघार्यैत्याज्यद्रव्यस्य प्राप्ततया क्षरद्घृतसंस्कारस्याविधेयत्वादाघारशब्दोऽपि, यौगिकं कर्मनामधेयम् । यस्मिन् कर्मणि नैर्ऋर्तीं दिशमारभ्यैशानीं दिशमवधिं कृत्वा संतत्या घृतं क्षार्यते तस्य कर्मण एतन्नाम । ननु नामत्वे सति " उद्भिदा यजेत " " ज्योतिष्टोमेन यजेत " इत्यादाविव धात्वर्थेन करणेन सामानाधिकरण्यायाग्निहोत्रेण जुहोति, आघारेणाघारयतीति तृतीयया भवितव्यम् । नैष दोषः । अनुष्ठानादूर्ध्वं धात्वर्थस्य सिद्धत्वाकारेण करणत्वेऽपि ततः पूर्वं साध्यत्वाकारं वक्तुं अग्निहोत्रमाघारमिति द्वितीयाया युक्तत्वात् । न चात्र द्वितीयानुसारेण व्रीहीन् प्रोक्षतीत्यादाविव संस्कारः शङ्कनीयः । व्रीहिशब्दवदग्निहोत्राघारशब्दयोः प्रसिद्धद्रव्यवाचकत्वाभावेन क्रियावाचित्वाभ्युपगमात् । तस्मादग्निहोत्राघारशब्दौ दर्वीहोमोपांशुयागयोर्गुणसंस्कारविधायिनौ न भवतः किन्तु कर्मान्तरयोर्नामनी । इति । १।४।४ पू०मी०। आघारः—आङ्पूर्वात् घृधातोर्भावघञन्तमाघारपदमुपसर्गवशाद्यागोत्तरक्षारणरूपहोमस्य नामधेयम् ।

अग्निहोत्रशब्दविषये किञ्चिदत्र प्रासङ्गिकं विचार्यते । ' तथाहि—हूयते इति होत्रं पयोदध्यादिद्रव्यम् । " हुयामाश्रुभसि " इत्यादिना त्रन् प्रहुयामयः, । अग्नये होत्रमस्मिन्निति बहुव्रीहिणैव मत्वर्थस्य लाभान्न मत्वर्थलक्षणा, " सप्तमीविशेषणे बहुव्रीहौ " इति ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः । "कण्ठेकालः, उरसिलोमा, सच्छास्त्रजन्मा हि विवेकलाभः " इत्यादिवत् । ततश्चाग्न्युद्देश्यकपयोदध्यादिहूयमानद्रव्यकहोमोऽवगतः । तत्राग्निहोत्रपदे होमो न विधेयः, जुहोतिनैव तल्लाभात् । नापि पयोदध्यादिद्रव्यम् " पयसा जुहोतीत्यादिभिस्तल्लाभात् " अत उपसर्जनीभूतोऽप्यग्निरेव विधेय इति प्राञ्चः । वस्तुतस्तु होत्रशब्दो भावसाधनः । अग्नये होत्रं होमः अग्निहोत्रं यद्वा हूयते यस्मिन्कर्मणि तद्धोत्रम् । अग्नये होत्रमग्निहोत्रम् । प्रकृतिविकारभाव एव चतुर्थीसमासविधावपि " सुप्सुपा " इति समासः । " लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमो यथा लौकिकवैदिकेषु " इति वार्तिकव्याख्यावसरे " धर्माय नियमो धर्मनियमः" इति पातञ्जलभाष्ये, चतुर्थीसमासप्रदर्शनात् व्यक्तोक्तत्वाच्च कैयटादिभिः ततश्च मत्वर्थलक्षणां विनैव गुणविधिसम्भवः । बहुव्रीह्याश्रयणे तु । "बहुव्रीहौ प्रकृत्या पूर्वपदम्" इति बहुव्रीहिस्वरेणाग्निशब्दे इकारस्योदात्तत्वे, सतिशिष्टस्वरेणावशिष्टानामचामनुदात्तत्वे ओकारस्य "उदात्तानुदात्तस्य स्वरितः" इति स्वरितत्वे, रेफादकारस्य,

" स्वरितात्संहितायामनुदात्तानाम् " इति प्रचयः स्यात् । 'सुप्सुपा' इति समासाश्रयणे तु " समासस्य " इत्यन्तोदात्तं भवति । अन्तोदात्तमेव चाग्निहोत्रपदं प्रयुञ्जते तैत्तिरीयादय इत्यन्यदेतत् । अग्नेः होत्रमित्यपि समासो वैयाकरणैः शेखरकारैः प्रादर्शि । प्रभावल्यामपि षष्ठीतत्पुरुषसमास एव प्रादर्शीति सर्वं सुसङ्गतम् । प्राचीननवीनविचारसरण्यां भेदज्ञानार्थमलिखमिमं विचारम् । इत्थमेव विचारः प्रवर्तयितव्यो न च तूर्णीभाव एव वरमिति विभावनीयम् । न च प्राञ्चो नवीनाश्च तूर्णीं स्थिताः । एतन्मया तत्र तत्र प्राय एतदर्थमेव विचार्यते लिख्यते च । इदानीन्तनास्तु संशयमानान्तःकरणा एव स्वस्थमुपविशन्तीत्यन्येषां हास्यास्पदम् । शब्दकौस्तुभेऽपि परमतखण्डनावसरे भट्टोजीदीक्षितैः पराक्रान्तमिति दिशो दर्शनाय तत्रत्यं " सर्वादीनि सर्वनामानी " त्येतत्सूत्रव्याख्यानमवलोकनीयम् । न हि इदानीन्तना अबुद्धिमन्तोऽमेधावन्त इत्युच्यतेऽस्माभिः अपि तु न मीमांसन्ते इत्येव दोषास्पदीभूतास्ते नान्यत्किमपि अतोऽहं ब्रवीम्येतद्धर्मशास्त्रमवश्यं शास्त्रान्तरसाहाय्येन मीमांसनीयामिति । उक्तं चाभियुक्तैः, " पाणिनीयं च काणादं सर्वशास्त्रोपकारकम् " धर्मब्रह्ममीमांसार्थमेव हि व्याकरणादीनामुपयोगः न च तेषां स्वतन्त्रतया कश्चित्सिद्धान्तोऽभ्युपेतव्यो भवति यथा स्फोटवादः परमाणुवादश्च । परं मीमांसासहायकं भवतीत्येव हि तदङ्गीक्रियते । त एव हि परमार्थभूते । तत्तच्छास्त्रे मोक्षार्थमेवेदं प्रवृत्तमिति प्रतिपाद्यते सोऽभ्युच्चय इति ज्ञेयं सुधीभिराकलनीयं च तथैव स्वमतप्रतिपादनाय कदापि न भेतव्यम् । यथा च निरुक्ते ऐतिहासिकयाज्ञिकमतविरुद्धमपि स्वमतं प्रतिपादयति यास्कः श्रौतसूत्रेऽप्येवमेव स्थितिः। व्याकरणे, न्याये, सांख्येऽपि अयमेव प्रधानभूतो विषयः । स्वमतप्रतिपादनेनैव हि ते सामाजिकत्वमन्वबोभूवन् को हि नाम समाजभीत्या पारमार्थिकं शास्त्रतः सिद्धं स्वमतमभिलपेत् प्रत्यक्षं चैतन्मीमांसाग्रन्थे, यथा स्मृत्याद्यधिकरणेषु भाष्यकारमतमेकं, तद्विरुद्धं च वार्तिककारः स्वमतं शास्त्रतः प्रतिष्ठापयति । अन्यच्च प्राभाकरः , अपरं चैतन्मुरारिः । यत्किल धर्मशास्त्रमभ्युदयाय पूर्वमभवत्तदेवेदानीमपकर्षायास्माकं भवतीति विचारास्पदम् । को हि नामैतन्नानुमन्येत यदिदं धर्मब्रम्हमीमांसाशास्त्रं विचारणीयमिदानीन्तनैरिति । न तत्राज्ञजनसमुदायभीतिः पुरस्कार्या अपि तु शास्त्रं प्रमाणीकृत्य स्वमतमवश्यम्प्रतिपादयितव्यम् । तथा चास्मिन् ग्रन्थे प्रतिपादितं मया । स्खलनं तु युक्तम् । अवदानादिविचारः= एवमाचार्यसूत्राणि " द्विर्लाजानावपति " "त्रिर्जामदग्नयानाम् " " प्रत्यभिघार्य हविः' "अवत्तं च " "एषोऽवदानधर्मः" " मध्यात्पूर्वार्धाच्च हविषोऽवद्यति" मध्यात् पूर्वार्धात्, पश्चार्धादिति पश्चावत्तिनाम् " उत्तरार्धात्सौविष्टकृतम् " नात्र हवींषि प्रत्यभिधारयति स्विष्टकृतं द्विरभिधारयति ' । इति । आध्वर्यवे तु एव-

मयं विचारः प्रवर्तितः ॥ " तस्य द्विरवद्यति " भाष्यम्—तस्य पुरोडाशचरुधानासान्नाय्यादिरूपस्य द्विरवद्यति । यागार्थे द्विरवखण्डयाति तस्येत्यवयवषष्ठीयम् । "त्रिर्जमदग्नीनाम्" भाष्यम्—जमदग्निः प्रवरो येषां ते जमदग्नय इत्युच्यन्ते । तेषां जमदग्नीनां पञ्चार्षेयाणां त्रिरवद्यति तथा चोपस्तराभिघाराभ्यां पञ्चावत्तं सम्पद्यते । किं बहुना यत्र यत्रान्येषां चतुरवत्तमाज्यभागपत्नीसंयाजप्रधानयागादौ तत्र सर्वत्र जमदग्नीनां पञ्चावत्तमेव कर्तव्यम् । पञ्चावत्तं जमदग्नीनामिति शाखान्तरात् । अग्निहोत्रेऽपि तेषां पञ्चावत्तमेव पठ्यते मानवे, चतुःपञ्चकृत्वो वेति । आपस्तम्बोऽपि, पञ्च जमदग्नीनामिति, पित्र्यायां च प्रधानयागेषु स्वीयस्वीयहविषो द्विर्द्विरवदेयम् । अन्येभ्यस्तु सकृत्सकृत् । कव्यवाहनयागे तु द्विरुपस्तरणं कार्यम् । हविर्भ्यो वा द्विर्द्विरवदेयम् । पश्ववदानेभ्योऽपि त्रिरवदेयामिति । अत्र त्रिर्जमदग्नीनामिति जमदग्निग्रहणमुपलक्षणार्थम् । अन्येषामपि पञ्चावत्तं स्मर्यते तथाहि

" जमदग्निवत्सबिदा वार्ष्टिषेणास्तथैव च।
पंचावत्तिन एतेऽन्ये सर्वे चतुरवत्तिनः ॥

" पश्चात्तृतीयम् " भाष्यम्—तृतीयमवदानं हविषः पश्चात् भागादवदेयम् प्रथमद्वितीये तु मध्यात् पूर्वार्धादिति वक्ष्यते । " सर्वेषां वोभयमविधानात् " भाष्यम्—वा विकल्पे सर्वेषामिति जमदग्नीनां तद्व्यतिरिक्तानां चोभयं चतुरवत्तं पंचावत्तं वा भवति । कुतः अविधानात् । जमदग्नीनामेव पंचावत्तं भवतीति नियमस्याविधानात् । अविशेषेण हि श्रूयते । " तद्वै चतुरवत्तं भवतीति उतो पञ्चावत्तं भवतीति । शाखान्तरे तु पञ्चावत्तं जमदग्नीनामिति तेन जमदग्नीनां पञ्चावत्तमेव नियतम् । इतरेषां चतुरवत्तं वा पञ्चावत्तं वेति । " मध्यात्पूर्वार्धाच्चासम्भिन्नाङ्गुष्ठपर्वमात्रमवदानम् " हविषो मध्याद्धविषः पूर्वार्धाच्चाङ्गुष्ठमात्रमङ्गुष्ठपर्वप्रमाणं तिरश्चीनमवदानमवद्यति । किं कुर्वन्नसम्भिन्दन्नवदानयोः परस्परं सम्भेदं संगतिं मर्यादाभङ्गमकुर्वन्नित्यर्थः। अवदानयोः सम्भेदे कृते मर्यादाभङ्गः तदङ्गे च मध्यपूर्वार्धसंमोहो मा भूदिति यत्नः कार्यः। " मात्रावद्दधिपयसोः दधिपयसोरप्यवदानमात्रावदवदेयम् । अङ्गुष्ठमात्रमेवेत्यर्थः । तयोर्हि द्रवत्वात्स्रुवेणावदानं सामर्थ्यात् । स्रुवपुष्करस्यैतावन्मात्रपरिमाणवत् । " आद्यन्तयोराज्यम् " हविराद्यवदानस्याद्यन्तयोरित्यादौ अन्ते चाज्यमवदेयम् । आज्यस्योपस्तीर्य द्विर्हविषोऽवदायाथोपरिष्टादाज्यस्याभिघारयति " सैषाज्येन मिश्राहुतिर्हूयते इति श्रुतेः । तच्च ध्रुवाया अवदेयम् । उपस्तृणन्नभिघारयन्नाज्यस्य यजन् ध्रुवायां गृण्हातीति वचनात् । " एकप्रत्यवायश्स्विष्टकृतः " एकप्रत्य-

वायं प्रधानावदानापेक्षयैकेनावदानेनोनं हीनं स्विष्टकृद्यागस्यावदानं भवति यस्य प्रधानयागे द्विरवदानं तस्यैकं स्विष्टकृत् । यस्य त्रिस्तस्य द्वे इति । "द्विश्चाभिघारणम् ॥" स्विष्टकृत्यवदानानन्तरमुपरिष्टाद्द्विराभिधारणं भवति । वरुणप्रघासादौ तथानुवादात् स सर्वेषामेव हविषामध्वर्युः सकृत्सकृदवद्यत्यथैतस्या एव पयस्यायै प्रतिप्रस्थाता सकृदवद्यत्यथोपरिष्टाद्द्विर्द्विराज्यस्याभिघारयतीति । गृहमेधीयेऽपि स्थालीपक्षे अथास्य चरोः सकृदवद्यत्यथोपरिष्टाद्द्विर्द्विराज्यस्याभिघारयतीति च "अवदाय प्रत्यभिधारणं प्राक् स्विष्टकृतः" भाष्यम्—अवदाय प्रधानार्थं हविषोऽवदानं गृहीत्वा हविषो यावद्भूयः प्रदेशेभ्योऽवदानग्रहणं कृतं भवति तत्र प्रत्यभिघारणमाज्येन कर्तव्यम् । स्विष्टकृतः प्राक् स्विष्टकृदर्थावदानानन्तरं तु हविषः प्रत्यभिघारणं न भवति । तस्माद्यस्य कस्य च हविषोऽवद्यति पुनरेव तदभिधारयति स्विष्टकृत एव तत्पुनराप्याययत्ययातयामं करोत्यथ यदा स्विष्टकृतेऽवद्यति न ततः पुनरभिघारयति नो हि ततः कांचन हविषोऽग्नौ आहुतिꣳ होष्यन् भवतीति श्रुतत्वात् । तथा वरुणप्रघासेषु वारुण्याद्यवदानानन्तरं श्रूयते । प्रत्यनक्त्यवदानेऽतिक्रामतीति न प्रत्यनक्त्यवदानानि नातिक्रामतीति श्रवणात्प्रत्यवदानमभिघारणं कार्यम् । का० श्रौ० सू० १।२।११॥ इत्यवदानसूत्राणि । अवदानमीमांसा 'आग्नेयोऽष्टाकपाल इत्यत्र कृत्स्नोऽपि पुरोडाशोऽग्नये वक्तव्यः । तद्धितेन कृत्स्नस्याग्निदेवतासंबंधावगतेः । त्यागमन्तरेणैतदनुपपत्तिः इति चेत् । मैवम् । "द्विर्हविषोऽवद्यति" इत्यवदानद्वयं श्रूयते । अवदेयं चाङ्गुष्ठपर्वमात्रम् । ततो हविषः सकाशादङ्गुष्ठपर्वद्वयमात्रं खण्डयित्वा त्यक्तव्यम् । इतरच्छेषणीयम् । देवतासंबन्धश्चांशद्वारेणाप्युपयुज्यते ॥ ३।४।१८ पू० मी० स्विष्टकृन्मीमांसा 'उत्तरार्धात्सौविष्टकृतम्' इत्याचार्यसूत्रम् । वृत्तिः—सर्वेषां हविषामुत्तरार्धात् स्विष्टकृदर्थमवदानं प्रधानादवदानाद्भूयः सकृत्सकृदवखण्डयति ॥ १।१०।२० आ० गृ० 'दर्शपूर्णमासयोः श्रूयते—"शेषात्स्विष्टकृते समवद्यति इति । तत्र आग्नेयादीनां त्रयाणां हविषां मध्ये यस्य कस्यचिदेकस्य हविषः शेषादवदातव्यम् । तावतैव शास्त्रानुष्ठानसिद्धेरिति चेन्मैवम् । उपयुक्तं हविः संस्कर्तुमवदीयते संस्कारश्च सर्वेष्वपि हविःषु समानस्तस्मात् सर्वेभ्यो हविःशेषेभ्यः स्विष्टकृदनुष्ठेयः तत्रैवान्यच्छ्रूयते । 'उत्तरार्धात्स्विष्टकृते समवद्यति इति सोऽयं स्विष्टकृद्यागः कस्यचिन्नूतनस्य तदुत्तरार्धस्य च प्रयोजकः तदुभयाभावे स्वसिध्द्यभावादिति चेत् मैवम्—उत्तरशब्दोऽर्धशब्दश्च सर्वनामत्वाद्भागवाचित्वाच्च प्रकृतं कंचिद्भागिनमाकाङ्क्षतः । अग्न्यादिदेवतार्थः पुरोडाशः प्रकृतो भागवांश्च । तस्मात् तमेवोपजीव्य स्विष्टकृद्यागः प्रवर्तते नत्वन्यस्य प्रयो-

जकः ॥ पू. मी० ४।१।१३। अवभृताद्युपस्थानादिविचाराः सूत्रेष्वेवान्यत्र च ग्रन्थकर्त्रा स्पष्टमुदीरिताः इति नेह पप्रंच्यते ॥

समिद्विषयकसूत्राणि । आश्वला० गृ०

" समिधं त्वाहरेदपराजितायां दिशि यज्ञियस्य वृक्षस्य । ३।८।३ भाष्यम्—यज्ञियस्य वृक्षस्य या अपराजिता दिक् ततो गृहीत्वा आहरेत् । यज्ञियस्येति वचनं होमार्थेयं समिदिति ज्ञापयितुं यत्र यत्र समिद्धोमस्तत्रैवमवगन्तव्यम् ॥

" आर्द्रामन्नाद्यकामः पुष्टिकामस्तेजस्कामो वा ब्रह्मवर्चसकाम उपवाताम् ॥ ३।८।४

वृत्तिः—अन्नं च तदाद्यं चान्नाद्यं खाद्यान्नकाम इत्यर्थः । पुष्टिस्तत्तदिन्द्रियं सामर्थ्यम् । तदिच्छावान् । तेजस्कामः । तेजश्छविः, उपवाताम् शुष्कामित्यर्थः ।

" उभयीमुभयकामः " ॥ ३।८।५

वृत्तिः—आर्द्रशुष्कामित्यर्थः । एको भाग आर्द्रः, अपरो भागः शुष्कः । इत एव तत्र तत्र समिद्विषयको विस्तरोऽवगन्तव्यः । दैर्घ्यादि तु स्थण्डिलानुसारेण ज्ञेयं सुधीभिः । विचारत एव स्मृतिषूपनिबद्धम् ॥ इति मन्तव्यं सूत्रत एव तैरपि स्मृतमिति ॥ दर्भविचारः=अपां वा एष ओषधीनां रसो यद्दर्भाः, सरसमेव ब्रह्म कुरुते । स्वाध्यायप्रकरणे ह्येवं श्रूयते । तद्भाष्यं च । दर्भाणामपां रसत्वमन्यत्राम्नातम् " तासां यन्मेध्यं, यज्ञिय ँ सदेवमासीत्, तदपोदक्रामत् । ते दर्भा अभवन्निति । ओषधीनां मध्ये शुद्धिहेतुत्वात् तत्सारत्वं ततो दर्भासनत्वादधीयमानं ब्रह्म सरसं भवति ॥ इति ॥ उपवासः—एकदा भोजनम् । इति सामान्यतो विचाराः ॥ विशेषस्तत्र तत्र प्रदर्शयिष्यते ॥

विवाहविषयकसूत्राणि.

उदगयन आपूर्यमाणपक्षे कल्याणे नक्षत्रे चौलकर्मोपनयनगोदानविवाहाः ॥ १ ॥

अनेन चौलकर्मादीनां कालो विधीयते । उदग्यदा गच्छत्यादित्यस्तदुदगयनम् । तथा लोकप्रसिद्धेः । आपूर्यमाणस्य चन्द्रस्य यः पक्षः स तथोक्तः । स हि मासस्य च पक्षस्य च कर्ता । अथवा आपूर्यमाणश्चासौ पक्षश्च आपूर्यमाणपक्षः । सहि चन्द्ररश्मिभिरापूर्यते शुक्लपक्ष इत्यर्थः । ज्योतिःशास्त्राविरुद्धं कल्याणं नक्षत्रम् । चौलकर्मेति चौलस्यैव संज्ञान्तरं नतु व्रतादेशानामयं काल इष्यते । स कथं प्राप्नोति । उपनयनातिदेशात् । तर्हि अत्र गोदानग्रहणमपार्थकं चौलातिदेशात् । उच्यते । समावर्तनार्थं गोदानग्रहणम् । ' गोदानिकं कर्म कुर्वीत ' इति कर्मग्रहणं तथा कर्मणोऽन्यनियमे वाग्यमनादिकं निवर्तयति तथा कालमपि निवर्तयेत् । तस्माद्गोदानग्रहणं यत्र गोदानगन्धोऽप्यस्ति तत्रापि यथा स्यात् । तर्हि समावर्तनग्रहणमेव कार्यम् । उच्यते । लाघवार्थं गोदानग्रहणम् ॥ १ ॥

सार्वकालमेके विवाहम् ॥ २ ॥

एके आचार्याः सर्वस्मिन्काले विवाहमिच्छन्ति । नोदगयनादिनियमः । तेषां कोऽभिप्रायः । दोषश्रवणात् ' ऋतुमत्यां हि तिष्ठन्त्यां दोषः पितरमृच्छति ' इति । अन्ये च लौकिका दोषाः समुत्पद्यन्ते ॥ २ ॥

तेषां पुरस्ताच्चतस्र आज्याहुतीर्जुहुयात् ॥ ३ ॥

तेषां ग्रहणं किमर्थम् । विवाहस्यानन्तरत्वात्सर्वेषां प्राप्त्यर्थमिति चेत् तन्न दर्शनात् । सर्वेषां स्युः यदयं विवाहे चतुर्थीमित्याह । उच्यते । तेषां संबंधिन्योऽन्तर्वर्तिन्य एता आहुतयो भवन्ति नतु तेभ्यः पूर्वे भवन्तीत्येवमर्थं तेषांग्रहणम् । तर्हि पुरस्ताद्ग्रहणमपार्थकम् । न । प्रयोजनमुपरिष्टाद्वक्ष्यामः । संख्यावचनं किमर्थम् । तत्रैके ब्रुवते । यत्र परिमाणवचनं प्रत्यृचग्रहणं वा नास्ति ' धाता ददातु दाशुष इति द्वाभ्याम् ' इत्यादौ तत्र कथं प्रत्यादेशं होमः स्यादिति । तदसत् । एकमन्त्राणि कर्माणीति न्यायात् । अपि च स्वाहाकारान्तैर्मन्त्रैरिति प्रतिमन्त्रं स्वाहाकारः प्राप्तः स च प्रदानार्थः । नच तमतिक्रम्य होतव्यमिति युक्तं वक्तुमस्य विद्यमानायां गतौ । तेन सर्वत्र प्रत्यृचमेव होम इति सिद्धम् । का पुनरस्य गतिः । तत्रैके नियमार्थमिति प्राहुः । समुच्चयपक्षेऽपि कथं चतस्र एव स्युः न बह्व्य इति कथं प्रयोगः एकैकस्या ऋचोऽन्ते एकैका आहुतिरिति ।

तदप्यसत् । प्राधान्येनाहुतिविधिप्रकरणत्वादाहुतिसमुच्चय एव न मन्त्रसमुच्चयः । किमर्थं तर्हीदं नियमार्थमेव चतस्र एव स्युरिति । तेनाज्यभागौ न भवतः । तर्हि स्विष्टकृदपि न स्यात् । न । पुरस्तान्नियमार्थं हि पुरस्ताद्ग्रहणं कृतम् । आघारौ तु स्त एव अनाहुतित्वात् । आज्यग्रहणं परिस्तरणविकल्पार्थम् ॥ ३ ॥

अग्न आयूंषि पवस इति तिसृभिः प्रजापते न त्वदेतान्यन्य इति च व्याहृतिभिर्वा ॥ ४ ॥

चतसृभिः । चतसृणामेव हि सूत्रे व्याहृतिसंज्ञा कृता । व्याहृतिभिश्च भूः स्वाहेत्यादिभिः ॥ ४ ॥

समुच्चयमेके ॥ ५ ॥

एके आचार्याः ऋगाहुतीनां व्याहृत्याहुतीनां च समुच्चयमिच्छन्ति । तेनाष्टाहुतयः ॥ ५ ॥

नैके कांचन ॥ ६ ॥

एके आचार्याः कामप्याहुतिं नेच्छन्ति । नैक इत्येव वक्तव्ये कांचनग्रहणमृगाहुतीनां व्याहृत्याहुतीनां चायं प्रतिषेधो यथा स्यात् किंशब्दस्य सर्वनामत्वात् सर्वनाम्नां च प्रकृतपरामर्शित्वात् अन्यास्त्वाहुतयो होतव्या इत्येवमर्थम् । तेनाऽनादेशाहुतयः सिद्धाः ॥ ६ ॥

त्वमर्यमा भवसि यत्कनीनामिति विवाहे चतुर्थी ॥ ७ ॥

अत्र संशयः । पूर्वस्या बाध उतोत्कर्ष इति । उत्कर्ष इति ब्रूमः । असमानजातित्वात् । समानजातेरेव हि बाधो विहितः । एष समानजातिधर्म इति तच्छब्दचोदितश्च समानजातिर्भवति । तथा । अथ सामिधेन्यः ताः सामिधेन्य इति । अत्र च अतच्छब्दचोदितत्वान्न बाधः अपि तूत्कर्षः । यथा ‘ प्रतिप्रस्थाता वाजिने तृतीयः ’ इत्यत्र आग्नीध्रस्योत्कर्षस्तद्वदत्रापि । अपि च । संख्यानिर्दिष्टो न पूर्वं बाधते । यत्र तु बाधते तत्र स्थानग्रहणं करोति यथा। तृतीयाहुतिस्थाने महाव्रतमिति । तस्मादुत्कर्ष इति सिद्धम् ॥ ७ ॥

कुलमग्रे परीक्षेत ये मातृतः पितृतश्चेति यथोक्तं पुरस्तात् ॥ ८ ॥

कुलशब्देनोभौ वंशौ महापातकादिरहिताविति सिद्धौ तथाऽपस्मारादिदोषरहिताविति कुलमग्रे प्रथमं परीक्षेत । कथम् । ये मातृतः पितृतश्चेति यथोक्तं पुरस्तात् । ‘ ये मातृतः पितृतश्च दशपुरुषं समनुष्ठितविद्यातपोभ्यां पुण्यैश्च कर्मभिर्येषामुभयतो

वा ब्राह्मण्यं निनयेयुः पितृतश्चैके ’ इति । अग्रेवचनं वधुवरगुणेभ्यः कुलमेव प्रधानं स्यादित्येवमर्थम् ॥८॥

अथ वरगुणमाह—

बुद्धिमते कन्यां प्रयच्छेत् ॥ ९ ॥

अर्थदर्शिनी बुद्धिः । कोऽर्थः । यः शास्त्राविरुद्धः । तद्वते बुद्धिमते कन्यां प्रयच्छेत् ॥ ९ ॥

अथ कन्यागुणमाह—

बुद्धिरूपशीललक्षणसंपन्नामरोगामुपयच्छेत ॥ ९ ॥

बुद्धिरूपशीललक्षणैर्युक्तां रोगवर्जितां कन्यामुपयच्छेत स्वीकुर्यात् । यत्र स्वमनो रमते तद्रूपम् ॥ १० ॥

लक्षणानां दुरवगाहत्वं मत्वा परीक्षान्तरमाह—

दुर्विज्ञेयानि लक्षणानीति ॥ ११ ॥

लक्षणानि दुर्ज्ञेयानीति कृत्वा एवं परीक्षेत ॥ ११ ॥

अष्टौ पिण्डान्कृत्वा, ऋतमग्रे प्रथमं जज्ञ ऋते सत्यं प्रतिष्ठितम्। यदियं कुमार्यभिजाता तदियमिह प्रतिपद्यतां यत्सत्यं तद्दृश्यतामिति पिण्डानभिमन्त्र्य कुमारीं ब्रूया-देषामेकं गृहाणेति ॥ १२ ॥

क्षेत्रादिभ्योऽष्टभ्यो मृदमाहृत्याऽष्टौ पिण्डान्कृत्वा ‘ऋतमग्रे ’ इत्यनेन मृत्पिण्डा-नभिमन्त्र्य कुमारीं ब्रूयादेषामेकं गृहाणेति । पुनः पिण्डग्रहणं कुमार्या अभिमंत्रणं माभूत् । सापि हि द्वितीया निर्दिष्टा ॥ १२ ॥

क्षेत्राच्चेदुभयतः सस्याद्गृह्णीयादन्नवत्यस्याः प्रजा भवि-ष्यतीति विद्याद्गोष्ठात्पशुमती वेदिपुरीषाद्ब्रह्मवर्चस्विन्यवि-दासिनो ह्रादात्सर्वसंपन्ना देवनात्कितवी चतुष्पथाद्द्विप्रव्रा-जिनीरिणादधन्या श्मशानात्पतिघ्नी ॥ १३ ॥

उभयतःसस्यात्क्षेत्रादाहृतं मृत्पिण्डं गृण्हीयाच्चेदस्याः प्रजा अन्नवती भविष्य-तीति विद्यात् । एवमुत्तरत्रापि नेयम् । यदेकस्मिन्संवत्सरे द्विः फलति तदुभयतः

सस्यं क्षेत्रम् । अपवृत्ते कर्मणि या वेदिस्तस्याः पुरीषम् । अविदासिन्ह्रदो नामाऽशोष्यं ह्रदम् । देवनं द्यूतस्थानम् । यत्रोप्तबीजं न प्ररोहति तदिरिणम् । द्वौ प्रव्रजतीति द्विप्रव्राजिनी । स्वैरिणीति यावत् । पतिं हन्तीति पतिघ्नी । अत्र प्रजास्तुतिनिन्दाद्वारेण सैव स्तुता निन्दिता चेति मन्तव्यम् । उत्तरैस्त्रिभिर्वाक्यैः सैव निन्द्यते ॥ १२ ॥

अलंकृत्य कन्यामुदकपूर्वां दद्यादेष ब्राह्मो विवाहः । तस्यां जातो द्वादशावरान्द्वादश परान्पुनात्युभयतः । ऋत्विजे वितते कर्मणि दद्यादलंकृत्य स दैवो दशावरान्दश परान्पुनात्युभयतः । सह धर्मं चरत इति प्राजापत्योऽष्टावरानष्ट परान्पुनात्युभयतः। गोमिथुनं दत्त्वोपयच्छेत स आर्षः सप्तावरान्सप्त परान्पुनात्युभयतः । मिथः समयं कृत्वोपयच्छेत स गान्धर्वः । धनेनोपतोष्योपयच्छेत स आसुरः । सुप्तानां प्रमत्तानां वापहरेत्स पैशाचः । हत्वा भित्वा च शीर्षाणि रुदतीं रुदद्भ्यो हरेत्स राक्षसः ॥ १३ ॥

कन्यामलंकृत्योदकपूर्वां दद्यात् । एष विवाहो ब्राह्मसंज्ञो भवति । तस्यां कन्यायां जातो द्वादशाऽवरानुत्पत्स्यमानान् द्वादश परान्पुनाति। उभयतो मातृतः पितृतश्चेत्यर्थः। एवमुत्तरत्रापि नेयम् । वितते कर्मणीति वैतानिके कर्मणीत्यर्थः । मिथःसमयकरणं नाम त्वं मम भार्या भव अहं तव पुरुषो भवामीत्येवंरूपो विवाहो गान्धर्वसंज्ञः । कन्यापित्रे धनदानेन यो विवाहः स आसुरसंज्ञः । सुप्तेभ्यः प्रमत्तेभ्योऽसावधानेभ्यः कन्यामपहृत्य यो विवाहः स पिशाचसंज्ञकः । युद्धं कृत्वा कन्यामपहृत्य यो विवाहः स राक्षससंज्ञकः । एवमेतेऽष्टौ विवाहाः । तत्र पूर्वेषु चतुर्षु पूर्वः पूर्वः प्रशस्तः । उत्तरेषु चतुर्षु उत्तरोत्तरः पापीयान् । तत्र पूर्वौ ब्राह्मणस्य । इतरयोः प्रतिग्रहाभावात् आर्त्विज्याभावाच्च । गान्धर्वः क्षत्रियस्य पुराणे दृष्टत्वात् । राक्षसश्च तस्यैव युद्धसंयोगात् । आसुरस्तु वैश्यस्य धनसंयोगात् । इतरे त्रयोऽनियताः ॥ १३ ॥

अथ खल्वुच्चावचा जनपदधर्मा ग्रामधर्माश्च तान्विवाहे प्रतीयात् ॥१४॥

अथशब्दोऽधिकारार्थः । यद्वक्ष्यते तद्विवाहे वेदितव्यमिति । खलूक्तः । उच्चावचग्रहणं कथम् । एते जनपदधर्मादयो नानाप्रकाराः क्रियेरन् नैकेन कर्त्रा समुच्चीयरन्निति । जनपदधर्मा देशधर्माः । ग्रामशब्देन नगरमुच्यते । धर्मशब्दादेव द्वितीयानिर्देशे सति अन्वये सिद्धे तानितिवचनं कुलधर्मा अपि कार्या इत्येवमर्थम् । तान्

तादृशानित्यर्थः । विवाहाधिकारे पुनर्विवाहग्रहणं कृत्स्ने विवाहे यथा स्युरित्येवमर्थम् । इतरथोपयमनकालादुत्तरकालं विहितत्वादुपयमने न स्युः । उपयमनं नाम कन्यायाः स्वीकरणम् । प्रतीयादिति कुर्यादित्यर्थः ॥ १४ ॥

यत्तु समानं तद्वक्ष्यामः ॥ १५ ॥

किमर्थमिदम् । यथा अन्यान्युपदेशादेव सर्वत्र भवन्ति पार्वणादीनि तथेदमपि स्यात् । नियमार्थं तर्हि जनपदादिधर्माणां वक्ष्यमाणधर्माणां च विरोधे सति वक्ष्यमाणमेव धर्मं कुर्यात् । जनपदादिधर्ममिति यद्वक्ष्यामस्तत्सर्वत्र समानमेवेत्यर्थः । वैदेहेषु सद्य एव व्यवायो दृष्टः। गृह्ये तु 'ब्रह्मचारिणौ त्रिरात्रम्, इति ब्रह्मचर्यं विहितम् । तत्र गृह्योक्तमेव कुर्यान्न देशधर्ममिति सिद्धम् ॥ १५ ॥

पश्चादग्नेर्दृषदमश्मानं प्रतिष्ठाप्योत्तरपुरस्तादुदकुम्भं समान्वारब्धायां हुत्वा तिष्ठन्प्रत्यङ्मुखः प्राङ्मुख्या आसीनाया गृभ्णामि ते सौभगत्वाय हस्तमित्यङ्गुष्ठमेव गृह्णीयाद्यदि कामयीत पुमांस एव मे पुत्रा जायेरन्निति ॥ १६ ॥

अग्निप्रतिष्ठापनोत्तरकालं पश्चादग्नेर्दृषदमश्मानं प्रतिष्ठाप्य उत्तरपूर्वदेशे उदकुम्भं प्रतिष्ठापयेत् । तत आज्यस्य बर्हिषि सादनान्तं कृत्वा समन्वारब्धायां वध्वां इध्माभ्याधानान्तं कृत्वा ततः पूर्वोक्ता आज्याहुतीर्हुत्वा तिष्ठन्प्रत्यङ्मुखः प्राङ्मुख्या आसीनाया अङ्गुष्ठमेव गृण्हीयात् [गृभ्णा] मीत्युक्त्वा पुत्रकामश्चेत् । मन्त्रस्तूत्तरयोरपि हस्तग्रहणयोर्भवत्येवायम् । दृषत् प्रसिद्धा । अश्मा तत्पुत्रकः । तत्रोभयोः प्रतिष्ठापनं सिद्धम् । एवं चेद्दोषः । 'अश्मानमारोहयति' इत्यत्र पुत्रकारोहणं स्यात् । तर्हि अश्मग्रहणं तस्य विशेषणं स्यात् । दृषदमश्मानमिति । अश्ममयीमित्यर्थः । मृण्मय्यपि हि लोके दृषद्विद्यते । तर्हि पुत्रकप्रतिष्ठापनं न स्यात् । न स्यादेव मंगलार्थत्वात् । दक्षिणतः पत्न्युपविशेदुत्तरतः पतिरिति शास्त्रान्तरे दृष्टम् । स्रुवेण होमः साधनान्तराऽनुपदेशात् । एवंभूतोव्यक्तहोमेत्यनेनैवावस्थाने सिद्धे 'तिष्ठन्समिधमादध्यात्' [श्रौ०] इत्यत्र तिष्ठन् ग्रहणं कथम् । अन्यत्रासीनस्य कर्माणि स्युरित्येवमर्थम् । ततोऽत्राप्यासीनप्राप्तौ तन्निवृत्त्यर्थं तिष्ठन्ग्रहणम् । प्रत्यङ्मुख इति प्राङ्मुखत्वनिवृत्त्यर्थम् । 'तस्य नित्याः प्राञ्चश्रेष्ठाः' [श्रौ० १।१।८] इत्यनेन प्राङ्मुखत्वे सिद्धे प्राङ्मुख्या आसीनाया इति वचनं प्रत्यङ्मुखाधिकारनिवृत्त्यर्थम् । आसीनाया इत्येतत्कथम् । इत उत्तरं वध्वा विहितं कर्म तिष्ठन्त्या स्यादित्येवमर्थम् । 'उत्तानेनोत्तानं पाणिं गृण्हीयान्नीचेन चोत्तानम्' इति शाखान्तरे दृष्टम् । पुत्रशब्दः पुंसि स्त्रियां च

स्मृतौ दृष्टः—' अकृता वा कृता वापि यं विन्देत्सदृशात्सुतम् । पौत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनम् ' । इति ॥ [मनुः ९।१३६] दौहित्रेण मातामहः पौत्री भवतीत्यर्थः । लोके च दुहितरि पुत्रशब्दं प्रयुञ्जाना दृश्यन्ते एहि पुत्रेति । मन्त्रे च दृश्यते । ' पुमांस्ते पुत्रो जायताम् ' इति । तस्मात्पुमांसः पुत्रा इति विशेषणम् । अथवा । ' पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा ॥ ' इति । [मनुः ९।१३८] एवंविधः स पुत्रो जायेत न प्रथमप्रकृतिमात्रमित्येवमर्थमुभयोर्ग्रहणम् ॥ १६ ॥

अङ्गुलीरेव स्त्रीकामः ॥ १७ ॥

एवकारोऽङ्गुष्ठनिवृत्त्यर्थः । स्त्रीकामो दुहितृकाम इत्यर्थः ॥ १७ ॥

रोमान्ते हस्तं साङ्गुष्ठमुभयकामः ॥ १८ ॥

उभयकामः पुत्रदुहितृकामः अङ्गुष्ठाङ्गुलीभिः सह हस्तं गृह्णीयात् ॥ १८ ॥

प्रदक्षिणमग्निमुदकुम्भं च त्रिः परिणयञ्जपति । अमोहमस्मि सा त्वं सा त्वमस्यमोहं द्यौरहं पृथिवी त्वं सामाहमृक् त्वं तावेह विवहावहै । प्रजां प्रजनयावहै संप्रियौ रोचिष्णू सुमनस्यमानौ जीवेव शरदः शतमिति ॥ १९ ॥

अग्निमुदकुम्भं च त्रिः प्रदक्षिणं वधूः स्त्रीः परिणयञ्जपति अमोहमस्मीति । उदकुम्भग्रहणमन्येषां यज्ञपात्राणां बहिःकरणार्थमित्येके । अन्ये तु विवाहे यदन्यद्दृष्टं पात्रं अश्मा तस्यैव बहिःकरणार्थमिति । त्रिर्ग्रहणं परिणयनेन संबध्यते उत जपेन । यदि पूर्वेण तर्हि सकृज्जपः स्यात् । अथ जपेन तर्हि सकृत्परिणीतिः । पूर्वेणेति ब्रूमः । कुतः । परिणीय परिणीयेति तस्य बहुत्वं दर्शितम् । जपश्च परिणयाङ्गमिति कृत्वा यावत्परिणयनमावर्तते ॥ १९ ॥

परिणीय परिणीयाश्मानमारोहयति । इममश्मानमारोहाश्मेव त्वं स्थिरा भव । सहस्व पृतनायतोऽभितिष्ठ पृतन्यत इति ॥ २० ॥

वीप्सावचनं सर्वपरिणयनेष्वश्मानमारोहणं कारयितव्यमित्येतदर्थम् । अथास्य कर्मणः कः कर्ता । आचार्यः । कुतः । वक्ष्यति । ' शिरसी उदकुम्भेनावसिच्य ' [गृ० १.७.२०] इति । स्वयंकर्तृत्वे सति अवसेचनं कर्तुं न

शक्यते । तदसत् । आचार्येण त्वयं विसृष्टो विवाहं करोति । उदकुम्भग्रहणं तु तत्रस्थमुदकुम्भं लक्षयति ॥ २० ॥

वध्वञ्जलावुपस्तीर्य भ्राता भ्रातृस्थानो वा द्विर्लाजानावपति ॥ २१ ॥

ततो वध्वञ्जलौ उपस्तीर्य वध्वा भ्रात्रादिर्द्विर्लाजानावपति । वरो जामग्नयश्चेत्त्रिः । ततः शेषं प्रत्यभिघार्य अवदानं च प्रत्यभिघारयति । एवमवदायावदाय त्रिभिमन्त्रैर्जुहोति । भ्रातृस्थानः पितृव्यपुत्रो मातुलपुत्रश्च ॥ २१॥

त्रिर्जामदग्न्यानाम् ॥ २२ ॥

पञ्चावत्तिनामित्यर्थः ॥ २२ ॥

प्रत्याभिघार्य हविः ॥ २३ ॥

हविः शब्दः शेषे वर्तते । यथा नात्र हवींषीति ॥ २३ ॥

अवत्तं च ॥ २४ ॥

अवदानमित्यर्थः । उपस्तरणाभिघारणे कः करोति । भ्राता । कुतः । समानकर्तृत्वनिर्देशात् । तदयुक्तम् । यदि ह्यत्र भ्राताऽभिप्रेतः स्यात् वध्वञ्जलौ भ्रातोपस्तीर्येत्येवावक्ष्यत् । तस्माद्वर एव करोति । यत्तूक्तं समानकर्तृत्वनिर्देशादिति तत्र ब्रूमः । असमानकर्तृकत्वेऽपि हि क्त्वाप्रत्ययो दृश्यते । यथा ‘ आज्याहुतिं हुत्वा मुख्यं धनं दद्यात् ’ , इति होमे ब्रह्मा कर्ता । दाने यजमान इत्यादिषु पूर्वकालतामात्रमेव विवक्षितं तद्वदत्रापि ॥ २४ ॥

एषोऽवदानधर्मः ॥ २५ ॥

यत्र यत्रावदानमस्ति तत्र तत्रैष धर्मो भवतीत्यर्थः । मध्यात्पूर्वार्धाच्च हविषोऽवद्यतीत्यादौ ॥ २५ ॥

अर्यमणं नु देवं कन्या अग्निमयक्षत । स इमां देवो अर्यमा प्रेतो मुञ्चातुनामुतः स्वाहा । वरुणं नु देवं कन्या अग्निमयक्षत । स इमां देवो वरुणः प्रेतो मुञ्चातुनामुतः स्वाहा । पूषणं नु देवं कन्या अग्निमयक्षत स इमां देवः पूषा प्रेतो मुञ्चातुनामुतः स्वाहेत्यविच्छिन्दत्यञ्जलिं स्रुचेव जुहुयात् ॥ २६ ॥

को जुहोति । वधूः । कुतः । अविच्छिन्दत्यञ्जलिमिति स्त्रीलिङ्गानिर्देशात् । कस्यैते मन्त्राः । वध्वाः । कुतः सा हि जुहोति । मन्त्रलिङ्गात् । कन्या अग्निमयक्षतेति । तदसत् । नहि स्त्रीणां मन्त्रेष्वधिकारोऽस्ति । ननु कथं पत्नीवाचने । तत्र वचनमस्ति । अत्र तु सन्दिग्धम् । तस्माद्वरस्य मन्त्राः । मन्त्रलिङ्गाच्च । स इमां देव इति हि परोक्षनिर्देशः । यदि हि वध्वाः स्युः स इमां देव इति न स्यात् । यत्तूक्तं साहि जुहोतीति । तत्र ब्रूमः । अन्यस्याऽपि मन्त्रो दृश्यते । अध्वर्युर्जुहोति होता वषट्करोति । यत्तूक्तं मन्त्रलिङ्गादिति । तत्र ब्रूमः । न ह्यत्रेयं कन्याऽभिधीयते । अन्या एव तु कन्याः । यदीयमभिधीयते बहुवचनं नोपपद्यते । तथाभूतश्च प्रत्ययः । तस्माद्वरस्येति सिद्धम् ॥ २६ ॥

अपरिणीय शूर्पपुटेनाभ्यात्मं तूष्णीं चतुर्थम् ॥ २७ ॥

अप्राप्तनिषेधः किमर्थः । चतुर्थहोमं कृत्वा कथममन्त्रकं परिणयनं स्यादित्येवमर्थमित्येके । अन्ये तु त्रीणि परिणयनान्यानन्तर्येणोक्तानि । तत्र त्रयो होमाः तत्र कथं पूर्वं पूर्वं परिणयनं कृत्वा पश्चात् होमः स्यादिति ज्ञापयितुमिति । शूर्पपुटः कोणः । तूष्णींवचनं प्रजापतिज्ञापनार्थम् । चतुर्थग्रहणं कथम् । एतस्य द्रव्यस्य स्विष्टकृतं न स्यात् स एव च कर्ता यथा स्यादिति । तेन वधूर्जुहोति ॥ २७ ॥

ओप्योप्य हैके लाजान्परिणयन्ति तथोत्तमे आहुती न संनिपततः ॥२८॥

अभिमतार्थज्ञापनार्थो हशब्दः । एके लाजानोप्योप्य पश्चात्परिणयन्ति । किमिति । तथा सत्युत्तमे आहुती न सन्निपतत इति कृत्वा । पूर्वस्मिंस्तु पक्षे उत्तमे आहुती सन्निपततः । कोऽयं सन्निपातो नाम यदि पूर्वाहुतिशिरसि प्रक्षेपः । न तर्हि क्वचिदप्यसाविष्यते किं पुनः पूर्वस्मिन्पक्षे । अथानन्तर्यम् । न । तर्ह्यसौ दोषः । पार्वणादौ दृष्टत्वात् । तस्मादयमर्थः । यथोत्तमे आहुती न सन्निपततस्तथा कर्तव्यम् । उत्तमयोराहुत्योर्मध्ये परिणयनं कर्तव्यमित्यर्थः । कथं वा न स्यात् । अपरिणीय शूर्पपुटेनाभ्यात्ममिति । अन्यार्थे कृतमपीह मध्ये परिणयनं निवर्तयेत् । अथवा पूर्वस्मिन्पक्षे उत्तमे सन्निपततः । अत्र तु न सन्निपतत इति वदन् अपरिणीयवचनं चतुर्थपरिणयनार्थमिरस्मिन्नपि पक्षे पूर्वं परिणयनं कृत्वा पश्चात् होमः न चानन्तर्येण होम इति ज्ञापयति । यदि त्वानन्तर्येण होमः स्यात्सर्वासामेव सन्निपातादुत्तमयोराहुत्योः पूर्वस्मिन्पक्षे सन्निपात इति नोपपद्यते ॥ २८ ॥

अथैनामपराजितायां दिशि सप्तपदान्यभ्युत्क्रामयतीष एकपद्यूर्जे द्विपदी, रायस्पोषाय त्रिपदी, मायोभव्याय चतुष्पदी, प्रजाभ्यः पञ्चपदृतुभ्यः षट्पदी, सखा सप्तपदी, भव सा मामनुव्रता भव । पुत्रान्विन्दावहै बहूंस्ते सन्तु जरदष्टय इति ॥ २९ ॥

अथशब्दः पूर्वेण तुल्यः । एनां वधूम् । अपराजिता प्रागुदीची । तत्र सप्तपदान्यभ्युत्क्रामयति वधूं सप्तभिर्मन्त्रैः । वाक्यस्य साकाङ्क्षत्वाद्भवादेश्च योग्यत्वात्सन्निहितत्वाच्च प्रत्येकं संबध्यते । यत्र रहस्ये उल्लिखामीति शब्दः 'प्राणाय त्वापानाय त्वा व्यानाय त्वोल्लिखामि' इत्यन्त्ये वाक्ये पठितेऽपि पूर्वत्रापि संबध्यते तद्वदत्रापि । ऐतरेयिभिरप्युक्तं 'भवादि सर्वत्र समानम्' इति तेन इष एकपदी भव । सा मामनुव्रता भवेति सर्वत्र संबन्धनीयम् ॥ २९ ॥

उभयोः सन्निधाय शिरसी उदकुम्भेनावासिच्य ॥ ३० ॥

सप्तमे पदे अभ्युत्क्रामिते तत्रस्थ एवोभयोः शिरसी सन्निधाय केनाचिदुदकुम्भमानाय्य तत्रस्थेनोदकेन शिरसी अवसिञ्चति । अथाज्येन स्विष्टकृतं जुहोति ॥३०॥

ब्राह्मण्याश्च वृद्धाया जीवपत्न्याः जीवप्रजाया अगार एतां रात्रिं वसेत् ॥ ३१ ॥

ग्रामान्तरगमने यद्यन्तरा वसतिः स्यात्तदा एवंगुणयुक्तायाः ब्राम्हण्या गृहेऽनन्तरां रात्रिं वसेत् । वसतिं कुर्यादित्यर्थः । स्वग्रामे विवाहश्चेन्नायं विधिः ॥ ३१॥

ध्रुवमरुन्धतीं सप्तऋषीनिति दृष्ट्वा वाचं विसृजेत जीवपत्नी प्रजां विन्देयेति ॥ ३२ ॥

समाप्ते होमे रात्रौ ध्रुवादीन्दृष्ट्वा वाचं विसृजेत 'जीवपत्नी' इति मन्त्रेण । इदानीं वाग्विसर्जनविधानाद्धोमादारभ्य एतावन्तं कालं वाचो नियम इति गम्यते । कस्यायं वाग्विसर्गः । वध्वाः । कुतः मन्त्रलिङ्गात् । तथा हि । जीवः पतिर्यस्याः सा जीवपत्नी । जीव इति कर्तरि पचाद्यच् । 'पत्युर्नो यज्ञसंयोगे' 'विभाषा सपूर्वस्य' इति ङीप्प्रत्ययो नश्चान्तादेशः ॥ ३२ ॥

प्रयाण उपपद्यमाने पूषा त्वेतो नयतु हस्तगृह्येति यानमारोहयेत् ॥ ३३ ॥

विवाहहोमानन्तरं स्वगृहं गन्तव्यम् । तत्र यदि ग्रामान्तरे गृहं स्यात् । तथा सति तत्र प्रयाणे यदि यानमुपपद्यते । तथा सत्युपपद्यमाने याने यानमारोहयेद्वधूं मन्त्रेण । तेन प्रयाणे यानस्याऽनियमः । यानादन्येन शिबिकादिना प्रयाणे च न भवति मन्त्रः । स्वग्रामविवाहपक्षे स्वगृहगमने नायं विधिः ॥ ३३ ॥

अश्मन्वतीरीयते संरभध्वमित्यर्धर्चेन नावमारोहयेत् ॥ ३४ ॥

यद्यन्तरा नाव्या नदी स्यात्तदाऽनेनार्धर्चेन नावमारोहयेत् । वधूमिति शेषः॥३४॥

उत्तरेणोत्क्रमयेत् ॥ ३५ ॥

उत्तरेणार्धर्चेन । अत्राजहामेत्यर्धर्चेन वधूमुदकादुत्तारयेत् ॥ ३५ ॥

जीवं रुदन्तीति रुदत्याम् ॥ ३६ ॥

नीयमाना वधूः यदि रोदिति बन्धुवियोगात्तदा एतां जपेत् । अयं विधिः स्वग्रामेऽपि भवत्यविशेषात् ॥ ३६ ॥

विवाहाग्निमग्रतोऽजस्रं नयन्ति ॥ ३७ ॥

विवाहाग्निग्रहणमग्निविशेषनियमाभावशङ्कानिवृत्त्यर्थम् । अजस्रग्रहणं ध्रियमाणस्य नयनार्थम् । तेनान्यत्र प्रयाणे समारोपणं कृत्वा नयनं गम्यते । अयं च विधिः स्वग्रामेऽपि भवत्यविशेषात् ॥ ३७ ॥

कल्याणेषु देशवृक्षचतुष्पथेषु मा विदन्परिपन्थिन इति जपेत् ॥ ३८ ॥

कल्याणेषु विवाहादिशोभनेषु देशवृक्षचतुष्पथेषु एताञ्जपेत् ॥ ३८ ॥

वासे वासे सुमङ्गलीरियं वधूरितीक्षकानीक्षेत ॥ ३९ ॥

वसतौ वसतौ ईक्षकाः सन्ति चेत्तानेतया ईक्षेत । वासादन्यत्रेक्षणे मन्त्रः । वीप्सावचनं प्रतिवसतौ मन्त्रप्राप्त्यर्थम् ॥ ३९ ॥

इह प्रियं प्रजया ते समृध्यतामिति गृहं प्रवेशयेत् ॥ ४० ॥

अनया वधूं गृहं प्रवेशयेत् । इदमादयो विधयः स्वग्रामेऽपि विवाहे भवन्ति ॥४०॥

विवाहाग्निमुपसमाधाय पश्चादस्याऽऽनडुहं चर्मास्तीर्य प्राग्ग्रीवमुत्तरलोम तस्मिन्नुपविष्टायां समन्वारब्धायाम् । आ नः प्रजां जनयतु प्रजापतिरिति चतसृभिः प्रत्यृचं हुत्वा

समञ्जन्तु विश्वेदेवा इति दध्नः प्राश्य प्रतिप्रयच्छेदाज्यशेषेण वानक्ति हृदये ॥ ४१ ॥

अग्निप्रणयनान्तं कृत्वाऽग्निमुपसमादधाति । समिधः प्रक्षिप्य प्रज्वलयतीत्यर्थः । ततः पश्चादस्याऽऽनडुहं चर्मास्तृणाति । प्राग्ग्रीवमुत्तरलोम ऊर्ध्वलोम । ततोऽन्वाधानाद्याज्यस्य बर्हिषि सादनान्तं कृत्वा तस्मिन् चर्मण्युपविष्टायां समान्वारब्धायां वध्वां इध्माधानाद्याज्यभागान्तं कृत्वा आ नः प्रजामिति चतसृभिः प्रत्यृचं हुत्वा ततः समञ्जन्त्वित्यृचा दध्न एकदेशं स्वयं प्राश्य वध्वे प्राशनार्थं शिष्टं दधि प्रयच्छेत् । सा तु तूष्णीं प्राश्नाति । सकृत्प्रयुक्तस्य मंत्रस्य उभयप्राशनार्थत्वादुभयार्थत्वम् । नाविति द्विवचनात् । आज्यशेषेण वा उभयोर्हृदये अनक्ति तेनैव मन्त्रेण । हृदये अत ऊर्ध्वमिति विवृत्या पाठः कार्यः । प्रगृह्यत्वात् । ततः स्विष्टकृदादि समापयेत् । विवाहाग्निग्रहणमन्यनिवृत्त्यर्थम् । कथं पुनरन्याग्निप्राप्तिशङ्का । 'गृह्याणि वक्ष्यामः' [गृ० १।१।१] इति प्रतिज्ञातम् । उच्यते । दायविभागकाले अग्निः परिगृह्यते चेदत्राप्यन्योऽग्निः प्रसज्येत तन्निवृत्त्यर्थमिदम् । अपि चात्र विवाहाग्निग्रहणान्न विवाहहोममात्रेणाग्नेर्गृह्यत्वसिद्धिः किंतर्हि गृहप्रवेशनीयहोमे कृते एवमुभाभ्यां होमाभ्यां गृह्यत्वसिद्धिः नैकेनेति ज्ञायते । तेन गृहप्रवेशनीयहोमादर्वाग्दर्शपूर्णमासप्राप्तौ पार्वणस्थालीपाको न कार्यः । परिचरणहोमस्तु कार्य एव । 'पाणिग्रहणादि' [गृ० १।९।१] इति वचनात् । वैश्वदेवं च कार्यमेव । तस्याग्निविशेषाविध्यभावात् । तेनाग्निनाशे होमद्वयं कार्यमिति सिद्धम् । उपसमाधायेति आस्तरणकालोपदेशार्थम् । अथवा समानकर्तृकत्वसिद्ध्यर्थम् । तेन यत्रोपसमाधानग्रहणं नास्ति तत्राऽन्यो वोपसमाधानं कुर्यात् । तस्मिन्निति वचनं चर्मास्तरणानन्तरं तन्त्रान्तरमिति ज्ञापनार्थम् । प्रत्यृचग्रहणं कथम् । ऋगन्ते होमः स्यात् न स्वाहाकारान्त इत्येवमर्थम् । स्वाहाकारं पठञ्जुहुयादित्यर्थः । तेन यत्र प्रत्यृचग्रहणं नास्ति तत्र स्वाहाकारं कृत्वा पश्चाद्धोमः । आज्यशेषेण वेति सिद्धवदुपदेशाद्दनादेशे आज्येन होम इति गम्यते ॥ ४१ ॥

अक्षारालवणाशिनौ ब्रह्मचारिणावलंकुर्वाणावधःशायिनौ स्याताम् ॥४२॥

विवाहादारभ्य एते नियमा भवन्त्युभयोः । 'हैडिम्बिका राजमाषा माषा मुद्गा मसूरिकाः । लङ्क्याढक्याश्च निष्पावास्तिलाद्याः क्षारसंज्ञिताः ॥' गृहप्रवेशनीयहोमात्प्रागपि नियमानामिष्टत्वाद्योगविभागः कृतः ॥ ४२ ॥

उत्तरावधिमाह—

अत ऊर्ध्वं त्रिरात्रं द्वादशरात्रं ॥ ४३ ॥

अतो गृहप्रवेशनयिहोमादूर्ध्वं त्रिरात्रं द्वादशरात्रं वा नियतौ स्याताम् ॥ ४३ ॥

संवत्सरं वैक ऋषिर्जायत इति ॥ ४४ ॥

संवत्सरं वा नियतौ स्यातां एक ऋषिकल्पः पुत्रो जायत इति कृत्वा । अन्ये त्वाहुः । व्रतान्ते एक ऋषिः संपद्यते । पितृगोत्रं विहाय पतिगोत्रं भजत इत्यर्थः ॥ ४४ ॥

चरितव्रतः सूर्याविदे वधूवस्त्रं दद्यात् ॥ ४५ ॥

व्रतानन्तरं सूर्याविदे वध्वा उपयमनकाले उपहितं वस्त्रं दद्यात् । सूर्यया दृष्टो मन्त्रः सूर्या यथा वृषाकपिरिति । सा च ' सत्येनोत्तभिता ' इति सूक्तम् ॥ कथं तत्पुनरसौ वेत्ति स्वरतो वर्णत इत्यादि ॥ ४५ ॥

अन्नं ब्राह्मणेभ्यः ॥ ४६ ॥

दद्यादिति शेषः ॥ ४६ ॥

अथ विवाहप्रयोगः ॥

आचम्य, मम समस्तपितॄणां निरतिशयसानंदब्रह्मलोकावाप्त्यादिकन्यादानकल्पोक्तफलावाप्तये अनेन वरेणास्यां कन्यायामुत्पादयिष्यमाणसंतत्या द्वादशावरान् द्वादशपरान् पुरुषांश्च पवित्रीकर्तुम्, आत्मनश्च लक्ष्मीनारायणप्रीतये ब्राह्मविवाहविधिना कन्यां दास्ये इति संकल्प्य, अलंकृतांकन्यां सपत्नीकः परिगृह्य अमुकगोत्रोऽमुकनामा मम समस्तपितॄणां निरतिशयसानन्दब्रम्हलोकावाप्त्यादिकन्यादानकल्पोक्तफलावाप्तये अनेन वरेणास्यांकन्यायामुत्पादयिष्यमाणसंतत्या द्वादशावरान् द्वादशपरान् पुरुषांश्च पवित्रीकर्तुमात्मनश्च लक्ष्मीनारायणप्रीतये अमुकप्रवरान्विताऽमुकगोत्रोत्पन्नायामुकप्रपौत्राय, अमुकपौत्रायामुकपुत्रायामुकनाम्ने वराय, अमुकप्रवरोपेताम् अमुकगोत्रोत्पन्नाम् अमुकप्रपौत्रीम् अमुकपौत्रीम् अमुकस्य पुत्रीम् । अमुकनाम्नीङ्कन्यां श्रीरूपिणीं प्रजापतिदैवत्यां प्रजोत्पादनार्थं तुभ्यमहं संप्रददे इति कन्यां समर्पयेत् । इति कन्यादानम् ॥ आचम्यानेन कन्यादानाख्येन कृतेन कर्मणा परमेश्वरः प्रीयताम् । आचम्य प्रतिगृहीतायामस्यां वध्वां भार्यात्वसिद्धये गृह्याग्निसिद्धये चाज्याहुतीर्होष्ये ॥

स्थालीपाकोक्तेतिकर्तव्यतयाऽग्निप्रतिष्ठापनान्तं कृत्वा, अग्नेः पश्चात् दृषदं सोपलां प्रतिष्ठाप्य, ऐशान्यामुदकुम्भं प्रतिष्ठाप्य समित्त्रयमादाय, अस्मिन् विवाह, होमे देवतापरिग्रहार्थमन्वाधास्ये, अस्मिन्नन्वाहितेऽग्नौ, जातवेदसमग्निमिध्मेन-

प्रजापतिं प्रजापतिं चाघारदेवते आज्येन, अग्निं, वायुं, सूर्यं सकृदग्निं, प्रजापतिं चाज्येन, अर्यमाग्निं, वरुणाग्निं, पूषाग्निं, प्रजापतिं च लाजद्रव्येण शेषेण स्विष्टकृतमग्निं प्रजापतिं प्रायश्चित्तदेवतामाज्येन यक्ष्ये, । परिसमुह्य, परिस्तीर्य, पर्युक्ष्य, अपः प्रणीय, आज्यमुत्पूय, तयान्वारब्धः, इध्माधानाद्याघारहोमौ कुर्यात् । ततः ।

भूः स्वाहा	अग्नय इदं न मम
भुवःस्वाहा	वायव इदं न मम
स्वः स्वाहा	सूर्याय इदं न मम

त्वमर्यमा भवसि यत्कनीनां नाम स्वधावन् गुह्यं बिभर्षि ॥
अञ्जन्ति मित्रं सुधितं न गोभिर्यद्दंपती समनसा कृणोषि स्वाहा अग्नय इदं न मम ॥

भूर्भुवः स्वः स्वाहा प्रजापतय इदं न मम ॥

एवं पञ्चाज्याहुतीर्हुत्वा, तिष्ठन् प्रत्यङ्मुखः प्राङ्मुखः आसीनायाः रोमान्ते हस्तं साङ्गुष्ठं गृह्णीयात् । तत्र मन्त्रः ।

गृभ्णामि ते सौभगत्वाय हस्तं मयापत्या जरदष्टिर्यथा सः ।
भगो अर्यमा सविता पुरन्धिर्मह्यं त्वा दुर्गार्हपत्याय देवाः ॥

ततो वधूमुत्थाप्य, तया करौ क्षालयित्वाञ्जलिं कारयित्वा प्राङ्मुख्यास्तस्य[1] अञ्जलौ वरः स्रुवेणाज्यमुपस्तीर्य वधूभ्रात्रा तत्स्थानीयेनान्येन वा तिष्ठता शूर्पस्थान् लाजान् मुष्ट्या द्विरोप्य स्वयं चेत्पञ्चावत्ती तदा त्रिरोप्य स्वयं शूर्पस्थानभिघार्य, अञ्जलिस्थानमपि सकृदभिघार्य ।

अर्यमणं नु देवं कन्या अग्निमयक्षत ।
स इमां देवो अर्यमा प्रेतो मुञ्चातु नामुतः स्वाहा ॥

इति मन्त्रं पठित्वा तिष्ठन् तिष्ठन्त्याधृताञ्जलिरञ्जल्यविच्छेदे नाङ्गुल्यग्रैरञ्जलिपार्श्वेण वा हावयेत् । वरश्च अर्यमाग्नय इदं न मम इति त्यजेत् । ततोऽग्निमुदकुम्भं च वधूं प्रदक्षिणं परिणयन् स्वयमग्रे गच्छन् जपेत्—तत्र मन्त्रः ।

अमोऽहमस्मि सा त्वं सा त्वमस्यमोहं द्यौरहं पृथिवी
त्वं, सामाहमृक्त्वं तावेव विवहावहै । प्रजां प्रजनयावहै
संप्रियौ रोचिष्णू सुमनस्यमानौ जीवेव शरदः शतम् ।

ततो वधूमश्मानमारोहयति । तन्मन्त्रः ।

इममश्मानमारोहाश्मेव त्वं स्थिरा भव ।
सहस्वपृतनायतोभितिष्ठ पृतन्यतः ।

पुनः पूर्ववदञ्जल्युपस्तरणादि कृत्वा पूर्ववदेव हावयेत् तत्र मन्त्रः

वरुणं नु देवं कन्या अग्निमयक्षत ।
स इमां देवो वरुणः प्रेतो मुञ्चातु नामुतः ।

वरुणाग्नये इति त्य पुनरमो हमस्मीति पूर्ववत्परिणीयेममश्वानमित्याश्मानमारोहयेत्॥ पुनः पूर्ववदञ्जल्युपस्तरणादि कृत्वा हावयेत्तन्मन्त्रः ।

पूषणं नु देवं कन्या अग्निमयक्षत
स इमां देवः पूषा प्रेतो मुञ्चातु नामुतः

पूषाग्नय इदं न मम इति त्यक्त्वा पूर्ववदमोहमस्मीति परिणीयेममश्मानामित्यश्मानमारोहयेत् । ततोऽवशिष्टान्सर्वान् लाजान् अभ्यात्मं शूर्पकोणेन जुहोति तदा प्रजापतय इति स्मृत्वा स्वाहेत्युच्चार्य प्रजापतय इदं न ममेति त्यजेत् । अथैनामपराजितायां (ऐशान्यां) दिशि सप्तपदान्यभ्युत्क्रामयति । तत्र मन्त्राः—

इष एकपदी भव सा मामनुव्रता भव
पुत्रान्विन्दावहै बहूंस्ते सन्तु जरदष्टयः ॥ इति प्रथमम् ।
ऊर्जे द्विपदी भव सा मामनुव्रता भव ।
पुत्रान्विन्दावहै बहूंस्ते सन्तु जरदष्टयः ॥ द्वितीयम् ।
रायस्पोषाय त्रिपदी भव सा मामनुव्रता भव ।
पुत्रान्विदावहै बहूंस्ते सन्तु जरदष्टयः ॥ इति तृतीयम् ॥
मा यो भव्याय चतुष्पदी भव सा मानुव्रता भव ।
पुत्रान्विन्दावहै बहूंस्ते सन्तु जरदष्टयः ॥ इति चतुर्थम् ।
प्रजाभ्यः पञ्चपदी भव सा मामनुव्रता भव ।
पुत्रान्विन्दावहै बहूंस्ते सन्तु जरदष्टयः ॥ इति पञ्चमम् ।
ऋतुभ्यः षट्पदी भव सा मामनुव्रता भव ।
पुत्रान्विन्दावहै बहूंस्ते सन्तु जरदष्टयः ॥ इति षष्ठम् ।
सखा सप्तपदी भव सामामनुव्रता भव ॥
पुत्रान्विन्दावहै बहूंस्ते सन्तु जरदष्टयः ॥ इति सप्तमम् ॥

सप्तमे पदे अभ्युत्क्रामति तत्रस्थ एवोभयोः शिरसी सन्निधाय केनचिदुदकुम्भमानाय्य तत्रस्थेनोदकेन शिरसी अवसिञ्चति । अथाज्येन स्विष्टकृदादि समाप्य आचामेत् । इति विवाहहोमः ।

समाप्ते होमे रात्रौ ध्रुवम्, अरुन्दतीं, सप्तऋषीन् दृष्ट्वा वाचं विसृजेत। तत्र मन्त्रः—वध्वा वाचयेदयं मन्त्रः ।

'जीवपत्नी प्रजां विन्देय'

एतावत् वधूगृहे भवितव्यं कृत्यम् । ततः प्रयाण उपपद्यमाने यानमारोह्यते तन्मन्त्रः ।

"पूषा त्वेतो नयतु हस्तगृह्याश्विना त्वा प्रवहतां रथेन ।
गृहान् गच्छ गृहपत्नी यथा सोवाशिनी त्वं विदथ मा वदासि ।।
अश्मन्वतीरीयते संरभध्वमुत्तिष्ठत प्रतरता सखायः । "

इत्यनेन वधूं नावमारोहयेत् ।

अत्राजहाम येऽसन्नशेवाःशिवान्वयमुत्तरे माभिवाजान् ।। इत्यनेन वधूमुदकादुत्तारयेत् । नीयमाना वधूर्यदि रोदिति बन्धुवियोगात् तदाएतां जपेत् ।

जीवं रुदन्ति विमयंते अध्वरे दीर्घामनुप्रसितिं दीधियुर्नरः ।
वामं पितृभ्यो य इमं समेरिरे मयः पतिभ्यो जनयः परिष्वजे ।।

कल्याणेषु देशवृक्षचतुष्पथेषु एतां जपेत् ।

मा विदन् परिपन्थिनो य आसीदन्ति दम्पती ।
सुगेभिर्दुर्गमती तामपदान्त्वरातयः ।।

वसतो वसतौ ईक्षकाः सन्तीति चेत्तानेतया ईक्षेत—

सुमङ्गलीरियं वधूरिमां समेत पश्यत ।
सौभाग्यमस्यै दत्त्वा याथास्तं विपरेत न ।।
इह प्रियं प्रजया ते समृध्यतामस्मिन्गृहे गार्हपत्याय जागृहि ।।
एनापत्या तन्व१ंसंसृजस्वाधाजिव्रीविदथ मा वदाथः ।

इति मन्त्रेण वधूं गृहं प्रवेशयेत् ।

इति प्रयाणेतिकर्तव्यता ।।

वरः आचम्य, ममविवाहाग्नेर्गृह्यत्वासिद्धिद्वारा श्रीपरमेश्वर प्रीत्यर्थं, गृहप्रवेशनीया आज्याहुतीर्होष्ये ।

स्थालीपाकोक्तविधिना अग्निप्रतिष्ठापनान्तं कृत्वा अग्नेः पश्चात् प्राग्ग्रीवमुत्तरलोम आनडुहं चर्म आस्तीर्य तस्मिन्वधूमुपवेश्य तयान्वारब्धः, अस्मिन्नन्वाहितेऽग्नौ चक्षुषी

आज्येनेत्यन्तमुक्त्वा सूर्यासावित्री चतुर्वारमाज्येन, शेषेण स्विष्टकृतमित्याद्युक्त्वा समिधोऽग्नौ त्यक्त्वा, परिसमूहनादि कुर्यात् । ततस्तयान्वारब्ध इध्माधानाद्याज्य-भागान्तं कृत्वा ।

आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा ।
अदुर्मङ्गलीः पतिलोकमाविश शं नो भवद्विपदे शं चतुष्पदे स्वाहा ।

सूर्या सावित्र्या इदं न मम ॥

अघोरचक्षुरपतिघ्न्येधिशिवा पशुभ्यः सुमनाः सुवर्चाः ।
वीरसूर्देवकामा स्योना शं नो भवद्विपदे शं चतुष्पदे स्वाहा ।

सूर्या सावित्र्या इदं न मम ॥

इमां त्वमिन्द्र मीढ्वः सुपुत्रां सुभगां कृणु ॥
दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि स्वाहा ॥

सूर्या सावित्र्या इदं न मम ॥

सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव ।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधिदेवृषु स्वाहा ॥

सूर्या सावित्र्या इदं न मम ॥

समंजंतु विश्वे देवाः समापो हृदयानि नौ ।
संमातरिश्वा संधाता समुदेष्ट्री दधातु नौ ॥

इत्यनेन सकृत्पठितेन सकृत्दधि प्राश्य पत्नीमपि प्राशयेत् । हुताशिष्टाज्येन वा स्वस्य पत्न्याश्च हृदयाञ्जनं कार्यम् । ततः स्विष्टकृदादि होमशेषं सामाप्य आचम्य । अनेन गृहप्रवेशीयाख्येन कर्मणा परमेश्वरः प्रीयताम् ॥ चतुर्थदिनेऽस्मत्सूत्रे वधू-वस्त्रादानमात्रमुपदिष्टम् नान्यत् । अत्र ब्राह्मणेभ्यः । बहुत्वं त्रित्वे पर्यवसन्नम् । स्वस्तिवाचनम् । अनेन विवाहाख्येन कृतेन कर्मणा परमेश्वरः प्रीयताम् ॥
सामग्रीविशेषः—

अलंकृता कन्या—दानार्थम्, हवनसप्तपद्याद्यर्थं च ।
सपत्नीको यजमानः । कर्मकरणार्थम् ।
दृषत् उपला च—आरोहणार्थं कन्यायाः ।
उदकुम्भः–शिरोऽवसेचनार्थम् । प्रदक्षिणार्थम् ।
अग्निः होमार्थं प्रदक्षिणार्थं च ।
भ्राता तत्स्थानोऽन्यो वा लाजावापार्थम् ।

लाजा —हवनार्थम् ।
शूर्पम्—हवनसाधनं चतुर्थ्याहुतेः ।
शकटम्—गमनार्थं, नौका नदी चेत् ।
विवाहाग्निः गृहप्रवेशीयार्थम् ।
आनडुहं चर्म--उपविश्य होमार्थं (उपवेशनार्थमिति यावत् ।)
सग्रीवसलोमकं च ।
दधि—प्राशनार्थं दम्पत्योः ।
अन्नम् ब्राह्मणेभ्यो दातुं ।
अन्यत्सर्वं स्थालीपाकोक्तं विना व्रीह्यादीन् । इति सामग्रीविशेषः ।

अत्र कन्यादानं प्रधानतमम् । विवाहहोमः, लाजाहोमः, सप्तपदी, गृहप्रवेशीय इमानि प्रधानानि, 'तस्यां जातो द्वादशावरान् द्वादशपरान् पुनातीत्युभयत इति सूत्रितत्वात् । फलवत्सन्निधौ अफलं तदङ्गमितिन्यायाच्च । विवाहो नाम विशेषेण ऊह्यते प्राप्यते इति वैशिष्ट्यं च संस्कारपूर्वकत्वं वरस्य विवाहः, कन्यायाः दानम् । अत्र कन्यां दद्यादित्युक्तत्वात् । दानविधिर्येन साङ्गःस्यात्तदत्र संगृहीतं तत्संकल्पोऽपि सूत्रमूलक एव अमोहमस्मि, उदकपूर्वां, तस्यां जातो, उभयतः ये मातृतः पितृतश्चेति यथोक्तं पुरस्तात्' इति सूत्रस्यपदमूलकः सर्वोऽस्माभिः स्वकृतोऽयं संकल्पादिविध्यन्त इति विपश्चिद्भिरनुसंधेयम् ।

इति विवाहप्रयोगः ॥

विवाहप्रयोगमन्त्रभाष्यम् ॥

त्वमर्यमा भवसि यत्कनीनां नाम स्वधावन् गुह्यं बिभर्षि ।
अञ्जन्ति मित्रं सुधितं न गोभिर्यद्दम्पती समनसा कृणोषि ॥ १ ॥

ऋ. सं. ५।१।३।२

भाष्यम्-हे अग्ने त्वम् अर्यमा भवसि सर्वेषां नियामिता असि । यद्यदा कनीनां कन्यकानां संबन्ध्यसि । किं च हे स्वधावन् हविर्लक्षणान्नवन् गुह्यं गोपनीयं नाम बिभर्षि वैश्वानर इति तन्नाम सुधितं सुष्ठु निहितम् मित्रं न मित्रमिव गोभिः । विकारे प्रकृतिशब्दः । गोविकारैः क्षीरादिभिरञ्जन्ति । यद्यस्माद्दम्पती, जायापती, समनसा समानमनस्कौ कृणोषि करोषि ॥ १ ॥

गृभ्णामि ते सौभगत्वाय हस्तं मयापत्या जरदष्टिर्यथा सः ।
भगो अर्यमा सविता पुरंधिर्मह्यं त्वा दुर्गार्हपत्याय देवाः ॥ २ ॥

ऋ. सं. १०।७।८५।३६

भाष्यम्—हे वधु ते तव हस्तमहं गृभ्णामि गृण्हामि, किमर्थम् सौभगत्वाय, सौभाग्याय मया पत्या त्वं यथा जरदष्टिः प्राप्तवार्धक्या सः भवसि। भगोऽर्यमा सविता पुरंधिः पूषा एते देवास्त्वा त्वां मह्यम् अदुः दत्तवन्तः। किमर्थं गार्हपत्याय, यथाहं गृहपतिः स्यामिति ॥ २ ॥

अमोऽहमस्मि सा त्वं सा त्वमस्यमोऽहं द्यौरहं पृथिवी त्वं
सामाहमृक् त्वं तावेव विवहावहै। प्रजां प्रजनयावहै सं-
प्रियौ रोचिष्णू सुमनस्यमानौ जीवेव शरदः शतम् ॥ ३ ॥

भाष्यम्—हे कन्ये यतः अमो विष्णुरहमस्मि अमति सर्वत्र गच्छति सर्वं जानाति वेति न मिनोति हिनस्तीति वा अमः तथा सौति सुवति सूते वा विश्वमिति सा लक्ष्मीस्त्वमासि किं च सा देवी त्रयीरूपा त्वमसि अमो देवत्रयरूपोऽहमस्मि किञ्च अहं द्यौरस्मि, त्वं च पृथिव्यसि, तद्गुणश्रितावावामित्यर्थः। किंचाहं सामास्मि त्वं च ऋगसि तावेव आवां विवहावहै विवाहं करवावहै। ततः प्रजां पुत्रं प्रजनयावहै उत्पादयाम इत्यर्थः। आवामपि सम्प्रियौ, सम्यक्प्रीतौ परस्परप्रेमशालिनौ रोचिष्णू सुदीप्तौ शोभमानौ वा, सुमनस्यमानौ शोभनमनोवृत्तिं कुर्वाणौ सुमनसो भावः सौमनस्यं सुमनस्यं वा तत्कुर्वाणावित्यर्थः। इन्द्रियपाटवमाशास्त इति यावत्। तथा शतं शरदो वर्षाणि जीवेम निरुपद्रुतप्राणान् धारयामेत्यर्थः ॥ ३ ॥

इममश्मानमारोहाश्मेव त्वं स्थिरा भव।
सहस्व पृतनायतोऽभितिष्ठ पृतन्यतः ॥ ४ ॥

भाष्यम्—हे कन्ये इमं पुरोवर्तिनमश्मानं प्रस्तरमारोह आरुह्य अधितिष्ठेति यावत्। आरोहणेन संस्कृता त्वमश्मेव पाषाणवत्स्थिरा दृढाङ्गी भव। किञ्च पृतनाभिः सेनाभिर्यतन्ते इति पृतनायत तान् पृतनायतः सहस्व भग्नोद्यमान् कुरुष्व अवबाधस्व अवाचीनान् कृत्वा बाधस्वेत्यर्थः। किंच अभि आधिकृत्य आक्रम्य तिष्ठ कान् पृतनां संग्राममिच्छन्ति पृतन्यान्ति त एव पृतन्यतः तान् पृतन्यतः कलहकारिण इत्यर्थः ॥

अर्यमणं नु देवं कन्या अग्निमयक्षत।
स इमां देवो अर्यमा प्रेतो मुञ्चातु नामुतः स्वाहा ॥ ५ ॥

भाष्यम्—नु वितर्के, देवं कान्तम् अर्यमणं, अरीणां तमसां नियन्तारम् अग्निम् अयक्षत अयजन्। तस्मात् सः अर्यमा अग्निर्देवः इमां पुरोवर्तिनीं कन्यां इतः

मतः सकाशात् न प्रमुञ्चतु अमुतः तस्याः सकाशात् मां न प्रमुञ्चतु । स्वाहेति दानार्थकः सर्वत्रेति ज्ञेयम् ॥ अथवा इतः, ऐहिकसुखोपभोगात्, अमुतः पारमार्थिकसुखोपभोगात् न प्रमुञ्चतु । अमुत इति अव्ययं परमार्थे रूढम् । उभयलोकसुखं अस्याः स्यादित्यर्थः ।

वरुणं नु देवं कन्या अग्निमयक्षत ।
स इमां देवो वरुणः प्रेतो मुञ्चातु नामुतः स्वाहा ॥ ६ ॥

भाष्यम्—पूर्ववदेवार्थः वरुणो देव एतावान् भेदः । शेषं समानम् । वरुणः वृणोतीति सतः वरुणः कस्मात्? वृणोतीति सतः । स हि वियद्वृणोति मेघजालेन । आदित्यस्याप्येतन्नाम श्रूयते " त्वं वरुण पश्यसि

पूषणं नु देवं कन्या अग्निमयक्षत ।
स इमां देवः पूषा प्रेतो मुञ्चातु नामुतः स्वाहा ॥ ७ ॥

पूर्ववदेवार्थः । पूषा अथ यद्रश्मिपोषं पुष्यति तत् पूषा भवति । अथ यता यदा रश्मिपोषं आपूर्णस्तेजसा रश्मीन् सूर्यः पुष्यति । बिभर्ति तत् तदैव पूषा भवति ॥

अनेनार्थेन न पुनःसंधानविरोध इति विभावयन्तु सुधियः । विशेषस्तु मन्त्राणां विधायकत्वमेव नास्तीति साधितम्पुनर्गृह्यविचारे ॥

प्र त्वा मुञ्चामि वरुणस्येति पक्षः सूत्रकार एवानित्यत्वेनानुजानाति अतस्तद्भाष्यं नोल्लिख्यते ॥

इष एकपदी भव सामानुव्रता भव ।
पुत्रान्विन्दावहै बहूंस्ते सन्तु जरदष्टयः ॥

इषे अन्नाय, सर्वैरिष्यमाणत्वात् इट् अन्नम् । इट्शब्देन वृष्टिरित्यप्यभिधीयते तथा च—इष्यते काङ्क्ष्यते सर्वैर्व्रीह्यादिधान्यनिष्पत्तये सा इट् श्रुत्या वृष्टिर्व्याख्याता इषु इच्छायां तस्य कर्मणि क्विप् । "वृष्टयै तदाह यदाहेषेत्वा" शु. सं. १।७।१।२। यद्यप्यत्र सूत्रे इष एकपदीत्येव सूत्रितं तथापि वाक्यस्य साकाङ्क्षत्वात् भवादेश्च योग्यत्वात् सन्निहितत्वाच्च प्रत्येकं सम्बध्यते । उक्तञ्च वाक्यलक्षणं भगवता जैमिनिना,= " अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात् " २। १।१४। अयमर्थः सूत्रस्य—कियदेकं यजुरित्याकाङ्क्षायामुच्यते विच्छिद्य पाठे साकाङ्क्षत्वे सत्यर्थैकत्वं यावति स्यात्तावदेकं यजुर्वाक्यमिति । अर्थैकत्वमात्रोक्तौ भगो वां विभजतु पूषा वां विभजत्वित्यत्रापि विभागरूपार्थैक्यात् एकवाक्यता स्या-

दतःसाकाङ्क्षं चेदित्यादि । विभागे साकाङ्क्षत्वं स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि तस्मिन्त्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इत्यत्राप्यंस्ति, तच्छब्दस्य पूर्वसाकाङ्क्षत्वादतस्तद्वारणायार्थैकत्वादिति तत्र तु सदनसादनरूपार्थभेद इति नातिव्याप्तिः । अन्नाय एकपदी भव मया सह । सा च त्वं माम् अनुव्रता मय्येवानुरक्ता मममतानुसारिणी व्रतं नियमः, भव इत्येव्रतौ आवां भूत्वा बहून् पूत्रान् पूत्रपौत्रादीन् विंदावहै, लभावहै ते च पुत्रपौत्रादयः जरदष्टयः शतायुषः सन्तु । एवं सर्वत्रोह्यं विशेषस्तावदुच्यते ।

ऊर्जे==बलाय अथवा, उर्ग्बलहेतू रसः । "ऊर्ज, बलप्राणनयोः" इति धातुः उर्ज्यते बलं संपाद्यतेऽनया रसरूपयेत्यूर्क् । अथवा ऊर्जति सर्वान् मनुष्यपश्वादीन् बलयति पानादिना दृढशरीरान् करोति । यद्वा प्राणयति प्रकर्षेण चेष्ट-गतीति व्युत्पत्तिद्वयेन वृष्टिगतो जलात्मको रसः ऊर्जशब्देनोच्यते तस्मै रसोपभोगाय द्विपदीभव मया साकमिति पूर्ववत् ।

रायस्पोषाय—धनपुष्ट्यै

मायो भव्याय–मायः सुखम्-भव्यं कल्याणम् । ऐहिकपारमार्थिकत्वेन भेदः

प्रजाभ्यः–पुत्रादिसुखाय प्रकर्षेण जायमानत्वात्सुखसाधनं पुत्रादयः

ऋतुभ्यः—तत्तदृतुजन्यसुखोपभोगेभ्यः

सखा सप्तपदी–इहामुत्र मित्ररूपा त्वं सप्तपदी भूरादिसप्तलोकप्रख्यात्री भव । मामनुवर्तिनी भवेति यावत्समस्तार्थः । जीवपत्नी प्रजां विन्देय ॥ १६ ॥

जीवः पतिर्यस्याः सा जीवपत्नी, जीव इति कर्तरि पचाद्यच्, पत्युर्नो यज्ञसंयोगे 'विभाषा सपूर्वस्य' इति ङीप्प्रत्ययो नश्चान्तादेशः प्रजां, पुत्रपौत्रादीन् विन्देय, लभेयम् । ध्रुवदर्शनेन सा लब्धा प्रजा ध्रुवं भवत्वित्यर्थः ।

पूषात्वेतो नयतु हस्तगृह्याश्विना त्वा प्रवहतां रथेन ॥
गृहान् गच्छ गृहपत्नी यथा सोवशिनी त्वं विदथमावदासि ॥
ऋ० सं० १०।७।८५।२६

हस्तगृह्यः, ग्राह्यहस्तः, पूषा त्वा त्वामितो नयतु प्रापयतु अश्विना अश्विनौ त्वा त्वां रथेन प्रवहतां प्रगमयताम् । गृहान् भर्तृसंबधिनो गच्छ त्वं गृहपत्नी यथा सः भवसि स्वगृहस्वामिनी भवसि । वशिनी सर्वेषां गृहागतानामतिथीनां पूजयित्री, सत्कारयित्री, पत्युर्वशे वर्तमाना वा विदथं पतिगृहमावदासि आवदासि गृहास्थितं भृत्यादिजनमावद ॥ अतिथिषु, पत्यौ, भृत्यादिषु, श्वश्र्वादिगृहीयेषु यथा न स्यात्कलहस्तथा वर्तस्वेत्यर्थः अत एव गृहपत्नीति उक्तम् ॥ वशंकारस्तु पत्युरेव नान्यस्य,

अश्मन्वतीरीयते संरभध्वमुत्तिष्ठत, प्रतरता सखायः ॥
अत्राजहाम ये असन्न शेवाः शिवान्वयमुत्तरेमाभिवाजान् ॥
ऋ० सं० मंडलं–१०।४।५३।८

अनयापि देवा यज्ञं जिगमिषवः परस्परं ब्रुवते, अश्मन्वती नाम नदी रीयते गच्छति री गतिरेषणयोः । तां यज्ञगमनायोत्तरीतुम् उत्तिष्ठत उद्गच्छत तथा कृत्वाप्रतरत तां नदीमुल्लङ्घयत हे सखायो यजमानस्य सखिभूता इति देवानां संबोधनम् । अत्रास्यां नद्यां जहाम । परित्यजाम । कानित्युच्यते । येऽशेवाः शेवमिति सुखनाम, येऽसुखभूताः । असन् अभवन् अस्मानाश्रित्य वर्तन्ते ताञ्जहाम । तथा कृत्वा शिवान् सुखकराणि वाजानन्नानि हवींषि अभिप्राप्तुमुत्तरेम ॥ १८ ॥

जीवं रुदन्ति विमयन्ते अध्वरे दीर्घा मनुप्रसितिं दीधियुर्नरः
वामं पितृभ्यो य इदं समेरिरे मयः पतिभ्यो जनयः परिष्वजे ॥१९॥
ऋ० सं० मं० १०।३।४०।१०

भाष्यम्==हे अश्विनौ युवयोरनुग्रहाद्ये नरः पतयो जायानां जीवं जीवनमुद्दिश्य रुदन्ति, रोदनेनापि जायानां जीवनमेवाशासत इत्यर्थः । ताः जाया अध्वरे यज्ञे विमयन्ते निवेशयन्ति च किंच तासु दीर्घां महतीं प्रसितिं भुजयोः प्रबंधमनुदीधियुः अनुदधति इदं वामं वननीयमपत्यं पितृभ्यः समेरिरे संप्रेरयन्ति च तेभ्यः पतिभ्यो जनयो जायाः परिष्वजे परिष्वंगार्थे मयः सुखं कुर्वन्तीति शेषः ॥ १९ ॥

माविदन्परिपन्थिनो य आसीदन्ति दम्पती ।
सुगेभिर्दुर्गमतीतामपद्रान्त्वरातयः ॥ ऋ० सं० मं० १९।७।८५।३२

भाष्यम्—परिपन्थिनः, पर्यवस्थातारः, शत्रवः मा विदन् मा प्रापयन् । ये परिपन्थिनः, दम्पती आसीदन्ति अभिगच्छन्ति सुगेभिः सुगैर्मार्गैर्दुर्गं दुःखेन गन्तुं शक्यं दुर्गमं देशमतीताम् अतिगच्छताम् अरातयोऽदातारः शत्रवोऽपद्रान्तु अपगच्छन्तु ॥

सुमङ्गलीरियं वधूरिमां समेत पश्यत ।
सौभाग्यमस्यै दत्त्वा याथास्तं विपरेतन ॥ ऋ० सं०१०।८५।३३

भाष्यम्–इयं वधूः सुमङ्ली शौभनमङ्गला, अत इमां सर्वे आशीःकर्तारः समेत संगच्छत, तां पश्यत च, तां संगतांश्च दृष्ट्वास्या ऊढायै सौ-

भाग्यं दत्वायथास्तं गृहनामैतत् अस्तमिति स्वत्वसंबाधिनं गृहं विपरेतन । विविधं परागच्छत ॥ २१ ॥

इह प्रियं प्रजया ते समृध्यतामस्मिन्गृहे गार्हपत्याय जागृहि ॥
एनापत्या तन्वं संसृज स्वाधाजित्रीविदथमावदाथः ॥२२॥
ऋ० सं० १०।७।८५।२७

भाष्यम्—हे वधु ते तवेहास्मि पतिकुले प्रियं प्रजया सह समृध्यताम् । अस्मिन् गृहे । गार्हपत्याय गृहपतित्वाय जागृहि बुध्यस्व एना अनेन पत्या सह तन्वं स्वीयं शरीरं संसृजस्व संसृष्टा भव अधा अथ जित्री जीर्णौ जायापती युवां विदथं गृहम् आवदाथः, आभिमुख्येन वदतम् । जीर्णयोरपि युवयोर्वियोगो मा भूदित्यर्थः ॥

गृहप्रवेशनीयहोममन्त्रभाष्यम् ॥

आनः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा ॥
अदुर्मङ्गलीः पतिलोकमाविश शं नो भवद्विपदेशं चतुष्पदे ॥
ऋ० सं० मं० १०।७।८६।४३

प्रजापतिर्देवो नोऽस्माकं प्रजामाजनयतु । अर्यमा चाजरसाय जरापर्यन्तं जीवनाय समनक्तु संगमयतु सात्वमदुर्मङ्गलीर्दुर्मङ्गलरहिता सुमङ्गली । यद्वा या मङ्गलाचारान् दूषयति सा दुर्मङ्गली ततोऽन्यादुर्मङ्गली तादृशी सती पतिलोकम्पतिसमीपमाविश । प्राप्नुहि, नोऽस्माकं द्विपदे शं भव तथा च शं चतुष्पदे भव, ॥ १ ॥

अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः ॥
वीरसूर्देवकामा स्योना शं नो भवद्विपदे शं चतुष्पदे ॥४४॥

भाष्यम्=हे वधु त्वमघोरचक्षुः क्रोधादभयङ्करचक्षुरेधि भव । तथापतिघ्नी भव तथा पशुभ्यः शिवा हितकरी भव सुमनाः सुवर्चाश्च भव । वीरसूः पुत्राणामेव प्रसवित्री देवकामा स्योना सुखकरा च भव ।

इमां त्वमिंद्र मीढ्वः सुपुत्रां सुभगां कृणु ।
दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि ॥४५॥

भाष्यम्=हे इन्द्र त्वमिमां वधूं सुपुत्रां सुभगां च कृणु कृधि अस्यां वध्वां दश पुत्रानाधेहि । पतिमेकादशं कृधि दशपुत्राः पतिरेकादशो यथास्या स्तथा कृधि कृणु, कुर्विति यावत् ।

मीढ्वः=धनसंपन्न इन्द्र विभक्तिपरिणामः । अथवा मीढ्वां धनसंपन्नामेनां कुरु ।

सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव ॥
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधिदेवृषु ॥४६॥

भाष्यम्=हे वधु श्वशुरादिषु सम्राज्ञी भव देवृषु देवरेष्वित्यर्थः । ननान्दा= पत्युः स्वसा । पत्युर्माता पत्न्याः श्वश्रूः पत्न्या माता पत्युः श्वश्रूः । श्वशुरस्योकाराकारलोपश्च इति वार्तिकात् ऊङ् । तयोः पतिपत्न्योः पिता अन्योन्यं श्वशुरः । सुपूजितं कृत्वाऽश्नुते । पत्युः कनिष्ठः भ्राता देवरः पत्न्याः । दीव्यति देवः दिवेर्ऋः । अर्तिकमिभ्रमिचमिदेविवासिभ्यश्चिदित्यरः । देवरः । सम्राज्ञी सर्वाधिकारिणी ।

समञ्जन्तु विश्वे देवाः समापो हृदयानि नौ ॥
संमातरिश्वा संधाता समुद्रेष्ट्री दधातु नौ ॥४७॥

भाष्यम्=विश्वेदेवाः सर्वे देवा नौ हृदयानि मानसानि समंजंतु । सम्यगंजंतु । अपगतदुःखादिक्लेशानि कृत्वा लौकिकवैदिकविषयेषु प्रकाशयुक्तानि कुर्वन्त्वित्यर्थः । आपश्च समंजंतु । तथा मातरिश्वा नौ हृदयानि संदधातु । आवयोर्बुद्धीः परस्परानुकूलाः करोत्वित्यर्थः । धाता च संदधातु । देष्ट्री दात्री फलानां सरस्वतीत्यर्थः । सा च संदधातु संधानं करोतु ।

इतिविवाहप्रयोगमन्त्रभाष्यम् ।

उपयमविचारः ॥

विवाहः उपयमः स्वीकारः, इति अनर्थान्तरम् । विवाहो नाम विशेषेण ऊह्यते प्राप्यते इति विवाहः । उपयमो नाम स एव स्वीकारः अयि महाशयाः विविधविद्यालंकृतबुद्धयः धर्मशास्त्राब्धौकृतावताराः, मीमांसारमणीयचित्ताः, धर्ममूलैकराष्ट्राभ्युदयमिच्छन्तः वेदप्रामाण्यमङ्गीकुर्वन्तः वेदबाह्यमतं तिरस्कुर्वन्तः, वैदिकनामाभिमानंकुर्वन्तः शास्त्रैकगम्यमर्थमभीप्सन्तः भारतीयाः, इदमिदानीं तत्रभवद्भ्य आश्रावयामि । विपुलः किलायमवसरोऽभूदस्मदीयधर्मशास्त्रमीमांसायाः प्रतिक्षणं भिद्यन्ते हीमानि शास्त्राणि, धर्मशास्त्रम्, वैद्यशास्त्रम् ज्यौतिषकं कालावलम्बीनि खल्वेतानि त्रीणि, देशकालानुरूपेण भवन्तीमानि मीमांसनीयानि, अत एव तत्तत्कालोचिता मीमांसा अपि जैमिनि,—वाग्भट्ट—

सुश्रुत,-भास्कराचार्यादिभिः प्रवर्तिताः पूज्यविचारस्य खलु मीमांसाशब्दो वाचकः ॥ उत्तरत्रापि खलु अहमहमिकया स्मृत्यादिग्रन्थाः पराशरादिभिः प्रणीताः उररीकृताश्च तेऽस्माभिः प्रतिशास्त्रं खल्वियमेवावस्था न किल धर्मशास्त्रीयैवेति मन्तव्या ॥ मूलभूताश्चास्माकं श्रुतयः ततस्तदङ्गानि व्याकरणश्रौतगृह्यसूत्रप्रभृतीनि, ततः स्मृतयस्ततो निबन्धग्रन्था इति हि परम्परां समामनन्ति तत्तत्काले प्रचलितविषया एव विचार्यन्ते यथा कर्ममीमांसा भट्टाचार्यैरुपबृंहिता बौद्धादिभिर्मालिन्यं प्रापिता आसीत् सा पुनश्च सैव परमसाध्यसाधनत्वमापन्नेति बुद्ध्वा भगवत्पादाः शंकराचार्यास्तामुद्दिधीर्षवः, परमकारुणिकाः ज्ञानमेव परमसाध्यसाधनमिति स्थापयितुं " पुरुषार्थोत्तःशब्दादिति बादरायणः " इत्यारब्धब्रह्ममीमांसाभाष्यमारेभिरे । इदानीं परमस्मासु मीमांसा लुप्तप्रायेति अभ्युदयसाधनाभावमेव वयं मन्यामहे । ये चाभ्युदयोपायाः सन्त्यस्माकं न खलु तेष्वेकमपीदानीं पश्यामः नापि विश्वविद्यालयान्यस्माकं नापि गुरुकुलानि नाप्यस्मद्धर्मीया राजानः । पश्यत विद्यमानाः पाठशाला अपि जीवन्ति यथाकथंचित् । ये तूर्जीवन्ति ते तु कालिकालमेव पुरस्कृत्योपरमन्ते मीमांसाया इति विनोदप्रमोदास्पदमन्येषाम् । अस्मात् प्रसङ्गादुद्धर्तुं सर्वविषयिणी पारम्पर्यानुगता मीमांसा आरब्धव्या भवति । तदर्थमेवायमुपक्रम इति मन्तव्यं मीमांसामहे चेदानीं विवाहविषयकविचारम् ॥ सांप्रतं ह्ययं विचारः प्रवर्तयितव्यश्चेन्महान् प्रसङ्ग एव वरीवर्तीति ज्ञेयम् केचन बालिकाविवाहमेव मन्यन्ते शास्त्रसम्मत इति, अन्ये च ऋतुमत्यनर्तुमतिसाधारणं प्रौढाविवाहमनुजानते अपरे तु विधवानां बालिकानां अनागतरजस्कानां विवाहं प्रतिपादयन्ति क्षताक्षतयोनित्वेन च कल्पयन्ति व्यवस्थाम् । भुक्तभोगां गतभर्तृकामपि विवाहयन्त्येके,अपरे तु राजकीयव्यवस्थामेव कल्पयन्ति विवाहस्य, न वैदिकीं व्यवस्थां सांस्कारिकीमनुजानान्ति ॥ अन्ये च कानिचनाङ्गान्यभिनयस्वरूपाणि कल्पयित्वा स्वीयं कार्यं निर्वहन्ति । इति नः प्रत्यक्षमेव अपि सर्वे एते शास्त्रीयाः पन्थानः उताशास्त्रीया इति विचार्यमाणे त्वेवं प्रतिभाति तत् शास्त्रीयमेवेत्यपि निश्चिनुमः ॥ दानं, विवाहात् पूर्वं करिष्यमाणा होमः, लाजाहोमः, ग्रहप्रवेशीयश्चैतेषु न केषांचिदपि वादः नापि संदिग्धो विषयोऽस्ति । परं चान्यदस्ति केषुचिद्गृह्यसूत्रेषु विवाहात्परं भविष्यच्चतुर्थीकर्मेति व्यवहारभाक् यद्धि बहवो भाष्यकाराः विवाहाङ्गं मन्वते केनापि सूत्रकारेण वधूवरयोर्वयोमर्यादा न सूत्रितेति चित्रम् अथवा किमत्र चित्रं रागतः प्राप्नोति किलायं विषयोपभोगधर्मा, अतस्तत्र नियमो वा परिसंख्या वा विधातव्या शास्त्रेण तां च व्यवस्थां विधत्ते शास्त्रम् " ऋतौ भार्यामुपेयात् " इति उपगमने ऋतुकालः प्रशस्यते विधत्ते वा तत्र सर्वगृह्याणामेवं प्रवादः ,

अश्वलायनः ॥ गृहप्रवेशीयहोमानन्तरं ब्रह्मचर्यं विधत्ते " अक्षारलवणाशिनौ, ब्रह्मचारिणौ अलंकुर्वाणौ, अधःशायिनौ स्याताम् " अत ऊर्ध्वं त्रिरात्रं द्वादशरात्रं, संवत्सरं वा, अत्र ब्रम्हचर्यमर्यादाया उक्तत्वात् ततः परं संभोगमनुजानाति अनेन ज्ञायते तत्तन्मर्यादातिक्रमे संभोग्यां कन्यामुद्वहेदिति ॥

पारस्करोऽपि– " त्रिरात्रमक्षारलवणाशिनौ स्यातामधःशयीयातां संवत्सरं न मिथुनमुपेयातां द्वादशरात्रं षड्रात्रं त्रिरात्रमन्ततः" अत्र भाष्यं " अध इति खट्वाद्युदासो नास्तरणव्युदासः, संवत्सरम्मिथुनं नोपगच्छेताम् । अन्ततः, अत्र संवत्सरादौ त्रिरात्रपक्षोह्यन्तिमः । संवत्सरादिविकल्पास्तु शक्त्यपेक्षया व्यवस्थिता ज्ञेयाः, संवत्सरादिपक्षाशक्तौ त्रिरात्रपक्षाश्रयेऽपि चतुर्थीकर्मानंतरं पञ्चम्यादिरात्रावभिगमनम् ॥ चतुर्थीकर्मणः प्राक्तस्या भार्यात्वमेव नोत्पन्नं विवाहैकदेशत्वात् चतुर्थीकर्मणः । चतुर्थीकर्म सूत्रेषु एवं सूत्रयामास स एव " तामुदुह्य यथर्तु प्रवेशनम् . " १।११।७॥ भाष्यम्––एवं पूर्वोक्तप्रकारेण तां वधूमुदुह्य विवाहयित्वा विवाहकर्मणा भार्यात्वं सम्पाद्य यथर्तुप्रवेशनम् ॥ ऋतुकालं ऋतुकालं प्रवेशनमभिगमनं कुर्यादिति शेषः ॥ विवाहात्परं त्रिरात्रं ब्रम्हचर्यं सूत्रयता चतुर्थरात्रौ अभिगमनमनुज्ञातं भवति । प्रयोगकारोपि ऋतुगमनमनन्तरमभिगमनमेवाह पञ्चम्यां रात्रौ, । चतुर्थीकर्माङ्गं हि ऋतुप्रवेशनम् चतुर्थीकर्म हि विवाहाङ्गम् अपरे अंगाङ्गिभावमवेनानुमन्यंन्ते ॥

सत्याषाढोऽपि,––चतुर्थ्यामपररात्रे ' इत्यारभ्य, अथैनामुपयच्छते, मुखेनमुखमीप्सते, अथैनां परिष्वजते । इति सूत्रयामास । भाष्यम्––उपयच्छते मिथुनीभवति अवकिरते इत्यर्थः । मुखेन मुखमीप्सत इत्यालिङ्गनविषयः । विवाहोपयमौ इत्यनेन विवाहस्य उपयमः पर्यायः अतोत्र मिथूनीभावार्थमेव स्वीकार इति यावत् ।

आपस्तंबः––त्रिरात्रमुभयोरधः शय्या ब्रह्मचर्यं, क्षारलवणवर्जनं च, शेषं समावेशने जपेत् । भाष्यम् । सुदर्शनाचार्याणां । समावेशनं नाम वध्वा सह मैथुनार्थे शयनामिति ॥ अत्र यदधिकरणजातमानीय परिणयमीमांसायामुक्तं न तत् सौत्रविचारसहम् ॥ गृह्यसूत्राणि विचारयाम इत्यारभ्य केवलं आपस्तम्बसूत्रमेवं विचारितं तदपि सुदर्शनाचार्यव्याख्याव्यवस्थापकं न भवति त्रिरात्रं ब्रह्मचर्यं सूत्रयतामाचार्याणामयमेवाभिप्रायो वर्णनीयः, ऋतुकालादनन्तरं तिस्रो-रात्रीर्हापयित्वाऽनन्तरं विवाह आरब्धव्यस्ततः संवेशनम् । इत्येव सूत्रकारसम्मतं तथा तदानीमासीदित्यवगछामः । नहि सूत्रे ऋतुप्राप्त्यनन्तरं विवाहे दोषः सूत्रितः न हि तथा विवाहे कांचित् हानिमभ्युपगच्छामः स्मृतीनां गतिस्तु सूत्रविरोधा-

चिन्तनीया, मन्त्राः, सूत्राणि, विषयः, विचारिताश्चेदेवमेव जानीयुः ततश्च ऋतुपाप्त्यनन्तरं, तिस्रो रात्रीर्हापयित्वा अग्रेतनानि व्रतार्थं त्रीणि दिनानि संरक्ष्य विवाहो विधेयः। मनुनापि उपनयस्थाने विवाहः स्त्रीणां इति श्लोकयता अष्टौ वर्षाण्यारभ्य आषोडशं विवाहकाल इत्येवोक्तं भवति। उक्तं च तेनैव

"त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीम्"॥ ९।९४। मनुः

अत्र टीका—मेधातिथिः,—इयता कालेन यवीयसी कन्या वोढव्या न पुनरेतावद्वयस एव विवाह इत्युपदेशार्थः, अथापि न यथाश्रुतवर्षसंख्यैव किं तर्हि बहुना कालेन यवीयसी वोढव्येति॥ कुल्लूकः—त्रिंशद्वर्षः पुमान् द्वादशवर्षवयस्कां मनोहारिणीं कन्यामुद्वहेत्।

नन्दनस्तु=वयोवस्थानियमो नादरणीय इत्यर्थः। नह्येतद्वरपरामिति वक्तुं शक्यम्। उभयोरप्यत्र वयस उक्तत्वात्। अन्यच्च तदानीन्तनदेशकालशक्त्यनुसारेण काचन व्यवस्था आसीन्नहीदानीं सैवोपयुज्यत इत्यत्राभिनिवेशः कार्यः। एतद्विचाराधीनमेव नात्र शास्त्रम्। अनुभवानुसारेण शास्त्रं नियमयति न तु सन्ध्यावंदनवत् अपूर्वं विधत्ते विवाहादि अष्टवर्षदेशीया न वोढव्या इत्यपि न विधते, षोडशवर्षीया न वोढव्या इत्यपि न विधत्ते किन्तु सूत्रे कालस्तु नोच्यते परं इङ्गितेन चेष्टितेन महतामभिप्रायोवगम्यत इति न्यायात् तेषामभिप्रायोऽस्माभिर्वर्णितः स एवोररीकर्तव्यः। अन्यच्च कन्यादिशब्दादिभिरपि निर्णयः कर्तुमशक्यः सर्वे शब्दाः सूत्रेषूपलभ्यंते, कन्या, वधूः, भार्या, स्त्री, दाराः इत्यादयः। अन्यच्च। विवाहसमाप्तौ अत्राग्न्याधेयस्य कालः जायामवाप्य दशमेऽहन्यग्निमादधीत इति बोधायनवचनेन विवाहानन्तरं दशमदिने एव अग्न्याधेयस्य विहितत्वात्। जातपुत्रकृष्णकेशपदाभ्यामवस्थाविशेषो लक्ष्यते इत्यपि मीमांसितम्। अतोऽत्रयुक्तायुक्तमितः परं विचार्य शास्त्रं प्रमाणीकृत्य औपरिष्टिकपक्षाणां व्यवस्था विधेया, ऋतुप्राप्त्यनन्तरं विवाहनिषेधकानि वचांसि बहून्युपलभ्यन्ते। परं सूत्राणां चैवं पन्था विलसति। ऋतुप्राप्तेः पूर्वं वा विवाहं कृत्वा अदृष्टार्थं चतुर्थ्यामपररात्रे संवेशनमभ्युपगन्तव्यम्। यथैतदग्न्याधेयमग्निहोत्रं दर्शपूर्णमासावाग्रयणमुदगयनदक्षिणायनयोः पशुश्चातुर्मास्यानि ऋतुमुखे षड्ढोता वसन्ते ज्योतिष्टोमइत्येवं क्षेमप्रापणमिति वचनेन च चातुर्मास्यानामपि, विहितत्वात् आर्तवात्पूर्वं चातुर्मास्यानामस्त्येव प्रसङ्गः। एवमन्यान्यपि एवंजातीयकानि आर्तत्वात्पूर्वं गमनप्रतिषेधकानि वचनानि नियमयुक्तगृहस्थपरतया यथायोग्यं योजनीयानि एवं चात्र कन्यादान—पाणिग्रहण—विवाहहोम—लाजाहोम—गृहप्रवेशीय-स्वीकृतमङ्गलदेशकुल-

धर्मसंवेशनाद्यङ्गयुक्तो विवाहः प्रतिपादितः । " उक्तंचादिपर्वणिभीष्मंप्रति शल्यवचनम् ।

" पूर्वं प्रवर्तितं किंचित् कुलेऽस्मिन्नृप सत्तमैः ॥
साधु वा यदि वा साधु तन्नातिक्रान्तुमुत्सहे ॥

अतः सूत्रोदितः पन्था अनुसर्तव्य इतिमेमतम् । अत एव सार्वकालमेके विवाहमिति सूत्रयामास आश्वलायनः । बुद्धिमते कन्यां प्रयच्छेदिति च, कन्या चर्तुमती, बुद्धिमान् वरो न लब्धः किमनुष्ठेयं इति चेत्? यस्मै कस्मै दत्वा विवाहो नानुष्ठेय इति ह्येवोत्तरं तस्य सूत्रकाराणाम् । वयोमर्यादा विधातुमेवाशक्या । इत्येव सूत्रकाराशयः न सूत्रितवन्तश्च वयोमर्यादाम् । परिणयमीमांसाकारेण तु सौत्रवचनानि तद्व्याख्यानानि कानिचिद्गौणतया उपयोजितानि नचैतद्वरमिति सौत्रं पन्थानमेव वयमनुसरामः अस्तिचात्रकाश्चित्ऋग्वेदपठितोमन्त्रः " कुह स्विद्दोषा कुह वस्तोरश्विना कुहाभिपित्वं करतः कुहोषतुः को वां शयुत्रा विधवेव देवरम् मर्यं न योषा कृणुते सधस्थ आ " ७।८।१८।२ अत्र निरुक्तम् = क्वस्विद्रात्रौ भवतः, क्व दिवा क्वाभिप्राप्तिं कुरुथः क्व वसथः, को वां शयने विधवेव देवरं देवरः: कस्माद्द्वितीयो वर उच्यते विधवा विधातृका भवति, विधवनाद्वेति प्रचर्मशिराः, अपि वा धव इति मनुष्यनाम तद्वियोगाद्विधवा, देवरो दीव्यतिकर्मा, मनुष्यो मर्यो मरणधर्मा, योषा यौतेः, आकुरुते सह स्थाने।

भाष्यम् । कुहस्वित् दोषा क्व नु युवां रात्रौ भवथः, कुह वस्तोः क्व वा दिवा भवथः युवाम्? येन नापि रात्रौ अस्माकं दर्शनमुपगच्छथः । नापि दिवा। स्विदिति परिदेवनायाम् । ईर्ष्यायां वा । कुह क्व च अभिपित्वं अभिप्राप्तिं स्नानभोजनाद्यर्थं कुरुथः, कुह क्व वा ऊषतुः वसथः,? सर्वथा न विज्ञायते वाम् आगमनप्रवृत्तिः, किंच को वां शयुत्रा कतमो युवां यजमानः शयुत्रा शयने? किं विधवा इव देवरं यथा विधवा मृतभर्तृका काचित् स्त्री शयने रहस्यतितराम् यत्नवती देवरमुपचरति, स हि परकीयत्वात् नार्या दुराराध्यतरो भवति इति यत्नेनोपचर्यते, न तथा निजो भर्ता तस्मात्तेनोपामिमीते अश्विनौ, तथा मर्यं मनुष्यं देवरम्, सैव मृतभर्तृका योषा आकृणुते, आभिमुख्येन कुरुते, को वाम् एवम् आभिमुख्येन, सधस्थे, सहस्थाने समाने सह योगिनावात्मना कृत्वा परिचचार? येनेह नोपगतवन्तौ स्थोऽस्मद्दर्शनमिति । एवमस्यामृचि देवरेण कनीयसा ज्यायांसावश्विनावुपमीयेते विधवया च यजमानः । अथैकपद-

निरुक्तम् । विधवा विधातृका भवति । धाता धारयिता, स तस्याः पोषयिता वा भर्ता विगत इति विधवा, । विधवनाद्वा सा हि भर्तृमरणेन विधूता कम्पितेव भवति " विधवनाद्वा सा हि भर्तुरभावादनिरुध्यमाना तत्र तत्र विधावत्येव इति एवं चर्मशिरा आचार्यो मन्यते । अपि वा धव इति मनुष्यनाम तद्वियोगात् विधवा । " देवरः " इत्येष शब्दो दीव्यतिकर्मा दीव्यत्यर्थः स हि भर्तुर्भ्राता नित्यमेव तया भ्रातृभार्यया देवनार्थं व्रियत इति देवर इत्युच्यते । मर्यः मनुष्यः स हि मरणधर्मा, योषा यौतेर्मिश्रणार्थस्य सा हि मिश्रयत्यामानं पुरुषेण साकम् " आकुरुते सहस्थाने समानस्थाने आभिमुख्येनात्मनः कुरुते परिचरणाय " ॥

आश्वलायनसूत्रे कन्या वधूः, पत्नी,

सत्याषाढीये—भार्या, नग्निका, ब्रह्मचारिणी, असगोत्रा, वधूः, स्त्री, सुभगा, नारी,

आपस्तम्बीये–दुहिता, नारी, भार्या, वधूः, पत्नी,

गोभिले–दाराः, कुमारी, वधूः, नारी,

पारस्करीये=कुमारी, नारी, वधूः,

चतुर्थीकर्मणः प्राक् भार्यात्वमेव नोत्पन्नमेवेतिहरिहरः । सत्याषाढस्तु प्राक् चतुर्थीकर्मणो भार्याशब्दमेव " भार्यामुपयच्छेदिति सूत्रयति । अतोऽत्र विद्यमानाः शब्दा निर्णायका न भवन्ति । विवाहोन्मुखो यदाऽयं जायते तदाप्रभृति अपत्यसंस्कारारम्भ इति मन्तव्यम् । अवश्यं चैष संस्कारः करणीय इति श्रुतेः शासनम् । कृत्वेमं संस्कारमग्नीनादधीत " नानाहिताग्निर्मियेतेत्यनुशासनात् । पित्रर्णमपाकर्तुमेवायं संस्कार इत्यवगन्तव्यम् । न केवलमाधानार्थमेव अत एव प्रजोत्पादनार्थमिति संकल्पयन्ति । तदेवात्रोद्देश्यम् आधानादिकं सोमपानं तु दुर्ब्राह्मण्यापनयायेति " आतृतीयात्सोमं न पिबेत् स दुर्ब्राह्मणो भवति । यस्य वेदश्च वेदी चेत्यादिवाक्यार्थस्तु आनुषङ्गिक एव पुत्रश्चावश्यमुत्पादनीय इति श्रुतेः सूत्रकारस्य च सम्मतम् । आह च वसिष्ठः ॥ ऋग्वेदसंहितायाम् ।

न हि ग्रभायारणः सुशेवोन्योदर्यो मनसा मन्तवा उ ॥
अधाचिदोकः पुनरित्स एत्यानो वाज्यभीषाळे तु नव्यः ॥
ऋ० सं० ७।१।५।८

भाष्यम्=न हि ग्रभायेति । न हि ग्रहीतव्यः नाङ्गीकर्तव्यः, पुत्रो ममायामि-

त्यनेनाभिप्रायेण । कः पुनरसौ नाङ्गीकर्तव्यः अरणः अपार्णः, अपगतोदक-सम्बन्धः, अन्यकुलजः, यद्यपि सुशेव एव स्यात् सुखतमः, परिचरितो हितैषी, तथापि अन्योदर्यः । अन्येनोदीरिताद्रेतसो जातः, अन्यजायोदरसम्भूतो वा यो हि स्वस्यां जायायां सम्भवति स स्वएवोदरे सम्भूतो भवति । " अर्धो ह वा एष आत्मनो यज्जायेति विज्ञायते " तस्माद्योन्यजायोदरसम्भूतः सः मनसापि न मन्तव्यो ममायमिति किं पुनः पुत्रत्वेन न परिकल्पयितव्यइति, किं कारणं मनसापि न मन्तव्य इति ? अधाचिदोकः पुनरित्स एति, अधः-शब्दोथशब्दस्यार्थे वर्तते । स च हेत्वर्थः यस्मात् ओकः स्वं निवासस्थानं स्वं वंशं बहुनाऽपि कालेन स एति तद्वंश्य एव भवति । तस्मादपुत्रएवासौ यत एव-मतोऽग्रमीमि, आनो वाज्यभीषाळे तु नव्यः " एतु आगच्छतु । नो वाजी वेजनवान् । परेभ्यो भयदाता अभिषाट् अभिषहमाणः अभिभवन् सपत्नान् नव्यः नवजातः शिशुरित्यर्थः । स एव पुत्रः, आगच्छतु न परकीयैः पुत्रैः सङ्कल्पितैरित्याभिप्रायः ॥ ३।३।१ निरु० अन्यत्राप्येवमेव पुत्रोत्पादनेप्यतिशयः सूत्रकारप्रभृतीनामिति द्रष्टव्यम् । दशरथादीनामपि पुत्रोत्पत्तिविषये यत्नातिशयो ऐतिह्ये प्रसिद्धः । नह्यत्र ग्रन्थकारः स्वमतमेव शास्त्रविरुद्धमपि प्रतिपादयितुमुद्युक्तः अपि तु शास्त्रवचनान्येवं विद्यन्ते । परिस्थितिश्चेत्थं कात्र गतिरिति विचारणीयत्वेन प्रवृत्तोऽहं न तत्र वस्तुस्थितेरपलापः कर्तुं शक्यते । विचारस्त्वेवम् । अष्टवर्षीयामारभ्य आषोडशाद्ब्राह्मविवाहकालः ऋतुप्राप्त्यनन्तरं त्रिरात्रमपहाय आऋतुकालंबुद्धिमद्वरालाभे स्थेयमेव परं न बुद्धिहीनाय देया । कन्यामपि मनोहारिणीं वृणुयात् । आकस्मिकाः खल्वेवम् कलौ इदानीं परिस्थितयः समुत्पद्यन्ते न तत्र मानुषोपायः अतोयं विचारः इतः परमपि सर्वैरेकीभूय संगमयितव्य इति मे मतम् । तथैव विचारितव्योयं विषयः प्रमाणपरिपाट्या अन्येप्येवंजातीयका विचारा बहवो विचारणीया विद्यन्ते । तेऽपि विचारणीयाः यत्तु पूर्वमुक्तं विधवेव देवरामिति तत्र विचारान्तरं प्रस्तूयत । अस्ति च भगवत आश्वलायनाचार्यस्य सूत्रम् ।

" तामुत्थापयद्देवरः पतिस्थानीयोन्तेवासी जरद्दासो
वोदीर्ष्व नार्यभिजीवलोकम् ॥ आ० गृ० ४।२।१८

अस्य देवत्रातभाष्यम्=तामुत्थापयेत् । उदीर्ष्वेत्येतेन क उत्थापयेत् देवरो यवीयः पतिस्थानीयः पतिस्थानमर्हति स पतिस्थानीय इत्युच्यते । अन्तेवासी शिष्यो वेत्यर्थः जरद्दासो वोत्थापयेत् बद्धदास इत्यर्थः । इति ।

उत्तरतः पत्नीं संवेशयन्ति ॥ ४।२।१६ आ० गृ०

अत्र वृत्तिः=ततः प्रेतस्योत्तरतः प्रेतस्य पत्नीं संवेशयन्ति । शाययन्तीत्यर्थः—चितावेव उपवेशेय इति लिङ्गात् वर्णत्रयस्यापि समानम् । तामुत्थापयेदित्यस्य वृत्तिः—अथ पत्नीमुत्थापयेत् कः देवरः पतिस्थानीयः अनेन ज्ञायते पतिकर्तृकं कर्म पुंसवनादि पत्यसम्भवे देवरः कुर्यात् इति, अन्तेवासी शिष्यः, स वा, यो बहुकालं दास्यं कृत्वा वृद्धोभूत्सवा । अत्रोदीर्ष्व नार्येति मन्त्रभाष्यमुद्ध्रियते ।

उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुपशेष एहि ॥
हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभिसंबभूथ ॥
ऋ० सं० १०।२।१८।८

भाष्यम्= देवरादिकः प्रेतपत्नीमुदीर्ष्व नारीत्यनया भर्तृसकाशादुत्थापयेत् । हे नारि मृतस्य पत्नि, जीवलोकं जीवानां पुत्रपौत्रादीनां लोकं स्थानं गृहमभिलक्ष्योदीर्ष्व । अस्मात्स्थानादुत्तिष्ठ । ईर गतौ आदादिकः, गतासुम् अपक्रान्तंप्राणमेतं पतिमुपशेषे । तस्य समीपे स्वपिषि, तस्मात्त्वमेहि । आगच्छ यस्मात्त्वं हस्तग्राभस्य पाणिग्राहं कुर्वतो दिधिषोर्गर्भस्य निधातुस्तवास्य पत्युः संबंधादागतमिदं जनित्वं जायात्वमभिलक्ष्य संबभूथ संभूतासि अनुकरणनिश्चयमकार्षीः, तस्मादागच्छ, इति । एतावता तत्कालीना स्थितिः, सूत्रकाराणामाशयः, सूत्रकाराणां शैलिरपि मन्त्रमूलिकावाऽमन्त्रमूलिकैवेत्यपि ज्ञातुं सुलभमिति अत्र सर्वापि मूलस्थितिः प्रदर्शिता । इतः परं क्रियमाणं विचारान्तरं परस्ताद्यथासम्भवं प्रकटीकुर्महे । सूत्राणि विचारणीयानि ततः परं कलौ निषिद्धानिषिद्धविचारः । इति सुधीभिराकलनीयोयंविषयः । इति उपयमविचारः ॥

गृह्यपरिचरणसूत्राणि ॥

पाणिग्रहणादि गृह्यं परिचरेत्स्वयं पत्न्यपि वा
पुत्रः कुमार्यन्तेवासी वा ॥ १ ॥

पाणिग्रहणप्रभृति गृह्यमग्निं परिचरेत्स्वयं पत्न्यादयो वा । पाणिग्रहणादिवचनं गृहप्रवेशनीयहोमानन्तरकाले प्रारम्भाशङ्कानिवृत्त्यर्थम् । यद्विधास्यते तत्परिचरणम् ।

---

१ तैत्तिरीयारण्यकं मूलमत्रेत्यनुसंधेयम् । ६ प्र० १ अ०

पत्नी कुमार्यौ न होमकर्म कुर्यातामित्येके । कुतः । स्त्रीणां मन्त्राऽनधिकारात् । अन्ये तु सहोमकम् । कुतः । वचनात् । पत्नीसन्नहनवत् । अन्तेवासी शिष्यः ॥१॥

नित्यानुगृहीतं स्यात् ॥ २ ॥

अनुशब्दः परिशब्दस्य स्थाने । नित्यं परिगृहीतं स्यादित्यर्थः । किमुक्तं भवति । यदि विवाहाग्निर्नष्टः स्यात्ततो नष्टाहरणप्रायश्चित्तं कृत्वा परिचरेदिति । अथवा आत्मनः पत्न्यावा समीपे कथं नित्यः स्यात् नोभयोरन्यतरः स्थापयितव्य इति । अथवा होष्यद्धर्मस्योपलेपनादेर्निवृत्त्यर्थम् । तदपि हि क्रचग्रहणेन प्राप्नोति परिसमूहनादिवत् ॥ २ ॥

यदि तूपशाम्येत्पत्न्युपवसेदित्येके ॥ ३ ॥

यदि प्रादुष्करणकाल उद्वाहयेत् ततः अन्यस्माद्धोमकालात्पत्न्युपवसेदित्येके । एकेग्रहणाद्यजमान उपवसेदित्येके । अयाश्चाग्न इत्येकामाहुतिं जुहुयादित्येके । कुतः । शास्त्रान्तरे दर्शनात् । अन्ये तु पूर्वसूत्रमेवं व्याचख्युः । नित्यशब्द उक्तार्थः । नित्यमाचमनमिति यथा । अनुशब्दः पश्चाद्वचनः । एतदुक्तं भवति । यदि वैवाह्यो न गृहीतो दायविभागकाले गृह्यते । गृहीतोऽपि नष्टो वा द्वादशरात्रमतिक्रान्तः । तत उक्तया क्रियया पश्चाद्गृहीतो भवतीति । तत्र विवाहाज्याहुतयो लाजाहुतयो गृहप्रवेशनीयाज्याहुतयश्च हृदयाञ्जनं च भवति नान्यत् । कन्यासंस्कारत्वात् । होमद्वयं चात्र समानतन्त्रं स्यात् । लाजाहोमोऽत्रापि पत्न्यञ्जलिना कार्यः । तद्धोमे तस्य साधनत्वेन दृष्टत्वात् । लाजावपनं तु स्वयमेव करोति न भ्राता । दायविभागकाले गृह्यमाणे प्रयोगविशेषोऽन्वेष्यः ॥ ३ ॥

तस्याग्निहोत्रेण ॥ ४ ॥

तस्यग्रहणं योगविभागार्थम् । तस्याग्निहोत्रेणैव विधिर्भवति नान्येन । तेन पाकयज्ञतन्त्रं न भवति । तर्हि प्राशनादयोऽपि स्युरित्याशंक्याह ॥ ४ ॥

प्रादुष्करणहोमकालौ व्याख्यातौ ॥ ५ ॥

प्रादुष्करणं नामापराह्णे गार्हपत्यं प्रज्वाल्येति । एवं प्रातर्व्युष्टायामिति च । प्रदोषान्तो होमकालः सङ्गवान्तःप्रातरिति । एतावेव भवतो नान्यदित्यर्थः ॥५॥

हौम्यं च मांसवर्जं ॥ ६ ॥

हौम्यं चाग्निहोत्रेण व्याख्यातम् । पयसा नित्यहोम इत्यादि पञ्च द्रव्याण्याम्नातानि

मांसवर्जमिति मांसप्रतिषेधाच्छास्त्रान्तरे दृष्टमपि हौम्यं भवतीति गम्यते । ' पयो दधि यवागूश्च सर्पिरोदनतण्डुलाः । सोमो मांसं तथा तैलमापस्तानि दशैव तु ॥ ' द्रवद्रव्याणि स्रुवेण जुहोति । कठिनानि तु पाणिना येन द्रव्येण सायं जुहोति तेनैव प्रातः प्रतिनिधिवर्जम् ॥ ६ ॥

कामं तु व्रीहियवतिलैः ॥ ७ ॥

कामवचनं पूर्वोक्ताभावे कथमेतेषां ग्रहणं स्यादित्येवमर्थम् । व्रीह्यादयश्च प्रत्येकं साधनानि । न मिश्राणि । तच्च न्यायतोऽवगन्तव्यम् ॥ ७ ॥

अग्नये स्वाहेति सायं जुहुयात्सूर्याय स्वाहेति प्रातस्तूष्णीं द्वितीये उभयत्र ॥ ८ ॥

तूष्णीं द्वितीये आहुती जुहोति । तूष्णींवचनं प्रजापतिध्यानार्थम् । उभयत्र सायं प्रातश्चेत्यर्थः । अग्निं परिसमुह्य परिस्तीर्य पर्युक्ष्य होमद्रव्यस्याऽग्निहोत्रवत्तूष्णीं संस्कारं कृत्वा ततोऽग्नये स्वाहेति जुहोति । ततः प्रजापतय इति चतुर्थ्यन्तं शब्दरूपं ध्यात्वा स्वाहेत्युपांशूक्त्वा द्वितीयाहुतिं जुहोति । ततः परिसमूहनपर्युक्षणे । एवं सायम् । प्रातर्होमे तु पूर्वमन्त्रस्थाने सूर्याय स्वाहा इति विशेषः इति गृह्यपरिचरण सूत्राणि ॥ ८ ॥

गृह्यपरिचरणप्रयोगः ॥

आचम्य, ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थम्
सायं गृह्यं परिचरिष्ये ॥

अग्नये स्वाहा । अग्नय इदं नमम ॥
प्रजापतये स्वाहा । प्रजापतय इदं नमम ।

आचम्य , अनेन गृह्यपरिचरणेन परमेश्वरः प्रीयताम् ।

आचम्य ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रातर्गृह्यं परिचरिष्ये ।

सूर्याय स्वाहा । सूर्याय इदं नमम ॥
प्रजापतये स्वाहा प्रजापतय इदं नमम ॥

आचम्य अनेन गृह्यपरिचरणेन परमेश्वरः प्रीयताम् ॥

हविर्द्रव्याणि---यवागूरोदनो दधि, सर्पिः, व्रीहयः यवाः, तिलाः तण्डुलाः सोमः, तैलम्, आपः, एतेष्वन्यतमं ग्राह्यं, द्रवद्रव्याणां स्रुवेण होमः, कठिणद्रव्याणां तण्डुलादीनां पाणिना होमः, सायं प्रातश्चैकद्रव्येण होमः । अन्यो विध्यन्तः सूत्रे नोक्त इति न संगृहीतोऽस्माभिः ॥ तस्याग्निहोत्रेणेति सूत्रयताप्रादुष्करणकालस्तावदग्निहोत्रेण व्याख्यातः । होमकालश्च, । प्रादुष्करणं नाम---अपराण्हे अग्निप्रज्वालनम् । प्रातर्व्युष्टायां उदयास्तमयात् प्रागिति यावत्

" तस्याग्निहोत्रेण प्रादुष्करणहोमकालौ व्याख्यातौ ॥ १।९।५

इत्येकमेव सूत्रमस्मदभिप्रेतम् । वृत्तिकारेण तु योगविभागः कृतः । पाकयज्ञतन्त्रनिवृत्त्यर्थम् ततः । प्राशनादिप्राप्तं तद्वारणाय प्रादुष्करणेति व्याचख्यौ परं अग्निहोत्रेणैव विधिर्भवति इति व्याख्यात्रा सर्वोपि विध्यन्तस्तत्रत्योऽत्र वक्तव्यः । न च तत् न्यायसम्मतम् सौत्रं वा आचारोपि इत्थमेव । न हि गृह्यपरिचरणे पितृभ्यः स्वधा, वृष्टिरसीत्यादिविध्यन्तमनुतिष्ठन्ति । अतोऽस्मदुक्तः प्रयोग एव साधु, अन्यदकरणे प्रत्यवायाभावः कृतं चेन्न दोषः, पयसैव नित्यहोमः . आचार्यसम्मतः । सूत्रयामास हि सः । " पयसा नित्यहोमः " आ० श्रौ० २।३।१

अत्र प्रधानम्=त्यागः । त्यक्तस्य द्रव्यस्य प्रतिपत्तिः अग्नौ होमः तथा च देवतामुद्दिश्य द्रव्यत्याग एव सर्वत्र प्रधानमिति ध्येयम् । अन्यदुपस्थानाद्यनुष्ठितं चेदपि तदंगमेव अस्मामिस्तु न तत्संगृहीतम् । सूत्रेऽनुक्तत्वात् । इत्यलमतिपल्लवितेन । गृह्यपरिचरणम्--गृहशब्दो भार्यावचनः तन्निमित्तोयमग्निस्तत्परिचरणं नाम होमः त्यागश्च ।

इति गृह्यपरिचरणप्रयोगः ॥

अथ स्थालीपाकसूत्राणि ॥

अथ पार्वणस्थालीपाकः ॥ १ ॥

उक्तोऽर्थः । पर्वणि भवः पार्वणः । स्थालीपाक इति कर्मनामधेयम् । दर्शपूर्णमासातिदेशात्काले सिद्धे पार्वणवचनं पाणिग्रहणाद्यहरहः क्रियाशङ्कानिवृत्यर्थम् । विवाहादनन्तरं या पौर्णमासी तस्यामस्य प्रथमप्रारम्भः । प्रतिपद्यौपासनं हुत्वा ततः परिसमूहनादि प्रारभेत ॥१॥

अथ खलु यत्र क च होष्यन्त्स्यादिषुमात्रावरं सर्वतः स्थण्डिलमुपलिप्योल्लिख्य षड्लेखा उदगायतां पश्चात्प्रागायते नानान्तयोस्तिस्रो मध्ये तदभ्युक्ष्याग्निं प्रतिष्ठाप्यान्वाधाय परिसमुह्य परिस्तीर्य पुरस्ताद्दक्षिणतः पश्चादुत्तरत इत्युदक्संस्थं तूष्णीं पर्युक्षणम् ॥ १ ॥

अथशब्दोऽधिकारार्थः। इत उत्तरं यानि वक्ष्यन्ते तेषामेवायं होमविधिर्भवतीति। तेन वैश्वदेवः क्वचग्रहणेन प्राप्यमाणो होष्यद्धर्मकोः न भवति। खलुशब्दोऽपार्थकः। मिताक्षरेष्वनर्थक इति वचनात्। यत्र-क्वचग्रहणमहरहः क्रियान्तरविध्याशङ्कानिवृत्त्यर्थम्। यत्र क्वच होष्यन्त्स्यादिति होममनूद्य धर्मविधिः। तर्हि यत्रेत्येवास्तु क्वचग्रहणमनर्थकम्। न। तन्त्रप्रतिषेधविषयेऽप्यौपासनाग्निपरिचरणे एतत्सूत्रविहितपरिसमूहनपरिस्तरणपर्युक्षणानां प्राप्त्यर्थं क्वचग्रहणम्। लेखादयो न सन्तीति वक्ष्यामः। इषुमात्रा मात्रा यस्य स्थण्डिलस्य तदिषुमात्रम्। एकस्य मात्राशब्दस्य लोपः। उष्ट्रमुखवत्। तच तदवरं च इषुमात्रावरम्। अवरं निकृष्टमित्यर्थः। सर्वतः सर्वासु दिक्षु चतसृष्वित्यर्थः। चतसृष्वपि दिक्षु इषुमात्रप्रमाणं ततोऽधिकं वा चतुरस्रं स्थण्डिलं गोमयेनोपलिप्य षट् लेखा उल्लिखेत्। षड्ग्रहणं कथम्। षट्स्वपि लेखासु अग्नेः स्थापनं यथा स्यादिति। केनचिद्यज्ञियेन शकलेन स्थण्डिलमध्ये उदग्दीर्घां प्रादेशमात्रां न्यूनां वा लेखामग्निप्रतिष्ठापनदेशस्य पश्चाल्लिखेत्। नानेत्यसंसर्गार्थम्। तस्या अन्तयोर्नाना असंसृष्टे प्रागायते लेखे लिखेत्। ततस्तिस्रो मध्ये असंसृष्टाः प्रागायता लेखा लिखेत्। शकलं तत्रैव निधाय। स्थण्डिलमभ्युक्ष्य शकलं निरस्याप उपस्पृश्याभ्यात्ममग्निं प्रतिष्ठाप्यान्वादधाति। ततोऽतिदेशप्राप्तं बर्हिष इध्मस्य च सन्नहनं करोति। अन्वाधानं नाम कर्माङ्गत्वेन द्वयोस्तिसृणां समिधामभ्याधानम्। ततः परिसमुह्य। परिसमूहनं नामाऽग्नेः समन्तात्परिमार्जनम्। तच्चाग्निहोत्रवत्। ततः परिस्तीर्य। पुरस्ताद्दक्षिणतः पश्चादुत्तरत इत्येवम्। उदक्संस्थवचनं एकैकस्यां दिश्युदक्संस्थताप्राप्त्यर्थम्। अथवा इत्युदक्संस्थमिति पृथग्योगः। निपातानामनेकार्थत्वादितिशब्द एवंप्रकारे। एवंविधं यत्कर्म सर्वदिक्संबद्धं परिसमूहनपर्युक्षणशिरस्त्रिरुन्दनादिकं तदपराजितायां दिश्यारभ्योदक्संस्थं कार्यमित्यर्थः। ततस्तूष्णीं पर्युक्षणं करोति। तूष्णींग्रहणं मन्त्रवर्जमन्ये धर्मा अग्निहोत्रदृष्टा भवन्तीत्येवमर्थम्। त्रिस्त्रिरेकैकं पुनः पुनरुदकमादायादौ अन्ते च कर्मणां पर्युक्षणम्। उभयत्र च परिसमूहनपूर्वकत्वमित्यत्र पुनः परिसमूहनविधानं मध्ये परिस्तरणसिद्ध्यर्थम्। एतस्मिन्-

काले उत्तरतोऽग्नेरपः प्रणयति चमसेन कांस्येन मृण्मयेन वा । उतरत्र निनयनदर्शनात् ॥ १ ॥

तस्य दर्शपूर्णमासाभ्यामुपवासः ॥ २ ॥

तस्यग्रहणं नियमार्थम् । तस्यैवोपवासो यथा स्यात्तदतिदिष्टानां माभूदिति दर्शपूर्णमासाविति कर्मनामधेयम् । उपवास इत्येकभोजनम् । सर्पिर्मिश्रं दधिमिश्रं अक्षारलवणमशितव्यमित्यादयश्च नियमा लक्ष्यन्ते तस्य ताभ्यामुपवासो व्याख्यात इत्यर्थः ॥ २ ॥

इध्माबर्हिषोश्च सन्नहनम् ॥ ३ ॥

अनयोश्च बन्धनं ताभ्यां व्याख्यातम् । ' इध्मः पञ्चदशदारुकः '' इति शान्तिकर्मणि साधितम् ॥ ३ ॥

देवताश्चोपांशुयाजेन्द्रमहेन्द्रवर्जम् ॥ ४ ॥

देवताश्च ताभ्यां व्याख्याताः । उपांशुयाजादिवर्जम् । तेनाऽग्निरग्नीषोमौ पौर्णमास्याम् अग्निरिन्द्राग्नी अमावास्यायाम् । तदुक्तं शौकनेन—' पौर्णमासी न संप्राप्तार्थविवाहादनन्तरम् । ततः प्रक्रम्य कुर्वीत स्थालीपाकं तु कर्मसु ॥ तत्र यद्यप्यमावास्या विवाहानन्तरं यदा । तथापि पौर्णमास्यादिस्थालीपाकक्रिया स्मृता ॥ ' इन्द्रमहेंद्रयोर्निषेधः किमर्थः सन्नयत एव हि ते विहिते । इन्द्रं महेन्द्रं वा सन्नयत इति । न चात्र सान्नाय्यं विहितम् । उच्यते । गृह्यकर्माणि तावदाहिताग्नेरपीष्यन्ते अर्धाधाने औपासनाग्नौ । सर्वाधाने तु कर्मणि पुनः संस्कुर्यात् । सन्नयत इति कर्तृविशेषणम् । दर्शे चासौ सन्नयन् भवति सोमेनेष्टवांश्चेत् । तेनात्राऽपि तस्य प्राप्नुतः । तस्मान्निषेधः । तर्हि इन्द्राग्नी न स्याताम् असन्नयत इति वचनात् । उच्यते । इन्द्राग्नी अस्याऽपि देवता भवत्येव । अत्र ह्यसावसन्नयन्निति कृत्वा । न चात्राभावः कर्तृविशेषणम् ॥ ४ ॥

काम्या इतराः ॥ ५ ॥

उक्ताभ्योऽन्या या उपांशु याजाद्या देवतास्ताः काम्या भवन्ति । कामे सति कर्तव्या इत्यर्थः । ' विष्णुं बुभूषन्यजेत ' इत्येवमाद्याः काम्याः । अथ काम्यानां स्थान इत्येव सिद्धे उपांशुयाजादीनामपि निषेधः कृतः । तच्चात्र काम्यत्वेनापि न क्रियेरन्निति भ्रान्तिः स्यात्तन्निवृत्त्यर्थमिदं वचनम् । अथात्र किं द्रव्यमुपांशु-

याजस्य तावद्राज्यं तस्य विद्यमानत्वाद्दृष्टत्वाच्च । इन्द्रमहेन्द्रयोस्तु चरुः सान्नाय्याभावात् ॥ ५ ॥

तस्यै तस्यै देवतायै चतुरश्चतुरो मुष्टीन्निर्वपति पवित्रे अतन्धायाऽमुष्मै त्वा जुष्टं निर्वपामीति ॥ ६ ॥

प्रणीताप्रणयनोत्तरकालं शूर्पे पवित्रे अन्तर्धाय व्रीहीन्यवान्वा असम्भवे अन्यान्वा हौम्यानेकैकस्यै देवतायै चतुरश्चतुरो मुष्टीन्निर्वपति । 'अमुष्मै त्वा जुष्टं निर्वपामि' इति । अमुष्मैशब्दस्य स्थाने चतुर्थ्या विभक्त्या देवतां निर्दिशेत् । चतुरश्चतुर इति वीप्सावचनं एकैकस्यै देवतायै चतुर्मुष्टिप्राप्त्यर्थम् । पवित्रे व्याख्याते ॥ ६ ॥

अथैनान्प्रोक्षति यथानिरुप्तममुष्मै त्वा जुष्टं प्रोक्षामीति ॥ ७ ॥

अथशब्दः कथम् । सर्वासामेव देवतानां निरुप्तेषु प्रोक्षणं स्यादित्येवमर्थम् । एतानिति बहुवचनं संश्लिष्टानेव प्रोक्षेन्न विभज्येत्येवमर्थम् । यथा निरुप्तमिति तस्यै तस्यै देवतायै चत्वारि चत्वारि प्रोक्षणानि समन्त्रकेषु निर्वापेषु समन्त्रकाणि अमन्त्रकेष्वमन्त्रकाणि पवित्रे अन्तर्धाय कुर्यादित्येवमर्थम् । निर्वापप्रोक्षणे एकस्मिन्नेव पात्रे भवतः । उत्तरत्र नानाविधानात् ॥ ७ ॥

अवहतांस्त्रिःफलीकृतान्नाना श्रपयेत् ॥ ८ ॥

कृष्णाजिने उलूखलं कृत्वा पल्यवहन्यात् । त्रिःफलीकृतानिति त्रिःशुक्लीकृतानित्यर्थः । पिण्डपितृयज्ञे सकृत्प्रक्षाल्येति सकृद्ग्रहणादत्र त्रिः प्रक्षालयेत् । ततो नाना श्रपयेत् ॥ ८ ॥

समोप्य वा ॥ ९ ॥

एकत्र वा श्रपयेत् ॥ ९ ॥

यदि नाना श्रपयेद्विभज्य तण्डुलानभिमृशेदिदममुष्मा इदममुष्मा इति ॥ १० ॥

यदि पृथक् श्रपयेत्तथा सति तण्डुलानभिमृशेत् इदममुष्मा इदममुष्मा इति । अमुष्मै शब्दः पूर्ववत् ॥ १० ॥

यद्यु वै समोप्य व्युद्धारं जुहुयात् ॥ ११ ॥

यदि समोप्य श्रपयेत् तथा सति चरुं व्युद्धृत्य एवमभिमृश्य ततो जुहुयात् । व्युद्धारमिति व्युद्धृत्येत्यर्थः । व्युद्धरणं नाम पात्रान्तरे पृथक्करणम् । जुहुयादिति-वचनं होमकाले व्युद्धरेदित्येवमर्थम् ॥ ११ ॥

पवित्राभ्यामाज्यस्योत्पवनम् ॥ १२ ॥

कार्यमिति शेषः ॥ २ ॥

अथ किंलक्षणे पवित्रे कथं वा उत्पवनं कार्यमित्येतद्द्वयं निर्णेतुमाह—

अप्रच्छिन्नाग्रावनन्तर्गर्भौ प्रादेशमात्रौ कुशौ नानान्तयोर्गृहीत्वाङ्गुष्ठोपकनिष्ठिकाभ्यामुत्तानाभ्यां पाणिभ्यां सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरिति प्रागुत्पुनाति सकृन्मन्त्रेण द्विस्तूष्णीम् ॥३॥

प्रशब्दः सूक्ष्मच्छिन्नाग्रयोरनिवृत्त्यर्थः । न विद्यते अन्तर्मध्ये गर्भो ययोस्तौ तथोक्तौ । प्रादेशमात्रौ कुशौ । एवंलक्षणयुक्तौ कुशौ पवित्रसंज्ञौ । नानेत्यसंसर्गार्थम् । पवित्रे अन्तयोरसंस्पृष्टे अङ्गुष्ठोपकनिष्ठिकाभ्यामुत्तानाभ्यां पाणिभ्यां गृहीत्वा प्रागुत्पुनाति सकृन्मन्त्रेण द्विस्तूष्णीम् । प्रागिति पाठः कार्यः । प्राङिति पुल्लिङ्गपाठे तु कर्तुः प्राङ्मुखत्वं स्यात् । तच्च परिभाषासिद्धम् । ननु कर्मणश्चापि प्राक्त्वं तत एव सिद्धम् । सत्यम् । तत्तु शास्त्रान्तरदृष्टं पुनराहारनिवृत्त्यर्थम् । तेन ज्ञायते शास्त्रान्तरदृष्टानामाविरोधिनां पात्रासादनादीनामिच्छातः क्रियेति । इत्थं हि शास्त्रान्तरे दृष्टम् । परिस्तरणकाले उत्तरतोऽग्नेः कांश्चिद्दर्भानास्तीर्य ब्रह्मवत्सु कर्मसु दक्षिणतोऽग्नेरपि कांश्चिद्दर्भानास्तीर्य ततोऽग्निं पर्युक्ष्य उदगग्नेर्दर्भेषु द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति उभाभ्यां पाणिभ्याम् । अयं पात्रासादनक्रमः—'प्रोक्षणपात्रमथ स्रुवयुक्तं पात्रमपां प्रणयनाय विशिष्टम् । भाजनमाज्यहविर्ग्रहणार्थं त्विध्ममथो परिसादय दर्भान् इति आज्यहोमेषु दर्वीमत्सु तु कर्मस्वयं क्रमः—'स्थालीं चरोः प्रोक्षणभाजनं च दर्वीस्रुवौ सादय दर्विहोमे ।' पात्रं प्रणीतार्थमथाज्यपात्रमिध्मं क्रमेण क्रमवित्कुशैश्च ॥' ततोऽप्रच्छिन्नाग्रावित्युक्तलक्षणे पवित्रे गृहीत्वा प्रोक्षणपात्रे निधायाप आसिच्य ताभ्यां त्रिरुत्पूय उत्तानानि पात्राणि कृत्वा विस्रस्येध्मं सर्वाणि पात्राणि प्रोक्षति । ततः प्रणीतापात्रं प्रत्यगग्नेर्निधाय तस्मिंस्ते पवित्रे अन्तर्धायाद्भिः पूरयित्वा गन्धादि प्रक्षिप्य पाणिभ्यां पात्रं नासिकान्तमुद्धृत्योत्तरतोऽग्नि दर्भेषु निधाय दर्भैः प्रच्छाद्यासादयेदिति । आचार्यस्य तु पूर्णपात्रं कार्यम् । अन्यस्य तु करणेऽभ्युदयः । अकरणे न प्रत्यवाय इत्याशयः ॥ इत्थं चान्यशास्त्रे

दृष्टम् । पूर्णपात्रनिधानानन्तरं तत्रस्थे पवित्रे गृहीत्वाज्यस्थाल्यां निधायाज्यमासिच्योदगङ्गारानपोह्य तेष्वधिश्रित्याज्यमवज्वलयेत् । द्वे दर्भाग्रे प्रच्छिद्य प्रक्षाल्याज्ये प्रत्यस्य पुनर्ज्वलता तेनैवोल्मुकेन त्रिः परिहरेत् येनावज्वलनं कृतम् । ततः शनैरुदगुद्वास्याङ्गारानतिसृज्य तत्रस्थमेवाज्यमुत्पूय पवित्रे त्वाद्भिः प्रोक्ष्याग्नौ विनिक्षिपेदिति । आचार्यस्योत्पवनं नित्यम् । अन्यत्पाक्षिकम् । पूर्ववदित्याकूतम् ॥ स्रुक्स्रुवसंमार्जनमप्यन्यशास्त्रे दृष्टम् । तस्यापीच्छातः क्रिया । अनयोः संमार्ग उच्यते । दक्षिणेन हस्तेनोभौ गृहीत्वा सव्येन कांश्चिद्दर्भानादाय सहैवाग्नौ प्रताप्य जुहूं निधाय दक्षिणेन पाणिना स्रुवस्य बिलं दर्भाग्रैर्बिलादारभ्य प्रागपवर्गं त्रिः समृज्याधस्तादग्रेणैवाग्रमभ्यात्मं त्रिःसंमार्ष्टि । ततो दर्भाणां मूलेन दण्डस्याधस्तात् बिलपृष्ठादारभ्य यावदुपरिष्टाद्बिलं तावत्त्रिः संमार्ष्टि । अथाऽद्भिः प्रोक्ष्य स्रुवं निष्टप्याज्यस्थाल्यां निधायोदकस्पृष्टैरेव दर्भैर्जुहूं चैवमेव संमार्ष्टि । ततो दर्भानद्भिः प्रक्षाल्याग्नावनुप्रहरेत् । एवं संमार्गः । स्विष्टकृदन्ते चेध्मसन्नहनानामग्नौ प्रासनं दृष्टम् । अन्यदपि यदस्मच्छास्त्राऽविरुद्धं परशास्त्रे दृष्टं तदपीच्छातः कार्यमिति ज्ञापयितुं प्रागुत्पुनातीति पुनराहारप्रतिषेधः कृतः । किंच उत्पुनाति त्रिरित्येव वाच्यं लाघवार्थम् । तथा सति सर्वत्रैवंकर्मावृत्तावित्यनेन सकृन्मन्त्रेण द्विस्तूष्णीमिति सिद्ध्यति । एवं सिद्धे इदं वचनं गृह्ये कर्मावृत्तौ मन्त्रावृत्तिर्भविष्यतीत्येवमर्थम् । पूर्वयोगः किमर्थः । अस्याधिकारार्थ इति चेत् । तर्हि प्रागुत्पुनात्याज्यमित्यत्रैव वाच्यम् । अथ पवित्रसंज्ञार्थः तर्हि कुशौ पवित्रे इत्यत्रैव वाच्यम् । उच्यते । पूर्वेणामन्त्रकमुत्पवनं विधीयते । अनेन तु समन्त्रकम् । तत्र वैतानिके अमन्त्रकं गृह्ये कर्मणि समन्त्रकमित्येवं विनिवेशः ॥ ३ ॥

शृतानि हवींष्यभिघार्योदगुद्वास्य बर्हिष्यासाद्येध्ममभिघार्याऽयन्त इध्म आत्मा जातवेदस्तेनेध्यस्व वर्धस्व चेद्ध वर्धय चास्मान्प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहेति ॥१२॥

उत्तरतोऽग्नेराज्यमुत्पूयाग्नेः पश्चाद्बर्हिरास्तीर्याज्यमासाद्य ततः शृतानि हवींष्यभिघार्योदगुद्वास्य बर्हिष्यासाद्य तत इध्ममभिघार्य अयन्त इति मन्त्रेणाग्नावादध्यात् । बर्हिष्यासाद्य पुनरभिघार्येति केचित्पठन्ति ॥ १२ ॥

तूष्णीमाघारावाघार्याज्यभागौ जुहुयादग्नये स्वाहा सोमाय स्वाहेति ॥ १३ ॥

तूष्णींग्रहणं मन्त्रवर्जम् । अन्ये धर्माः शास्त्रान्तरदृष्टाः कथं प्रवर्तेरन्निति ।

उत्तरपश्चिमाया आरभ्य दक्षिणपूर्वां प्रति अविच्छिन्नामाज्यधारां हरेत् । तथा दक्षिणपश्चिमाया आरभ्य उत्तरपूर्वां प्रत्याघारयेत् । स्रुवेणोभौ जुहुयात् । कुतः । यत्राज्यहोमे साधनान्तराऽनुपदेशस्तत्र स्रुवेण होम इति साधितम् । 'एवंभूतोऽव्यक्तहोम' इति सूत्रे व्याख्यातृभिर्यावन्मात्रं स्वशास्त्रानुक्तमपेक्षितं तावन्मात्रं ग्राह्यं नतु स्वशास्त्रे उक्तमपि 'आज्याभागौ जुहुयादग्नये स्वाहा सोमाय स्वाहा' इति। आज्यभागावित्यनयोर्यागयोः संज्ञा ॥ १३ ॥

उत्तरमाग्नेयं दक्षिणं सौम्यम् ॥ ४ ॥

अग्नेरुत्तरपार्श्वे आग्नेयमाज्यभागं जुहुयात् दक्षिणपार्श्वे तु सौम्यम् । स्रुवेणोभौ जुहुयात्पूर्ववत् ॥ १४ ॥

विज्ञायते चक्षुषी वा एते यज्ञस्य यदाज्यभागौ ॥ १५ ॥

आज्यभागौ यज्ञस्य चक्षुषी इत्येवं श्रूयेते इत्यर्थः ॥ १५ ॥

ततः किमित्याह—

तस्मात्पुरुषस्य [हि] प्रत्यङ्मुखस्यासीनस्य दक्षिणमक्ष्युत्तरं भवत्युत्तरं दक्षिणम् ॥ १६ ॥

यज्ञपुरुषस्य हि प्रत्यङ्मुखस्यासीनस्य दक्षिणमक्ष्युत्तरं भवत्युत्तरदक्षिणम् । तस्माद्दक्षिणसंस्थैव शक्या कर्तुं नोदक्संस्थेत्यर्थः । श्रुत्याकर्षोऽन्यत्र क्वचिदुदक्संस्थाऽपि यथा स्यादिति । तेन बलिहरणे प्रधानानामुत्तरतः पुरुषेभ्यो बलिहरणं सिद्धम् ॥ १६ ॥

मध्ये हवींषि प्रत्यक्तरं वा प्राक्संस्थान्युदक्संस्थानि वोत्तरपुरस्तात्सौविष्टकृतम् ॥ १७ ॥

अग्नेर्मध्यप्रदेशे हवींषि जुहोति । प्रत्यक्तरं वा देशे हवींषि वा जुहोति । प्रत्यक्तरमिति द्वितीया सप्तम्यर्थे । तत्रापि देशे प्राक्संस्थानि वा जुहोत्युदक्संस्थानि वा । ननु प्राक्संस्थानीत्यस्मिन्नसत्यप्युदक्संस्थानि वेति वाशब्दप्राप्तया प्राक्संस्थया सह विकल्पे सति पक्षे प्राक्संस्थत्वमपि सिद्ध्यति । किमर्थं प्राक्संस्थवचनम् । उच्यते। देशद्वयस्य संस्थाद्वयस्य चानन्तर्ययोगो मा भूदित्येवमर्थम् । तेन देशद्वयेऽपि संस्थाद्वयस्य यथासंख्यता नास्तीति सिद्धम् । अग्नेरुत्तरपूर्वदेशे सौविष्टकृतं हविर्जुहोति ॥ १७ ॥

मध्यात्पूर्वार्धाच्च हविषोऽवद्यति ॥ १८ ॥

हविषो मध्यात्पूर्वार्धाच्चाङ्गुष्ठपर्वमात्रं हविरवद्यतीति देशो वियम्यते ॥ १८ ॥

मध्यात्पूर्वार्धात्पश्चार्धादिति पञ्चावत्तिनाम् ॥ १९ ॥

पञ्चावत्तिनां तु मध्यात्पूर्वार्धात्पश्चार्धादित्येवमवदानं भवति । पश्चार्धाच्चेत्येतावतैव सिद्धे मध्यात्पूर्वार्धादिति वचनं प्रत्यक्संस्थता यथा स्यात् प्राक्संस्थता मा भूदित्येवमर्थम् ॥ १९ ॥

उत्तरार्धात्स्विष्टकृतम् ॥ २० ॥

सर्वेषां हविषामुत्तरार्धात्स्विष्टकृदर्थमवदानं प्रधानादवदानाद्भूयः सकृत्सकृदवखण्डयति । पञ्चावत्ती तु एवं सकृत्सकृद्गृहीत्वा पुनरपि पूर्वावदानदेशस्य पुरस्तात्सकृत्सकृदवद्येत् । तथा दृष्टत्वात् । ततो द्विरुपरिष्टादभिघारयति पञ्चावत्ती चतुरवत्ती च ॥ २० ॥

नात्र हवींषि प्रत्यभिघारयति । स्विष्टकृतं द्विरभिघारयति ॥ २१ ॥

स्विष्टकृति हविःशेषं न प्रत्यभिघारयति । अत्रग्रहणमत्रैव नाभिघारयति स प्रधानहविःष्वित्येवमर्थम् । हविःशब्दः शेषे वर्तते । यद्यवत्ते वर्तेत चतुरवत्तताऽहुतेर्न स्यात् । तन्न चेष्यते ॥ २१ ॥

यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरम् । अग्निष्टात्स्विष्टकृद्विद्वान्त्सर्वं स्विष्टं सुहुतं करोतु मे । अग्नये स्विष्टकृते सुहुतहुते सर्वप्रायश्चित्ताहुतीनां कामानां समर्धयित्रे सर्वान्नः कामान्त्समर्धय स्वाहा इति ॥ २२ ॥

अनेन मन्त्रेण स्विष्टकृतं जुहुयात् ॥ २२ ॥

बर्हिषि पूर्णपात्रं निनयेत् ॥ २३ ॥

यत्पूर्वं निहितं पूर्णपात्रं तदधुना बर्हिषि निनयेत् । निषिञ्चेदित्यर्थः ॥ २३ ॥

एषोऽवभृथः ॥ २४ ॥

यदिदं पूर्णपात्रानिनयनं एषोऽस्य कर्मणोऽवभृथो भवति । अवभृथवचनमवभृथधर्मप्राप्त्यर्थम् । तेन कालोऽभ्युक्षणं च भवति । कालस्तु सर्वप्रायश्चित्तदूर्ध्वं प्राक्संस्थाजपात् । अनेनैवाभ्युपायेन सर्वप्रायाश्चित्तानि संस्थाजपश्च द-

कार्याणीत्युक्तं भवति । निरसनोपवेशने ब्रह्मजपः सर्वप्रायाश्चित्तानि संस्थाजप इति पञ्च ब्रह्मणो भवन्तीत्युक्तं तत्रैवं क्रमः । पूर्वं कर्ता सर्वप्रायाश्चित्तानि जुहोति । ततो ब्रह्मा सर्वप्रायाश्चित्तानि जुहुयात् । ततः कर्ता पूर्णपात्रं निनयति । ततः कर्ता संस्थाजपेनोपतिष्ठते । ततो ब्रह्मोपतिष्ठते । ततः कर्ता परिसमूहनपर्युक्षणे इति । अभ्युक्षणं च ' आपो अस्मान्, इदमापः, सुमित्र्या नः ' इत्येतैर्मन्त्रैः ॥ २४ ॥

पाकयज्ञानामेतत्तन्त्रम् ॥ २५ ॥

एतत्तन्त्रं पाकयज्ञानां सर्वेषां भवतीत्यर्थः । पाकयज्ञग्रहणं स्थालीपाकसदृशानां हुतानामेव तन्त्रं यथा स्यात् प्रहुतब्रह्माणि हुतानां मा भूदित्येवमर्थम् । अङ्गसंहतिस्तन्त्रम् । विध्यन्त इत्यर्थः । यद्यपि सर्वमुच्यते तथापि न प्रधानदेवताः प्रसज्यन्ति । देवतागमे नित्यानामपाय इति बाधदर्शनात् ॥ २५ ॥

हविरुच्छिष्टं दक्षिणा ॥ २६ ॥

उच्छिष्टं हविर्दक्षिणां ददाति ब्रह्मणे यद्यस्ति ब्रह्मा । तदभावे ब्राह्मणेभ्यः । कर्माङ्गत्वाद्दक्षिणानाम् ॥ २६ ॥ इति स्थालीपाकसूत्राणि

स्थालीपाकसामग्री

१ मृत्तिका—स्थंडिलार्थम्
१ गोमयम्—स्थंडिलोपलेपार्थम्
१ काष्ठशकलम्—लेखाकरणार्थम्
१ उदकम्—स्थंडिलाभ्युक्षणार्थम् व्रीहिप्रोक्षणाद्यर्थंच
१ अग्निः—होमार्थम्
१ समित्त्रयम्—अन्वाधानार्थम्
१ अंगप्रधान देवताः—— } परिग्रहार्थमुद्देशार्थंच
१ पंचदशसमिधः इध्मापरनामधेयाः } अग्निप्रज्वालनार्थम्

१ द्विमुष्टिपरिमितं बर्हिः } हविरासादनार्थं परिस्तरणनिर्वापाज्योत्पवनाद्यर्थंच

१ प्रतिदैवतं चतस्रोमुष्टय एवंव्रीहयः } चर्वर्थम्

१ शूर्पम्—व्रीहिनिर्वापार्थं तुषशोधनार्थंच

१ कृष्णाजिनम्—उलूखलस्थापनार्थम्

१ उलूखलमुसले—व्रीह्यवहननार्थम्

१ जलं पात्रंच—तंडुलप्रक्षालनार्थम्

१ ताम्रमयी स्थाली—तंडुलपाकार्थम्

१ दर्वी—अवत्तहोमार्थम्

१ स्रुवः—आज्यहोमार्थम्

१ पूर्णपात्रम्—निनयनार्थम्

१ पात्रम्—आज्यस्थापनार्थम्

१ उपवासः—(एकदा भोजनम्) } परेद्युः कर्मानुष्ठानायेंद्रियोत्साहार्थम्

एतावत् पूर्वदिवसे संपादनीयम् अन्यदपि यदावश्यकं स्यात् तदपि संपादनीयम् ॥

इति स्थालीपाकसामग्री ।

अथ स्थालीपाकप्रयोगः ॥

कृतनित्यः, आचम्य, ममोपात्तदुरितक्षयद्वारा यक्ष्यमाणदेवताप्रीत्यर्थं दर्शपूर्णमासाभ्यां स्थालीपाकाभ्यां यक्ष्ये । तत्रेदानीं पौर्णमासस्थालीपाकेन यक्ष्ये ।

[दर्शे तु पूर्वसंकल्पितेन दर्शस्थालीपाकेन यक्ष्ये]

सर्वत इषुमात्रावरं स्थण्डिलं कृत्वोपलिप्य, उल्लिख्य षड्लेखा उदगायतां, पश्चात्प्रागायते नानान्तयोस्तिस्रोमध्ये, तदभ्युक्ष्याग्निं प्रतिष्ठाप्य, समित्त्रयं हस्ते गृहीत्वा अस्मिन्नन्वाहितेऽग्नौ, जादवेदसमाग्निमिध्मेन, प्रजापतिं प्रजापतिं चाघारदेवते आज्येन, अग्नीषोमौ चक्षुषी आज्येन, अग्निमग्नीषोमौ प्रधानदेवते चरुद्रव्येण,

[दर्शे तु अग्निमिन्द्राग्नी च प्रधानदेवते चरुद्रव्येण]

शेषेण स्विष्टकृतमग्निं प्रजापतिं प्रायश्चित्तदेवतामाज्येन श्वो यक्ष्ये इत्युक्त्वा समिधामग्नौ प्रक्षेपः । एतावत्पूर्वदिने कृत्यम् । ततः परिसमुह्य, परिस्तीर्य, तूर्ष्णीं पर्युक्ष्य, पूर्णपात्रमग्नेरुत्तरतः संस्थाप्य,
अग्नये त्वा जुष्टं निर्वपामि, अग्नीषोमाभ्यां त्वा जुष्टं निर्वपामि, अग्नये त्वा जुष्टं प्रोक्षामि, अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्ष्यामि,

[दर्शेतु अग्नीषोमस्थाने इन्द्राग्निभ्यां त्वेति निर्वापप्रोक्षणे विशेषः]

ततः अवहतान्, संशोधिततुषान्, त्रिःशुक्लीकृतान्, त्रिःप्रक्षालितान्, एकपात्रे सुशृतं चरुं पचेत् ततः ।

सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोःसूर्यस्य रश्मिभिः । इत्याज्यमुत्पूय, शृतं हविरभिघार्य, उदगुद्वास्य ॥

इत्याज्यमुत्पूय, शृतं हविःस्रुवगृहीतेनाज्येनाभिघार्य, उदगुद्वास्य बर्हिषि आसाद्य, स्रुवगृहेतेनाज्येन इध्ममभिघार्य, —

अयं त इध्म आत्मा जातवेदस्तेनेध्यस्व वर्धस्व चेद्ध वर्धय चास्मान् प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहा ॥ १ ॥

इतीध्ममग्नावाधाय, ततः स्रुवेणाज्यमादायाघारौ आघार्य, स्रुवेणाज्यमादाय, अग्नये स्वाहा, सोमाय स्वाहा । इत्याज्यभागौ हुत्वा, पूर्वनिहितपात्रे चरुमुद्धृत्य, पृथक्कृत्य, इदमग्नये, इदमग्नीषोमाभ्यां इति संस्पृश्य, अवदानधर्मेणावदाय, अग्नये स्वाहा, अग्नीषोमाभ्यां स्वाहा ॥

[दर्शे तु अग्नीषोमस्थाने, इन्द्राग्निभ्यां स्वाहा इति]

**यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरम् ।
अग्निष्टत्स्विष्टकृद्विद्वान् सर्वं स्विष्टं सुहुतं करोतु मे ॥
अग्नये स्विष्टकृते सुहुतहुते सर्वप्रायश्चित्ताहुतीनां ।
कामानां समर्धयित्रे सर्वान्नः कामान्त्समर्धय स्वाहा ॥**

प्रजापतये स्वाहा, पूर्णमात्रमभिमृशन्तीं वाचयेत्,

पूर्णमसि पूर्णं मे भूयाः सुपूर्णमसि सुपूर्णं मे भूयाः सदासि
सन्मे भूयाः सर्वमसि सर्वं मे भूयाः, अक्षितिरसि मामे क्षेष्ठाः ॥

पत्न्यञ्जलिमुत्तानमात्मनश्च सव्यं पाणिमुत्तानं निधाय पूर्णपात्रं निनयन् तां वाचयेत् । तत्र मन्त्रः—

माहं प्रजां परासिचं या नः सयावरी स्थ न ।
समुद्रेवो निनयानि स्वं पाथो अपीथ ॥
ॐचमे स्वरश्चमे यज्ञोपचते नमश्च ।
यत्ते न्यूनं तस्मै त उपयत्तेतिरिक्तं तस्मै ते नमः ॥

आचम्य, अनेन स्थालीपाकाख्येन कर्मणा इष्टा देवताः प्रीयन्ताम् । आज्य-भागानन्तरम्, स्विष्टकृतः पूर्वं क्रियमाणमत्र प्रधानम् इतरदङ्गं । स्थालीपाक इति कर्मणो नामधेयम्, स्थाल्यां पाकः, स्थालीपाकः । अत्रावघातादिः सन्निपत्यो-पकारकं अङ्गम् । आज्यभागादि आरादुपकारकम् मन्त्रादौ ॐकारः सर्वत्र प्रयोक्तव्यः । ॐकारामिति सूत्रात् । १।२।१० श्रौ० सू० त्यागश्चान्ते वक्तव्यः स च मीमासकानां मतेन न तु सूत्रकारमतेन उक्तं च कुमारिलभट्टैः

न ममेति स्वस्वतायाः निवृत्तिमपि कीर्तयेत् ।
दानहोमादिकं कुर्यादेवं श्रद्धासमन्वितः ॥

व्रीहीनवहन्यादेवेति नियमविधेर्जागरूकत्वात् इदानींतनाः चक्रनिष्पन्नांस्तण्डु-लान् गृहीत्वा चरुं निष्पादयन्ति ते सर्वथा शास्त्रविरोधादुपेक्ष्याः । इयमेव प्रक्रिया सर्वत्र ज्ञेया प्रधानं विशेषश्च तत्र तत्रोत्तरत्र वक्ष्यते आज्यमात्रहोमे तु निर्वापादि न स्यात् । कर्मानुष्ठानकाले ऋष्यादिस्मरणं प्रतिमन्त्रं उत पूर्वमेव स्मरणं कृत्वा कर्मारम्भः । "एतान्यविदित्वा" योऽधीते, इत्यादि सर्वानुक्रमण्यामुक्तत्वात् तत्प-दार्थज्ञानमात्रमपेक्षितं न तु कर्मानुष्ठानकालोच्चारणम् । यथार्थज्ञानमावश्यकम् ।

इति स्थालीपाकप्रयोगः ॥

मन्त्रभाष्यम् ॥

अयं त इध्म आत्मा जातवेदस्तेनेध्यस्व चेद्ध वर्धय चास्मा-
न्प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहा ॥

भाष्यम्=जातवेदविशिष्ट अग्ने पंचदशकाष्ठरूपः इध्मसंज्ञकः ते आत्मा स्वरूपं

तेन इध्यस्व, प्रदीप्तो भव अभिषिक्तोऽयं घृतेन तं वर्धस्व, सप्तभिर्ज्वालाभिः, च हे इध्द, प्रदीप्त, अस्मान् प्रजया उत्तमया संतत्या, पशुभिः ब्रह्मवर्चसेन, अन्नाद्येन, अन्नं च तत् आद्यं च अन्नाद्यं तेन वर्धय, समेधय, च तस्मै अग्नये तुभ्यमयमिध्मः स्वाहा दत्तः । स्वाहा, अव्ययम् । स्वाहा देवहविर्दाने इत्यमरः । सौत्र एवायं मन्त्रः । जातवेदाः—जातवेदाः कस्मात् ? जातानि वेद, जातानि वैनं विदुः, जाते जाते विद्यत इति वा, जातवित्तो वा जातधनः, जातविद्यो वा जातप्रज्ञानः, यज्जातः पशूनविन्दतेति तज्जातवेदसो जातवेदस्त्वमिति ब्राह्मणं तस्मात् सर्वानृतून् पशवोऽग्निमभिसर्पन्तीति च ॥ नि० ७।१६ ऋष्यादि प्रयोगरत्ने वामदेवो, जातवेदा अग्निस्त्रिष्टुप् इध्महवने विनियोगः । अयं मन्त्रः इत्थमेव हिरण्यकेशीयगृह्ये आम्नातः । क्रियापदमेकं भिद्यते ।

सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य
रश्मिभिः ॥

हे आज्य अन्तर्हृदयेऽवस्थितः प्रेरकः अन्तर्यामी, त्वा त्वां ऊर्ध्वं पुनामि, केन साधनेन, आदित्यरूपत्वभावनाबलादच्छिद्रेण दर्भपवित्रेण । पुनरपि केन । जगन्निवासहेतोः सूर्यस्य रश्मित्वेन भावितैर्दर्भावयवैः । यथोक्तं मन्त्रार्थं विशदयति । तैत्तिरीयब्राह्मणम् । भेदेनायं मन्त्रः केनचित् तत्र पठ्यते तस्माद्ब्राह्मणमपि भिद्यते । सवितुष्ट्वा प्रसव उत्पुनामीत्याह । सवितृप्रसूतएवैनदुत्पुनामि, अच्छिद्रेण पवित्रेणेत्याह । असौ वा आदित्योऽच्छिद्रं पवित्रम् । तेनैवैनदुत्पुनामि । वसोः सूर्यस्य रश्मिभिरित्याह । इत्यादि तत्र अपां उत्पवने विनियोगः अत्र आज्योत्पवने अतो भेदं कृत्वोहितं ब्राह्मणम् ; ऋष्यादि प्रयोगरत्ने--हिरण्यस्तूपः सविता पुर उष्णिक्, आज्योत्पवने विनियोगः ।

यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरम् ।
अग्निष्टत्स्विष्टकृद्विद्वान्त्सर्वं स्विष्टं सुहुतं करोतु मे ॥
अग्नये स्विष्टकृते सुहुतहुते सर्वप्रायश्चित्ताहुतीनां कामानां
समर्धयित्रे सर्वान्नः कामान्त्समर्धय स्वाहा ।

यत् अस्य अनुष्ठितस्य कर्मणः अत्यरीरिचम् अधिकं कृतवान् यद्वा इह अस्मिन् कर्मणि न्यूनम् अकरम् अकार्षं तत्सर्वं न्यूनातिरिक्तं विद्वान् जानन् अग्निः स्विष्टकृच्च, सुइष्टंकरोतीति स्विष्टकृत् एतद्गुणविशिष्टः अग्निः मे सर्वं स्विष्टं सम्यगिष्टं यथास्यात्तथा, सुहुतं सम्यक्हुतं करोतु । तस्मै अग्नये च कथं भूताय

सुहुतहुते, स्विष्टकृते, सर्वप्रायश्चित्ताहुतीनां कामानां समर्धयित्रे, इयमाहुतिः स्वाहा दत्ता । नः अस्माकं सर्वान् कामान्, अभिलषितपदार्थान् समर्धय, वृद्धिं प्रापयेत्यर्थः ।

पूर्णमसि पूर्णं मे भूयाः सुपूर्णमसि सुपूर्णं मे भूयाः, सदसि
सन्मे भूयाः, सर्वमसि सर्वं मे भूयाः, अक्षितिरसि मामे क्षेष्ठाः ॥

स्पष्टार्थोयं मन्त्रः, आदरार्थे द्विरुक्तिः, अक्षितिरसि, क्षयरहितमसि अतो मामपि माक्षेष्ठाः क्षयरहितो यथा स्यां तथा कुरु, त्वं सदसि न कदाचिदपि असत् अतो मामपि सन्तमेव कुरु । अन्यत्स्पष्टम् ।

माहं प्रजां परासिचं या नः सयावरी स्थन ।
समुद्रे वो निनयानि स्वं पाथो अपीथ ॥

हे आपः प्रजामिवोपकारिणीर्युष्मान् मापरासिचम् । पृथक्सेकं न करोमि या अस्मत्सहचारिण्यः, समुद्रे युष्मान्निनयामि यूयं च स्वं पाथः स्वस्थानमपीथ संगच्छथ । इतिचौण्डपः । अथवा=अहं प्रजां मा परासिचम्, मानिषूदयेयम् । हे उदकानि यूयम् समानं सह यावरीः गमनशीलाः न इव स्थ भवत अस्मत्सहचारिण इव भवत इति यावत् । वः युष्मान् समुद्रे स्वंपाथः स्वयोनौ निनयानि प्रापयानि अपीथ, संगच्छथ, लयं गच्छथ, स्वस्वरूपं लभध्वमित्यर्थः ।

ओं चमे स्वरश्चमे यज्ञोपचते नमश्च ।
यत्ते न्यूनं तस्मै त उपयत्तेतिरिक्तं तस्मै ते नमः ॥

चौण्डपभाष्यम्=ॐ च मे ब्रह्म च मे ॐ इति ब्रह्मवाचकः तद्ब्रह्म मे प्रसीदतु, स्वरश्च स्वरति शरीरेन्द्रियादिकं स्वस्वकार्येषु प्रेरयति स्वतोन्तर्यामी स च मे प्रसीदतु । हे यज्ञ ते तवोपसन्नोऽस्मि नमश्च करोमि हे यज्ञपते तव यन्न्यूनमज्ञानात्प्रमादाद्वा कृतं यश्च ते तवातिरिक्तं तत्सर्वं तस्मै तदुपसमीपे एव समर्पयामि, तस्मै तुभ्यं नमश्च करोमि । इति ।

इति मन्त्रभाष्यम् ।

पुंसवनसूत्राणि ॥

उपनिषदि गर्भलम्भनं पुंसवनमनवलोभनं च ॥ १ ॥

आम्नातामिति शेषः । गर्भो लभ्यते येन कर्मणा निषिक्तं वीर्यममोघं भवति तद्गर्भलम्भनम् । पुमांल्लब्धो जायते येन तत्पुंसवनम् । पुमांस्तु सन् येन नावलुप्यते तदनवलोभनम् । वर्णविकारो द्रष्टव्यः पृषोदरादित्वात् । एतानि कस्यांचिदुपनिषद्याम्नातानि । न केवलमेतानि किं तर्हि गर्भाधानादय आत्मज्ञानपर्यन्ता आम्नाताः । अस्मच्छाखायां सा न विद्यते अतस्तत्कर्म कर्तव्यमित्युपदिश्यते ॥ १ ॥

तस्या उत्सन्नत्वाद्यदि तां नाधीयात्तत एवं कुर्यादित्याह—

यदि नाधीयात्तृतीये गर्भमासे तिष्येणोपोषितायाः सरूपवत्साया गोर्दधनि द्वौ द्वौ [तु] माषौ यवं च दधि प्रसृतेन प्राशयेत् ॥ २ ॥

गर्भाधानमाचार्येणानुक्तमिति कृत्वा न कार्यमित्येके । अन्ये पुनः शौनकाद्युक्तमार्गेण कार्यमित्याहुः । इदं तु पुंसवनम् । गर्भसहितो मासो गर्भमासः । तिष्येणेति ‘ नक्षत्रे च लुपि ’ इत्यधिकरणे तृतीया । तिष्येणेति प्राशनकर्मणा संबध्यते । तस्य प्रधानत्वात् । नोपवासेन गुणत्वात् । तेन पुनर्वसुना उपोषितायाः-पत्न्यास्तिष्येणेदं कर्म करोति । तत्र प्राजापत्यस्य स्थालीपाकस्याज्यभागान्तं कृत्वा वक्ष्यमाणं कर्म कुर्यात् । समानं रूपं यस्य स सरूपः । सरूपो वत्सो यस्याः सा तथोक्ता । गोग्रहणं सरूपवत्साया अभावे असरूपवत्सा गौर्ग्राह्या नासरूपवत्सां त्यजेदित्येवमर्थम् । वीप्सावचनं कथम् । प्रतिप्रसृतं द्वौ द्वौ माषौ स्यातामिति । यदि वीप्सा न क्रियेत स्थालीस्थदधन्येव माषयोर्यवस्य च प्रक्षेपः स्यात् । तस्य सप्तमीनिर्दिष्टत्वात् तस्मादावृत्त्यर्थं वीप्सावचनम् । पुनर्दधिग्रहणं दध्नः प्राशनार्थम् । अन्यथा पूर्वस्य सप्तमीनिर्दिष्टत्वाद्दध्नः प्राशनं न स्यात् । प्रसृते दधि प्राक्षिप्य तस्मिन्दधनि माषयवानां प्रक्षेपणार्थं पूर्वं दधिग्रहणम् । अण्डरूपेण माषौ दद्यात् शिश्नरूपेण यवम् । तथा दृष्टत्वात् ॥ २ ॥

किं पिबसि किं पिबसीति पृष्ट्वा पुंसवनं पुंसवनमिति त्रिः प्रतिजानीयात् ॥ ३ ॥

किं पिबसीति प्रश्नः । पुंसवनमिति प्रश्नः । तत्रेति प्रश्ने त्रिर्ग्रहणमाचार्येण

---

१ प्रतिज्ञानं प्रत्युत्तरमिति वा स्यात् ।

कृतम् । अतस्तस्यैव त्रित्वप्राप्तौ उभयोस्तुल्यत्वज्ञापनार्थमुभयत्र वीप्सावचनम् । तेन प्रश्नोऽपि त्रिर्वाच्य इति सिद्धम् ॥ ३ ॥

एवं त्रीन्प्रसृतान् ॥ ४ ॥

अनेनविधिना त्रीन्प्रसृतान्प्राशयेत् । एकस्मिन्प्रसृते प्राप्ते त्रयः प्रसृतास्तुल्यधर्माणो विधीयन्ते ॥ ४ ॥

इति पुंसवनसूत्राणि ॥

अथानवलोभनसूत्राणि ॥

अथास्यै मण्डलागारच्छायायां दक्षिणस्यां नासिकायामजीतामोषधीं नस्तः करोति ॥ ५ ॥

कर्मान्तरत्वात्कालान्तरप्राप्तावान्तर्यार्थोऽथशब्दः । इदं त्वनवलोभनम् । कुतः । 'माहं पौत्रमघं नियाम्' [गृ. १ । १३।७] इति मंत्रलिङ्गात् । पुत्रसंबन्धि अशोभनं माहं नियामित्यर्थः । अस्यै अस्याः मण्डलागारं कृत्वा तस्य छायायामुपवेश्यास्या दक्षिणस्यां नासिकायां दूर्वां नस्तः करोति । दक्षिणग्रहणमिन्द्रियाणामनङ्गत्वज्ञापनार्थम् । अजीतेति गुणनाम । अजीर्णेत्यर्थः । सा चौषधी दूर्वेत्युपदिशन्ति । नस्तःकरणं नासिकायां रससेचनम् ॥ ५ ॥

प्रजावज्जीवपुत्राभ्यां हैके । आ ते गर्भो योनिमैतु पुमान्बाण इवेषुधिम् । आ वीरो जायतां पुत्रस्ते दशमास्यः । अग्निरैतु प्रथमो देवतानां सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात् । तदयं राजा वरुणोऽनुमन्यतां यथेयं स्त्री पौत्रमघं न रोदादिति ॥ ६ ॥

प्रजावता दृष्टो मन्त्रः प्रजावान् । जीवपुत्रेण दृष्टो मन्त्रो जीवपुत्रः यथा सूर्येति । 'आ ते गर्भ' इति सूक्तं प्रजावान् । 'अग्निरैतु प्रथम' इति सूक्तं जीवपुत्रः । आभ्यां सूक्ताभ्यामेके नस्तःकरणमिच्छान्ति । अन्ये तूष्णीम् । हशब्दोऽभिमतत्वज्ञापनार्थः ॥ ६ ॥

प्राजापत्यस्य स्थालीपाकस्य हुत्वा हृदयदेशमस्या आलभेत । यत्ते सुसीमे हृदये हितमन्तः प्रजापतौ । मन्येऽहं मां तद्विद्वांसं माहं पौत्रमघं नियामिति ॥ ७ ॥

प्राजापत्यस्य स्थालीपाकस्यैकदेशं हुत्वा हृदयदेशं हृदयसमीपमस्या आलभेत स्पृशेत् 'यत्ते' इति मन्त्रेण । ततः । स्विष्टकृदादि समापयेत् । इदं कर्म प्रतिगर्भमावर्तते गर्भसंस्कारत्वात् । प्रथमगर्भे तृतीयमासि यदि गर्भो न विज्ञातस्तदाचतुर्थे कुर्यात् । विज्ञाते गर्भे तिष्ये पुंसवनम् । ' तत्तृतीये मास्यन्यत्र गृष्टेः ' इति च स्मरणात् । गृष्टिः प्रथमगर्भः । पञ्चमे मास्यङ्गनिष्पत्तिर्भवति । स्वयमेव चास्य कर्ता । माहं पौत्रामिति लिङ्गात् । तदभावे देवरः ॥ ७ ॥

इत्यनवलोभनसूत्राणि ॥

अथ पुंसवनानवलोभनप्रयोगः ॥

कृतनित्यः, आचम्य, ममोपात्तदुरितक्षयद्वारा यक्ष्यमाणदेवताप्रीत्यर्थम् पुंसवनमनवलोभनं च तन्त्रेण करिष्ये ॥ समित्त्रयग्रहणान्तं कृत्वा, चक्षुषी आज्येनेत्यंतमुक्त्वा, प्रजापतिं चरुद्रव्येण शेषेण स्विष्टकृतमित्याद्युक्त्वान्वाधाय, परिसमूहन परिस्तरणादिप्रणीताप्रणयनावधि प्राक्तनतन्त्रं कृत्वा ॥

प्रजापतये त्वा जुष्टं निर्वपामि ।

इति निरुप्य हविरासादनान्तं कृत्वा, पत्न्यान्वारब्धइध्माधानाद्याज्यभागान्तं कृत्वा प्रसृतीकृते पत्नीपाणौ प्रसृतिमितं तद्वोर्दधि निक्षिप्य, तदुपरि यवं, पार्श्वयोर्माषद्वयं निधाय किं पिबसीति त्रिः पतिः पत्नीं पृच्छेत् । सा च पुंसवनमिति त्रिरुक्त्वा सयवमाषं तद्दधि निःशेषं पीत्वा जलेनाचम्य पुनरेवं द्विः प्रश्नप्रतिप्रवचनपूर्वकं प्राश्याचामेत् । एतत्पुंसवनम् । ततो मण्डलागारच्छायायामुपविष्टायाः पत्न्या दक्षिणस्यां नासिकायां पतिर्दूर्वारसं तूष्णीमासिंचेत् । ततः पत्न्या स्पृष्टः सन् प्राजापत्यचरुमवदानधर्मेणावदाय ।

प्रजापतये स्वाहा । प्रजापतय इदं न मम

इत्येकामाहुतिं हुत्वा, पत्न्याः हृदयदेशमालभेत तत्र मन्त्रः ।

यत्ते सुसीमे हृदये हितमन्तः प्रजापतौ ।
मन्येहं मां तद्विद्वांसं माहं पौत्रमघं नियाम् ॥

ततः स्विष्टकृदादिहोमशेषं समापयेत् । आचम्य अनेन पुंसवनानवलोभनाख्येन कर्मणा इष्टा देवताः प्रीयन्ताम् । दधि,यव,माषाणां त्रिः प्राशनम् दूर्वारससेचनम् । एते अत्र प्रधाने इतरदङ्गम् । पुंसवनम्=गर्भसंस्कारकर्मणो नामधेयम् । तच्च स्पन्दते पुरा स्पन्दिष्यते "यावत्पुरानिपातयोर्लट्" इति भविष्यदर्थे वर्तमानप्रयोगः । पुरा—गर्भस्पन्दनाद्भवतीति हेतोः पुमान् सूयतेऽनेनेति पुंसवनम् । लब्धः पुमान् नावलुप्यते येन कर्मणा तदनवलोभनम् । एतयोः कर्ता तु पतिः पतिस्थानीयोऽन्यो वा देवरादिः । परं यथोक्तकाले अनुष्ठेयम् । उक्तं च सूत्रकारेण= "तामुत्थापयेद्देवरः पतिस्थानीयोऽन्तेवासी, जरद्दासो वा" ४।२।१८ । इत्यनेन सर्वं पतिकर्तृकं कर्म देवरादिः कुर्यादिति । सामग्रीविशेषः=माषषट्कं, दधि, यवत्रयं, अन्यत्सर्वं स्थालीपाकीयम् । द्वाविमौ संस्कारौ अस्मत्सूत्रोक्तौ कस्मिंश्चिद्गृह्ये अनवलोभनं नोक्तम् । एकतंत्रेण भवतइमौ, अत एक एवायं संस्कार इति भवति भ्रांतिः, तामपनेतुमाह द्वाविमाविति ॥

अत्र अनवलोभनसंस्कारे प्रयोगरत्ने "आ ते गर्भो योनिमेतु" इत्यादि सूक्ताभ्यां नस्तःकरणमभिहितं । अस्माभिस्तु तन्नोक्तम् । केवलं निष्पीडनमुक्तम् । तावदेव आश्वायनोक्तं प्रजावज्जीवसूक्ते तु अन्येषां आचार्याणां मते पठितव्ये, आचार्यस्य ते सम्मते एतावदेव हशब्दार्थः । अतः तदीयमेवमतं "नासिकायामजीतामोषधिं नस्तः करोति" इति स्वीकृतमस्माभिः । ओषधिः=दोषान् ओषति भस्मसात्करोति, गुणान् दधाति, इति ओषधिः सा च दूर्वेत्युप दिशन्ति । इति ।

मन्त्रभाष्यम् ॥

यत्ते सुसीमे हृदये हितमन्तः प्रजापतौ ।
मन्येहं मां तद्विद्वांसं माहं पौत्रमघं नियाम् ॥

आ० गृ० १।१३।७

हे सुसीमे, ते हृदये अन्तः च प्रजापतौ, यत् हितम् स्थापितम्, तत् विद्वांसं, जानन्तं मां अहं मन्ये । तदहं जानामि इत्यहं मन्ये इत्यर्थः । अतः पौत्रं पुत्रसंबंधि अघं दुःखं मानियाम् माप्रापम् । पुत्रसंबन्धिदुःखं मे माभूदिति यावत् । अथवा तृतीयार्थे सप्तमी, प्रजापतौ प्रजापतिना, ब्रह्मणा ते हृदये यत् हितं निहितं तदहं मन्ये किं निहितं गर्भधारणसामर्थ्यं, तदहं मन्ये जाने अत एव गर्भमासे इत्युक्तं त्वयि गर्भधारणसामर्थ्यं पुरुषेषु अप्रतिष्ठितं तत युष्मासु स्त्रीषु

हितं अतस्त्वामिमं गर्भं योग्यप्रकारेण धारय रक्ष अस्यावहेलनां मा कुरु मा च तद्दुःखं गमय मामिति प्रार्थनार्थः युष्माकं हृदये हितमित्यनेन पुत्रवात्सल्यं ध्वन्यते। कठोरहृदयं मत्पुत्रविषये माकार्षीरित्यर्थः। स्विष्टकृदादीनामर्थस्तु स्थालीपाकप्रयोगमन्त्रभाष्ये द्रष्टव्यः।

इति मंत्रभाष्यम्।

सीमन्त सूत्राणि.

चतुर्थे गर्भमासे सीमन्तोन्नयनम् ॥ १ ॥

सीमन्तो यस्मिन्कर्मणि उन्नीयते तत्सीमन्तोन्नयनं चतुर्थे मासि कार्यम्। इदं कर्म न प्रतिगर्भमावर्तते। स्त्रीसंस्कारत्वात्। न त्वयं गर्भसंस्कारः। 'एवं तं गर्भमाधेहि' इति मंत्रलिङ्गात्। सत्यम्। तथापि नावर्तते। आधारसंस्कारस्य प्राधान्यात्। कुतः प्राधान्यमिति चेत्। सीमन्तोन्नयनमिति समाख्याबलात् आधारस्य च संस्कृतत्वात्। सकृत्संस्कृता यं यं गर्भं प्रसूते स सर्वः संस्कृतो भवेत्। तेनावृत्तिर्न भवतीति सिद्धम् ॥ १ ॥

आपूर्यमाणपक्षे यदा पुंसा नक्षत्रेण चन्द्रमा युक्तः स्यात् ॥ २ ॥

शुक्लपक्षे यदा पुंसा नक्षत्रेण चन्द्रमा युक्तः स्यात्तदेदं कर्म कार्यम्। पुंसा नक्षत्रेण। पुन्नामधेयेन नक्षत्रेणेत्यर्थः तिष्यो हस्तः श्रवण इत्यादिना। चन्द्रमा युक्तः स्यादिति वचनं प्रकर्षेण युक्ते चन्द्रमसि यथा स्यात्। एतदुक्तं भवति। षष्टिघटिकासु मध्ये मध्यमत्रिंशद्घटिकासु कुर्यादिति ॥ २ ॥

अथाग्निमुपसमाधाय पश्चादस्याऽनुडुहं चर्मास्तीर्य प्राग्ग्रीवमुत्तरलोम तस्मिन्नुपविष्टायां समन्वारब्धायां धाता ददातु दाशुष इति द्वाभ्यां राकामहमिति द्वाभ्यां नेजमेषेति तिसृभिः प्रजापते न त्वदेतान्यन्य इति च ॥ ३ ॥

जुहुयादिति शेषः। अथशब्दोऽन्यस्मिन्नपि काले भवतीदं कर्मेति ज्ञापनार्थः। कस्मिन्। षष्ठाष्टमयोर्मासयोः शास्त्रान्तरे चायं कालो विहितः। अग्निमुपसमाधायेत्यादि गृहप्रवेशनीये व्याख्यातम्। आज्यभागान्तं कृत्वा 'धाता ददातु दाशुषे' इत्यादिभिरष्टावाज्याहुतीर्जुहुयात् ॥ ३ ॥

अथास्यै युग्मेन शलाटुग्लप्सेन त्रेण्या च शलल्या त्रिभिश्च कुशापिञ्जूलैरूर्ध्वं सीमन्तं व्यूहति भूर्भुवः स्वरोमिति त्रिः ॥ ४ ॥

अस्यै अस्याः । युग्मेन समेन । केन शलाटुग्लप्सेन तरुणफलसंघातेन । शलाटुरित्यपक्वानां फलानां समाख्या । ग्लप्स इति स्तबक उच्यते । औदुम्बरस्तबकेन । शास्त्रान्तरे दृष्टत्वात् । तदभावेऽन्येन । त्रीण्येतानि यस्याः सेयं त्रेणी शलली । एतः शुक्ल इत्यर्थः ' वर्णादनुदात्तात्तोपधात्तो नः ' इति ङीप तकारस्य नत्वं च । ततो ' रषाभ्यां नो णः ' इतिणत्वम् । कुशापिञ्जूलैः कुशतरुणैः । एतैरेकीकृतैर्ललाटकेशयोः सन्धिमारभ्य ऊर्ध्वं सीमन्तं व्यूहति मन्त्रेण । आमूर्धप्रदेशात्केशान्पृथक्करोतीत्यर्थं । एवं त्रिर्व्यूहति । मन्त्रावृत्तिरुक्ता ॥ ४ ॥

चतुर्वा ॥ ५ ॥

चतुर्वा व्यूहति मन्त्रेण ॥ ५ ॥

वीणागाथिनौ संशास्ति सोमं राजानं संगायेतामिति ॥ ६ ॥

वीणा च गाथा च वीणागाथे ते ययोः स्तः तौ तथोक्तौ । तौ संशास्ति संप्रेष्यति सोमं राजानं संगायेतामिति ॥६॥ तौ च एतां गाथां गायत इत्याह—

सोमो नो राजाऽवतु मानुषीः प्रजा निविष्टचक्राऽसाविति यां नदीमुपवसिता भवन्ति ॥ ७ ॥

असावित्यस्य स्थाने यस्या नद्याः समीपे वसन्ति तस्या नाम आमन्त्रणविभक्त्या ब्रूयाताम् निविष्टचक्रा गङ्गे इति ॥ ७ ॥

ब्राह्मण्यश्च वृद्धा जीवपत्न्यो जीवप्रजा यद्यदुपदिशेयुस्तत्तत्कुर्युः ॥ ८ ॥

एवंगुणयुक्ता ब्राह्मण्यो यद्यद्ब्रूयुः तत्तत्कार्यम् प्रैषं दत्वा स्विष्टकृदादि समापयेत् ॥ ८ ॥

ऋषभो दक्षिणा ॥ ९ ॥

वृषभो गौरासेचनसमर्थः तं दक्षिणां दद्यात् । अत्र तु स्वयमेव कर्ता । कुतः ' अस्यै मे पुत्रकामायै ' इति लिङ्गात् । कस्मै तर्हि दक्षिणा ब्रह्मणे यद्यस्ति । तदभावे सन्निहितेभ्यो ब्राह्मणेभ्यः कर्माङ्गत्वाद्दक्षिणानाम् ॥ ९ ॥

इति सीमन्तसूत्राणि ॥

अथ सीमन्तोन्नयनप्रयोगः ॥

कृतनित्यः, आचम्य, ममोपात्तदुरितक्षयद्वारा· यक्ष्यमाणदेवताप्रीत्यर्थम् सीमन्तोन्नयनाख्यं कर्म करिष्ये ॥

समितूत्रयग्रहणान्तं कृत्वा चक्षुषी आज्येनेत्यंतमुक्त्वा द्विर्धातारम्, द्वीराकाम्, त्रिर्विष्णुम् प्रजापतिं चैताः प्रधानदेवता आज्येन शेषेण स्विष्टकृतमित्याद्युक्त्वा समित्त्रयमग्नावाधाय, परिसमुह्य, पर्युक्ष्य, प्रत्यगग्नेः स्वस्यदक्षिणतः, प्रागग्रीवमुत्तरलोमकमानडुहमजिनमास्तीर्य तस्मिन्नुपविश्य आज्यसंस्कारान्ते कृते तया पत्न्यान्वारब्ध, इध्माधानाद्याज्यभागान्तं कृत्वा ॥

धाता ददातु दाशुषे प्राचीं जीवातुमक्षिताम् ।
वयं देवस्य धमिहि सुमतिं वाजीनीवतः स्वाहा ॥ १ ॥

धात्र इदं नमम ॥

धाता प्रजानामुत राय ईशे धातेदं विश्वं भुवनं जजान ॥
धाता कृष्टीरनिमिषाभिचष्टे धात्रइद्धव्यं घृतवज्जुहोत स्वाहा ॥ २ ॥

धात्र इंद नमम ॥

राकामहं सुहवां सुष्टुती हुवे श्रृणोतु नः सुभगा बोधतु त्मना ॥
सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदायमुक्थ्यं १ स्वाहा ॥

राकाया इदं न मम ॥ ३ ॥

यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि ॥
ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा स्वाहा ॥

राकाया इदं० ॥ ४ ॥

नेजमेष परापत सुपुत्रः पुनरापत ॥
अस्यै मे पुत्रकामायै गर्भमाधेहि यः पुमान् स्वाहा ॥ विष्णव इदं० ॥ ५ ॥
यथेयं पृथिवी मह्युत्ताना गर्भमादधे ॥
एवं त गर्भमाधेहि दशमे मासि सूतवे स्वाहा ॥ विष्णव इदं० ॥ ६ ॥
विष्णोः श्रेष्ठेन रूपेणास्यां नार्यां गवीन्याम् ॥
पुमांसं पुत्रानाधेहि दशमे मासि सूतवे स्वाहा ॥ विष्णव इदं० ॥ ७ ॥
प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव ॥
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां स्वाहा ॥

प्रजापतय इदं नमम ॥ ८ ॥

एवं स्रुवेण हुत्वा अपक्वफलयुग्मान्वितस्तबकद्वयं, त्रिशुक्लां शलली, कुशाङ्कुरत्रयं चैकीकृत्य पाणिना गृहीत्वा तन्मूलेन पत्न्याः केशललाटयोः संधिमारभ्या-मूर्धप्रदेशात् ॐ भूर्भुवःस्वरोमिति मन्त्रेण त्रिवारं, प्रत्युन्नयनं मन्त्रमावर्तयन् सीमन्तमुन्नयेत् । ततो वीणागाथिनौ संशास्ति सोमं राजानं संगायेतामिति । तौ च

सोमो नो राजावतु मानुषीः प्रजा निविष्टचक्रा गङ्गे ।

इति वीणया गायेताम् ॥

ततः स्विष्टकृदादिहोमशेषं समाप्य ऋषभं दक्षिणां दत्त्वा स्त्र्याचारमाचरेत् आचम्य, अनेन समिन्ताख्येन कृतेन कर्मणा इष्टा देवताः प्रीयन्ताम् ॥

इति समिन्तोन्नयनप्रयोगः ॥

मन्त्रभाष्यम् ॥

धाता ददातु दाशुषे प्राचीं जीवातुमक्षिताम् ।
वयं देवस्य धीमहि सुमतिं वाजिनीवतः स्वाहा ॥

अथ. सं. ७।१७।२

भाष्यम्—धाता सर्वस्य विधारको देवः दाशुषे हविर्दत्तवते मह्यं यजमानाय प्राचीं प्रकृष्टगमनां, अस्मदभिमुखगमनाम् । जीवातुं जीवनकारिणीं जीवेः आतुप्रत्ययः ॥ अक्षितां अनुपक्षीणाम् । सुमतिमित्यनुषज्यते तां ददातु । वयमपि वाजिनीवतः, अन्नवतः देवस्य धातुः सुमतिं कल्याणीं मतिं अनुग्रहात्मिकां धीमहि धारयेम । धङ् आधारे श्यनो लुक् , यद्वा दाशुषे यजमानाय, प्राचीम् , प्राञ्चनाम् अनुगुणां जीवातुं जीवनाय पर्याप्तां अक्षितां रयिं ददातु वयमपि धन-प्रदानार्थं धातुः सुमतिं धीमहि, ध्यायेम, याचेमेत्यर्थः ॥

धाता प्रजानामुतराय ईशे धातेदं विश्वं भुवनं जजान ।
धाता कृष्टीरनिमिषाभिचष्टे धात्रइद्धव्यं घृतवज्जुहोत स्वाहा ॥२॥

आ० श्रौ० पू० ६।१४

भाष्यम्–अयं धाता प्रजानां पुत्रादेः ·ईशे इष्टे स्वामी भवति उतापिच रायः ईशे धनस्यापि स्वामी भवति । धाता सर्वमिदं भुवनं प्राणिजातं जजान उत्पा-दितवान् । स च धाता कृष्टीः मनुष्यान् अनिमिषाभिचष्टे अनिमिषन्नभिविपश्यति

उपकारद्वारेण यो हि यस्मा उपकरोति स तेन सम्यग्दृष्टो भवति योयमेवमुपकारप्रवृत्तः कृत्स्नस्य लोकस्य तस्मै धात्रे हव्यं घृतवत् घृतोन्मिश्रं जुहोत जुहुत हे मनुष्याः । कृष्टय इति मनुष्यनाम, तत् कस्मात् ? नित्यं हि ते कर्मवन्तो भवन्ति आरम्भशीलत्वात् । विकृष्टदेहा वा संसृष्टदेहा अन्ये पशवः गवादयः ते हि न कामकारतोऽङ्गानि प्रसारयितुं शक्नुवन्ति । स तेषां सङ्कर्षः मनुष्यास्तु कामतः प्रसारयन्त्यङ्गानि स तेषां विकर्षो देहस्य ॥

राकामहं सुहवां सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना ।
सीव्यत्वपः सूच्या च्छिद्यमानया ददातु वीरं शतदायमुक्थ्यम् ॥
ऋ० सं० मं० २।३।३२।४

भाष्यम्—संपूर्णचन्द्रा पौर्णमासी राका । तां देवीं सुहवां स्वाह्वानां आव्हानप्रयोजनकारिणीं सुष्टुती शोभनया स्तुत्याहं हुवे आव्हयामि, सुष्टुतिशब्दात्तृतीयैकवचनस्य सुपां सुलुगितिपूर्वसवर्णईकारः । सा च सुभगा शोभनधना नः अस्माकं आव्हानं शृणोतु श्रुत्वा च त्मना आत्मना स्वयमेव बोधतु अस्मदभिप्रायं बुध्यताम् । बुद्ध्वा चापः कर्म पुत्रोत्पादनलक्षणं सूच्या सूचीस्थानीयया अच्छिद्यमानया अविच्छिन्नया अनुग्रहबुद्ध्या सीव्यतु । संतनोतु । यथावस्त्रादिकं सूच्या स्यूतं चिरं तिष्ठति एवमिदं करोतु कृत्वा च वीरं विक्रान्तं शतदायं बहुधनं बहुप्रदं वोक्थ्यं प्रशस्यं पुत्रं ददातु ॥

यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि ।
ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा ॥ ५ ॥

भाष्यम्—हे राके देवि सुपेशसः शोभनरूपास्ते तव याः सुमतयः शोभनबुद्धयः याभिर्मतिभिर्दाशुषे हविर्दत्तवते यजमानाय वसूनि धनानि ददासि प्रयच्छसि अद्येदानीं ताभिर्मतिभिः सहिता त्वं सुमनाः शोभनमना भूत्वोपागहि । उपागच्छ । गमेश्छान्दसः शपो लुक् । अनुदात्तोपदेशेत्यादिनानुनासिक लोपः । असिद्धवदत्राभादित्यस्यासिद्धत्वात् हेर्लुगभावः ॥ किं कुर्वती । हे सुभगे शोभनधने सहस्रपोषं सहस्रसंख्याकस्य धनस्य पुष्टिं रराणा ददती, रा—दाने व्यत्ययेन शानच् छांदसः शपः श्लुः । अभ्यस्तानामादिरित्याद्युदात्तत्वम् ॥

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ॥८॥

भाष्यम्—हे प्रजापते त्वत् त्वत्तोऽन्यः कश्चिदेतानि इदानीं वर्तमानानि विश्वा विश्वानि सर्वाणि । शेश्छन्दसि बहुलमिति शेर्लोपः । जातानि प्रथमविकारभांजि ता तानि सर्वाणि भूतजातानि परिबभूव न परिगृण्हाति न व्याप्नोति । त्वमेवैतानि परिगृह्य स्रष्टुं शक्नोषीति भावः । परिपूर्वोभवतिः परिग्रहार्थः । वयं च यत्कामा यत्फलं कामयमानास्ते तुभ्यं जुहुमः हवींषि प्रयच्छामः तत्फलं नः अस्माकमस्तु भवतु तथा वयं च रयीणाम् धनानां पतयः ईश्वराः स्याम भवेम ऋ० ॥ १०।१०।४ ॥

भूर्भुवः स्वः । भाष्यं भूरादिलोकान् तत्सुखं च तुभ्यं विनयामि प्रापयामि ।

इति भाष्यसमाप्तिर्यावदुपलब्धि ॥

शास्त्रार्थः ॥

सीमन्तस्योन्नयनमत्र प्रधानम् इतरदङ्गम् ।

सीमन्तः केशरचनाविशेषः । शकन्ध्वादित्वात्साधु । तस्योक्तेन विधिना करणम् । इति कर्मणो नामधेयम् । संस्कारः खल्वयं स्त्रीपात्रस्य तद्द्वारेण च गर्भस्य स्यात् । कुतः ? सीमन्तकरणमिति समाख्यानात् । तस्मात्सकृदेव कर्तव्यम् । सकृत्संस्कृतपात्रजातानां सर्वेषामपत्यानां खल्वेवमेव संस्कारः सम्पद्यते । पुंसवनानवलोभनयोः गर्भसंस्कारकतैव परं ननु पात्रसंस्कारकताऽपि, तस्मात्ते प्रतिगर्भमावर्तनीये कुतः पुनर्गर्भसंस्कारतैव तयोर्न पात्रसंस्कारतापि ? पात्रसंस्कारतायां प्रमाणाभावात् । समाख्यानाच्च गर्भसंस्कारतावगतेः । पुंसवन-सीमन्तोन्नयन—जातकर्म—नामकरणान्नप्राशन—चौडोपनयनम् '' इति गौतमादिभिः पुरुषसंस्कारमध्ये गणनाच्च । पुंसवनावनवलोभनयोरावृत्तिरिष्यते, व्रीह्यादिसंस्कारवच्चैतदवगन्तव्यम् । यथाहि यागसाधनानां व्रीह्यादीनां संस्कारकर्माणि प्रोक्षणादीन्यपूर्वप्रयुक्तानि इति संस्कृता अपि व्रीहयः उपादीयमानाः प्रयोगवचनबलात् पुनः प्रोक्षणादिभिः संस्क्रियन्ते यथा चावघातस्य वितुषीकरणार्थत्वेवि प्रयोगवचनेन प्राप्तत्वात् तण्डुलमप्युपादीयमानमवहन्यते तथात्रापि । सीमन्तकरणमपि तर्हि प्रतिगर्भं क्रियताम् । ननु प्रयोगवचनबलात् स्त्र्यपि पुनः संस्करिष्यते न इति ब्रूमः । कस्मात्? यस्मात् सीमन्तकरणमिति समाख्यानात् प्राधान्येन स्त्रीसंस्कारकतैवास्यावगम्यते इति नैतत् प्रतिगर्भं क्रियते । शास्त्रप्रामाण्याच्च । सोयं शास्त्रोपोद्बलितोऽर्थः शास्त्रैकशरणैरादरणीयः यत् पुनर्देवलवचनम् ।

सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता ।
यं यं गर्भं प्रसूयेत स गर्भः संस्कृतो भवेत् ॥

तदपि सीमन्तकरणाभिप्रायमेव वर्णनीयम् । सकलवचनानां सामञ्जस्यात् सकृत्संस्कृता नारी—इत्यस्योद्देश्यानुवादकतया च यथा प्राप्तानुवादस्यैव वर्णयितुमुचितत्वात् ।न खल्वत्र सकृत्संस्कृतत्वं नार्या विधित्सितम्, अपि तु सकृत्संस्कृतायाः सर्वगर्भेषु संस्कृतत्वम्—इत्यनुवादएवायम् । सामग्रीविशेषः—शलाटुग्लप्सः, त्रेणीशल्ली, वीणागाथिनौ, कुशपिञ्जूलानि, आनडुहमजिनं, कर्ता, पत्नी, अन्यत्सर्वं स्थालीपाकोक्तं निर्वापादिर्वर्जम् ॥ ऋषभः दक्षिणार्थम् । सर्वत्र कर्माङ्गत्वेन ब्राह्मणभोजनं, यथाविभवं दक्षिणा वा देया ।

इति शास्त्रार्थः ॥

जातकर्मसूत्राणि ॥

कुमारं जातं पुराऽन्यैरालम्भात्सर्पिर्मधुनी हिरण्यनिकाषं हिरण्येन प्राशयेत् । प्र ते ददामि मधुनो घृतस्य वेदं सवित्रा प्रसूतं मघोनाम् । आयुष्मान्गुप्तो देवताभिः शतं जीव शरदो लोके अस्मिन्निति ॥ १ ॥

इदं जातकर्म । कुमारग्रहणं कुमारीनिवृत्त्यर्थम् । ननु कुमार्या अपि भवत्येव जातकर्म । कुतः । वक्ष्यति 'आवृतैव कुमार्याः' [गृ० ११।४।१२] इत्युच्यते । प्रवासादागतस्य विहितं कर्मावृता भवति न जातकर्म अनन्तरत्वात् । एवमेके । अन्ये पुनरावृतैव कुमार्या इत्येतदुभयार्थमिति वदन्ति । तेन कुमार्या अपि जातकर्म भवति । मनुनाप्युक्तम् 'अमन्त्रिका तु कार्येयं स्त्रीणामावृदशेषतः' इति । [अ०२।६६] तर्हि कुमारग्रहणं किमर्थम् । अधिकारार्थम् । अष्टमे वर्षे ब्राह्मणमुपनयेदित्युपनयनं कुमारस्यैव यथा स्यान्न कुमार्या इति । ननु ब्राह्मणमिति पुंल्लिङ्गनिर्देशादेव न भविष्यति । न जातिनिर्देशे लिङ्गमविवक्षितम्। यथा ब्राह्मण्यपि न हन्यते । एवमत्रापि स्त्रियाः प्रसज्येत । तन्निवृत्त्यर्थं कुमारग्रहणमिति । जातग्रहणमप्यधिकारार्थम् । 'गोदानं षोडशे वर्षे' इति जन्मतः प्रभृति षोडशे यथा स्यात् उपनयनप्रभृति माभूदिति । पुरा । पूर्वमित्यर्थः । अन्यग्रहणमनधिकृतालम्भनात्प्राक्कर्म कर्तव्यमित्येवमर्थम् । सर्पिर्मधुनी हिरण्येन

निकाशयति । ते हिरण्यसंसृष्टे हिरण्येन प्राशयेत् । मातुरुपस्थ आसीनं 'प्र ते ददामि' इति मन्त्रेण ॥ १ ॥

कर्णयोरुपनिधाय मेधाजननं जपति । मेधां ते देवः सविता मेधां देवी सरस्वती । मेधां ते अश्विनौ देवावाधत्तां पुष्करस्रजाविति ॥ २ ॥

अस्य कर्णयोः हिरण्यं निधाय मेधाजननं जपति । मेधां त इति । उपग्रहणं तस्य मुखसमीपे आत्मनो मुखं निधाय जपार्थम् । मेधाजननमित्यस्य मन्त्रस्याख्या सकृन्मन्त्रः । पर्यायेणोपनिधानमित्येके । अन्ये मन्त्रावृत्तिमिच्छन्ति ॥ २ ॥

अंसावभिमृशति । अश्मा भव परशुर्भव हिरण्यमस्तृतं भव । वेदो वै पुत्रनामासि स जीव शरदः शतमिति । इन्द्र श्रेष्ठानि द्रविणानि धेह्यस्मे प्रयन्धि मघवन्नृजीषिन्निति च ॥ ३ ॥

स्तनबाह्वोर्मध्यप्रदेशोंसः । अत्र बहुधा विप्रतिपन्नाः । तत्रैके सकृन्मन्त्रं पर्यायेणांसाभिमर्शनमिच्छन्ति द्वार्याभिमर्शनवत् । ननु युक्तस्तत्र सकृन्मन्त्रः । द्विवचनयुक्तत्वान्मन्त्रस्य । इह त्वेकवचनयुक्तः । अत आवृत्त्या भवितव्यम् । नैतदेवम् । नात्रांसावुच्येते । किं तर्हि कुमारः स चैकः । तस्मान्नावृत्तिरिति । अन्ये मन्त्रविभागमिच्छन्ति । 'अश्मा भव' इत्यनेन दक्षिणमंसमभिमृशेत् । 'इन्द्र श्रेष्ठानि' 'अस्मे प्रयन्धि' इत्याभ्यां सव्यमिति । कथं पुनर्मन्त्रविभागो ज्ञातः । मध्ये इति करणात् । नहि क्वचिन्मन्त्रमध्ये इतिकरणं पठन्ति । अपरे त्वाहुः सकृदेव त्रयो मन्त्रा वक्तव्याः । न च मन्त्रविभागः । न च पृथगभिमर्शः । द्वार्याभिमर्शने त्वशक्यत्वात्पृथगभिमर्शः । इह तु शक्यते युगपदंसौ स्प्रष्टुम् । यत्पुनरुक्तमितिकरणादिति । तत्र ब्रूमः । अन्यत्रापि मन्त्रमध्ये इतिकारः पठ्यते । यथा आसीद सदनं स्वमासीद सदनं स्वामिति माहिंसीर्देवप्रेरित इति । अयमेव नः पक्षोऽभिप्रेतः । यस्य त्रयाणामन्यतमः पक्षोऽभिप्रेतः तस्यापि कुर्वतो न दोषः । सर्वेषां गमकसत्त्वादिति भाष्यकारः । अत्रैके मन्त्रविभागः श्रेयानित्याहुः । मध्ये इतिकारात् । नन्वन्यत्रापि विद्यत इत्युक्तम् । तत्रापि विभाग एव । किमुत्पतसीति बर्हिषि निधाय माहिंसीरित्यभिमन्त्रयेत् । कुत एतत् आनन्तर्ययोगात् ननु इडाया दृश्यते हविर्जुषन्तामिति तस्मिन्नुपहूत इति । अनर्थज्ञो भवान् । इतिकारो मन्त्रस्य मध्ये वृथा न पठ्यत इति वयं ब्रूमः । इडायां तु मन्त्रैकदेशे इतिकारः । युष्मत्पक्षे त्वभि-

मन्त्रणे इतिकारो वृथैवेति । तदसत् । भगवता भाष्यकारेण यः पक्षः परिगृहीतः स एव सम्यक् । अन्यत्रापि मन्त्रमध्ये इतिकारदर्शनात् । नमो यत्र निषीदसीति । अमुं माहिंसीरमुं माहिंसीरिति चेति । तेन त्रीन्मन्त्रान्सकृदुक्त्वा युगपदेवोभावंसौ स्पृशेदिति सिद्धम् ॥ ३ ॥

इति जातकर्मसूत्राणि ॥

जातकर्मप्रयोगः ॥

शीतोष्णाभिरद्भिः स्नात्वा, आचम्य, अकरणे प्रत्यवायपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं जातकर्माख्यं कर्म करिष्ये । मधुसर्पिषी मिश्रीकृत्य शिलातले निक्षिप्य तत्र सुवर्णं यावद्रजोविमोकं अवघृष्य भाजने निधाय ।

प्र ते ददामि मधुनो घृतस्य वेदं सवित्रा प्रसूतं मघोनाम् ।
आयुष्मान् गुप्तो देवताभिः शतं जीव शरदो लोके अस्मिन् ॥१॥

इति मन्त्रेण तेनैव हिरण्येन कुमारं पाययित्वा तद्धिरण्यं प्रक्षाल्य कुमारस्य दक्षिणे कर्णे निधाय तन्मुखसमीपे स्वमुखमानीय ।

मेधां ते देवः सविता मेधां देवी सरस्वती ।
मेधां ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥ २ ॥

इति मन्त्रं जपित्वा पुनस्तद्धिरण्यं सव्ये कर्णे निधायैतमेव मन्त्रं जपेत् । ततः शिशोरंसौ युगपदभिमृशेत् । तत्र मन्त्राः

अश्मा भव परशुर्भव हिरण्यमस्तृतं भव ।
वेदो वै पुत्रनामासि स जीव शरदः शतम् ॥ ३ ॥
इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे ।
पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नाम् ॥ ४ ॥
अस्मे प्रयंधि मघवन्नृजीषिन्निन्द्र रायो विश्ववारस्य भूरेः ।
अस्मे शतं शरदो जीवसेधा अस्मे वीराञ्छश्वत इंद्र शिप्रिन् ॥५॥

ततो मूर्धानं त्रिराजिघ्रेत् तत्र मंत्रः ।

" अङ्गादङ्गात्संभवसि हृदयादधिजायसे ।
आत्मा वै पुत्रनामासि स जीव शरदः शतम् ॥ ६ ॥

अनेन जातकर्माख्येन कर्मणा परमेश्वरः प्रीयताम् ॥ आचम्य ॥

इति जातकर्मप्रयोगः ॥

मन्त्रभाष्यम् ॥

प्र ते ददामि मधुनो घृतस्य वेदं सवित्रा प्रसूतं मघोनाम् ।
आयुष्मान् गुप्तो देवताभिः शतं जीव शरदो लोके अस्मिन् ॥१॥

भाष्यम्=हे बाल तुभ्यमहं सवित्रा प्रसूतं मधुनो घृतस्य रसं प्रददामि इंद्रस्यायुषायुष्मान् देवताभिः सुरक्षितः त्वम् अस्मिंल्लोके शतं संवत्सराणि जीव ।

मेधां ते देवः सविता मेधां देवी सरस्वती ॥
मेधां ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥ २ ॥

भाष्यम्=मेधां धारणावतीं बुद्धिं सविता, जगत्प्रसविता द्योतमानो देवः द्योतमाना सरस्वती पुष्करमालिनौ द्योतमानौ अश्विनौ कुमारौ ते धारणावतीं बुद्धिमाधत्तां धारयताम् इति मेधाविषयिणी प्रार्थना ।

अश्मा भव परशुर्भव हिरण्यमस्तृतं भव ॥
वेदो वै पुत्रनामासि स जीवशरदः शतम् ॥ ३ ॥

भाष्यम्=हे कुमार त्वम् अश्मा मणिरिव दृढः प्रियश्च भव परशुर्वज्र इवापकर्तृनाशको भव किञ्च अस्तृतं अनाच्छादितं परतः अनभिभूतमितियावत् । अप्रच्युतस्वरूपमित्यर्थः । हिरण्यं हिरण्यवत्तेजोयुक्तः स्पृहणीयश्च भव यथा-: धात्वन्तरासम्भिन्नं सुवर्णं शुद्धम्भवति तथा त्वमपि रोगाद्युपद्रवहीनो भवेत्यर्थ यतस्त्वं पुत्रनामा वेदोऽसि धनरूपोऽसि । वेद इति धननाम निघण्टौ २।१० अतः स त्वं वै निश्चये शतं शरदो जीव प्राणिहि । शराद्धि दुर्जीवा रोगभूयस्त्वात् अत एवमाशास्यते शरच्छतं जीवत्विति । शरत् अस्यां हि शृताः पक्वाः ओषधयो भवन्ति इति, शीर्णा आप इति वा वर्षासु हि प्रवृद्धानि स्रोतांसि शरदि विशीर्य छिद्यन्ते ।

अङ्गादङ्गात्संभवसि हृदयादधिजायसे ॥
आत्मा वै पुत्रनामासि स जीव शरदः शतं ॥ ४ ॥

भाष्यम्=हे पुत्र यतस्त्वमङ्गादङ्गात् प्रत्यङ्गात्सम्भवसि उत्पत्स्यसे हृदयादन्तरङ्गादपि । अपि अधि अधिकतया जायसे अतस्त्वं वै निश्चितम्पुत्रनामा आत्मा अभिन्नरूपोऽसि स त्वं शतं शरदो वर्षाणि जीव प्राणिहि ।

इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे ॥
पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नाम् ॥५॥
ऋ० सं० २।२।२१।६।९

भाष्यम्=हे इन्द्र श्रेष्ठानि उत्तमानि द्रविणानि धनानि अस्मभ्यं धेहि। निधेहि दक्षस्य दक्षेर्भावे घञ् कर्मकरणसामर्थ्यस्य चित्तिं ख्यातिं धेहि। अस्मे अस्मभ्यं सुभगत्वं शोभनधनवत्वं सौभाग्यं वा निधेहि। रयीणां त्वया दत्तानां धनानां पोषं समृद्धिं धेहि। तनूनामङ्गानाम्। यद्वा तायत एभिः कुलमिति तन्वः पुत्राः तनोतेः करणे उप्रत्ययः तेषामरिष्टिमहिंसां धेहि तथास्मदीयाया वाचः स्वाद्मानं स्वादुतां। अह्नां सुदिनत्वं शोभनदिनत्वं च धेहि। येषु हि इन्द्रादयो देवा इज्यन्ते तानि सुदिनानि तेषां भावः सुदिनत्वम्।

अस्मे प्रयंधि मघवन्नृजीषिन्निन्द्र रायो विश्ववारस्य भूरेः ॥
अस्मे शतं शरदो जीवसेधा अस्मे वीराञ्छश्वत इन्द्र शिप्रिन् ॥६॥
ऋ० सं० ३।३।३६।१०

भाष्यम्=मघवन् धनवन् ऋजीषिन् गतसारसोमवन् हे इन्द्र विश्ववारस्य। विश्वैः सर्वैः संभजनीयतया वरणं यस्य तत् भूरेर्भूरि बहुरायो धनम् द्वितीयार्थे षष्ठी। अस्मे अस्मभ्यं प्रयंधि प्रयच्छ किंच अस्मे अस्माकं जीवसे जीवनाय शतं शरदः संवत्सरान् धाः। देहि। शिप्रीन् शोभनहनो हे इन्द्र अस्मे अस्माकं शश्वतः शश्वदिति बहुनाम् बहून् वीरान् पुत्रान् देहि जीवसे जीवप्राणधारणइत्यस्य तुमर्थेऽसे प्रत्ययः। प्रत्ययस्वरः। शश्वतः टुओश्वि गतिवृद्धयोः। अस्मात्संश्च-द्वेहादित्यादिना अतिप्रत्ययान्तत्वेन निपातनादिष्टरूपसिद्धिः

इति मन्त्रभाष्यम् ॥

जातकर्मशास्त्रार्थः ॥

प्राशनं, मेधामन्त्रजपः, अंसाभिमर्शः, मूर्धावघ्राणं, प्रधानं, इतरदङ्गं। सति स्नानावसरे अनुज्ञाते च स्त्रीभिः स्नातव्यं, परं न हि स्नानाभवे प्रधानमपि हातव्यं संस्कारोयं गर्भस्य। प्रतिगर्भमावर्तनीयः। सामग्रीविशेषः मधु, सर्पिः हिरण्यं,—संघृष्य प्राशनार्थम्। हिरण्यं कर्णयोर्निधानार्थंच। पुत्रोत्पत्त्यनन्तरं, श्राद्धं, जातेष्टिः, इत्यादि करणीयम्। समापतति शास्त्रान्तरात् तत्कदा करणीयमिति संदेहे मीमांस्यते। एवं हि श्रूयते—वैश्वानरं द्वादशपालं निर्वपेत्पुत्रे जाते इति

विधायाम्नायते " यस्मिन्जातएतामिष्टिं निर्वपति पूत एव स तेजस्व्यन्नाद इन्द्रियावी पशुमान्भवतीति " तदिदं पूतत्वादिकं रात्रिसत्रप्रतिष्ठावत्फलमिति स्थितम्। तत्किमिष्टिकर्तुः पितुः फलमुत पुत्रस्येति विचारेऽन्यफले कर्मण्यन्यस्य प्रेरणासम्भवात् पितुरेव प्रेर्यत्वादाधानगतादात्मनेपदादग्निसाध्यकर्मफलानामाधातृगामित्वनियमात्पितुरेव फलम्। नैतदेवम्—

येनैव वाक्यशेषेण फलमेतत्प्रकल्प्यते ॥
तेनैव पुत्रगामित्वप्रतिपत्तिरपि स्फुटा ॥ १ ॥

यस्मिञ्जाते निर्वपति स पूतो भवतीति स्पष्टं पुत्रगामित्वम्। पुत्रफलमपि पितुरभिलषितमेवेति विधेरात्मनेपदस्य चाविरोधः। एवं वा इयमेव वैश्वानरीया चिन्त्यते किं जननानन्तरमेव कर्तव्या उत कृते जातकर्मणीति। निमित्तानन्तरं नैमित्तिकमुपसंप्राप्तं विना कारणेन नातिक्रमितव्यमतोऽनन्तरमेव स्यात्। सत्यम्। इहत्वस्ति कारणम्। पुत्रफलार्थं हीदं कर्म। तस्य च कृते जातकर्मणि। स्तनप्राशनं न पुनः प्राक्, अकृते जातकर्माणि इष्टिर्निरूप्यमाणा स्तनप्राशनमुत्कर्षेत्। तत्र कुमारविपत्तिप्रसङ्गादिष्टिरेवेयमनर्थिका स्यात्। तस्मात्कृते जातकर्मणि कर्तव्या। पुनश्चिन्त्यते किं जातकर्मानन्तरं कर्तव्या उताशौचापगमे स्वकाले वागत इति।

निमित्तानन्तरं प्राप्ता प्रयोजनविरोधतः।
उत्कृष्टा तदभावात्तु पुनर्नोत्क्रष्टुमर्हति ॥ २ ॥

शौचाङ्गेन विनाप्येषा कर्तव्यैव निमित्ततः ॥
अपि वाप्येकदेशे स्यादिति षष्ठे हि वक्ष्यते ॥ ३ ॥

उच्यतेः—' निमित्तस्वरसात्प्राप्तिर्या तावत्सा निवारिता ॥
प्रयोजनविरोधेन तस्मादङ्गोपसङ्ग्रहः ॥ ४ ॥

निमित्तानन्तर्यं तावत्प्रयोजनविरोधादेव बाधितमित्युत्कृष्टेष्टिः। उत्कृष्टाचेदवैगुण्याय शौचकालप्रतीक्षया आशौचापगमे पौर्णमास्यादिकाले कर्तव्या। तदेतत्प्राचीनतन्त्रे शास्त्रदीपिकायाम् अधिकरणमालायां। ३।३८। इत्यत्र प्रपंचितम्। एतेन श्राद्धादि सर्वं व्याख्यातम्।

इति जातकर्मशास्त्रार्थः ॥

नामकरणसूत्राणि ॥

नाम चास्मै दद्युः ॥ १ ॥

कुर्युरित्यर्थः । नामकरणस्याचार्येण कालान्तरानुक्तेः जातकर्मानन्तरं कार्यमित्येके । अन्ये शास्त्रान्तरोक्तः कालो ग्राह्य इत्याहुः । उक्तं च मनुना [अ० २। ३०] । नामधेयं दशम्यां तु द्वादश्यां वापि कारयेत् । पुण्ये तिथौ मूहूर्ते वा नक्षत्रे वा गणान्विते, इति ॥ १ ॥

कीदृग्लक्षणं तन्नामेत्याह—

घोषवदाद्यन्तरन्तस्थमभिनिष्ठानान्तं द्व्यक्षरम् ॥ २ ॥

ऊष्माणवर्गाणांप्रथमद्वितीयौ ऊष्माणश्च हकारवर्जमघोषवन्तः शिष्टं घोषवन्तः तदादौ यस्य तत्तथोक्तम् । अन्तर्मध्येऽन्तस्था यस्य तत्तथोक्तम्। यकारादयश्चतस्रोऽन्तस्थाः । अभिनिष्ठानो विसर्जनीयः । सोऽन्ते यस्य तत्तथोक्तम् । अक्षरं स्वरः । अकारादयो द्वादश स्वराः शिष्टं व्यञ्जनम् । द्वे अक्षरे यस्य तद्व्यक्षरं । व्यञ्जनमपरिमितम् ॥ २ ॥

चतुरक्षरं वा ॥ ३ ॥

चतुरक्षरं वा उक्तलक्षणं नाम कुर्युः । भद्रः देवः, भवः, भवनाथः, नागदेवः, रुद्रदत्तः, देवदत्तः, इत्येवंलक्षणानि नामानि भवन्ति ॥ ३ ॥

द्व्यक्षरं चतुरक्षरं वेति यदुक्तं तत्काम्यमपीत्याह—

द्व्यक्षरं प्रतिष्ठाकामश्चतुरक्षरं ब्रह्मवर्चसकामः ॥ ४ ॥

प्रतिष्ठाब्रह्मवर्चसे च कुमारस्य । तत्संस्कारत्वात् न कर्तुः ॥ ४ ॥ अथवा ।

युग्मानि त्वेव पुंसाम् ॥ ५ ॥

युग्मानि युग्माक्षराणि पुंसां नामधेयानि भवन्ति । एवकारोऽवधारणार्थः । कथं युग्ममेवाद्रियेत न पूर्वाणि लक्षणानीति । तेन शिवदत्तः, नागदत्तः, देवस्वामी, वसुशर्मा, रुद्रः, जनार्दनः, वेदघोषः, पुरन्दरः, विष्णुशर्मा, इत्यादि सिद्धम् ॥ ५ ॥

अयुजानि स्त्रीणाम् ॥ ६ ॥

अयुजान्ययुग्माक्षराणि स्त्रीणां नामानि भवन्ति । सुभद्रा सावित्री सयशा वसुदा इत्यादि ॥ ६ ॥

सांव्यवहारिकं नाम कृत्वा अभिवादनीयं च कार्यमित्याह—

अभिवादनीयं च समीक्षेत तन्मातापितरौ विद्यातामोपनयनात् ॥ ७ ॥

येन नाम्ना उपनीतः अभिवादयते तच्च समीक्षेत । कुर्यादित्यर्थः । तच्च मातापितरावेव विद्यातामोपनयनात् । उपनीतस्य त्वाचक्षते । अनेन नाम्नाऽभिवादयस्वेति ॥ ७ ॥

प्रवासादेत्य पुत्रस्य शिरः परिगृह्य जपति । अङ्गादङ्गात्संभवसि हृदयादधिजायसे । आत्मा वै पुत्रनामाऽसि स जीव शरदः शतमिति मूर्धनि त्रिरवघ्राय ॥ ८ ॥

प्रवासादागत्य गृहानीक्षेताप्यनाहिताग्निरित्यादिसूत्रोक्तमार्गेण विधिं कृत्वा पुत्रस्य शिरः परिगृह्य सर्वतो गृहीत्वा मूर्धनि त्रिरवघ्राय ततो जपति । अङ्गादङ्गादिति ॥ ८ ॥

आवृतैव कुमार्यै ॥ ९ ॥

कुमार्यास्तु अमन्त्रकं कुर्यादिति । अनन्तरस्य चायं शेष इत्येके । अनन्तरस्य जातकर्मणश्चेत्यपरे ॥ ९ ॥

इति नामकरणसूत्राणि ॥

नामकरणप्रयोगः शास्त्रार्थश्च ॥

आचम्य परमेश्वरप्रीत्यर्थं नामकरणसंस्काराख्यं कर्म करिष्ये । ह, य, व, र, ल, ञ, म, ङ, ण, न, झ, भ, घ, ढ, ध, ज, ब, ग, एतेष्वन्यतमो वर्णः प्रथमः । य, र, ल, वेष्वन्यतमो मध्ये, विसर्गोन्ते एवं द्व्यक्षरं चतुरक्षरं वा नाम पुरुषस्य कार्यम् । यथा देवदत्तः, यज्ञदत्तः, चैत्रः, मैत्रः, इत्यादि । अयुजानि स्त्रीणाम् यथा भारती, सरस्वती, इत्यादि । अभिवादनीयं नामापि इदानीमेव समीक्षेत पितृभ्यामेव तज्ज्ञेयम्, उपनयनपर्यंतं ततः कुमारेणापिज्ञेयम् ।

अनेन नामकरणाख्येन कर्मणा परमेश्वरः प्रीयताम् । आचम्य, नामकरणमेव प्रधानम् ॥ इतरदङ्गम् । इदं तु अस्मदीयसूत्रे जातकर्मानुपदमेवोक्तं अतस्तथै-

वानुष्ठेयम् । इतरत्र तु दशम्यामित्यादि कालान्तरमभिहितम् । "नाम चास्मै दद्युः" इति चास्मत्सूत्रम् गर्भसंस्कारत्वात्प्रतिगर्भमावर्तनीयोऽयम् । दृष्टफलार्थोयंसंस्कारः आहूतंचेत्तेनागन्तव्यमिति नामकरणं, नियमविधिरयम् ।

मनुनापि—"नामधेयं दशम्यां तु द्वादश्यां वास्य कारयेत् ॥
पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते ॥
२।२।३०

इयं स्मृतिस्तावत्पारस्करगृह्येण संगच्छते । उक्तं हि पारस्करेण "दशम्यामुत्थाप्य ब्राह्मणान् भोजयित्वा पिता नाम करोति" १।१ यत्तु शर्मान्तं नाम ब्राह्मणस्येतिवदन्ति तत्रायमर्थः । ब्राह्मणस्य नाम शर्म मङ्गलप्रतिपादकं कुर्यात् । क्षत्रियस्य वर्म शौर्यरक्षावत्ताप्रतिपादकम् । वैश्यस्य गुप्तेति धनवत्ताप्रतिपादकम् । शूद्रस्य प्रेष्यत्वप्रतिपादकामिति बोद्धव्यम् । शर्मशब्दः सुखनीयवचनः । सुखनीयं ब्राह्मणस्य नाम कर्तव्यम् । यथा शुभङ्करः, प्रियङ्करः कर्कस्यापि सम्मतोऽयं पक्षः । ब्राह्मणस्य नाम्नि शर्मेत्यनुषङ्गो भवतीति भर्तृयज्ञहरिहरौ ; अस्मत्सूत्रे सा कथैव नास्तीत्युपरम्यते ।

इति नामकरणप्रयोगशास्त्रार्थौ ।

अन्नप्राशनसूत्राणि ॥

षष्ठे मास्यन्नप्राशनं ॥ १ ॥

जन्मप्रभृति षष्ठे मासे न गर्भप्रभृति । जाताधिकारात् । तत्रान्नप्राशनं नाम कर्म कार्यम् ॥ १ ॥

आजमन्नाद्यकामः ॥ २ ॥

अजस्येदमाजम् । तैत्तिरसाहचर्यान्मांसस्यात्र ग्रहणं न क्षीरदधिघृतानाम् ॥ २ ॥

तैत्तिरं ब्रह्मवर्चसकामः ॥ ३ ॥

तित्तिरेरिदं तैत्तिरं । आजतैत्तिरयोर्व्यंजकत्वेनोपदेशो नान्नत्वेन तथा लोके प्रसिद्धत्वात् । तेनान्नमपि सिद्धम् ॥ ३ ॥

घृतौदनं तेजस्कामः ॥ ४ ॥

घृतसंस्कृत ओदनो घृतौदनः । कुतः ओदनग्रहणात् । यदि हि घृतमिश्रोऽ-

भिप्रेतः स्याद् 'घृतं तेजस्काम' इत्येवावक्ष्यत् । ततश्च पूर्ववद्व्यञ्जकत्वेनान्नमपि सिध्यत्येव । नेदीयसि घृतसेके कृते घृतसंस्कृतो भवति नतु घृते श्रपणम् विक्लेदानुपपत्तेः ॥ ४ ॥

दधिमधुघृतमिश्रमन्नं प्राशयेत् । अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः । प्र प्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पद इति ॥ ५ ॥

अकामसंयोगेन दध्यादिमिश्रमन्नं प्राशयेत् । अन्नपतेऽन्नस्य न इति मन्त्रेण । अयं मन्त्रः सर्वप्राशनेष्वपि भवति । कुतः । प्राशनसहितत्वान्मन्त्रस्य । प्राशयेदित्यस्य च सर्वशेषत्वात् । आजं प्राशयेदित्यादि ॥ ५ ॥

आवृतैव कुमार्यै ॥ ६ ॥

कुमार्यास्त्वमन्त्रकमन्नप्राशनं कार्यमित्यर्थः ॥ ६ ॥

इति अन्नप्राशनसूत्राणि ॥

अन्नप्राशनप्रयोगः ॥

आचम्य, ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं अन्नप्राशनाख्यं कर्म करिष्ये ॥ दधिमधुघृतमिश्रमन्नं प्राशयेत् कुमारम् । तत्र मन्त्रः ।

" अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः ।
प्र प्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ॥

अनेन अन्नप्राशनाख्येन कर्मणा परमेश्वरः प्रीयताम् । आचामेत् ।

मन्त्रभाष्यम् ॥

" अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः ॥
प्र प्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ॥

शु. सं० ११।८३

हे अन्नपते अन्नस्य स्वमंशं नः अस्मभ्यं देहि अनमीवस्य, अनमीवो व्याधिः तद्रहितस्य शुष्मिणः शुष्मामिति बलनाम बलवतः किञ्च प्रप्रदातारं तारिषः अति-

शयार्थे उपसर्गाभ्यासः महता प्रकर्षेण अन्नस्य दातारम् । प्रतारिषः प्रवर्धय । किं च ऊर्जमन्नं नः अस्मभ्यं धेहि देहि द्विपदे चतुष्पदे द्विपाद्भ्यश्च जातावेक-वचनम् । सर्वेभ्यो नरपशुभ्योऽन्नं देहीत्यर्थः ।

इति अन्नप्राशनमन्त्रभाष्यम् ।

अन्नमीमांसा ॥

अन्नप्राशनविषये आश्वलायनेन, १।१६।२ " आजमन्नाद्यकामः " " तैत्तिरं ब्रह्मवर्चसकामः " आभ्यां सूत्राभ्यां मांसमेव भोजनार्थमुक्तम् । व्याख्याता अपि व्यंजनत्वेन भोज्यतां प्रतिपादयति यद्यपि अन्नाद्यकामाभावेन आजं परित्यक्तुं शक्यम् । तथापि ब्रह्मवर्चसकामेन ब्राह्मणेन तैत्तिरं भक्ष्यं वा नवेति विप्रतिपत्तौ इदानींतनलोकविद्विष्टत्वान्न भक्ष्यमिति समापतितम् । न चेदं सूत्रं क्षत्रियपरमिति वर्णनीयम् विशेषाभावात् । काम्यत्वादपि न परित्यक्तुं शक्यं ब्रह्मवर्चसः अस्माकं आवश्यकत्वात् । पारस्करोऽपि सूत्रयति—

" भारद्वाज्या मांसेन वाक्प्रसारकामस्य "
कपिञ्जलमांसेनान्नाद्यकामस्य "
" मत्स्यैर्जवनकामस्य "
" कृकषाया आयुष्कामस्य, " आस्या ब्रह्मवर्चसकामस्य "
" सर्वैः सर्वकामस्य "

भाष्यम्=भारद्वाजी पक्षिविशेषः, तस्य मांसेन वाक्प्रसारः अयङ्कुमारो वाग्मी स्यादित्येवं कामो यस्मिन्कुमारे तस्य प्राशनम् । कपिञ्जलस्तित्तिरो वा मयूरो वा यदि कुमारोयं शीघ्रगामी स्यात् तदा यथासम्भवं मत्स्यान् प्राशयेत् । कृकषेति कङ्कणहारिकोच्यते तन्मांसेनायुःकामस्य । य एतान् सर्वान् कामान् कामयते तस्य सर्वैरेतैर्मांसैः प्राशनं कारयेत् । हरिहरेणापि प्रयोगपद्धतौ समांसप्रयोग उद्धृतः। आपस्तंबोऽपि तैत्तिरेण मांसेनेत्येके ६।१६।२ हिरण्यकेशीयसूत्रव्याख्यातापि-अन्नशब्दव्याख्यावसरे प्रोवाच । अन्नं मांसादिव्यंजनसहितमोदनम् । शास्त्रमपि परिसंख्याविधिस्वरूपम्—

" पञ्च पञ्चनखा भक्ष्या ब्रह्मक्षत्रेण राघव ।
इत्याह । " लोके व्यवायामिषमद्यसेवा "

इति पद्यं तु सुप्रसिद्धं इदानींतननिषेधस्तु जागर्त्येव कामनास्तु सर्वा एवास्माकं भवन्ति को नाम भवदीयः कुमारः वाग्मी माभूदिति आशासेत् । आचार्यस्तु कुलपरम्पराप्राप्तमुपदिशति नहि प्रवृत्तिमुपरोद्धुमेव शास्त्रं प्रवृत्तं अपि तु नियम-विधिना तां तां प्रवृत्तिं येन केन प्रकारेण उपभोगेनैव शिशमयिषु शास्त्रमिति प्रमाणं प्रेक्षावताम् । बौद्धादीनारभ्येयं मांसभक्षणनिवृत्तिः प्रचुरप्रचारेति निश्चिनुमः नह्यस्माकं कुलगुरूणां सूत्रकाराणां काले इयं निवृत्तिरिति तत्तत्सूत्रप्रण-यनेन दरीदृश्यते । यः किल लोकविद्विष्टत्वं निवृत्तौ हेतुरुपादीयते स सर्वथाऽनाद-रणीय इति मया उद्घुष्यते कियद्भिर्दिवसैर्गतैरधुनापि लोकविद्विष्ट एव ज्योति-ष्टोमः । हिंसाघटितत्वात् । परं न सोननुष्ठेय इति शास्त्रसम्मतम् । भवति च कश्चन शास्त्रार्थः लोकमर्यादायां तिष्ठासुः । न भवति च कश्चन यथा सोमयागादिः । सूत्रयामास च बादरायणोऽपि ''अशुद्धमितिचेन्नशब्दात्'' ब्रह्मसू. ३।१ इति अयमर्थः= पशुहिंसादियोगात् अशुद्धमाध्वरिकं कर्म इति चेन्न कुतः शब्दात् । शास्त्रहेतुत्वा-द्धर्माद्धर्मविज्ञानस्य अयं धर्मोऽयमधर्म इति शास्त्रमेव विज्ञाने कारणम् अतीन्द्रिय-त्वात्तयोः । अनियतदेशकालनिमित्तत्वाच्च यस्मिन्देशे काले निमित्ते च यो धर्मोऽ-नुष्ठीयते स एव देशकालनिमित्तान्तरेष्वधर्मो भवति । तेन शास्त्रादृते धर्माधर्म विषयं विज्ञानं न कस्यचिदस्ति, शास्त्राच्च हिंसानुग्रहाद्यात्मको ज्योतिष्टोमो धर्म इत्यवधारितः स कथमशुद्धइति शक्यते वक्तुम् । यदि सोमे वैधी हिंसाऽभ्युपेयते तर्हि अन्नप्राशनमधुपर्कादिषु पाकयज्ञेषु कुतो नाभ्युपेयत इति वक्तव्यम् , लोकविद्विष्टतो-भयत्र समाना एतदर्धजरतीयापेक्षया । यत्र यत्र शास्त्रमाह अनुगृह्णाति च हिंसां सा सा अनुष्ठिता चेन्नायं जनो दोषभागिति मीमांसारमणीयं मतम् । परं रागतो मांसभक्षणे प्रवृत्तौ सत्यां शास्त्रं नास्तीति मन्यमाना इतस्ततो गत्वा चौर्यादिना मांसं भक्षयन्तः परास्ता वेदितव्याः । आह च मनुरपि ।

" न मांसभक्षणे दोषो न मद्ये न च मैथुने ॥
प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला " ॥ ५।५६

अत्र कुल्लूकभट्टाः= ब्राह्मणादीनां वर्णानां यथाधिकारं विहिताप्रतिषिद्धभक्ष-णादौ न कश्चिद्दोषः । यस्मात्प्राणिनां भक्षणपानमैथुनादौ प्रवृत्तिः स्वाभाविकोयं धर्मः, इति न पुनरिमानि गृह्यसूत्राणि अन्ययुगीयानि न कलावेतेषामवतार इति मन्तव्यम् अपि तु वेदाङ्गत्वादेतेषामव्याहतं प्रामाण्यम् शतपथब्राह्मणेऽपि— '' महोक्षं वा महाजं वा श्रोत्रियायप्रकल्पयेत् '' उक्त एवार्थोऽयं भङ्ग्यन्तरेण भवभूतिना '' समांसो मधुपर्क इत्याम्नायं बहुमन्यमानाः श्रोत्रियायाभ्यागताय वत्सतरीं महोक्षं वा महाजं वा निर्वपन्ति गृहमेधिनः । तं हि धर्मं धर्मसूत्रकाराः

समामनन्ति । इति । उ०रा०च०४अङ्के । तत्रैवान्यदपि अनिवृत्तमांसानामेवं कल्पमृषयो मन्यन्ते इति निश्चिनुमः इत्थं शास्त्रार्थमनुसरद्भिरस्माभिर्यन्निरणायि तदेव शास्त्रसम्मतमेवेति नहि शास्त्रविहितं किंचिदपि अकर्तव्यतामियात् इत्यस्माद्विचारादुपरम्यतेऽस्माभिरितः परमपि सुधीभिर्विचारणीयमेवेत्यास्तां तावत् नह्यविचारेणैवेदानींतनाः परिहासितव्या भवन्तीति नूनम् । अन्नप्राशनमेवात्र प्रधानम् इतरदङ्गम् । अन्नं प्राश्यते यस्मिन् कर्मणि तदन्नप्राशनम् कर्मणो नामधेयमेतत् । प्रतिगर्भमावर्तनीयोयं संस्कारः ।

इति ॥

अथ चौलसूत्राणि ॥

तृतीये वर्षे चौलं यथाकुलधर्मं वा ॥ १ ॥

कुलधर्मोपदिष्टे वा काले चौलं कार्यम् । जन्मप्रभृतितृतीये वर्षे वा कार्यमिति व्यवस्थितविकल्पः । केषांचिदुपनयनेन सह स्मर्यत इति ॥ १ ॥

उत्तरतोऽग्नेर्व्रीहियवमाषतिलानां पृथक्पूर्णशरावाणि निदधाति ॥ २ ॥

प्रणीताप्रणयनोत्तरकाले उत्तरतोऽग्नेः व्रीहियवमाषतिलानां पूर्णशरावाणि निदधाति स्थापयति । पृथग्ग्रहणं द्रव्यभेदार्थम् । पृथक् पूरयित्वा निदध्यादिति अन्यथा समासोपदेशान्मिश्रितानां पूरणं स्यात् । यथा सर्पिर्मधुनी हिरण्यनिकाषमिति मिश्रितानां प्राशनम् । अथवा सत्यपि समासोपदेशे यथाकामं व्रीहियवतिलैरित्यत्रैकं द्रव्यं भवति । एकेन कृतार्थत्वात् । एवमिहाप्येकं द्रव्यं प्रसज्येत तन्निवृत्त्यर्थं पृथग्ग्रहणम् ॥ २ ॥

कथं पृथग्भूतानां सर्वेषां द्रव्याणां पूर्णशरावाणि निधीयेरन्निति —

पश्चात्कारयिष्यमाणो मातुरुपस्थ आनडुहं गोमयं नवे शरावे शमीपर्णानि चोपनिहितानि भवन्ति ॥ ३ ॥

अग्नेः पश्चात्कारयिष्यमाणः कुमारः । तत्प्रयुक्तं हि चौलम् । एवं च कृत्वा संस्कारकर्मसु व्यवायपरिहारेषु कार्येषु कुमारोऽन्तरतम इति दर्शितं भवति । मातुरुपस्थे उत्सङ्गे आस्ते । आनडुहं गोमयं नवे शरावे उपनिहितं भवति । शमीपर्णानि चान्यस्मिन्नवे शरावे उपनिहितानि भवन्ति ॥ ३ ॥

मातुः पिता दक्षिणत एकविंशति कुशपिञ्जूलानादाय ॥ ४ ॥

मातुर्दक्षिणतः पिता एकविंशतिकुशपिञ्जूलान्यादायास्ते । मातुः सकाशाद्दक्षिणतो यथा स्यात्तथा अग्नेर्दक्षिणतो माभूदिति ॥ ४ ॥

ब्रह्मा वैतानि धारयेत् ॥ ५ ॥

एतानि कुशपिञ्जूलानि ब्रह्मा वा धारयेत् यद्यस्ति ॥ ५ ॥

पश्चात्कारयिष्यमाणस्यावस्थाय शीतोष्णा आपः समानीयोष्णेन वाय उदकेनेहीति ॥ ६ ॥

आघारान्तं कृत्वा पूर्वोक्ता आहुतीर्हुत्वा कुमारस्य पश्चिमदेशे स्थित्वा शीतमुदकमुष्णं चोदकमुभाभ्यां पाणिभ्यां गृहीत्वा अन्यस्मिन्पात्रे युगपन्निनीयेति उष्णेनवाय-उदकेनेहीति मन्त्रेण । समित्यैकीभावे । न तु दक्षिणाङ्गकारितया भाव्यम् । कथमुभाभ्यां पाणिभ्यामिति । उच्यते । अनियमे प्राप्ते नियमार्था या सा परिभाषा नतु दक्षिणाङ्गविधायिका ॥ ६ ॥

तासां गृहीत्वा नवनीतं दधिद्रप्सान्वा प्रदक्षिणं शिरस्त्रिरुन्दति । अदितिः केशान्वपत्वाप उन्दन्तु वर्चस इति ॥ ७ ॥

तासामपामेकदेशं गृहीत्वा नवनीतं च गृहीत्वा तदभावे दधिद्रप्सान्वा गृहीत्वा प्रदक्षिणं शिरस्त्रिरुन्दति क्लेदयति मन्त्रेण मन्त्रावृत्तिरुक्ता । तासांग्रहणं समानीतानां ग्रहणार्थम् । इतरथा समानयनस्य शीतोष्णाभिरद्भिरबर्थमित्यत्र कृतार्थत्वात्तासां ग्रहणमेव न स्यात् गृहीत्वेत्यस्य च नवनीतेन च संबन्धः स्यात् । तस्मिंस्तु सति आपो नित्याः । नवनीतदधिद्रप्सयोश्चविकल्पः सिद्ध्यति ॥ ७ ॥

दक्षिणे केशपक्षे त्रीणि त्रीणि कुशपिञ्जूलान्यभ्यात्माग्राणि निदधाति ओषधे त्रायस्वैनमिति ॥ ८ ॥

दक्षिणग्रहणं विस्पष्टार्थम् । तस्मिन्केशपक्षे त्रीणि त्रीणि कुशपिञ्जूलानि कुमारस्याभ्यात्माग्राणि स्थापयति मन्त्रेण । वीप्सा बह्वर्था ॥ ८ ॥

स्वधिते मैनं हिंसीरिति लौहेन क्षुरेण ॥ ९ ॥

अनेन मन्त्रेण लौहेन क्षुरेण तानि कुशपिञ्जूलानि निष्पीडयति । तेषु क्षुरं स्थापयतीत्यर्थः । लोके क्षुरो लौह एव प्रसिद्धः । अतोऽत्र तस्यावाच्यत्वाल्लोह-

शब्दस्ताम्रे वर्तते । शास्त्रान्तरे विहितत्वाच्च । लोके लोहशब्दश्चायं रजतादिष्वपि वर्तते । अत्र तु ताम्रे । तथा दृष्टत्वात् ॥ ९ ॥

प्रच्छिनत्ति । येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् । तेन ब्रह्माणो वपतेदमस्यायुष्माञ्जरदष्टिर्यथासदिति ॥ १० ॥

ततोऽनेन मन्त्रेण तेनैव क्षुरेण प्रच्छिनत्ति । प्रोऽनर्थकः अनभिप्राय इत्यर्थः । अन्ये क्षिप्रार्थ इत्याहुः ॥ १० ॥

प्रच्छिद्य प्रच्छिद्य प्रागग्राञ्छमीपर्णैः सह मात्रे प्रयच्छति तानानडुहे गोमये निदधाति ॥ ११ ॥

प्रच्छिद्य प्रच्छिद्येति वीप्सावचनं यो यत्र धर्म उपदिश्यते स सर्वेषु यथा स्यादिति । प्रागग्रान्कृत्वा शमीपर्णैः सहैकीकृत्य मात्रे प्रयच्छति ददाति । तानसावानडुहे गोमये निदधाति स्थापयति । नात्र प्रागग्रतानियमः ॥ ११ ॥

येन धाता बृहस्पतेरग्नेरिन्द्रस्य चायुषेऽवपत । तेन त आयुषे वपामि सुश्लोक्याय स्वस्तय इति द्वितीयम् । येन भूयश्च रात्र्यां ज्योक् च पश्याति सूर्यम् । तेन त आयुषे वपामि सुश्लोक्याय स्वस्तय इति तृतीयं ॥ १२ ॥

संख्यावचनं मन्त्रान्तरप्रदर्शनार्थम् । मन्त्रमध्येऽपीतिकारो विद्यत इत्युक्तम् । कुशपिञ्जूलनिधानस्याभ्यासविधानार्थं भवितुं नार्हति । अभ्यासस्य त्रीणि त्रीणि वीप्सयैव सिद्धत्वात् ॥ १२ ॥

सर्वैर्मन्त्रैश्चतुर्थं ॥ १३ ॥

सर्वैस्त्रिभिर्मन्त्रैश्चतुर्थवारं छिनत्ति ॥ १३ ॥

एवमुत्तरतस्त्रिः ॥ १४ ॥

यथा दक्षिणे केशपक्षे एवमुत्तरेऽपि केशपक्षे कुर्यात्त्रिः । परिसंख्येयम् । उत्तरे केशपक्षे त्रिरेव न चतुर्थमिति ॥ १४ ॥

क्षुरतेजो निमृजेत् । यत्क्षुरेण मर्चयता सुपेशसा वप्ता वपसि केशान् । शुन्धि शिरो मास्यायुः प्रमोषीरिति ॥ १५ ॥

ततः क्षुरधारां निमृजेच्छोधयेन्मन्त्रेण । निमार्जनमवमार्जनम् । न्यवेति विनिग्रहार्थीयाविति वचनात् ॥ १५ ॥

नापितं शिष्याच्छीतोष्णाभिरद्भिरबर्थं कुर्वाणोऽक्षण्वन्कुशलीकुर्विति ॥ १६ ॥

नापितं शिल्पिनं शिष्यात्प्रेष्येत्प्रैषेण । कुशलीकरणवचनं विपरीतलक्षणया वापने वर्तते । येन । विहितोऽयं मुण्डयति हि श्रूयते ॥ १६ ॥

यथाकुलधर्मं केशवेशान्कारयेत् ॥ १७ ॥

'एकशिखस्त्रिशिखः पञ्चशिखो वा' इति बौधायनः । पूर्वशिखः परशिख इति कुलधर्माः । तेषु यो यस्य कुलधर्मस्तेन तस्य केशसंनिवेशान्कारयेत् । ततः स्विष्टकृदादि समापयेत् । वेषानित्यपि पाठे स एवार्थः

आवृतैव कुमार्यै ॥ १८ ॥

आवृता अमन्त्रकामित्यर्थः । कुतः । येनान्यत्र आवृतेत्युक्त्वा तूष्णीमित्याह । अपरया द्वारा नित्ययाऽवृता सदो द्वार्ये चाभिमृश्य प्रतिप्रसर्पन्तीति । नैतदेवम् । एवकारोऽत्राबधारणार्थः । आवृत्तन्त्रमेव भवति न मन्त्र इति । तेनावृतेत्यस्य तूर्णामित्ययमर्थ इति सिद्धम् । एवंचद्दोषः । अमन्त्रकं होमः प्राप्नोति । इष्टमेव न एतदिति केचिदाहुः । अन्ये होमो न भवतीत्याहुः । अमन्त्रकस्य होमस्य क्वचिदप्यदृष्टत्वात् । ननु तूर्णी द्वितीये उभयत्रेत्यत्र दृष्ट इति शङ्का न कार्या । तत्रापि प्रजापतये स्वाहेति मन्त्रोऽस्त्येव ॥ १८ ॥

इति चौलसूत्राणि ॥

चौलकर्मप्रयोगः

आचम्य, ममोपात्तदुरितक्षयद्वारा यक्ष्यमाणदेवताप्रीत्यर्थम् चौलाख्यं कर्म करिष्ये । स्थालीपाकोक्तविधिनाऽग्निप्रतिष्ठापनान्तं कृत्वा, समित्त्रयमादाय, अस्मिन्नन्वाहितेऽग्नौ आघारावाज्येनेत्यन्तमुक्त्वा अग्निम्, वायुं, सूर्यम्, प्रजापतिं चैता आज्येन शेषेण स्विष्टकृतमित्याद्युक्त्वा समित्त्रयमग्नौ प्रक्षिप्य, परिसमुह्य, परिस्तीर्य, पर्युक्ष्य, अपः प्रणीय, अग्नेरुत्तरतो व्रीहियवमाषतिलानां पृथक् पृथक् पूर्णशरावाणि निदधाति । अग्नेः पश्चिमतः कारयिष्यमाणः मातुरुपस्थे कुमारं, आन-

डुहम् गोमयम् नवे शरावे शमीपर्णानि चोपानिहितानि भवन्ति । मातुर्दक्षिणतः पिता एकविंशति कुशपिञ्जूलान्यादायास्ते ततः कुमारेणान्वारब्धः कर्ता आघारान्तं कर्म कृत्वा ॥

भूः स्वाहा—अग्नय इदं न मम ।
भुवः स्वाहा—वायव इदं न मम ।
स्वः स्वाहा—सूर्याय इदं न मम ।
भूर्भुवः स्वः स्वाहा—प्रजापतय इदं न मम

ततः शीतमुष्णं जले उभाभ्यां पाणिभ्यां पात्रयोः पृथक् गृहीत्वा शिशोः पश्चिमदेशे स्थित्वा तदुदकद्वयम् अन्यस्मिन्पात्रे पाणिभ्यां

उष्णेन वायउदकेनेहि ॥

इति मन्त्रेण युगपन्निनीय तदेकदेशं गृहीत्वा नवनीतेन दधिद्रप्सेन वा मिश्रयित्वा प्रदक्षिणम् ।

अदितिः केशान्वपत्वाप उन्दन्तु वर्चसे ॥

इति मन्त्रेण शिरस्त्रिः क्लेदयेत् । ततोऽन्यहस्तास्थितकुशापिञ्जूलमध्ये त्रीणि पिञ्जूलानि आदाय

ओषधे त्रायस्वैनम् ॥

इति मन्त्रेण कुमाराभिमुखं पाश्चिमाग्राणि तस्य दक्षिणे केशभागे निधाय तेषु ताम्रमयं क्षुरं

स्वाधिते मैनं हिंसीः ॥

अनेन मन्त्रेण निधाय

येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् ।
तेन ब्रह्माणो वपतेदमस्यायुष्मान्जरदष्टिर्यथा सत् ॥

इति मन्त्रेण सकेशानि पिञ्जूलानि छित्वा प्रागग्राणि कृत्वा शरावस्थशमीपर्णैरेकीकृत्य मात्रे दद्यात् ; सा च आनडुहे गोमये प्रागग्राणि निदध्यात् । एवं द्वितीयादिच्छेदनेषु पिञ्जूलनिधानादि समन्त्रकं कार्यम्, छेदनमन्त्रे तु विशेषः ॥

ओषधे त्रायस्वैनम् । स्वधिते मैनंहिंसीः । येन धाता बृहस्पतेरग्नेरिंद्रस्य चायुषे वपामि सुश्लोक्याय स्वस्तये । इति-

द्वितीयम् ओषधे० स्वधिते० येन भूयश्च रात्र्यां ऽज्योक् च पश्याति सूर्यम् तेन त आयुषे वपामि सुश्लोक्याय स्वस्तये इति तृतीयम् ॥

सर्वैर्मन्त्रैश्चतुर्थम् ॥ एवमुत्तरतस्त्रिः ततः ॥

यत्क्षुरेण मर्चयता सुपेशसा वप्ता वपसि केशान् । शुन्धि शिरो मास्यायुः प्रमोषीः ॥

इति क्षुरतेजो निमृज्य,

शीतोष्णाभिरद्भिरवर्थं कुर्वाणोऽक्षण्वन् कुशलीकुरु ॥

नापितं शिष्यात् । ततः कुमारं स्थापयित्वा पूर्ववन्मातुरुत्सङ्गेऽवस्थाप्य स्विष्टकृदादि होमशेषं समापयेत् । आचामेच्च । अनेन चौलाख्येन कर्मणा परमेश्वरः प्रीयताम् ।

पदार्थाः—स्थालीपाकोक्तान्व्रीहीन्विना विद्यात्

व्रीहियवमाषतिलैः—पूरितानि शरावाणि चत्वारि नापितदानरूपप्रतिपत्तिकर्मार्थं ।

आनडुहं गोमयं—छिन्नकुशपिञ्जूलकेशनिधानार्थम् ।

नवः शरावः—शमीपर्णस्थापनार्थम् ।

शमीपर्णानि—छिन्नपिञ्जूलकेशैः सह एकीकरणार्थम् ।

एकविंशतिदर्भतरुणाः—छेदनार्थं केशैः सह सप्तधा ।

तद्धारकोऽन्यः, शीतोष्णा आपः क्लेदनार्थं शिरसः ।

नवनीतं, दधिद्रप्सोवा, शिरोलेपनार्थम् ।

लौहः क्षुरः ॥ चूडाकर्मार्थम् ।

अत्र केशनिकृंतनं प्रधानमितरदङ्गम् ।

चूडा प्रयोजनमस्येति चौडम् डळयोरविशेषः ।

चूडाः केशाः तेषां उक्तेन विधिना संस्करणम् चूडाकरणमिति कर्मणो नामधेयम् । यस्मात्सूत्रकारेणैतदुपदिष्टं, तस्मादिदं अवश्यं कर्तव्यमित्यर्थः ।

मन्त्रभाष्यम्.

ऊष्णेन वाय उदकेनेहि ॥ १ ॥

भाष्यम्—हे वायो उष्णेन अन्येन चोदकेन इहि एहि, आगच्छ ॥ १ ॥

अदितिः केशान्वपत्वाप उन्दन्तु वर्चसे ॥ २ ॥

भाष्यम्—अदितिः अखण्डिता, दितिः खण्डनम् दो अवखण्डने । सा अदितिर्देवता केशान् वपंतु अखण्डितत्वात् तस्याः आपश्च ते वर्चसे तेजसे प्रतापाय उंदन्तु आर्द्रीकुर्वन्तु ॥ २ ॥

ओषधे त्रायस्वैनम् ॥ ३ ॥

दोषानोषति भस्मसात्करोति गुणान् दधाति इति ओषधिः एवं कुमारं त्रायस्व रक्षस्व ॥ ३ ॥

स्वधिते मैनं हिंसीः ॥ ४ ॥

स्वधिते, क्षुर एनं कुमारं मा हिंसीः मा विनाशय ॥ ४ ॥

येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् ॥
तेन ब्रह्माणो वपतेदमस्यायुष्माञ्जरदष्टिर्यथासत् ॥ ५ ॥

हे ब्रह्माणः, ब्राह्मणाः, येन प्रकारेण, क्षुरेण वा सविता प्रसविता पिता आदित्यः राज्ञः सोमस्य वरुणस्य च शिरः अवपत् राजसूयदीक्षायै अमुण्डयत् किम्भूतः विद्वान् सर्वज्ञः तेन कारणेन क्षुरेण प्रकारेण वा अस्य कुमारस्येदं शिरः वपत मुण्डयत । यथायं कुमार आयुष्मान् प्रशस्तं आयुर्यस्य सः प्राशस्त्ये मतुप् दीर्घायुर्वा जरदष्टिः सुपरिणितवपुश्च यथा स्यात्तथा वपतेत्यर्थ ।

येन धाता बृहस्पतेरग्नेरिन्द्रस्य चायुषे वपत् ॥
तेन त आयुषे वपामि सुश्लोक्याय स्वस्तये ॥ ६ ॥

येन क्षुरेण कारणेन वा ब्रह्मा बृहस्पतेः अग्नेः इन्द्रस्यायुषोऽभिवृध्यै अवपत् अमुण्डयत् । तेन कारणेन क्षुरेण आयुषोभिवृद्धये सुश्लोक्याय, शोभनयशसे कल्याणाय च वपामि ॥ ६ ॥

येन भूयश्च रात्र्यां ज्योक् च पश्याति सूर्यम् ॥
तेन त आयुषे वपामि सुश्लोक्याय स्वस्तये ॥ ७ ॥

येन कारणेन पुनः बहुलं वा रात्र्यां ज्योक् चिरं सूर्यं पश्याति पश्यति तेन कारणेन ते आयुषोभिवृध्यै शोभनयशसे कल्याणाय च वपामि ॥ ७ ॥

यत्क्षुरेण मर्चयता सुपेशसा वप्ता वपसि केशान् ।
शुन्धि शिरो मास्यायुः प्रमोषीः ॥ ८ ॥

हे क्षुरदेवते यत् यस्मात् वप्ता त्वं मर्चयता संस्कुर्वता तथा सुपेशसा शोभयता क्षुरेण केशान् वपसि तस्मात् अस्य शिरः मा शुंधि मा छिंधि आयुश्च मा प्रमोषीः, मा मुषाण मुष स्तेये अथवा वप्त्रा क्षुरेण केशान् छिंदि इति ॥ ८ ॥

शीतोष्णाभिरद्भिरबर्थं कुर्वाणोऽक्षण्वन् कुशलीकुरु ॥ ९ ॥

अबर्थं अब्बहुलं, अक्षण्वन् क्षतमकुर्वन् कुशलीकुरु परिवप मुण्डयेत्यर्थः कुशलीकरणवचनं विपरीतलक्षणया वापने वर्तते इति गार्ग्यनारायणः ॥
आ. गृ. १।१७।१७

इति चौलप्रयोगमन्त्रभाष्यम् ॥

उपनयनसूत्राणि

अष्टमे वर्षे ब्राह्मणमुपनयेत् ॥ १ ॥

जन्मप्रभृत्यष्टमे वर्षे ब्राह्मणमुपनयेत् । कुमारमिति वर्तते । कुमारीनिवृत्त्यर्थमित्युक्तम् ॥ १ ॥

गर्भाष्टमे वा ॥ २ ॥

गर्भप्रभृत्यष्टमे वोपनयेत् ॥ २ ॥

एकादशे क्षत्रियम् ॥ ६ ॥

जन्मप्रभृति गर्भप्रभृति वा एकादशे वर्षे क्षत्रियमुपनयेत् ॥ ३ ॥

द्वादशे वैश्यम् ॥ ४ ॥

जन्मप्रभृति गर्भप्रभृति वा द्वादशे वर्षे वैश्यमुपनयेत् ॥ ४ ॥

आषोडशाद्ब्राह्मणस्यानतीतः कालः ॥ ५ ॥

षोडशवर्षपर्यन्तं ब्राह्मणस्योपनयनकालोऽतीतो न भवति ॥ ५ ॥

आद्वाविंशात्क्षत्रियस्य आचतुर्विंशाद्वैश्यस्य अत ऊर्ध्वं पतितसावित्रीका भवन्ति ॥ ३ ॥

षोडशद्वाविंशचतुर्विंशपर्यन्तेष्वनुपनीताश्चेत्पतितसावित्रीकाभवन्ति । संज्ञायाः प्रयोजनं पतितसावित्रीक उद्दालकव्रतं चरेदिति । अत ऊर्ध्वमितिवचनं पूर्वसूत्रेष्वाकारा अभिविधाविति ज्ञापनार्थम् ॥ ६ ॥

नैनानुपनयेन्न याजयेन्नैभिर्व्यवहरेयुः ॥ ७ ॥

अचीर्णप्रायश्चित्तानिति शेषः । उपनयनप्रतिषेधादेव सर्वत्र प्रतिषेधे सिद्धे यदि केनचिल्लोभादज्ञानाद्वोपनीताः स्युः तथापि नैवोत्तराणि कर्माणि पतितसावित्रीकाणां कुर्यादिति सर्वेषां पाठः क्रियते ॥ ७ ॥

अलंकृतं कुमारं कुशलीकृतशिरसमहतेन वाससा संवीतमैणेयेन वाऽजिनेन ब्राह्मणं रौरवेण क्षत्रियमाजेन वैश्यम् ॥८॥

कुशलीकृताशिरसम् । वापितशिरसमित्यर्थः । अहतं नवम् । अपुराणमनुपभुक्तमित्यर्थः । तेन वाससा संवीतम् । प्रावृतमित्यर्थः । ऐणेयेन वाऽजिनेन चर्मणा प्रावृतं ब्राह्मणमानीय होमं कुर्यात् । एवमुत्तरत्रापि नेयम् । एतानि चर्माणि वाससा सह विकल्पन्ते । उभयेषां प्रावरणार्थत्वाद्वाशब्दाच्च ॥ ८ ॥

यदि वासांसि वसीरन्रक्तानि वसीरन्, काषायं ब्राह्मणो माञ्जिष्ठं क्षत्रियो हारिद्रं वैश्यः ॥ ९ ॥

वासांसि वसीरन्नित्येवं सूत्रच्छेदइष्टः । वासांसि वसीरन् । परिदध्युरित्यर्थः । यदीत्युत्तरेण संबध्यते । तेन नियमेन परियानं सिद्धम् । पक्षे शुक्लान्यपि सिद्ध्यन्ति । यदि रक्तानि वसीरन् । काषायं ब्राह्मणः । माञ्जिष्ठं क्षत्रियः । हारिद्रं वैश्यः । एवं रक्तानां वसनमनित्यम् । तथा च गोतमः । ‘ वासांसि क्षौमचीरकुतपाः सर्वेषां कार्पासं वाऽविकृतं काषायमप्येके वाल्कं ब्राह्मणस्य माञ्जिष्ठहारिद्रे इतरयोः ’ इति ॥ ९ ॥

तेषां मेखलाः ॥ १० ॥

उच्यन्त इति शेषः ॥ १० ॥

मौञ्जी ब्राह्मणस्य, धनुर्ज्या क्षत्रियस्य, आवी वैश्यस्य ॥ ११ ॥

मौञ्जी नान्यस्य । ब्राह्मणस्य तु मौञ्जी वाऽन्या वा न नियमः । एवमुत्तरयोर्ज्ञेयम् ॥ ११ ॥

तेषां दण्डाः ॥ १२ ॥

उच्यन्त इति शेषः ॥ १२ ॥

पालाशो ब्राह्मणस्य औदुम्बरः क्षत्रियस्य बैल्वो वैश्यस्य, केशसंमितो ब्राह्मणस्य ललाटसंमितः क्षत्रियस्य प्राणसंमितो वैश्यस्य ॥ १३ ॥

दण्डनियमो मेखलाभिस्तुल्यः ॥ १३ ॥

सर्वे वा सर्वेषां ॥ १४ ॥

सर्वे दण्डाः सर्वेषां भवन्ति पालाशादयः ॥ १४ ॥

समन्वारब्धे हुत्वोत्तरतोऽग्नेः प्राङ्मुख आचार्योऽवतिष्ठते ॥ १५ ॥

आज्यस्य बर्हिष्यासादनान्तं कृत्वा समन्वारब्धे ब्रह्मचारिणि इध्माधानाघारान्तं कृत्वा पूर्वोक्ताज्याहुतीर्हुत्वा उत्तरतोऽग्नेः प्राङ्मुख आचार्योऽवतिष्ठते । ब्रह्मचारी तु तीर्थेन प्रविश्य आचार्यस्य दक्षिणत उपविशेत् । तीर्थं नाम प्रणीतानां पश्चिमो देशः । सर्वत्र तीर्थेनैव प्रविश्य कर्म कुर्यात् ॥ २ ॥

पुरस्तात्प्रत्यङ्मुख इतरः ॥ १६ ॥

आचार्यस्य पुरस्तात्प्रत्यङ्मुखो ब्रह्मचारी अवतिष्ठते ॥ ३ ॥

अपामञ्जली पूरयित्वा तत्सवितुर्वृणीमह इति पूर्णेनास्य पूर्णमवक्षारयत्यासिच्य, देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हस्तं गृह्णाम्यसाविति तस्य पाणिना पाणिं साङ्गुष्ठं गृह्णीयात् ॥ १६ ॥

अपामुभयोरञ्जली पूरयित्वा स्वस्य पूर्णेनाञ्जलिनाऽस्य पूर्णमञ्जलिमवक्षारयति तत्सवितुर्वृणीमह इति मन्त्रेण । ब्रह्मचारिणोऽञ्जलौ आत्मनोऽञ्जलिमवासिञ्चतीत्यर्थः । ततो देवस्य त्वेति मन्त्रेण तस्य पाणिं साङ्गुष्ठं गृह्णीयात् । आचार्याञ्जलिमर्थादन्यः पूरयति । आसिच्येति वचनं कथं । आचार्योऽवक्षारणं कुर्यान्न कुमार इत्येवमर्थम् । इतरथा पूर्णेनास्य पूर्णमवक्षारयतीत्युक्ते कस्याञ्जली कोऽवक्षारयतीति संदेहः स्यात् । आसिच्येति वचनं तूच्यमाने समानकर्तृकत्वनिर्देशात् यः

पाणिं गृण्हाति सोऽ वसिञ्नतीति ज्ञायते । तेनाचार्योऽवक्षारयतीति सिद्धम् । असा-वित्यस्य स्थाने संबुद्धया ब्रह्मचारिनाम ब्रूयात् ॥ १६ ॥

सविता ते हस्तमग्रभीदसाविति द्वितीयम् । अग्निराचार्य-स्तवासाविति तृतीयम् ॥ १७ ॥

सङ्ख्यावचनं प्रथमहस्तग्रहणदृष्टाञ्जलिपूरणादिधर्मप्राप्त्यर्थम् ॥ १७ ॥

आदित्यमीक्षयेत् । देव सवितरेष ते ब्रह्मचारी तं गोपाय स मामृतेत्याचार्यः

ततो ब्रह्मचारिणमादित्यमीक्षयेन्मत्रेणाचार्यः । आचार्यग्रहणं ज्ञापनार्थम् । अन्यत्रेक्षणे ब्रह्मचारिणो मन्त्रो नाचार्यस्येति । तेनादित्यमीक्षयेत् । मित्रस्य त्वा चक्षुषा प्रतीक्षे ' इत्यत्र ब्रह्मचारिणो मन्त्रः सिद्धः ॥ १८ ॥

कस्य ब्रह्मचार्यसि प्राणस्य ब्रह्मचार्यासि कस्त्वा कमुपनयते काय त्वा परिददामीति ॥ १९ ॥

जपेदिति शेषः । मन्त्रलिङ्गात् । प्रजापतये ब्रह्मचारी प्रदीयते । तेनाचार्य-स्यायं मन्त्रः ॥ १९ ॥

युवा सुवासाः परिवीत आगादित्यर्धर्चेनैनं प्रदक्षिणमावर्तयेत् ॥२०॥

अनेनार्धर्चेन एनं ब्रह्मचारिणं प्रदक्षिणमावर्तयेत् । एनामिति वचनं कथं आवर्तयितुर्मन्त्रः स्यान्नावर्त्यमानो ब्रूयात्कुमार इत्येवमर्थं । अर्धर्चग्रहणमृङ्-निवृत्त्यर्थं । अन्यथा ' ऋचं पादग्रहणे ' (आश्व० १।१।१७) इत्यृक् स्यात् ॥ २० ॥

तस्याध्यंसौ पाणी कृत्वा हृदयदेशमालभेतोत्तरेण ॥ २१ ॥

अधीत्युपरिभावे । ब्रह्मचारिणोंऽसयोरुपरि स्वस्य पाणी कृत्वा तस्य हृदयदेशं स्पृशेदुत्तरेणार्धर्चेन ॥ ९ ॥

अग्निं परिसमुह्य ब्रह्मचारी तूष्णीं समिधमादध्यात् तूष्णीं वै प्राजापत्यं प्रजापत्यो ब्रह्मचारी भवतीति विज्ञायते ॥ २१ ॥

अत्र परिसमूहनमनर्थकम् संस्कृतत्वादग्नेः । उच्यते । सायंप्रातः समिदाधाने पर्युक्षणपरिसमूहने यथा स्यातामिति परिसमूहनवचनम् । अत्र तु परिसमूहनाद्य-कृत्वैव तस्मिन्नेवाग्नौ ब्रह्मचारी तूष्णीं समिधमादध्यात् । ब्रह्मचारिवचनमाचार्य-

निवृत्त्यर्थम् । यस्मात् यत्प्राजापत्यं तत्तूष्णीं ब्रह्मचारी च प्राजापत्यः इति श्रूयते । तस्मात्तूष्णीं समिधमादध्यात् ॥ २१ ॥

मन्त्रेण हैके अग्नये समिधमाहार्षं बृहते जातवेदसे । तया त्वमग्ने वर्धस्व समिधा ब्रह्मणा वयं स्वाहेति ॥ २२ ॥

एके मन्त्रेण समिदाधानमिच्छन्ति । हशब्दोऽभिमतज्ञापनार्थः । तेन पूर्वस्य श्रुत्याकृष्टत्वेऽप्युभयोस्तुल्यत्वं सिद्धम् ॥ २२ ॥

स समिधमाधायाग्निमुपस्पृश्य मुखं निमार्ष्टि त्रिः तेजसा मा समनज्मीति ॥ २३ ॥

ब्रह्मचारी समिधमाधायाग्निमुपस्पृश्य मुखं निमार्ष्टि मन्त्रेण त्रिः । मन्त्रावृत्तिरुक्ता । सग्रहणं समिधौ वा जपेद्वेत्यत्र वक्ष्यमाणो विधिर्माभूत् । समिद्ग्रहणमुभयोरपि पक्षयोरुत्तरो विधिर्यथा स्यादिति । आधायग्रहणं ' सायंप्रातः समिधमादध्यात् ' इत्यत्रापि यथा स्यात् ॥ २३ ॥

तेजसा ह्येवात्मानं समनक्तीति विज्ञायते ॥ २४ ॥

श्रुत्याकर्षः कथमग्न्युपस्पर्शनमपि त्रिः स्यादिति ॥ २४ ॥

मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु । मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु । मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु । यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासं । यत्ते अग्ने वर्चस्तेनाहं वर्चस्वी भूयासं । यत्ते अग्ने हरस्तेनाहं हरस्वी भूयासं । इत्युपस्थाय जान्वाच्योपसंगृह्य ब्रूयात् । अधीहि भोः सावित्रीं भो अनुब्रूहीति ॥ २५ ॥

षड्भिरुपस्थाय दक्षिणं जान्वाच्य विधिवदुपसंगृह्याचार्यं ब्रूयात् अधीहीति प्रैषेण ॥ २५ ॥

तस्य वाससा पाणिभ्यां च पाणी संगृह्य सावित्रीमन्वाह पच्छोऽर्धर्चशः सर्वां ॥ २६ ॥

तस्य ब्रह्मचारिणः परिहितेन वाससा प्रावरणस्याऽनित्यत्वात्स्वस्य पाणिभ्यां च तस्य पाणी गृहीत्वा सावित्रीमन्वाह ॥ २६ ॥

यथाशक्ति वाचयीत ॥ २७ ॥

स्वयं पादं पादमुक्त्वा तेन वाचयति । यदि ब्रह्मचारी पादं पादं वक्तुं न शक्नोति ततस्तेन यथाशक्ति वाचयीत । एवमर्धर्चशः । एवं सर्वाम् ॥ २८ ॥

हृदयदेशेऽस्योर्ध्वाङ्गुलिं पाणिमुपदधाति । मम व्रते हृदयं ते दधामि मम चित्तमनु चित्तं ते अस्तु । मम वाचमेकव्रतो जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यमिति ॥ २८ ॥

ब्रह्मचारिणो हृदयदेशसमीपे स्वस्य पाणिमूर्ध्वाङ्गुलिमुपदधाति स्थापयति मन्त्रेण ॥ २९ ॥

मेखलामाबध्य दण्डं प्रदाय ब्रह्मचर्यमादिशेत् ॥ २९ ॥

ततो मेखलामाबध्य दण्डं प्रदाय ब्रह्मचर्यमादिशेत् ॥ ३० ॥

इत्थमादिशेदित्याह—

ब्रह्मचार्यस्यपोशान कर्म कुरु दिवा मा स्वाप्सीराचार्याधीनो वेदमधीष्वेति ॥ ३० ॥

इदानीं ब्रह्मचार्यसि । अपोऽशान । मूत्रपुरीषादौ शास्त्रविहितमाचमनं कुर्वित्यर्थः । कर्म कुरु । यच्छास्त्रविहितं कर्म सन्ध्योपासनादि । दिवा मा स्वाप्सीरिति दिवाशयनप्रतिषेधः । आचार्याधीनो नित्यं भव । वेदमधीष्व वेदाध्ययनं कुरु ॥ ३२ ॥

द्वादश वर्षाणि वेदब्रह्मचर्यम् ॥ ३१ ॥

वेदस्य ब्रह्मचर्यं वेदब्रह्मचर्यम् । वेदग्रहणं कथं वेदमात्रस्यायं कालनियमः स्यादिति । मन्त्रब्राह्मणयोर्वेदनामधेयम् । तेन महानाम्न्यादीनां व्रतानामूर्ध्वं द्वादशवर्षेभ्यस्त्रयः संवत्सराः स्युः । एवं च कृत्वोपनयनप्रभृति षोडशे वर्षे गोदानं सिद्धम् । वेदग्रहणादयमर्थो लब्धः । एवमेके । अन्ये तु जन्मप्रभृति षोडशे वर्षे गोदानम् । महानाम्न्यादीनां च व्रतानां द्वादशवर्षेष्वन्तर्भावमिच्छन्ति । महानाम्न्यादीनामपि वेदैकदेशत्वादिति । पूर्वस्मिन्पक्षे यदा संवत्सरं व्रतचर्या तदा सप्तदशे गोदानं स्यात् । तस्मादयमेव पक्षः श्रेयान् । वेदग्रहणं कथमेकैकस्य वेदस्य द्वादशवर्षाणि ब्रह्मचर्यं स्यादिति । तेन द्वयोश्चतुर्विंशतिः त्रयाणां षट्त्रिंशत् चतुर्णामष्टचत्वारिंशत् ॥ ३२ ॥

ग्रहणान्तं वा ॥ ३२ ॥

वेदग्रहणान्तं वा ब्रह्मचर्यं भवति प्रागूर्ध्वं वा द्वादशभ्यः । एवं ब्रुवता त्रिविधं स्नानं प्रदर्शितं भवति । विद्यास्नानं व्रतस्नानं विद्याव्रतस्नानमिति । प्राग्द्वादशभ्यो वेदमधीत्य यः स्नाति स विद्यास्नातकः । यस्तु द्वादशवर्षाणि ब्रह्मचर्यं कृत्वाऽनधीतवेदः स्नाति स व्रतस्नातकः । यस्तु पुनर्द्वादशवर्षाणि ब्रह्मचर्यं कृत्वाऽधीतवेदः स्नाति स विद्याव्रतस्नातकः । ननु विद्यान्ते गुरुमर्थेन निमन्त्र्य कृतानुज्ञातस्य वा स्नानमिति वक्ष्यति अतः कथं व्रतस्नानस्य संभवः । उच्यते । विद्यान्त इति न विद्यासमाप्तौ स्नानं चोद्यते किं तर्हि विद्याया अन्ते । न मध्ये । तेन व्रतस्नातकोऽपि मध्यमुत्सृज्य अन्तमारण्यकमधीत्य स्नायात् । रहस्ये चारण्यकं प्राधान्येन स्नाननिमित्तं चोद्यते ' नैवेदमनधीयन्स्नातको भवति ' इत्यादिना । ततः स्विष्टकृदादि समापयेत् ॥ ३२ ॥

सायंप्रातर्भिक्षेत ॥ ३३ ॥

अहनि रात्रौ चाचार्यार्थमशनार्थं चान्नं याचेत । तत्र भवत्पूर्वमित्यादि शास्त्रान्तरदृष्टो विधिर्द्रष्टव्यः ॥ ३४ ॥

सायंप्रातः समिधमादध्यात् ॥ ३४ ॥

अग्निं परिसमुह्येत्याद्युपस्थानान्ता धर्मा भवन्तीत्युक्तं पुनः सायंप्रातर्ग्रहणं पूर्वेणासंबन्धार्थम् । तेन भैक्षं वा पूर्वं भवति समिदाधानं वेति क्रमानियमः सिद्धः ॥ ३५ ॥

अप्रत्याख्यायिनमग्रे भिक्षेत अप्रत्याख्यायिनीं वा ॥ ३६ ॥

अयं नियमोऽनुप्रवचनीयभैक्षे । कुतः अनुप्रवचनीयम् भवान् ददात्विति भैक्षमन्त्रात् ॥ ३६ ॥

भवान्भिक्षां ददात्विति अनुप्रवचनीयामिति वा ॥ ३७ ॥

स्त्रीभिक्षा चेदुभयत्र मन्त्रे भवती ददात्विति ब्रूयात् ॥ ३७ ॥

तदाचार्याय वेदयीत तिष्ठेदहःशेषम् ॥ ३८ ॥

तल्लब्धमाचार्याय निवेद्य तस्मिन्नहनि यावच्छिष्टं तावन्तं कालं तिष्ठेत् आसनादि न कुर्यात् ॥ ३८ ॥

अस्तमिते ब्रह्मौदनमनुप्रवचनीयं श्रपयित्वाचार्याय वेदयीत ॥ ३९ ॥

ब्रह्मभ्य ओदनो ब्रह्मौदनः । ब्रह्मशब्दो ब्राह्मणवाचकः । तेन ब्राह्मणभोजनं

विधास्यमानमत एव चरोर्भवति । अनुप्रवचननिमित्तमनुप्रवचनीयम् । पाकयज्ञविधानेन ब्रह्मचारी अनुप्रवचनीयं श्रपयित्वाचार्याय शृतः स्थालीपाक इति ३९

आचार्यः समन्वारब्धे जुहुयात् सदसस्पतिमद्भुतमिति ॥ ४० ॥

ततः समन्वारब्धे ब्रह्मचारिणि इध्माधानाद्याघारान्तं कृत्वाऽनया जुहुयात् ४०

सावित्र्या द्वितीयम् ॥ ४१ ॥

सावित्री 'तत्सवितुर्वरेण्यम्' इत्येषा प्रसिद्धा । द्वितीयग्रहणमुत्तरार्थम् ॥ ४१ ॥

यद्यत्किंचात ऊर्ध्वमनूक्तं स्यात् ॥ ४२ ॥

अत्र सावित्री अनूक्तेति कृत्वा सावित्र्या द्वितीयं जुहोति । अत ऊर्ध्वमपि महानाम्न्यादिव्रतेषु यद्यदनूक्तं तेन तेन द्वितीयं जुहोति । एतदुक्तं भवति । महानाम्न्यादिव्रतेषु श्रावणान्ते अनुप्रवचनीयहोमः कार्यः।तत्र सावित्र्याःस्थाने महानाम्नीभ्यः स्वाहा महाव्रताय स्वाहा उपनिषदे स्वाहा इत्येवं द्वितीयं जुहोति। अन्यत्समानमिति द्वितीयग्रहणं महानाम्न्यादिनामधेयेन होमार्थम् । इतरथा मन्त्रेण होमे क्रियमाणे प्रतिमन्त्रं स्वाहाकारः स्यात् स च प्रदानार्थ इति कृत्वा अनेका आहुतयः स्युः ततश्चोत्तरासां द्वितीयत्वं न स्यात् तस्माद्द्वितीयग्रहणम् ॥ १२ ॥

ऋषिभ्यस्तृतीयम् ॥ ४३ ॥

तृतीयवचनमृषिभ्य इत्यस्य विधायकत्वं निवर्त्य मन्त्रत्वज्ञापनार्थम्।तेन ऋषिभ्यः स्वाहेति जुहोति ॥ ४२ ॥

सौविष्टकृतं चतुर्थम् ॥ ४४ ॥

संख्यावचनं नियमार्थम् । चतुर्थमेव न षष्ठमिति । तेनात्राज्यभागौ न भवतः ॥ ४३ ॥

ब्राह्मणान् भोजयित्वा वेदसमाप्तिं वाचयीत ॥ ४५ ॥

संस्थाजपान्तं कृत्वा ब्राह्मणान्भोजयित्वा वेदसमाप्तिं भवन्तो ब्रुवन्त्विति ब्रूयात् ते च वेदसमाप्तिरस्त्विति ब्रूयुः ॥ ४४ ॥

अत ऊर्ध्वमक्षारलवणाशी ब्रह्मचार्यधःशायीत्रिरात्रं द्वादशरात्रं संवत्सरं वा ॥ ४५ ॥

अत ऊर्ध्वमिति कस्मात् पूर्वेण संबन्धकरणार्थम् । प्रयोजनमुपरिष्टाद्वक्ष्यामः ब्रह्मचारिवचनमाचार्यनिवृत्त्यर्थम् ॥ ४५ ॥

चरिताव्रताय मेधाजननं करोति ॥ ४६ ॥

चरितव्रतायेतिवचनं मेधाजननव्रतस्य संबन्धार्थम् । यत्रोपनयने मेधाजननमस्ति तत्रैव व्रतचर्या यत्र व्रतचर्या तत्रैवानुप्रवचनीयम्। उपनीतपूर्वस्य मेधाजननाभावे त्रितयमपि निवर्तते ॥ ४६ ॥

अनिन्दितायां दिश्येकमूलं पलाशं कुशस्तम्बं वा पलाशापचारे प्रदक्षिणमुदकुम्भेन त्रिः परिषिञ्चन्तं वाचयति । सुश्रवः सुश्रवा असि यथा त्वं सुश्रवः सुश्रवा अस्येवं मां सुश्रवः सौश्रवसं कुरु । त्वं देवानां यज्ञस्य निधिपोऽस्येवमहं मनुष्याणां वेदस्य निधिपो भूयासमिति ॥ ४७ ॥

इदं मेधाजननम् । तिस्रो निन्दिता दिशः । दक्षिणा प्राग्दक्षिणा प्रत्यग्दक्षिणेति । अन्याः सर्वा अनिन्दिताः । तस्यां दिश्येकमूलं कुशस्तम्बं वा । पलाशाभावे प्रदक्षिणमुदकुम्भेन त्रिः परिषिञ्चन्तं ब्रह्मचारिणं वाचयति ‘ सुश्रवः ’ इति मन्त्रम् । एकमूलशाखमित्यर्थः । पुनः पलाशग्रहणमनेकमूलस्याप्यभावे कुशस्तम्बं परिषिञ्चेदिति ॥ ४७ ॥

इत्युपनयनसूत्राणि

उपनयनप्रयोगः ॥

आचम्य अहतेन वाससा संवीतं, शुक्लवाससा परिहितं कुमारं स्वसमीपे उपवेश्य वेदाध्ययनाधिकारद्वारा श्रीपरमेश्वरप्रीत्यर्थं कुमारमुपनेष्ये । इति संकल्प्य, स्थालीपाकोक्तविधिना अग्निं प्रतिष्ठाप्य, समित्त्रयमादाय, अन्वाहितेऽस्मिन्नग्नौ आघारावाज्येनेत्यंतमुक्त्वा अग्निं, वायुं, सूर्यं, प्रजापतिम् , आज्येन शेषेण स्विष्टकृतमग्निम्, प्रजापतिं प्रायश्चित्तदेवतामाज्येन सद्यो यक्ष्ये ततः समन्वारब्धे कुमारे आघारान्तंहुत्वा ।

भूः स्वाहा	अग्नय इदं न मम ।
भुवः स्वाहा	वायव इदं न मम ।
स्वः स्वाहा	सूर्यायेदं न मम ।
भूर्भुवः स्वः स्वाहा	प्रजापतय इदं न मम ।

इति हुत्वा, अग्नेरुत्तरतः प्राङ्मुख आचार्यः अवतिष्ठते आचार्यस्य पुरस्तात् प्रत्यङ्मुखो ब्रह्मचारी अवतिष्ठते । तत अपामुभयोरञ्जली पूरयित्वा स्वांजल्युदकं शिष्यांजलाववक्षार्यतज्जलं कुमाराञ्जलिनैवावक्षारयेत् तत्र मन्त्रः ॥

" तत्सवितुर्वृणीमहे वयं देवस्य भोजनम् ॥
श्रेष्ठं सर्वधातमंतुरं भगस्य धीमहि ॥ ५ ॥

ततः—देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो
हस्ताभ्यां हस्तं गृण्हामि

इत्यमुकनामन् इति कुमारस्य पाणिं पाणिना साङ्गुष्ठं गृण्हीयात् पुनरपि पूर्ववदवक्षारणान्तं कृत्वा ॥

सविता ते हस्तमग्रभीत् ॥

इति पूर्ववदेव पाणिग्रहणम् । पुनरपि पूर्ववदवक्षारणान्तं कृत्वा ।

" अग्निराचार्यस्तव "

इति नाम । निर्दिश्य पाणिं गृण्हीयात् तत आचार्य आदित्यं कुमारमीक्षयेत् ॥ तत्र मन्त्रः ।

देव सवितरेष ते ब्रह्मचारी तं गोपाय स मामृत ॥ इति—
अथाचार्यः—" कस्य ब्रह्मचार्यसि प्राणस्य ब्रह्मचार्यसि कस्त्वा कमुपनयते काय त्वा परिददामि ॥
तत आचार्यः—युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः

इति ब्रह्मचारिणं प्रदक्षिणमावर्तयेत् ।

ब्रह्मचारिणः अंसयोरुपरि स्वस्य पाणी कृत्वा तस्य त्हृदयदेशमालभेत तन्मंत्रः।

तं धीरासः कवय उन्नयन्ति स्वाध्यो १ मनसा देवयन्तः ॥

ततोऽग्निं परिसमुह्य ब्रह्मचारी तूष्णीं समिधमादध्यात् । स समिधमाधायाग्निमुपस्पृश्य मुखं निमार्ष्टि त्रिः । तन्मन्त्रः ।

" तेजसा मा समनज्मि "

ततोऽग्नेरुपस्थानम्=तन्मंत्राः ।

मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु ॥
मयि मेधां मयि प्रजां मयीन्द्र इंद्रियं दधातु ॥
मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥
यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासम् ॥
यत्ते अग्ने वर्चस्तेनाहं वर्चस्वी भूयासम् ॥
यत्ते अग्ने हरस्तेनाहं हरस्वी भूयासम् ॥ इत्युपस्थाय

अन्वाच्य (दक्षिणं जानु निपात्य) उपसंगृह्य (आचार्यं नमस्कृत्य ।)

"अधीहि भोः सावित्रीं भो अनुब्रूहि ॥ इति ब्रूयात् ॥

तत आचार्यस्तस्य संवीतेन वाससा पाणिभ्यां पाणी संगृह्य यथाशक्ति सावित्रीं वाचयीत ॥

सावित्री—ॐभूर्भुवःस्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धीयो यो नः प्रचोदयात् ।

ततोस्य ब्रह्मचारिणः ह्वदयदेशे उर्ध्वांगुलिं पाणिमुपदध्यात् । तत्रमन्त्रः

मम व्रते हृदयं ते दधामि मम चित्तमनुचित्तं ते अस्तु ॥
मम वाचमेकव्रतो जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यम् ॥

मेखलामाबध्य, दण्डं प्रदाय ब्रह्मचर्यमादिशेत् तच्चेत्थम् । ब्रह्मचार्यसि मूत्रपुरीषादौ शास्त्रविहितं आचमनं कुरु संध्योपासनादि कर्म कुरु, दिवा मा स्वाप्सीः, आचार्याधीनः सन् वेदमधीष्व, सायं प्रातर्भिक्षेथाः सायं प्रातः समिधमादध्यात् । वेदग्रहणान्तं ब्रह्मचर्यं चर अप्रत्याख्यायिनमग्रे भिक्षेत अप्रत्याख्यायिनीं वा, तत आचार्यः स्विष्टकृदादि होमशेषं समापयेत् ।

अथानुप्रवचनीयहोमः ॥

तदर्थं होमब्राह्मणभोजनपर्याप्तां तण्डुलरूपां भिक्षां याचेत् । तन्मंत्रः ।

" भवाननुप्रवचनीयं ददातु भवती अनुप्रवचनीयं ददातु ॥
इति वा

स्त्रीपुंसयोर्भेदेन व्यवस्थिताविकल्पोऽयमाकलनीयः । ताम् भिक्षामाचार्याय वेदयीत तिष्ठेदहःशेषं च । ततो नित्यकर्म कुर्यात् । तत आचार्यः समन्वारब्धे कुमारे

अस्मिन्नग्नौ आघारावाज्येनेत्यन्तमुक्त्वा सदसस्पतिं, सवितारं, ऋषीन् चरुद्रव्येण शेषेण स्विष्टकृतमग्निम् इत्यादि सद्यो यक्ष्ये, इति समिधो हुत्वा परिसमूहनादि प्रणयनान्तं कृत्वा, स्थालीपाकोक्तविधिना निर्वापावहननादिवर्जं श्रपयित्वा आचार्याय वेदयति, तत आचार्य आज्योत्पवनादि कृत्वा समन्वारब्धे कुमारे आघारान्तं कृत्वा प्रधानाहुतीरवदानधर्मेणावदाय जुहुयात् तत्र मंत्राः ।

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।
सनिं मेधामयासिषं स्वाहा । सदसस्पतय इदं न मम ॥
तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धीयो यो नः प्रचोदयात्स्वाहा ॥ सवित्र इदं न मम ॥
ऋषिभ्यः स्वाहा ऋषिभ्य इदं न मम ॥

ततः स्विष्टकृदादि होमशेषं समाप्य ब्राह्मणान् भोजयेत् । ततस्तेभ्यो 'वेदसमाप्तिरस्तु' इति वाचयति । अत ऊर्ध्वं अक्षारलवणाशी ब्रह्मचार्यधःशायी, त्रिरात्रं द्वादशरात्रं संवत्सरं वा व्रतं चरेत् ।

मेधाजननम् ॥

आचम्य मेधोत्पत्त्यै मेधाजननं करिष्ये ।

ऐशान्यां दिशि, पलाशं, कुशस्तम्बं वा प्रदक्षिणमुदकुम्भेन, त्रिः परिषिंचंतं वाचयति ॥

सुश्रवः सुश्रवा असि यथा त्वं सुश्रवः सुश्रवा असि । एवं मां सुश्रवसः सौश्रवसं कुरु । यथा त्वं देवानां यज्ञस्य निधिपोऽस्येवमहं मनुष्याणां वेदस्य निधिपो भूयासम् ॥
इति त्रिः

प्रतिप्रदक्षिणं मन्त्रावृत्तिः आचामेत् ।

अनेन उपनयाख्येन कर्मणा परमेश्वरः प्रीयताम् यदा तु मेधाजननं व्यवहितकालं भवति तदा ।

अनेन मेधाजननाख्येन कर्मणा परमेश्वरः प्रीयताम् । आचम्य, गायत्र्युपदेशार्थं आचार्यसमीपं नयनं प्रधानम् उपदेशश्चेति अन्यदक्षारणप्रभृति अंगजातं, ।

अनुप्रवचनीयः प्रवचनमनुक्रियमाणो होमो गायत्र्युपदेशात् परमयं क्रियते कर्मणो नामधेयं चैतत् समाख्यावशादयमर्थो लभ्यते मेधाजननम् मेधायाः उत्पत्तिकारकः कश्चन कर्मविशेषः मेधा जन्यतेनेनेति । समाख्यावशादेवायमर्थो लभ्यते ।

सामग्रीविशेषः

विद्वानाचार्यः, अलंकृतः, वापितशिराः, संवीतवासाः परिहितवासाः, कुमारः उपनयननार्थे। उपदेष्टा आचार्यः, अवक्षारणीयं जलम् । समित् होमार्थे, मेखला, दण्डः, अनुप्रवचनीया भिक्षा, पलाशस्तम्बः मेधाजननार्थम्। उदकुम्भश्च तदर्थमेव। अन्यत्सर्वं स्थालीपाकोक्तवज्ज्ञेयं विशेषोपि ऊह्य एव ॥

इत्युपनयनप्रयोगः ॥

मन्त्रभाष्यं

तत्सवितुर्वृणीमहे वयं देवस्य भोजनं ।
श्रेष्ठं सर्वधातमं तुरं भगस्य धीमहि ॥ १ ॥

तत् । सवितुः । वृणीमहे । वयं । देवस्य । भोजनम् । श्रेष्ठं । सर्वऽधातमं । तुरं । भगस्य । धीमहि ॥ १ ॥

तत् प्राप्यत्वेन प्रसिद्धं भोजनं भोग्यं धनं वयं स्तोतारो वृणीमहे प्रार्थयामः । कस्य धनं सवितुः प्रेरकस्य देवस्य स्वभूतं । लब्ध्वा च श्रेष्ठं प्रशस्यं सर्वधातमं सर्वधातृतमं, सर्वभोगप्रदमित्यर्थः । तुरं शत्रूणां हिंसकं धनेन शत्रून् हन्तुं शक्यत्वात् तादृशं धनं भगस्य भजनीयस्य सवितुरनुग्रहात् धीमहि । धारयामः । उपभोगं करवामेत्यर्थः अथवा धनं वृणीमहेअर्थित्वाच्च लभेमहीति ॥ १ ॥

अस्या ऋचः
श्यावाश्व ऋषिः
सविता देवता
गायत्री छंदः

अवक्षारणे विनियोगः स्मार्तः श्रौतेपि अस्य विनियोगः अग्निष्टोमे वैश्वदेवशस्त्रे उक्तः ।

देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां
हस्तं गृण्हामि ॥ २ ॥

अत्र तैत्तिरीयब्राह्मणम् ।

देवस्य त्वा सवितुः प्रसव इत्याह प्रसूत्यै अश्विनोर्बाहुभ्यामित्याह । अश्विनौ हि देवानामध्वर्यू आस्ताम् पूष्णो हस्ताभ्यामित्याह यत्यै ॥ २ ॥

सविता ते हस्तमग्रभीत् ॥ ३ ॥

ते हस्तं सविता प्रसविता अग्रहीत् ॥ ३ ॥

अग्निराचार्यस्तव ॥ ४ ॥

हे ब्रह्मचारिन् ते आचार्यः अग्निः इतः परं अग्निमेव आचार्येण विभावय ४

देवसवितरेष ते ब्रह्मचारी तं गोपाय स मा मृत ॥ ५ ॥

आचार्यः ब्रह्मचारिणं आदित्यमीक्षयति । हे सवितः देवः एषः ते ब्रह्मचारी तं गोपाय सः मा अमृत मा विनश्यतु अत्र मामृतेतिपाठानुसारेणायमर्थः मा ब्रृत इति पाठे मानवगृह्यानुसारेण गृहीत्वा मा अवृत इति पदच्छेदः । अयं बटुः मा मां अवृत, स्वीचकार अतस्तं त्वं गोपाय युक्ततमः पाठो विद्वद्भिः संशोध्य ग्राह्यः ॥ ५ ॥

कस्य ब्रह्मचार्यसि प्राणस्य ब्रह्मचार्यसि, कस्त्वा कमुपनयते
काय त्वा परिददामि ॥ ६ ॥

प्रजापतये ब्रह्मचारी समर्प्यते मन्त्रलिङ्गात् । कस्य प्रजापतेः प्राणशब्देनाप्यत्र सर्वेषां प्राणनहेतुत्वात् स एव प्रकारान्तरेण उच्यते क एव कमुपनयते अहं तस्माएव ददामि ॥ ६ ॥

युवा सुवासाः परिवीत आगात्स उ श्रेयान् भवति जायमानः ॥
तं धीरासः कवय उन्नयन्ति स्वाध्यो३ मनसा देवयन्तः ॥ ७ ॥

युवा । सुऽवासाः । परिऽवीतः । आ । अगात् । सः । ऊंइति । श्रेयान् । भवति । जायमानः । तं धीरासः । कवयः । उत् । नयंति । सुऽआध्यः । मनसा । देवऽयंतः ॥ ७ ॥ अ. अ. ऋ. ३।१।४

युवा दृढांगोऽष्टाश्र्यादिलक्षणलक्षित इत्यर्थः सुवासाः शोभनेन वाससा रशनया युक्तः । परिवीतस्तया रशनया वेष्टितः । एवंविधो यूप आगात् आगच्छति स उ स एव यूपः श्रेयान् जायमानः सर्वेभ्यो वनस्पतिभ्य उत्कृष्टः तया संपद्यमानो भवति । तमेवंविधं यूपं धीरासः, प्राज्ञाः मनसा देवयंतो देवान् कामयमानाः स्वाध्यः सुष्ठु सर्वतो ध्यानयुक्ताः कवयः क्रांतदर्शिन अध्वर्य्वादयः उन्नयन्ति । उन्नतं कुर्वन्ति । एतस्मिन्नर्थे ब्राह्मणं युवा सुवासाः परिवीत आगादित्युत्तमया परिदधाति प्राणो वै युवा सुवासाः सोयं शरीरैः परिवृतः स उ श्रेयान

भवति जायमान इति श्रेयान् श्रेयान् ह्येष एतद्भवति जायमानस्तं धीरासः कवय उन्नयंति स्वाध्यो मनसा देवयंत इति ये वा अनूचानास्ते कवयस्त एवैनं तदुन्नयंति । ऐ. ब्रा. २।२

कौशिको विश्वामित्र ऋषिः
यूपः देवता
त्रिष्टुप् छंदः

विनियोगः—पूर्वार्धस्य प्रदक्षिणावर्तने । उत्तरार्धस्य—हृदयस्यस्पर्शने । स्मार्तोयं विनियोगः श्रौतस्तु यूपपरिव्ययणे ॥ ७ ॥

तेजसा मा समनज्मि ॥ ८ ॥

मा माम् तेजसा समनज्मि—संस्करोमि । अग्निनिष्ठं तेजो मयि उपसंहरामि इत्यर्थः ॥ ८ ॥

मयि मेधां मयि प्रजां इत्यादयो मंत्राः स्पष्टार्था इति न तत्र यत्नः क्रियते । मम व्रते इत्यपि सुलभम् ।

सदसस्पतिमद्भुतं प्रियमिंद्रस्य काम्यम् सनिं मेधामयासिषम् ॥ ९ ॥

सदसः । पतिं । अद्भुतं । प्रियं । इंद्रस्य । काम्यं । सनिं । मेधां । अयासिषम् ॥ ९ ॥

मेधां लब्धुं सदसस्पतिमेतन्नामकं देवमयासिषं प्राप्तवानस्मि । कीदृशं अद्भुतं आश्चर्यकरं इन्द्रस्य प्रियं सोमपाने सहचारित्वात् काम्यं कमनीयं सनिं दातारं काण्वो मेधातिथिर्ऋषिः । सदसस्पतिर्देवता गायत्रीछंदः अनुप्रवचनीयचरोर्होमे विनियुक्ता ॥ ९ ॥

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् । तत् । सवितुः । वरेण्यं भर्गः देवस्य धीमहि धियः यः नः प्र चोदयात् ॥ १० ॥

सवितुर्देवस्य वरेण्यं, वरणीयं भर्गस्तेजः धीमहि ध्यायेम तस्मात् यः धियः बुद्धीः प्रचोदयात् प्रेरयेत् ॥ १० ॥

विश्वामित्रः । ऋषिः
सविता । देवता ।
गायत्री । छंदः ।
अनुप्रवचनीयहोमे विनियोगः ॥

सुश्रवः सुश्रवा असि यथा त्वं सुश्रवः सुश्रवा अस्येवं मां सुश्रवः सौश्रवसं कुरु। यथा त्वं देवानां यज्ञस्य निधिपो स्येवमहं मनुष्याणां वेदस्य निधिपो भूयासम् ॥ ११ ॥

हे सुश्रवः शोभनकीर्ते पलाश कुशस्तम्ब, यथा येन गुणेन त्वं सुश्रवा असि। एवङ्गुणाधानेन मां सुश्रवः सौश्रवसं सुश्रवाश्चासौ सौश्रवसश्च तम् तत्र सुश्रवाः बटुः स्वयं सुश्रवा गुरुस्तस्यायं सौश्रवसः ममाचार्यमपि सुश्रवसं कृत्वा तदीयत्वेन मां सौश्रवसं कुरु इत्यर्थः। किं च हे पलाश यथा त्वं दीव्यन्ति प्रकाशयन्त इति देवाः अङ्गानि इन्द्रादयो वा यज्ञस्य चाङ्गिनः वेदस्य विष्णोर्वा निधिपाः निधीनां मन्त्राणां अधिष्ठानमसि एवमहं वेदस्य सांगस्य मनुष्याणां च तदध्येतॄणां निधिपाः वेदस्य निधिरधिकरणं। मनुष्याणां पालकश्च भूयासम् ॥ ११ ॥

इति मन्त्रभाष्यम्।

उपनयनविचारः।

उपनयनं नाम—आचार्यसमीपनयनांगकगायत्र्युपदेशप्रधानकः कर्मविशेषः। तथाहि—"वसन्ते ब्राह्मणमुपनयीत" "ग्रीष्मे राजन्यम्" "शरदि वैश्यम्" इति द्वितीयानिर्देशादुपनयनसंस्कृतास्त्रैवर्णिकाः 'किमस्माभिः कर्तव्यम्' इत्यपेक्षन्ते तत्संनिधौ चाध्ययनमनिर्दिष्टकर्तृकं विधीयमानं कर्तारमपेक्षते, तत्रापेक्षासंनिधियोग्यत्वैरेवं विज्ञायते त्रैवर्णिकैरेवोपनीतैरक्षरग्रहणेनाध्ययनादिपरम्परयाऽर्थज्ञानं कर्तव्यमिति। एवं च फलवदध्ययनकर्तृभूतमाणवकसंस्कारत्वादुपनयनमध्ययनांगम् अध्ययनमपि दृष्टार्थज्ञानार्थम्, अर्थज्ञानं त्वनुष्ठानौपयिकत्वात्प्रसिद्धफलकमेवेति सर्वेषां फलवत्त्वम्। एवं च त्रैवर्णिकेषु विद्वत्सु लब्धेषु नाग्निहोत्रादिविषयश्चतुर्थवर्णस्य विद्यामाक्षिपंति किं तु त्रैवर्णिकानेव विदुषोऽधिकुर्वेति। सोयमधिकारनियमोऽपशूद्राधिकरणे वक्ष्यमाणोऽध्ययनविधिप्रसादलभ्य इति फलवानेव विधिः। तेनार्थज्ञानावसानमध्ययनमध्ययनविधिना विधीयत इति विचारमन्तरेण तदनुपपत्तेरध्ययनविधिरेव विचारमाक्षिपंस्तद्विरुद्धं स्मार्तं स्नानं बाधते इति सिद्धमध्ययनानंतरं धर्मजिज्ञासा कर्तव्येति।

"वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यम्, शरदि वैश्यम्" इत्यत्र ब्राह्मणादिशब्दोत्तरद्वितीयानिर्देशादुपनयनरूपसंस्कारकर्मता हि ब्राह्मणत्वावच्छिन्ने क्षत्रियत्वावच्छिन्ने वैश्यत्वावच्छिन्ने च प्रतीयते न तु शूद्रत्वावच्छिन्नेऽपीति त्रैवर्णिकाः ब्राह्मणक्षत्रियवैश्या एवोपनीता भवन्ति तत्र च यथाऽऽहूतो भृत्यो जिज्ञासते किं मया कर्त्तव्यम्, एवमुपनयनेन संस्कृतास्त्रैवर्णिका अपि किमस्माभिः कर्त्तव्यम्

इति स्वकर्त्तव्यमपेक्षन्ते, कर्त्तव्याभावे ह्युपनयनसंस्कारो निष्फलः स्यात्। किमर्थो ममायं संस्कार इति तूपनीतस्यावश्यं जिज्ञासा जायत एव। "वसन्ते ब्राह्मणमुपनयीत" इत्यादिवाक्योक्तोपनयनसंनिधौ च "स्वाध्यायोऽध्येतव्यः इत्येवमनिर्दिष्टकर्तृकमध्ययनं विहितं न चात्रोक्तम्—अमुकोऽमुककामोवाऽध्ययनं कुर्यात् इति तस्माद् विधीयमानमध्ययनं स्वकर्तारमपेक्षते। तथा चोपनीतानां त्रैवर्णिकानां स्वकर्तव्यस्यापेक्षास्ति, अध्ययनस्य च स्वकर्तुरपेक्षास्ति, उपनयनवाक्यैः सहाध्ययनवाक्यस्य संनिधिरप्यस्ति अध्ययनयोग्यताप्यस्त्युपनतिानाम्, इति दग्धाश्वरथन्यायेनाध्ययनोपनीतयोः कर्मत्वेन कर्तृत्वेन च परस्परप्रकरणस्थानाभ्यामन्वयोजातः। तथा चोपनीतैर्द्विजातिभिरेवाक्षरग्रहणलक्षणमध्ययनं कर्तव्यं तदनंतरं तैरेव वेदवाक्यानामर्थज्ञानं संपादनीयं वेदवाक्यानि विचारयितव्यानीत्यर्थः।

एवं च—उपनीतैस्त्रैवर्णिकैरेवाध्ययनं कर्तव्यमिति सिद्धे च, अर्थज्ञानरूपफलवत् यदध्ययनं तत् स्वकर्तृभूतो यो द्विजातिमाणवकस्तस्य संस्कार एवेत्युपनयनमध्ययनस्यांगम्। यत उपनयनं विनाध्ययनं न भवति ततस्तेनोपनयनेन बटुरध्ययनयोग्यो भवति इत्यध्ययनार्थत्वादुपनयनं सफलम्। अध्ययनं च वाक्यार्थत्वात्सफलम् वाक्यार्थज्ञानं च कर्मानुष्ठानसंपादनार्थत्वात्सफलम्, वाक्यार्थज्ञानं विना तत्तद्वाक्योक्तकर्मणामनुष्ठानासंभवाद् विद्यावत्त्वस्याधिकारिविशेषणत्वादिति—उपनयनादीनां सर्वेषां सफलत्वं सिद्धम्। ननु कथमुपनयनं विनाध्ययनं न संभवति उपनयनं विनाप्यध्येतुं शक्यत्वादितिचेत्? नात्र नास्तिकमतेः प्रवेशोस्ति, आस्तिकेन त्वेवं विज्ञेयम्—उपनयनप्रकरणे पठितस्यानिर्दिष्टकर्तृकस्याध्ययनस्योपनीता एवाधिकारिणः उपनयनं च द्विजातीनामेवोति। अन्यदेतद्यत्सच्छूद्राणामप्युपनय इति धर्माब्धौपरमतोक्तिः।

एवं च उपनयनद्वारा द्विजातीनामध्ययने सिद्धे अधीतवेदा द्विजातय एव वेदवाक्यार्थं विचारयिष्यन्तीति द्विजातयो विद्वांस उपलब्धा इत्यग्निहोत्रादिविधयो न शूद्रस्य विद्यामाक्षिपन्ति कारणाभावात्। किंतु त्रैवर्णिका विद्वांस एवास्माकमधिकारिण इति बोधयंति। अन्यथा पूर्वोक्तक्रमेण शूद्रस्याप्यध्ययने प्रवेशः स्यादित्यर्थः। उपनयनानन्तरमधीतवेदानां द्विजातीनामेवाग्निहोत्रादिष्वधिकारोस्ति न तुरीयादेरिति नियमः षष्ठाध्याये प्रथमपादे सप्तमेऽपशूद्राधिकरणे "चातुर्वर्ण्यमविशेषात्" इत्यत्र वक्ष्यमाणोऽस्यैवाध्ययनविधेः प्रसादेन (अर्थापत्त्या) लब्ध इत्यनेन त्रैवर्णिकाधिकारानियमनोध्ययनाविधिः फलवानस्ति। उपनयनप्रकरणसंनिहितोयमध्ययनविधिरुक्तमधिकारानियमं बोधयाति स्वफलत्वेनेति भावः। ततः। अध्ययनविधिनाऽर्थज्ञानावसानम्—वाक्यार्थज्ञानसंपादनपर्यंतमध्ययनं विधीयते। अर्थादक्षरग्रहणमात्रानंतरं न समावर्तितव्यं। किं तु वाक्यार्थज्ञानसंपाद-

नानंतरम् । वाक्यार्थज्ञानानुपपत्तेः । वाक्यार्थविचारं विना वाक्यार्थज्ञानं न संभवतीत्यध्ययनविधिरेव वाक्यार्थविचारमाक्षिपति । आक्षिपन्=स्वफलसिध्द्यर्थं प्रापयन् । ततश्च तद्विरुद्धम् वाक्यार्थविचारविरुद्धम् स्मार्तं स्नानम् "अधीत्य स्नायात्" इति विहितमध्ययनविधिरेव बाधते । यतोऽक्षरमात्रग्रहणानंतरं समावर्तनरूपे स्नाने कृते वाक्यार्थविचारो न स्यात् । किं वा "अधीत्य स्नायात्" इत्यस्याप्यध्ययनविध्यानुकूल्येन वाक्यार्थविचारपर्यंतमेवाध्ययनं शक्यमस्तीति ज्ञेयम् । ननु त्रैवर्णिकानामेवाग्निहोत्रादिष्वधिकारो न तुरीयादेरिति नियमेन फलवानध्ययनविधिः कथं वाक्यार्थज्ञानसंपादनावसानमध्ययनं विदध्यात् ! वाक्यार्थज्ञानसंपादनं विनाप्यध्ययनस्वरूपसंपत्तेरिति चेन्न, वाक्यार्थज्ञानं विनाग्निहोत्रादि कर्म कर्तुं न शक्यत इति वाक्यार्थज्ञानसंपादनावसानमध्ययनं विधीयते । अध्ययनविधिनैव वाक्यार्थविचारस्याक्षिप्तत्वाद्धेतोः । एतत्सर्वं मनसि निधायैव सूत्रयामासतुर्जैमिनिबादरायणौ पूर्वोत्तरतंत्रे ॥ तत्र प्रवृत्तिमार्गस्थितेन बटुना अवश्यं वेदो गुरूच्चारणानूच्चारणपूर्वकं पठितव्यः । अनेन नियमेन कृतं यदक्षरग्रहणं तेन ब्रह्मयज्ञः निर्वर्तयितव्यः । ततः वेदांगानि शिक्षादीनि गुरुमुखादेवावगन्तव्यानि । अधीतेष्वंगेषु द्वे अपि पूर्वोत्तरमीमांसे अवश्यं गुरुमुखादवगम्य स्वयं विचार्ये । न 'गुरुभिः इत्थं उक्तं, ग्रंथकर्त्राचेत्थं लिखितं परम्परया चेदं प्राप्तं ईदृशश्च आचारः' इति तूर्णीं स्थेयं—यदि तूर्णीं भाव एव वरं इति स्यात् तर्हि सन्तु प्राचीनग्रंथेषु उत्तरोत्तरं ग्रंथाः कथं भवेयुः इयं हि ग्रंथकर्तॄणां पद्धतिः । परमतं, पूर्वग्रंथकृतां मतं खंडनीयं, उपबृंहणीयं च इतरांगसहायेन च स्वमतं स्थापनीयं । अस्यां पद्धतौ जैमिनिबादरायणौ प्रामुख्येन स्थितौ । अन्ये तु प्रासंगिकं परमतं खंडयन्ति । सर्वेषां मूलं वेद एव—वेदेऽपि परपक्षं उद्भाव्य स्वपक्षं संस्थाप्य परपक्षं निराकुर्वन्ति । यथा=ऐतरेयप्रथमारण्यके—' तदाहुः किं प्रेङ्खस्य प्रेङ्खत्वं इत्याद्यारभ्य एकं फलकं स्यादित्याहुरेकधा ह्येवायं वायुः पवतेस्य रूपेण इति पूर्वपक्षः सयुक्तिकः उद्भावितः । पुनरपि त्रीणि फलकानि स्युरित्यादिना द्वितीयपूर्वपक्षं पूर्ववदुद्भाव्य 'तत्तन्नादृत्यं' इत्यादिनाऽभावपि पक्षौ निराकृतौ स्वपक्षश्च सिद्धांतत्वेन 'द्वे एव स्यातामित्यादिना स्थापितः इत्थं सहस्रशः उदाहरणानि तत्तद्वेदाध्ययनकर्तृभिरवगन्तव्यानि ॥ सूत्रकारोपि । श्रौतसूत्रे न तान् कुर्यात् अकृत्स्नत्वात् हौत्रस्य' इत्यादिना हेतुपूर्वकं परपक्षं निषेधति—अन्यत्रापि—श्रौतसूत्रे उत्तरषट्के पंचमाध्याये चतुर्थखंडे कुंडपायिनामयनप्रकरणे मासं अग्निहोत्रं मासं दर्शपूर्णमासौ इत्यादि उक्त्वा 'सौत्यान् मासान् अग्निहोत्रादीन् वदन्तः तदनुपपन्नं पश्वर्थे हि अग्निप्रणयनं तस्य च श्वः सुत्यानिमित्तं अतिप्रणीतचर्यायां च वैगुण्यं दर्शपूर्णमासयोस्तथाग्निहोत्रस्ये'त्यादिना पक्षनिषेध उक्तः । वैगुण्य-

हेतुना ॥ एवं बौधायनोपि । नित्ययूपा एव अस्माकं भवंतिइत्याह—न विकल्पं अंगीकारोति । सर्वैरपि यथामति वेदार्थं अवगत्य स्वस्वसिद्धांतः स्थापितः । सर्वैश्च मीमांसिता वेदाः—अत एव आह शिवदत्तशर्मा ॥ "बहूनां ऋषीणां मीमांसकत्वेपि जैमिनीयत्ववैयासिकत्वमात्रख्यातौ कारणं तु देवा एव जानन्ति" इति मम तु कारणं एवं भाति अथातो धर्मजिज्ञासा, अथातो ब्रह्मजिज्ञासा इति ताभ्यां प्रथमत एव सूत्रितत्वात् तौ ख्यातिंगतौ न तथा आपस्तंबगौतमप्रभृतयः—तैस्तु अथातो दर्शपूर्णमासौ अथैतस्य समाम्नायस्य विताने योगापत्तिं वक्ष्यामः समाम्नायः समाम्नातः इत्येव सूत्रितं न तथा जैमिनिबादरायणाभ्यां अपि तु—धर्मजिज्ञासा—धर्मविचारः कार्यः ब्रह्मविचारः कार्यः—जिज्ञासा नाम विचारः· ननु इच्छा तथा चात्र उभयोरपि सूत्रयोरर्थः ब्रह्मचारिबुद्धिवैशद्याय लिख्यते अथातो धर्मजिज्ञासा जै. पू. मी १।१।१। अत्राथशब्द आनन्तर्ये वर्तते । तच्चानन्तर्यमर्थाद्वेदाध्ययननिरुपितमवगम्यते । नहि वेदैकबोध्यो धर्मो वेदाध्ययनमन्तरा शक्यो विचारयितुम् । अतः शब्दो वृत्तं वेदाध्ययनं हेतुत्वेन स्थिरीकुर्वन्नथशब्दस्यानन्तर्यातिरिक्तार्थपरतां निराचष्टे ज्ञातुमिच्छा जिज्ञासा । सा च धर्मे विशिष्य ज्ञाते न संभवति, अज्ञाते च नतरामिति सामान्यतो ज्ञाते विशेषजिज्ञासा । विशेषज्ञानं च विचारमन्तरा न संभवतीत्यन्तभूतो विचारो जिज्ञासेत्यनेनोच्यते । कर्तव्येत्यध्याहार्यम् । तथा च वेदाध्ययनानंतरं तद्धेतुको धर्मविचारः कर्तव्य इति सूत्रार्थः । तत्र धर्मस्वरूपविचारस्तावच्छक्तपदश्रुतिरूपया श्रुत्या गम्यमानत्वाच्छ्रौतः तदतिरिक्तप्रमाणादिविचारस्त्वार्थिकः । तथा चायमर्थः ॥अथ वेदाध्ययनानंतरम्, अतः विचारहेतुभूताध्ययनस्य वृत्तत्वाद्धेतोः, धर्मस्य प्रभाणस्वरूपसाधनफलैरग्रे निरूपयिष्यमाणैर्जिज्ञासा विचारात्मिका चिन्ता कर्तव्येति शेषः ।

विचारान्तरं किंचित्क्रियते । "अष्टमे वर्षे ब्राह्मणमुपनयेत्" इति आश्वलायनाचार्यः असूसूचत् तत्र वृत्तौ कुमारमिति वर्तते इत्युक्तं अत्र संदेहः । अत्र कुमारमित्यावर्तनं कुतः? कुमारीनिवृत्यर्थं एवमेके तदसत् कुतः आवृतैव कुमार्या इति चूडाकरणान्तसंस्काराणां कुमार्या अपि सूत्रणात् । मन्त्रनिवृत्यर्थं तर्हि न तत्र तूष्णीं इति वृत्तिकारेण व्याख्यातत्वात् । आवृता इत्यस्य च अर्थद्वयं परिपाटिः, तूष्णीं, चेति तथा च गोभिलभाष्ये एतयैवावृत्ता—एतया परिपाट्या इति । तथा च कुमारानुवर्तनं कार्यं अथ क्रियते प्रयोजनं वक्तव्यं । अधिकारार्थं हि जातकर्माणि कुमारग्रहणं इत्युक्तं अधिकारत्वं नाम उत्तरोत्तरसूत्रैकवाक्यतापन्नत्वं । तच्चावश्यकमिति भ्रमः । तेनोपनयनादीनि व्रतानि न कुमार्याः । ननु ब्राह्मणमुपनयेत् इति हि सूत्रितं स खल्वयं पुल्लिङ्गनिर्देशः स्त्रियं व्यावर्तयिष्यति ! न कुतः यतो नखल्वत्र ब्राह्मणो विधित्सितः । किं तर्हि उप.

नयनव्रतं तदर्थं ब्राह्मणेनूद्यते । तस्मात् जातिनिर्देशाच्च लिंगं अविवक्षितं स्याद्यथा "ब्राह्मणो न हन्तव्यः" इति ब्राह्मण्यपि न हन्यते तस्मात् कुमारानुवर्तनं उपनयनादिव्रतेषु कुमार्या व्यावर्तनार्थं मनुरपि—

अमन्त्रिका तु कार्येयं स्त्रीणामावृदशेषतः ॥
संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम् ॥ १ ॥
वैवाहिको विधिः स्त्रीणां संस्कारो वैदिक स्मृतः ॥
पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिष्क्रिया ॥ २ ॥

इत्याभ्यां वचनाभ्यां जातकर्मादिसंस्कारम् उपनयनादिव्रताभावं च स्त्रियाः दर्शयति । अथवा प्राधान्यता कुमारग्रहणं जातकर्मणि कृतम् अनुपादेयलिङ्गाविवक्षया तु जातकर्मणि अवगम्यमाना न निराक्रियते उपनयनादिव्रतमपि क्रियतां तर्हि कुमार्याः न करिष्यते । अध्ययनार्थं हि तानि व्रतानि स्त्रियाः खलु वेदाध्ययनं नास्ति । "स्त्रीशूद्रौ नाधीयेतां" इति हि ब्राह्मणम् वस्तुतस्तु आवृतैव कुमार्यै इत्युक्तत्वात् प्रथमपक्षएवयुक्तः ॥ अथवा आवृतैव कुमार्या इति मूर्ध्न्यवघ्राणविषये वा भवतु तथा च सूत्रान्तरे, "तूष्णीं मूर्ध्न्यवघ्राणमिति" एतेन स्त्रीणां वेदाध्ययनादि आसीत् पूर्वमिति वदन्तः प्रमाणपूर्वं व्याख्याताः पुराकल्पे तु नारीणामिति स्मृतिरपि 'स्त्रीशूद्रौ नाधीयेतां' इति श्रुतिविरोधादप्रमाणं । तथाचाहुः "गृह्योक्तकर्मणा येन समीपं नीयते गुरोः ॥ बालो वेदाय तद्योगात् बालस्योपनयं विदुः ।

इति उपनयनविचारः ॥

संध्यासूत्राणि ॥

यज्ञोपवीती नित्योदकः सन्ध्यामुपासीत वाग्यतः ॥ १ ॥

यज्ञोपवीतीति व्याख्यातम् । नित्योदकः स्मृत्युक्तोदककर्मेत्यर्थः । अतो मार्जनादि कार्यम् । सन्ध्यामुपासीत वाग्यतः । एतावत्सन्ध्याद्वये समानम् ॥ १ ॥

प्रतिसन्ध्यमित्थमुपासीतेत्याह—

सायमुत्तरापराभिमुखोऽन्वष्टमदेशं सावित्रीं जपेदर्धास्तमिते मण्डल आनक्षत्रदर्शनात् ॥ २ ॥

१ श्रौतसूत्रवृत्तौ १ अ० ।

सायंकाले उत्तरां परां दिशमभिमुखः । वायव्याभिमुख इत्यर्थः । तत्रापि नाञ्जसाभिमुखः अपि त्वन्वष्टमदेशमभिमुखः । प्रतीच्यां दिशि य उत्तरो भागस्तदभिमुख इत्यर्थः । सावित्रीं जपेत् । इतः कालादाराभ्य आ इतः कालात् ॥२॥

एवं प्रातः ॥ ३ ॥

एवमेव प्रातःकाल उपासीत । तत्र विशेषमाह ॥ ३ ॥

प्राङ्मुखस्तिष्ठन्नामण्डलदर्शनात् ॥ ४ ॥

प्राङ्मुख इति वायव्याभिमुखनिवृत्त्यर्थम् । तिष्ठन्नित्युपवेशननिवृत्त्यर्थम् । अतो ज्ञायते अविशेषे उपवेशनं भवतीति । पूर्वावधिस्तु अर्धास्तमितेषु नक्षत्रेषु । कुतः पूर्वस्माद्विपरीतत्वात् । उत्तरावधिस्त्वत्रैवोक्तः ॥ ६ ॥

इति सन्ध्यासूत्राणि ॥

सन्ध्याप्रयोगः ॥

आचम्य, ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थम् प्रातः सन्ध्यामुपासिष्ये ।

ॐभूर्भुवःस्वः—तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ॥ धियो यो नः प्रचोदयात् । सवित्रे सूर्याय इदमर्घ्यं दत्तं न मम ॥ इति जलमभिमन्त्र्य उत्क्षिपेत् । तत 'असावादित्योब्रह्म' इति प्रदक्षिणं प्रक्रम्य गायत्रीजपः ।

अनेन सन्ध्योपासनेन परमेश्वरः प्रीयताम् ॥ आचामेत् ।

मन्त्रभाष्यम् ॥

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात ॥

तै० आ० १ प्र० ११ अनु० २ ऋ०

भाष्यम्=वरेण्यं वरणीयं श्रेष्ठं सवितुः प्रेरकस्य सूर्यस्य तत् प्रसिद्धं भर्गः तेजः

२ प्रातः स्थाने सायमिति सायंविशेषः प्रातः पूर्वाभिमुखोर्घ्येदद्यात् सायंप्रत्यङ्मुखः ।

धीमहि ध्यायामः यः सविता नः अस्माकं धियः बुद्धीः, प्रचोदयात् प्रकर्षेण प्रेरयति । तस्य सवितुरिति पूर्वत्रान्वयः ॥

सवादित्यो ब्रह्मेति ब्रह्मैव सन् ब्रह्माप्येति य एवं वेद ।

भाष्यम्—यः पुमान् आदित्यो ब्रह्मेतिवेद स पुमान् पूर्वमजानानोपि स्वयं वस्तुतः ब्रह्मैवसन् प्रागद्वेदनादज्ञानापगमेसति स्वानुभवेनापि ब्रह्म प्राप्नोति । तै॰ आ॰ २ प्र॰ २ अ॰ ।

इति ।

संध्योपासनविचारः ॥

'सूत्रयामास आश्वलायनः नित्योदकः सन्ध्यामुपासीतेति' सन्ध्या=संधौ क्रियमाणः कर्मविशेषः । यौ अहोरात्रयोः सन्धी यश्च पूर्वाह्णापराह्णयोस्तत्कालभवा देवता सन्ध्या तामुपासीत इति गृह्यपरिशिष्टे ॥ १।२।

चोदनाद्वयघटितेयं संध्योपासना विहिता आचार्येण । उपासीत, जपेत् इति च अनेन नित्योदकइति पदेन अर्घ्यदानं तैत्तिरीयारण्यकस्थं गृह्यते, न मार्जनादि । नित्योदकः—कृतोदककार्यइत्यर्थः असावादित्यो ब्रह्मेति प्रधानतमं ध्यानमेवादित्यविशेष्यकाभेदसंसर्गकब्रह्मप्रकारकं ॥ जपोप्यङ्गं किंपुनर्मार्जनाद्यङ्गमित्यत्र वक्तव्यम् । नापि च सूत्रकारेणोक्तं । नित्योदकपदेन च अर्घ्यमात्रं ग्राह्यं ॥ उभयसाधारण्यात् नित्योदकपदस्य । प्रधानं हि तत् । गायत्र्याभिमन्त्रितजलोत्क्षेपणं अर्घ्यशब्दार्थः तच्चैकदेव श्रुतौ विहितं तथैव श्रुतत्वात् एवं च अर्घ्यप्रदानं, ध्यानं, जपः एतावान् संध्याशब्दार्थः मध्याह्नसंध्याऽस्मत्सूत्रे नोक्ता अस्यां श्रुतावपि नास्ति ॥

संध्यास्वरूपमाह श्रुतिः ॥ 'रक्षांसि ह वा पुरोनुवाके तपोग्रमतिष्ठन्त तान्प्रजापति र्वरेणोपामन्त्रयत तानि वरमवृणीतादित्यो नो योद्धा इति तान् प्रजापतिरब्रवीद्योधयध्वमिति तस्मादुत्तिष्ठन्त ह वा तानि रक्षांस्यादित्यं योधयन्ति यावदस्तमन्वगात्तानि ह वा एतानि रक्षाँसि गायत्रियाभिमन्त्रितेनाम्भसा शाम्यन्ति तदु ह वा एते ब्रह्मवादिनः पूर्वाभिमुखाः सन्ध्यायां गायत्रियाभिमन्त्रिता आपऊर्ध्वं विक्षिपन्ति ता आपो वज्रीभूत्वा तानि रक्षांसि मन्देहारुणे द्वीपे प्रक्षिपन्ति यत्प्रदक्षिणं प्रक्रमन्ति तेन पाप्मानमवधून्वन्ति उद्यन्तमस्तं यन्तमादित्यमभिध्यायन् कुर्वन् ब्राह्मणो विद्वान् सकलं भद्रमश्नुते सवादित्यो ब्रह्मेति ब्रह्मैव सन् ब्रह्माप्येति

य एवं वेद ॥ तै० आ० २।२। अम्भसा शाम्यन्ति, इत्यन्तेन जलं प्रशंस्य 'तदु ह वा इत्यनेन अर्घ्यं विधत्ते । यत्प्रदक्षिणमित्यादिना प्रदक्षिणावृत्तिं विधत्ते ॥ उद्यन्तमस्तं यन्तमित्यादिना ध्यानं विधत्ते ॥ ब्रह्मैव सन्निति वेदनप्रशंसा ॥ इतः परं विचार्यानुष्ठेयमिति सर्वत्रासनुन्धेयम् ।

इति सन्ध्याविचारः ॥

अत्र यज्ञोपवीती, ब्रह्मयज्ञप्रकरणे च यज्ञोपवीतीति श्रूयते तदर्थं तद्विचारः प्रस्तूयते ।

यज्ञोपवीतविचारः ॥

यज्ञार्थमुपवीतम् यज्ञोपवीतं, यज्ञशब्दोत्रपाकयज्ञ, हविर्यज्ञ, ज्योतिष्टोमादियज्ञवाचकः उपवीतं नाम—अग्रे वक्ष्यते । तदेतदाश्वलायनेसूत्रे नास्तीति व्यवहरन्त्यस्मदीयाः केचन । तत्सूत्राज्ञानमूलकमिति वयं मन्यामहे श्रुतौ विद्यमानमेव हि प्रतिपादयितव्यमिति आचार्यस्य शैली लक्ष्यते विज्ञायतेइति तत्र तत्र सूत्रितत्वात् । नित्यकर्मणि चैतदावश्यकमित्यपि अनेन ज्ञायते यतो हि नित्यकर्मस्वेव यज्ञोपवीतीत्युपलभ्यते तन्मूलकं काम्येष्वपि सर्वथा कर्माङ्गत्वेन प्रतीतिः समाख्ययापि कर्मार्थतैव प्रतीयते ॥ पुरुषार्थमपि केचिदनुजानते एवं सूत्रयता यज्ञोपवीतं नोक्तमिति कथं स्यात् । हन्त विद्यमानमपि यज्ञोपवीतं सूत्रे न ज्ञायतेऽस्मदीयैरिति । एवं ह्याचार्यसूत्रम् । "अहतेन वाससा संवीतम्" किमर्थमिदमहतं वासः, यज्ञोपवीतार्थमिति ब्रूमः । तथा चाम्नायते तैत्तिरीयारण्यके प्र० २।२ अ० "सह वै देवानाञ्चासुराणाञ्च यज्ञौ प्रततावास्तां वयं स्वर्गं लोकमेष्यामो वयमेष्यामइति तेऽसुराः सन्नह्य सहसैवाचरन् ब्रह्मचर्येण तपसैव देवास्तेऽसुरा अमुह्यꣳस्ते न प्राजानꣳस्ते पराभवन्ते न स्वर्गं लोकमायन् प्रसृतेन वै यज्ञेन देवाः स्वर्गं लोकमायन्नप्रसृतेनासुरान् पराभावयन् प्रसृतो ह वै यज्ञोपवीतिनो यज्ञोऽप्रसृतोऽनुपवीतिनो यत्किंच ब्राह्मणो यज्ञोपवीत्यधीते यजतएव तत् तस्माद्यज्ञोपवीत्येवाधीयीत याजयेद्यजेत वा यज्ञस्य प्रसृत्या अजिनं वासो वा दक्षिणत उपवीय (त) दक्षिणं बाहुमुद्धरतेऽवधत्ते सव्यमिति यज्ञोपवीतमेतदेव विपरीतं प्राचीनावीतं संवीतं मानुषं, २।१। तै० आ० ॥ भाष्यम् अध्ययनाङ्गत्वेन यज्ञोपवीतं विधातुं तत्प्रशंसार्थमादावुपाख्यानमाह । सह वै० पराभावयन्निति वयमेवाधिपत्यनिमित्तं स्वर्गंगमिष्याम इत्येवं देवाः यदा यज्ञे प्रवृत्ताः तदानीमेव असुरास्तथैवा-

भिप्रेत्य यज्ञे प्रवृत्ताः तावुभौ यज्ञौ प्रततौ विस्तीर्णौ आस्तां, तदानीं तथाविधा असुराः, सन्नह्य कृतसन्नाहाः सहसैव भुजबलमात्रेणैव आचरन् यज्ञमारब्धवन्तः, ते मौर्ख्यात् ब्रह्मचर्यादिनियमं नादृतवन्तः, देवास्तु ब्रह्मचर्यात् समस्ततपसा युक्ताः सन्तो यथाशास्त्रमनुष्ठितवन्तः, ते मूर्खा असुराः, अमुह्यन् मौर्ख्यपारवश्येन मोहं प्राप्ताः, मूढाः सन्तः कर्तव्याकर्तव्यं किमपि न प्राजानन् ततो यथाशास्त्रानुष्ठानाभावात् स्वर्गं न प्राप्ताः अप्रसृतेनयज्ञेन युक्तानसुरान् पराभावयन् अथ प्रसृताप्रसृतयोः स्वरूपं विभजते--प्रसृतो ह वै० यजत एव तत् इति, यज्ञोपवीतयुक्तस्य योऽयं यज्ञः सोयं गुणाधिक्यात् प्रसृतः प्रकर्षेण वृत्त इत्युच्यते । अनुपवीतिनः, यज्ञोपवीतरहितस्य यज्ञः गुणहीनत्वात् अप्रसृतइत्युच्यते, किञ्च ब्राह्मणः यज्ञोपवीतयुक्तः सन् यत्किमपि, अधीते तत्सर्वं यागानुष्ठानसमं भवति, तदेवं यज्ञोपवीतं प्रशस्याध्ययनोपयोगं वदन् यज्ञानामङ्गत्वेन विधत्ते, तस्माद्यज्ञोपवीत्येवाधीयीत० प्रसृत्यै इति प्रसृतिः=प्रकृष्टगुणयुक्तत्वम् । यज्ञोपवीतसाधनं द्रव्यं विधत्ते अजिनं० उपवीय कृष्णाजिनवस्त्रयोरन्यतरद्द्रव्यं दक्षिणभागे लम्बमानं कृत्वाऽधीयीतेत्यर्थः ॥ एवमध्ययनादावनेनैव वाक्येन विहितस्यापि, यज्ञोपवीतस्य दर्शपूर्णमासप्रकरणे निवीतं मनुष्याणामित्यत्र पुनर्विधानं तदतिक्रमे तत्रत्यविशेषप्रायश्चित्तार्थम् । यज्ञोपवीतप्रसङ्गात् त्रयाणामपि लक्षणं दर्शयति । दक्षिणं बाहुमुद्धरते० संवीतं मानुषं इति, दक्षिणं बाहुमूर्ध्वं धृत्वा सव्ये बाहौ लम्बमाने सति यद्वेष्टनं तत् यज्ञोपवीतं एतदेव विपरीतं सव्यबाहोरूर्ध्वं धारणं दक्षिणबाहोर्लम्बमानं चेद्भवति तद् वेष्टनं प्राचीनावीतमित्युच्यते, बाह्वोरुभयोरप्यधो लम्बमानयोरंसद्वयसमं संवीतं तदेतत् मानुषं मनुष्याणामृषीणां च यज्ञोपवीतं, देवानां यथा प्राचीनावीतं पितॄणां तद्वत् इति--पूर्वमीमांसायामपि ३।४।१ इत्यत्रायं विचारः कृतः सोप्यत्रानुसन्धेयः, ॥ " वस्त्रं यज्ञोपवीतार्थे सूत्रं वा त्रिगुणीकृतं " इति स्मृतिं पूर्वपक्षीकृत्य अस्तु वा नियमेनापि तत्प्राप्तिरिति सिद्धातं कृत्वा ब्रूते सोमनाथः । स एव पुनराह " निवीतं कण्ठलम्बितया धारणं, कर्मस्वव्यग्रत्वार्थम्, कटिसमीपे परिकरबन्धनं वा, तत्र कण्ठलम्बितया, धारणमिति पक्षे ऋष्यात्मक मनुष्यप्रधानकर्मसम्बधित्वेन शास्त्रप्राप्तं निवीतं, स्तुत्यालम्बनं परिकरबंधनं निव्यानमितिपक्षे तु लौकिककर्मसाधारण्याल्लोकत एव प्राप्तिः, तत्रापि नवतन्तुकसूत्रस्यैव विन्यासविशेषो निवीतमिति पक्षे उपव्ययत इत्यनेन विधीयमानोपवीतवन्निवीतस्य वासोवि न्यासात्मकत्वाभावेपि विन्यासविशेषमात्रेण स्तुत्यालम्बनत्वम् । अजिनवासः सूत्राणामन्यतमस्य विन्यासविशेषो निव्यानमिति पक्षे तु न काप्यनुपपत्तिः,॥ एवं च यज्ञोपवीती हि देवेभ्यो इत्यत्रापि यज्ञोपवीतशब्देनापि वासोविन्यासविशेष एवाभिधीयतइत्याश्रित्यायं विचारः प्रवर्तितः ॥ नवतन्तुकात्रिसूत्रक, त्रिवृद्ब्रह्मग्रन्थि-

कब्रह्मसूत्राभिधानेऽस्य विचारस्यानुपपत्तेरिति ध्येयं ॥ सूत्रात्पूर्वं विद्यमानाः श्रुतय एव तैः प्रकारान्तरेण सूत्र्यते । अतोऽत्र " अजिनं वासो वा " इत्यादि श्रुतं तदेव " अहतेन वाससा संवीतं ऐणेयेनाजिनेन वा इति सूत्रयताऽऽश्वलायनेन यज्ञोपवीतं न सूत्रितमिति वदन्तः प्रत्याख्याता वेदितव्याः ॥ " वासांसि वसीरन्नित्यनेन कौपीनमपि सूत्रितं इदानीं इतः पूर्वं वा बहुकालं वासोधारणपद्धतिर्लुप्तप्राया त्रिवृत्सूत्रविषयिणी प्रचलिता स्मृतौ च तदेवोच्यते । अथवा स्यात् कस्यांचन श्रुतौ तदपि गोभिलगृह्ये तथा दर्शनात् । अस्तु नामैषा प्रणालिकवार्ता, आश्वलायनसूत्रं तु श्रुत्या संगतमित्यत्रालं पल्लवितेन तथा चायं विचारस्तावद्यथासम्भवं प्रकटीकुर्महे, यथा सर्वं समंजसं स्यात् ॥

अन्यदपि धर्माब्धौ=आयुष्कामस्य त्र्यधिकानि बहूनि यज्ञोपवीतानि अन्यच —

तैत्तिरीयाः कठाः काण्वाश्चरका वाजसनेयिनः ॥
अभ्यङ्गे चोदधिस्नाने मातापित्रोर्मृतेऽहनि ॥
कण्ठादुत्तार्य सूत्रं तु कुर्युर्वै क्षालनं द्विजाः ॥ इति ।

इतः परमपि मीमांसकैर्निर्णीयानुष्ठेयमिति अलम् ।

इति यज्ञोपवीतविचारसंक्षेपः ॥ अत्र नवीनमीमांसकाः ।

'दर्शपूर्णमासयोःश्रूयते, 'निवीतंमनुष्याणां प्राचीनावीतं पितॄणामुपवीतं देवानामुपव्ययते देवलक्ष्ममेव तत्कुरुते तत्र—पञ्चधासंशयशरीरम् ।

१ निवीतं मनुष्याणामिति किमयं मनुष्यधर्मः ?

२ उतकर्मधर्मः ?

३ अथकर्मयुक्तमनुष्यधर्मः, ?

४ अथवा प्रकरणे यन्मनुष्यप्रधानमन्वाहार्यपचनादिकर्म तस्यधर्मः ?

---

१ निवीतम्—व्येञ्संवरणे इति भावेकर्मणिनिष्ठावा । अनेन वेञ्तन्तुसंताने इति गृहीते अजिने अनुपपत्तिं प्रदर्शयन्तो व्याख्याताः अजिने वाससि संवरणं संभवत्येव, सूत्रमयेनूभयथा नुपपत्तिस्तदवस्थैवेति ।

५ आहोस्वित्प्रकरणे यन्मनुष्यपूजात्मकमातिथ्यादिकर्म तस्यधर्मः ? इति अत्रान्तिमः प्रकारएवक्त्वाचिन्तया सिद्धान्तितः। पुनश्चशेऽप्यर्थवाद इति मत्वा-परमसिद्धान्तमाह। "अर्थवादोवाप्रकरणात् ३।४।८ जै०। इत्यादिना, स्मर्तारोऽपि ज्ञात्वैवनिबध्नन्ति। यज्ञोपवीती दैवानि कर्माणि, कुर्वीत, प्राचीनावीती पित्र्याणि, निवीती मानुषाणि, तत्रनिवीतकार्याणि, परिगणयति बौधायनः। 'निवीतकार्यांण्यृषीणां, तर्पणं, व्यवायः, प्रजासंस्कारा अन्यत्रहोमान्मूत्रपुरीषोत्सर्गः, प्रेतोद्वहनं-यानिचान्यानि मनुष्यकार्याणि इति, अतिथिपूजातु—दैवकर्मैव 'सएकः प्राजापत्यः कुटुम्बिनो यज्ञो नित्यप्रततः, इत्यादिना आतिथ्यकर्मणः प्रजापतिदेवताकत्वावगमात्। अतिथिस्तु, आहवनीयादिवद्धविःप्रक्षेपाधारमात्रं, इति तत्रोपवीतमेवेति। एवं नित्यभोजनेपि आद्यानां, पञ्चानां, ग्रासानां प्राणादिदेवत्यत्वात् "तूर्ष्णीभूयोव्रतयेत्प्रजापतिं मनसा ध्यायन्' इति तदितरग्रासानां प्रजापतिदेवत्यत्वात् इदमेवाभिप्रेत्य स्मरन्ति, उपासने गुरूणां वृद्धानामतिथीनांहोमे जप्यकर्मणि भोजन आचमने स्वाध्यायेच यज्ञोपवीतीस्यात् इत्यादि। तत्रैवं निर्णयः—नित्ययज्ञोपवीती इति स्मृतिमूलश्रुत्या विहितमेकं यज्ञोपवीतं पुरुषार्थतयानित्यधार्यम्। यज्ञोपवीत्येवाधीयीतजयेद्यजेत इति तैत्तिरीयश्रुत्या यज्ञोपवीती दैवानि कर्माणि-करोति इतिस्मृतिमूलश्रुत्या च सर्वार्थतया विहितमन्यद्यज्ञोपवीतम्। तदेत्पुरुषार्थेन यज्ञोपवीतेन समुच्चीयते, क्रतुपुरुषार्थतया संयोगभेदात्। बौधायनसूत्रे 'नित्यमित्याचार्याः, संप्रतिपन्नाः कथमेतदुच्यते' इति कर्मसु नित्ययज्ञोपवीती इत्येव सिद्धे पुनस्तद्विधानं व्यर्थमित्याक्षिप्य 'अजिनं, वासः सूत्रं, वा द्वितीयं यस्ययद्भवति तेन स उपव्ययते, इति समुच्चयवचनाच्च, टुप्टीकावार्तिके यज्ञोपवीतेनोपवीतस्याविरोधात्समुच्चय इति तत्त्वंतु क्रत्वर्थपुरुषार्थत्वेन विभाग इति सर्वमनवद्यम्।

समावर्तनमन्त्राणि ॥

अथैतान्युपकल्पयीत समावर्त्यमाने मणिं कुण्डले वस्त्रयुगं छत्रमुपानद्युगं दण्डं स्रजमुन्मर्दनमनुलेपनमाञ्जनमुष्णीषमित्यात्मने चाचार्याय च ॥ १ ॥

उक्तोऽर्थः। उपकल्पयीतेतिशब्दोऽयं छान्दसः। समावर्तनं नाम संस्कारः तेन संस्क्रियमाण इत्यर्थः। अर्थादेवोपकल्पने सिद्धे उपकल्पनवचनमत्रात्मने चाचार्याय च एतान्येकादश द्रव्याण्युपकल्पयेदिति विधानार्थम् ॥ १ ॥

यद्युभयोर्न विन्देताचार्यायैव ॥ २ ॥

यद्युभयोर्न लभेत तदाचार्यायैव केवलायोपकल्पयेत् ॥ २ ॥

समिधं त्वाहरेदपराजितायां दिशि यज्ञियस्य वृक्षस्य ॥ ३ ॥

यज्ञियस्य वृक्षस्य या अपराजिता दिक् ततो गृहीत्वा आहरेत् । यज्ञियस्येति वचनं होमार्थेयं समिदिति ज्ञापयितुम् । तेन तिष्ठन्समिधमादध्यादित्यत्र इमामादध्यादिति सिद्धम् ॥ ३ ॥

आर्द्रामन्नाद्यकामः पुष्टिकामस्तेजस्कामो वा ब्रह्मवर्चसकामः उपवाताम् ॥ ४ ॥

शुष्कामित्यर्थः ॥ ४ ॥

उभयीमुभयकामः ॥ ५ ॥

आर्द्रशुष्कामित्यर्थः । एको भाग आर्द्रः । अपरो भागः शुष्कः ॥ ५ ॥

उपरि समिधं कृत्वा गामन्नं च ब्राह्मणेभ्यः प्रदाय गौदानिकं कर्म कुर्वीत ॥ ६ ॥

आहृतां समिधमुपरि निदध्यान्न भूमौ । ततो ब्राह्मणेभ्यो गां दक्षिणां दद्यात् । कर्मांगत्वेन भोजनं च देयम् । ततो गोदानोक्तं कर्मेहापि कुर्यात् । कर्मग्रहणं कर्मैव कुर्यान्नाप्लुत्य वाग्यत इत्यादिनियमाः कार्या इत्येवमर्थम् । इदं कर्म स्वयमेव करोति समावर्त्यमाने इत्यधिकारादूहदर्शनाच्च ॥ ७ ॥

आत्मनि मन्त्रान्त्संनमयेत् ॥ ७ ॥

मन्त्रानात्मवाचकान्कुर्यादित्यर्थः । ऊह्यानि ब्रूमः । 'ओषधे त्रायस्व मां । स्वधिते मा माहिंसीः वपतेदं ममायुष्मान् । यथासं ते नम आयुष इत्युभयत्र । शिरो मुखं माम आयुः प्रमोषीः, इति ॥ ७ ॥

एकक्रीतकेन ॥ ८ ॥

उन्मर्दनं कुर्वीतेति शेषः । करञ्जबीजस्य यत्रैकं बीजं तदेकक्रीतकम् । तत्पेषयित्वा तेनोन्मर्दनं कारयेत् ॥ ८ ॥

शीतोष्णाभिरद्भिः स्नात्वा । युवं वस्त्राणि पीवसा वसाथे

इत्यहते वाससी आच्छाद्य । अश्मनस्तेजोऽसि चक्षुर्मे पाहीति चक्षुषी आञ्जयीत ॥ ९ ॥

प्रतिवस्त्रं मन्त्रावृत्तिः । द्विवचनस्य देवतापरत्वात् । सव्यं पूर्वमाञ्जयित्व ततो दक्षिणमाञ्जयीत । 'सव्यं मनुष्या अञ्जते प्रथमं' इति श्रुतेः । प्रतिचक्षुर्मन्त्रावृत्तिः ॥ ९ ॥

अश्मनस्तेजोऽसि श्रोत्रं मे पाहीति कुण्डले आबध्नीत ॥ १० ॥

अनेन कुण्डले आबध्नीत । सुवर्णकुण्डले इत्यर्थः । अत्र दक्षिणं पूर्वं पश्चात्सव्यम् । मन्त्रावृत्तिरुक्ता ॥ १० ॥

अनुलेपनेन पाणी प्रलिप्य मुखमग्रे ब्राह्मणोऽनुलिम्पेत । बाहू राजन्यः उदरं वैश्यः । उपस्थं स्त्री । ऊरू सरणजीविनः ॥ ११ ॥

पश्चाद्गात्राणि । कुतः । अग्रेवचनात् । अनुलेपनं कुंकुमादि । बाहू राजन्यः अग्रेऽनुलिम्पेत् । उदरं वैश्यः अग्रेऽनुलिम्पेत् । उपस्थं स्त्री अग्रेऽनुलिम्पेत् । ऊरू सरणजीविनः अग्रेऽनुलिम्पेरन् । अयं विधिः सार्वत्रिकः । कुतः स्त्रीविधानात् ॥ ११ ॥

अनार्ताऽस्यनार्तोऽहं भूयासमिति स्रजमपि बध्नीत न मालोक्तां ॥ १२ ॥

मालेत्युक्तां स्रजमपि न बध्नीत ॥ १२ ॥

मालेति चेद्ब्रूयुः स्रगित्यभिधापयीत ॥ १३ ॥

यद्यज्ञानान्मालेति ब्रूयुस्ततः स्रगित्यभिधाय्य बध्नीत ॥ १३ ॥

देवानां प्रतिष्ठे स्थः दिवश्छन्नासीति छत्रमादत्ते ॥ १४ ॥

'उपानहौ चर्ममय्यौ ते आतिष्ठेत्' इत्युपानहावास्थाय सकृन्मन्त्रः । द्विवचनात् । ततश्छत्रमादत्ते ॥ १४ ॥

---

१ शावसामग्रीविक्रेतारः ।

२ भोगं (उपानदादि) चर्मणाकुर्वीतेति शांवत्य आचार्यो मन्यते ।

वेणुरसि वानस्पत्योऽसि सर्वतो मा पाहीति वैणवं दण्डम् ॥१५॥

आदत्ते ॥ १५ ॥

आयुष्यमिति सूक्तेन मणिं कण्ठे प्रतिमुच्योष्णीषं कृत्वा तिष्ठन्त्समिधोऽभ्यादध्यात् ॥ १६ ॥

आयुष्यमिति सूक्तग्रहणमायुष्यमित्येतावान्मन्त्र इति शंकानिवृत्यर्थम् । कुतः शंका । वाक्यस्य परिपूर्णत्वात् । आयुष्यमिति आयुष्करमित्यर्थः । तेन 'नेजमेष' इत्यस्य खिलत्वेऽपि सूक्तग्रहणं सिद्धम् । मणिः सुवर्णमयः । उष्णीषं कृत्वा । अहतने वाससा शिरो वेष्टयेत्यर्थः । तिष्ठन्ग्रहणमन्यत्रासीनस्य कर्माणि भवन्तीति ज्ञापनार्थम् ॥ १६ ॥

स्मृतं निन्दा च विद्या च श्रद्धा प्रज्ञा च पञ्चमी । इष्टं दत्तमधीतं च कृतं सत्यं श्रुतं व्रतम् । यदग्ने सेन्द्रस्य सप्रजापतिकस्य सऋषिकस्य सऋाषराजन्यस्य सपितृकस्य सपितृराजन्यस्य समनुष्यस्य समनुष्यराजन्यस्य साकाशस्य सातीकाशस्य सानूकाशस्य सप्रतीकाशस्य सदेवमनुष्यस्य सगन्धर्वाप्सरस्कस्य सहारण्यैश्च पशुभिर्ग्राम्यैश्च यन्म आत्मन आत्मनि व्रतं तन्मेसर्वव्रतमिदमहमग्ने सर्वव्रतो भवामि स्वाहेति ॥ १७ ॥

स्मृतं च मे अस्मृतं च मे तन्म उभयव्रतामिति द्वादशाप्येवमेवोक्त्वा । ततो यदग्न इत्यादि यथासूत्रमित्येवमुपदिशन्ति । उपानहौ विमृज्य समिदाधानं कार्यम् । तथाच गौतमः । 'सोपानत्क आसनाभिवादननमस्कारान्वर्जयेत्' इति ॥१७॥

ममाग्ने वर्च इति प्रत्यृचं समिधोऽभ्यादध्यात् ॥ १८ ॥

अत्र खिलस्यापि ग्रहणं भवति । अथैतस्य समाम्नायस्येत्यत्र समाम्नायग्रहणस्य वितानविशेषणत्वात् । 'समाम्नायस्य विताने' इति । कुतः एतत् । सूक्ते खिलानां पाठादिह च प्रतीकग्रहणात् तस्माद्दशभिर्होम इति सिद्धम् । प्रत्यृचमिति व्याख्यातम् । आदध्यादिति प्रकृते पुनरादध्यादिति वचनं पूर्वस्याधिकारनिवृत्त्यर्थम् । तेनोपविश्यादध्यान्न तिष्ठन् । स्विष्टकृदादिहोमशेषं समापयेत् ॥ १८ ॥

---

२ एतानि परिगणितानि अतः समिदाधानं तैथैव कुर्वतो न दोषः ।

यत्रैनं पूजयिष्यन्तो भवन्ति तत्रैतां रात्रीं वसेत् ॥ १९ ॥

यत्रात्मानं मधुपर्केण पूजयन्ति तत्रैतां रात्रिं वसेद्वसतिं कुर्यात् । कुत एतत् । स्नातकायोपस्थितायेति वचनान्मधुपर्केण पूजनमिति लब्धम् ॥ १९ ॥

अस्य कालमाह—

विद्यान्ते गुरुमर्थेन निमन्त्र्य कृत्वाऽनुज्ञातस्य वा स्नानम् ॥ २० ॥

विद्यांते गुरुमर्थेन निमन्त्रयते 'कमर्थमहं ते करवाणि' इति । गुरुर्यमर्थमाह तं कृत्वा स्नानं करोति । अथवाऽनुज्ञातः स्नायात् । स्नानं समावर्तनमित्यर्थः । विद्यान्त इति व्याख्यातं प्राक् ॥ २० ॥

तस्यैतानि व्रतानि भवन्ति ॥ २१ ॥

उपदेशादेव व्रतत्वे सिद्धे इदं वचनं नक्तं न स्नास्यामीत्येवं संकल्पयेदित्येवमर्थम् ॥ २१ ॥

न नक्तं स्नायात् । न नग्नः स्नायात् । न नग्नः शयीत न नग्नां स्त्रियमीक्षेतान्यत्र मैथुनात् । वर्षति न धावेत् ॥२२॥

द्रुतगमनप्रतिषेधः ॥ २२ ॥

न वृक्षमारोहेत् न कूपमवरोहेत् । न बाहुभ्यां नदीं तरेत् । न संशयमभ्यापद्येत ॥ २३ ॥

अन्यांश्च प्राणसंशयान्नाभ्यापद्येत । यस्मादित्थं श्रूयत इत्यर्थः । वर्षति न धावेदित्यादिप्रतिषेधोऽस्य प्राणसंशयाभ्यापादनप्रतिषेधत्वज्ञापनार्थः । अर्थसंशयाभ्यापादने न दोषः ॥ २३ ॥

इति समावर्तनसूत्राणि ॥

समावर्तनसंस्कारप्रयोगः ॥

आचम्य गृहस्थाश्रमान्तरप्राप्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थम् समावर्तनं करिष्ये ॥ अग्निप्रतिष्ठापनान्तं कृत्वा, अस्मिन्नन्वाहितेऽग्नौ, आघारावाज्येनेत्यंतमुक्त्वा, अग्निं, वायुं सूर्यं, प्रजापतिं चैताआज्येन, अग्निमूर्ध्वसमिधा, विश्वान्देवान् दशसमिद्भिः,

शेषेण स्विष्टकृतमित्यादि सद्योयक्ष्ये ॥ इत्यंतमुक्त्वा समित्त्रयमग्नावाधाय, पूर्णपात्र-निधानान्तं पुरस्तनतन्त्रं अनुष्ठाय उदगग्नेरास्तीर्णदर्भेषु, व्रीहियवमाषतिलैः पृथक् पूरितानि चत्वारिशरावाणि आसादयेत् । एकस्मिन् शरावे शमीपर्णानि, अपर-स्मिन्नानडुहं गोमयमासादयेत् ततोऽन्यः एकविंशतिकुशाङ्कुरान् दधानः मातु-र्दक्षिणतस्तिष्ठेत् । ततो ब्रह्मचारी पुरस्तनतन्त्रं आधारान्तं कृत्वा ।

भूः स्वाहा	अग्नय इदं न मम ।
भुवः स्वाहा	वायव इदं न मम ।
स्वः स्वाहा	सूर्याय इदं न मम ।
भूर्भुवः स्वः स्वाहा—	प्रजापतय इदं न मम ।

ततोन्यः शीतोष्णवारिणी पात्राभ्यां पृथक् आनीय बटोः पश्चिमे देशे स्थित्वा तदुदकमन्यस्मिन्पात्रे ॥

उष्णेन वायउदकेनेहि ॥

इति मन्त्रेण युगपन्निनीय तदेकदेशं गृहीत्वा नवनीतेन दध्ना वा मिश्रयित्वा ब्रह्मचारिणः श्मश्रुप्रदेशमारभ्य प्रदक्षिणम्, ।

अदितिः श्मश्रूणि वपत्वापउन्दन्तु वर्चसे ॥

इति मन्त्रं प्रतिक्लेदनमावर्तयन् त्रिवारं श्मश्रूण्येव क्लेदयित्वा स्वहस्तस्थितेष्वेक-विंशतिकुशाङ्कुरेषु त्रीनंकुरानादाय दक्षिणश्मश्रुभागे ब्रह्मचार्यभिमुखं पश्चिमाग्रं निदध्यात् तदा ब्रह्मचारी ।

ओषधे त्रायस्व माम् ॥

इति पठेत् । ततस्तेषु कुशाङ्कुरेषु लौहं क्षुरं निदध्यात् । ततो ब्रह्मचारी ।

स्वधिते मा मा हिंसीः ।

येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् ॥

तेन ब्रह्माणो वपतेदं म आयुष्मान् जरदष्टिर्यथासम् ॥

इति जपेत् । ततो ब्रह्मचारिणा येनावपदिति मन्त्रे उच्चरितेऽन्यः सश्मश्रुकान् कुशाङ्कुरान् छित्वा प्रागग्रान् शरावस्थशमीपर्णैः सहैकीकृत्य मातुः करे दद्यात् । सा च तान् सश्मश्रुशमीपर्णकुशाङ्कुरान् आनडुहे गोमये निदध्यात् । एवं द्विती-यादिछेदनेषु कुशाङ्कुरत्रयनिधानादि समन्त्रकं कार्यम् छेदनमन्त्रे विशेषो वक्ष्यते ॥

येन धाता बृहस्पतेरग्नेरिन्द्रस्य चायुषे वपत् ।

तेन म आयुषे वपामि सुश्लोक्याय स्वस्तये ॥ इति द्वितीयम् ।

येनभूयश्चरात्र्यां ज्योक्चपश्यामिसूर्यम् ॥

तेन म आयुषे वपामि सुश्लोक्याय स्वस्तये ॥ इति तृतीयम् ।

चतुर्थे तु येनावपत्० येनधाता०येनभूयश्चेति त्रयोपि मन्त्राः ॥ एवं दक्षिणश्मश्रुभागे चत्वारिछेदनानि कृत्वोत्तरश्मश्रुभागेष्वनया रीत्याद्यानि त्रीणि छेदनानि प्रत्येकम् मन्त्रैः कुर्यात् ॥ नतु सर्वमन्त्रैश्चतुर्थम् । ततः क्षुरधारां निमृजेत् ।

यत्क्षुरेण मर्चयता सुपेशसा वप्ता वपसि श्मश्रूणि शुन्धि शिरो मुखं मा म आयुः प्रमोषीः ॥

ततो नापितं प्रैषेणानुशास्य शीतोष्णाभिरद्भिरबर्थे कुर्वाणोऽक्षण्वन् कुशलीकुरु ।

एवं केशश्मश्रुलोमनखान्युदक्संस्थानि वापयीत तत एकक्लीतकेन उन्मर्दयित्वा शीतोष्णाभिरद्भिः स्नात्वा, ।

युवं वस्त्राणि पीवसावसाथे युवोरछिद्रामंतवोह सर्गाः ।

अवातिरतमनृतानि विश्वऋतेन मित्रावरुणा सचेथे ॥

इत्यहते वाससी आच्छाद्य,

अश्मनस्तेजोसि चक्षुर्मे पाहि

इति चक्षुषी आञ्जयीत ।

अश्मनस्तेजोसि श्रोत्रं मे पाहि

इति कुण्डले आबध्नीत, ततोनुलेपनेन पाणी प्रलिप्य मुखमग्रे ब्राह्मणोऽनुलिम्पेत । ततः ।

अनार्तास्यनार्तोहं भूयासम्

इति स्रजं बध्द्वा,

---

१ करञ्जबीजस्य यत्रैकं बीजं तत्

देवानां प्रतिष्ठे स्थः सर्वतो मा पातम्

इत्युपानहौ आस्थाय,

दिवश्छद्मासि ॥

इति छत्रमादत्ते ।

वेणुरसि वानस्पत्योसि सर्वतो मा पाहि

इति वैणवं दण्डं गृण्हीयात् ।

आयुष्यं वर्चस्यं रायस्पोषमौद्भिदम् ।
इदं हिरण्यं वर्चस्व जैत्रायाविशतादिमाम् ॥
उच्चैर्वाजिपृतनाषाट् सभासाहं धनंजयम् ।
सर्वाः समग्रा ऋद्धयो हिरण्येस्मिन्त्समाहिताः ॥
शुनमहं हिरण्यस्य पितुर्नामेव जग्रभ ।
तेन मां सूर्यत्वचमकरं पूरुषु प्रियम् ॥
सम्राजं च विराजं चाभिष्टिर्या च मे ध्रुवा ।
लक्ष्मी राष्ट्रस्य या मुखे तया मामिन्द्र संसृज ॥
अग्नेः प्रजातं परियाद्धिरण्यममृतं जज्ञे अधिमर्त्येषु ।
य एनद्वेद स इदेनमर्हति जरामृत्युर्भवति यो बिभर्ति ॥
यद्वेद राजा वरुणो यदु देवी सरस्वती ।
इन्द्रो यद्वृत्रहा वेद तन्मे वर्चस आयुषे ॥
न तद्रक्षांसि न पिशाचाश्चरन्ति देवानामोजः
प्रथमजं ह्येश्तत् ॥
यो बिभर्ति दाक्षायणाहिरण्यं स देवेषु कृणुते दीर्घ-
मायुः स मनुष्येषु कृणुते दीर्घमायुः ॥
यदा बध्नन्दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमाना ॥
तन्न आबध्नामि शतशारदायायुष्मान्जरदष्टिर्यथासत् ।
घृतादुल्लुप्तं मधुमत्सुवर्णं धनंजयं धरुणं धारयिष्णु ॥
ऋणक् सपत्नादधरांश्च कृण्वदारोह मां महते सौभगाय ॥
प्रियं मा कुरु देवेषु प्रियं राजसु मा कुरु ।
प्रियं विश्वेषु गोप्त्रेषु मयि धेहि रुचारुचम् ॥

अग्निर्येन विराजति सूर्यो येन विराजति ।
विराज्येन विराजति तेनास्मान् ब्रह्मणस्पते
विराज समिधं कुरु ॥

इति कण्ठे मणिं बध्नीयात् ॥ तत उष्णीषं कृत्वा उपरि निहितां समिधं गृहीत्वा, तिष्ठन्नेव[2] समिधोऽभ्यादध्यात् ॥

तत्र मंत्रः—स्मृतं च मे अस्मृतं च मे तन्म उभयव्रतम् ।
निन्दा च मे अनिन्दा च मे तन्म उभयव्रतम् ॥
विद्या च मे अविद्या च मे तन्म उभयव्रतम् ।
श्रद्धा च मे अश्रद्धा च मे तन्म उभयव्रतम् ॥
प्रज्ञा च मे अप्रज्ञा च मे तन्म उभयव्रतम् ।
इष्टं च मे अनिष्टं च मे तन्म उभयव्रतम् ॥
दत्तं च मे अदत्तं च मे तन्म उभयव्रतम् ।
अधीतं च मे अनधीतं च मे तन्म उभयव्रतम् ॥
कृतं च मे अकृतं च मे तन्म उभयव्रतम् ।
सत्यं च मे असत्यं च मे तन्म उभयव्रतम् ॥
श्रुतं च मे अश्रुतं च मे तन्म उभयव्रतम् ।
व्रतं च मे अव्रतं च मे तन्म उभयव्रतम् ॥

यदग्ने सेन्द्रस्य, सप्रजपातिकस्य, सऋषिकस्य, सऋषिराजन्यस्य, सपितृकस्य, सपितृराजन्यस्य, समनुष्यस्य, समनुष्यराजन्यस्य, साकाशस्य, सातीकाशस्य, सानूकाशस्य, सप्रतीकाशस्य, सदेव-मनुष्यस्य, सगंधर्वाप्सरस्कस्य, सहारण्यैश्च पशुभिर्ग्राम्यैश्च यन्म आत्मन आत्मनि व्रतं तन्मे सर्वव्रतमिदमहमग्ने सर्वव्रतोभवामि स्वाहा ॥ अग्नय इदं न मम ॥

इतः परं ऋगन्ते समिधमाधाय स्वाहाकारमुच्चारयेत् ।

ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेंधानास्तन्वं पुषेम
मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेम स्वाहा ॥
मम देवा विहवे सन्तु सर्वइन्द्रवन्तो मरुतो विष्णुरग्निः ।
ममान्तरिक्षमुरुलोकमस्तु मह्यं वातः पवतां कामे अस्मिन्स्वाहा ॥

---

२ वृत्तिकारमतेन्ते पविश्यान्याः समिधोभ्यादध्यादिति ।

मयि देवा द्रविणमायजंतां मय्याशीरस्तु मयि देवहूतिः ।
दैव्या हातारोवनुषंत पूर्वेरिष्टाः स्याम तन्वा सुवीराः स्वाहा ॥
मह्यं यजन्तु मम यानि हव्याकूतिः सत्या मनसो मे अस्तु ।
एनो मानिगां कतमच्चं नाहं विश्वे देवासो अधिवोचतानः स्वाहा ॥
देवीं षळुर्वी रुरुणः कृणोत विश्वे देवास इह वीरयध्वम् ।
माहास्महि प्रजया मातनूभिर्मारधाम द्विषते सोम राजन् स्वाहा ॥
अग्ने मन्युं प्रति नुदन् परेषामदब्धो गोपाः परिपाहि नस्त्वम् ।
प्रत्यंचो यन्तु निगुतः पुनस्तेऽमैषां चित्तं प्रबुधां विनेशत्स्वाहा ॥
धाता धातृऋणां भुवनस्य यस्पतिर्देवं त्रातारमभिमातिषाहम् ।
इमं यज्ञमश्विनोभा बृहस्पतिर्देवाः पांतु यजमानं न्यर्थात्स्वाहा ॥
उरुव्यचा नो महिषः शर्म यंसदस्मिन्हवे पुरुहूतः पुरुक्षुः ।
स नः प्रजायै हर्यश्वमृळयेन्द्रमानोरीरिषोमा परादाः स्वाहा ॥
ये नः सपत्ना अप ते भवंत्विद्राग्निभ्यामवबाधामहे तान् ।
वसवो रुद्रा आदित्या उपरि स्पृशं मोग्रं चेत्तारमधिराजमक्रन् स्वाहा ॥
अर्वाचमिन्द्रममुतो हवामहे यो गोजिद्धनजिदश्वजिद्यः ।
इमं नो यज्ञं विहवे जुषस्वास्य कुल्मो हरिवो मेदिनं त्वा स्वाहा ॥
॥ विश्वेभ्यो देवेभ्य इदं न मम ॥ इतिप्रत्यृचं

एवं पूर्ववदत्रापि त्यागो वक्तव्यः । ततः स्विष्टकृदादि होमशेषं समापयेत् ततो वक्ष्यमाणव्रतानि संकल्पयेत् । न नक्तं स्नामि ॥ न नग्नः स्नामि ॥ न नग्नः शये ॥ न नग्नां स्त्रियमीक्षेऽन्यत्र मैथुनात् ॥ वर्षति न धावामि वृक्षं न रोहामि, कूपं नावरोहामि न बाहुभ्यां नदीं तरेय, प्राणसंशयं नाभ्यापद्ये ॥ आचम्य. अनेन समावर्तनाख्येन कर्मणा परमेश्वरः प्रीयताम् ॥ इतिप्रयोगः

सामग्रीविशेषः

मणिः कण्ठे धारणार्थम्
कुण्डले कर्णे धारणार्थम्
वस्त्रयुगम् धारणप्रावरणार्थंच
छत्रम् आतपवृष्ट्यादिनिवारणाय
उपानद्युगम् दृषच्छिशुकण्टकादिनिवारणार्थम्
दण्डः स्वाभिगुप्त्यै

स्रक्—धारणार्थम्
उन्मर्दनम्—अंगेलापनार्थे
अनुलेपनं—मुखे लापनार्थे–कुंकुमकेशरादि
आञ्जनं—चक्षुषोः स्थापनार्थम्
उष्णीषम्—शिरसो वेष्टनाय
एतानि आत्मने आचार्याय च केवलमाचार्याय वा कल्पयीत
समिधः—एकादश हवनार्थम्
शीतोष्णा आपः—स्नानार्थम्

अन्या सामग्री चौलकर्मण्युक्ता स्थालीपाकोक्ता चात्रानुसंधेया इति

इति सामग्री–

शास्त्रार्थः

मण्यादिधारणं, व्रतसंकल्पादिः प्रधानम्, इतरदङ्गम् अत्र गुरवे प्रवक्ष्यमाण इति विधिं कुतो नानुतिष्ठन्तीति न विद्मः, अस्माभिस्तु नसंगृहीत इत्यत्र मानं तु विध्यन्तरं तत् समावृत्तेनानुष्ठेयं तत् सूत्रे स्पष्टमुक्तत्वाच्च अनुतिष्ठासुस्तथैवानुतिष्ठतु ॥ प्रयोगरत्नेपि न संगृहीत इत्यलं बहुना एतन्मंत्रभाष्यं तु स्पष्टत्वान्न-लिख्यते चौलादौ गतत्वाच्च परस्ताद्वा प्रदर्शयिष्यामः

समावर्तनं नाम–"गुरुगृहवासनियमं ब्रह्मचर्यलक्षणं समाप्य स्वगृहे गमनम् " अत्रैव शीतोष्णाभिरद्भिःस्नात्वेत्युपदेशात्स्नानमित्यपि कर्मणो नामधेयम् उपनीत श्चरितब्रह्मचर्योधीतवेदः आचार्यकुलात् अन्याश्रमं प्रेप्सुर्भवति तस्य स्नानं नाम कर्मोपदिश्यते ॥ स्नानं समावर्तनं अनर्थान्तरम्। भवति च काचन स्मृतिः, " अधीत्य स्नायात् " इति तत्र मीमांसकानां मते एवं विचारः । किम् अध्ययनानन्तरं धर्मजिज्ञासया गुरुगृहेऽवस्थातव्यम् उत गुरुगृहात्समावर्तितव्यमिति= अध्ययनं गुरूच्चारणानूच्चारणं अधीत्य स्नायादिति स्मृतेरध्ययनानन्तरं समावर्तनं विदधानाया गुरुकुलवास्तव्येन विचारकरणे बाधः स्यात् इति प्राप्त आह अर्थ-ज्ञानं संपाद्यैव समावर्तितव्यम् अध्ययनशब्दार्थः अर्थज्ञानपर्यंतमेव वाच्यः । अधीत्य स्नायादित्यत्र तु क्त्वाप्रत्ययात् पूर्वकालत्वमवगतम् नत्वानन्तर्यं इति कुतूहलवृत्तौ= गुर्वनुज्ञा च तत्कर्माङ्गम् निमन्त्रं कृत्वा स्नायात् अनुज्ञातस्य वा स्नानमिति ब्रुवता निमन्त्रेण सह विकल्पोयं नत्वध्ययनेन सह । अथवा यदानुज्ञा तदा वा

त्मायात् गुर्वाज्ञापेक्षापि अपस्यंते इत्यत्र तात्पर्यम्। समावृत्तो ब्रह्मचारिकल्पेनेत्यत्रापि समावृत्तः=इति कर्तरि निष्ठा कः पुनरसौ विधिवत्स्नात्वा गुरुणालब्धानुज्ञः। तद्गृहात् स्वगृहं प्रति सम्यगावृत्तः स्वगृहमागतो यः सोयं समावृत्तः ॥ आगत्य च गुरुकुलात् अवश्यं सेवितव्यो गृहस्थाश्रम इति शास्त्रमर्यादा स्मरन्ति चेममाश्रमं सर्वोपकारक्षमत्वनेति॥ इतः परमपि आलोचनीयम् परमल्पमतित्वात् एतावद्विचारितम् तत्र विशेषविचारे भूमिदेवा एव नः प्रमाणम्

अथोपाकर्मोत्सर्जनसूत्राणि ॥

अथातोऽध्यायोपाकरणं । १॥

अध्यायनमध्यायस्तस्योपाकरणं प्रारम्भो येन कर्मणा तदध्यायोपाकरणम् । उक्तोऽर्थः अतःशब्दो हेत्वर्थः । यस्माद्ब्रह्मयज्ञो नित्योऽतोध्यायोपाकरणम् ब्रूम इति ॥ १ ॥

तस्य कालमाह—

ओषधीनां प्रादुर्भावे श्रवणेन श्रावणस्य ॥ २ ॥

ओषधीनां प्रादुर्भावे सति श्रावणमासस्य श्रवणेन कर्तव्यम् । ओषधीनां प्रादुर्भावे इति वचनं यदा श्रावणे प्रादुर्भावो न स्यात्तदा भाद्रपदे श्रवणेन कर्तव्यमित्येवमर्थम् । वृष्ट्यपकर्षे कर्मापकर्षशंका नैवास्ति । यदा भाद्रपदादुत्कर्षो भवति तदापि कर्मोत्कर्षशंका नैव कार्या । वार्षिकमिति समाख्याबलाद्वर्षासु क्रियत इति वार्षिकम् । श्रावणभाद्रपदमासौ हि वर्षाऋतुः । श्रावणे प्रादुर्भावाभावे कर्माकरणशंकाप्यनेनैव निरस्ता । श्रवणेनेति श्रवणेन युक्ते काले इत्यर्थः । 'नक्षत्रेण युक्तः कालः' इत्यनेनाण् । 'लुबविशेषे' इति तस्य लुप् । 'नक्षत्रे च लुपि' इति सप्तम्यर्थे तृतीया । नक्षत्रशब्देषु सर्वत्रैवं योज्यम् ॥ २ ॥

पञ्चम्यां हस्तेन वा ॥ ३ ॥

अत्रापि श्रावणस्येति संबध्यते । मध्यगतस्य विशेषाभावात्प्रयोजनवत्त्वाच्च । श्रावणमासश्च पञ्चमी यदा हस्तेन युज्यते तदा वेत्यर्थः। इति कालत्रयमुक्तम् ॥३॥

आज्यभागौ हुत्वाऽज्याहुतीर्जुहुयात् । सावित्र्यै ब्रह्मणे श्रद्धायै मेधायै प्रज्ञायै धारणायै सदसस्पतयेऽनुमतये छन्दोभ्य ऋषिभ्यश्चेति ॥ ४ ॥

आज्यभागवचनं नित्यार्थम् । द्रव्यानादेशादेवाज्ये सिद्धे आज्याहुतिवचनमुत्सर्जनेऽप्येता आज्येनैव जुहुयान्नान्नेनेत्येवमर्थम् । परिस्तरणविकल्पस्यासंभवात् ॥४॥

अथ दधिसक्तूञ्जुहोति ॥ ५ ॥

दधिमिश्रान्सक्तूनित्यर्थः । मन्त्रानाह ॥ ५ ॥

अग्निमीळे पुरोहितमित्येका ॥ ६ ॥

एकाग्रहणं कुसुम्भकादिवद्‌द्व्यृचनिवृत्त्यर्थम् ॥ ६ ॥

कुसुम्भकस्तदब्रवीत्, आवदंस्त्वं शकुने भद्रमावद, गृणाना जमदग्निना, धामंते विश्वं भुवनमधिश्रितं, गन्ता नो यज्ञं यज्ञियाः सुशमि, योनः स्वो अरणः, प्रतिचक्ष्व, आग्ने याहि मरुत्सखा, यत्ते राजञ्छृतं हविरिति द्व्यृचाः ॥ ७ ॥

एते नव द्व्यृचाः ॥ ७ ॥

समानीव आकूतिरित्येका ॥ ८ ॥

एकाग्रहणं द्व्यृचानन्तरमियमेवैका न वक्ष्यमाणेत्येवमर्थम् ॥ ८ ॥

तच्छंयोरावृणीमह इत्येका ॥ ९ ॥

अत्र चैकाग्रहणं द्व्यृचानन्तरमियमेवैका न पूर्वोक्तेत्येवमर्थम्। एवमनयोर्विकल्पः। शाकलसमाम्नायस्य बाष्कलसमाम्नायस्य चेदमेव सूत्रं गृह्यं चेत्यध्येतृप्रसिद्धम् । तत्र शाकलानां 'समानीव आकूतिः' इत्येषा भवति संहितान्त्यत्वात् । बाष्कलानां तु 'तच्छंयोरावृणीमहे' इत्येषा भवति संहितान्त्यत्वादित्येवं विनिवेशो युक्तः ॥ ९ ॥

अध्येष्यमाणोऽध्याप्यैरन्वारब्ध एताभ्यो देवताभ्यो हुत्वा दधिसक्तून्प्राश्य ततो मार्जनम् ॥ १० ॥

अध्यापयितव्यैरित्यर्थः । अध्याप्यैरन्वारब्ध इत्येतावतैव सिद्धे अध्येष्यमाणे इति वचनमध्याप्याभावेऽप्यध्येष्यमाणः स्वयमेव कुर्यादित्येवमर्थम् । वर्षासु च्छन्दांस्युपाकृत्याधीयीरन् ' इति श्रुतेः । हस्तेन वाऽध्येष्यमाणोऽध्याप्यैरन्वारब्ध आज्यभागौ हुत्वाऽज्याहुतीर्जुहुयादित्येवं वक्तव्ये एताभ्यो देवताभ्यो हुत्वेति वचनं सावित्र्यादिनवानामग्निमीड आदिविंशतीनां च देवताग्रहणेन ग्रहणार्थम् । क । एताभ्यो देवताभ्योऽन्नेन हुत्वा एता एव देवता इत्यत्र च । स्विष्टकृद्वचनं

व्याख्यातं प्राक् । दधिसक्तुवचनमाज्यनिवृत्त्यर्थम् । परिस्तरणैरञ्जलिमन्तर्धायाप आसेचयते तन्मार्जनम् । प्राशनादिवेदारम्भणान्तं शिष्याणामपि कार्यम् ॥१०॥

अपरेणाग्निं प्राक्कूलेषु दर्भेषूपविश्योदपात्रेदर्भान्कृत्वा ब्रह्माञ्जलिकृतो जपेत् ॥ ११ ॥

पश्चादग्नेः प्रागग्रेषु दर्भेषूपविशन्ति । ततः शरावादावुदकमासिच्य तत्र दर्भान्निदध्यात् । ततो ब्रह्माञ्जलिकृतो जपेत् स्वयं शिष्यैः सह सन्ति चेत् । जपतिचोदनायां ब्रह्मकर्मण्वनित्यमुपांशुत्वमिति ज्ञापयिष्यामः । तस्मादुच्चैरेव जपेत् । अध्यापनविरोधाच्च ॥ ११ ॥

ॐपूर्वा व्याहृतीः सावित्रीं च त्रिरभ्यस्य वेदादिमारभेत् ॥ १२ ॥

पूर्वमोंकारं । ततस्तिस्रो व्याहृतीः समस्ताः । ततः सावित्रीम् । एवमेतत्त्रितयं त्रिरभ्यस्य वेदादिमग्निमीळ इत्यारभ्य सूक्तमनुवाकं वारभेत । चशब्दः प्रणवव्याहृतीनामप्यभ्यासार्थः । अथ सर्वप्रायश्चित्तादि समापयेत् ॥ १२ ॥

तथोत्सर्गे ॥ १३ ॥

अत्र एतेनेत्यभावान्न कृत्स्नकर्मातिदेशः । वेदारम्भणमात्रमतिदिश्यते । एताभ्यो देवताभ्योऽन्नेन हुत्वेति च प्रधानहोमः । तेन प्राशनमार्जने उत्सर्जने न भवत इति सिद्धम् ॥ १३ ॥

षण्मासानधीयीत ॥ १४ ॥

इदं वचनमुपाकृत्य नियमेन षण्मासानधीयीत नोपरमेदित्येवमर्थम् ॥ १४ ॥

समावृत्तो ब्रह्मचारिकल्पेन ॥ १५ ॥

ब्रह्मचारिधर्मैरित्यर्थः । स्वाध्यायकाले ये विहिता धर्मा मधुमांसस्त्रीगमनखट्वादिवाशयनादिवर्जनादयस्तैर्युक्तोऽधीयीत । समावृत्तस्य मेखलादयस्तु न भवन्ति । अस्वाध्यायधर्मत्वात् ॥ १५ ॥

यथान्यायमितरे ॥ १६ ॥

ब्रह्मचारिण इत्यर्थः । अस्मिन्नध्ययने ब्रह्मचारिणामपि प्रवृत्त्यर्थमिदम् । इतरथा समावृत्तानामेवेति शंका स्यात् ॥ १६ ॥

---

१ प्रत्यवरोहे

जायोपेयेत्येके ॥ १७ ॥

समावृत्तो जायां गच्छेदित्येके आहुः । ऋतावेव गच्छेन्नानृतावित्याह ॥ १७ ॥

प्राजापत्यं तत् ॥ १८ ॥

तद्गमनं प्रजापतित्वसिद्ध्यर्थं कार्यम् । प्रजोत्पत्त्यर्थमित्यर्थः । तदर्थं कार्यं नानृतावित्यर्थः । ऋतुगमनं सर्वथा कार्यमिति तेषामभिप्रायः । अगमने दोषश्रवणात् । ' ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति । घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः ' [मनु०—टी० ३।४५ पराशरः] इति ॥ १८ ॥

वार्षिकमित्येतदाचक्षते ॥ १९ ॥

एतदुपाकरणमित्यर्थः । आचक्षत इति ब्रुवन्वैदिकीयं संज्ञा न पारिभाषिकीति दर्शयति । अन्वर्थसंज्ञेयं दर्शितं प्राक् ॥ १९ ॥

मध्यमाष्टकायामेताभ्यो देवताभ्योऽन्नेन हुत्वाऽपोऽभ्यवयन्ति ॥ २० ॥

मध्यमाष्टकाग्रहणं षण्मासान्तोपलक्षणार्थम् । तेन तस्याः समीपे माघ्यां पौर्णमास्यामित्यर्थः । शास्त्रान्तरे चैवं दृश्यते । ' एताभ्यो देवताभ्यो हुत्वा सावित्र्यादिभ्य आज्यम् ' इत्युक्तम् । अग्निमीळ इत्यादिभ्योऽन्नेन हुत्वा स्थालीपाकग्रहणमकृत्वाऽन्नेनेति यत्नेन ब्रुवन् गृहसिद्धमन्नं ग्राह्यमिति दर्शयति । ततः स्विष्टकृत् । ततो वेदारम्भणम् । ततो होमशेषं सामाप्यापोऽवगाहन्त इत्यर्थः ॥ २० ॥

एता एव तद्देवतास्तर्पयन्ति ॥ २१ ॥

स्नात्वा सावित्र्याद्या नव अग्निमीळ इत्याद्याश्च विंशति तर्पयन्तीत्यर्थः । ऋग्देवता आदिश्य तर्पयेयुः । द्वितीयान्तं कृत्वा तर्पयामीत्येकान्नत्रिंशद्वाक्यानि कृत्वा तावत्कृत्वस्तर्पयेयुः ॥ २१ ॥

आचार्यानृषीन्पितॄंश्च ॥ २२ ॥

यच्च ब्रह्मयज्ञांगं तर्पणमुक्तं तदेतदंगत्वेनेदानीमपि कार्यमित्यर्थः । चशब्दो देवतातर्पणसमुच्चयार्थः । तेन प्रजापत्याद्या अपि तर्प्याः । देवतास्तर्पयतीत्यत्र देवताग्रहणमत्रापि समुच्चयार्थम् । क्रमश्च तत्रोक्त एव ॥ २२ ॥

एतदुत्सर्जनम् ॥ २३ ॥

अस्येयं संज्ञा । ततः षण्मासान्षडंगान्यधीयीत । षण्मासानधीयीतेत्यारभ्य एवमन्ता धर्मा ग्रहणाध्ययन एवेत्याहुरेके । अन्ये त्वविशेषेणेत्याहुः ॥ २३ ॥

इत्युपाकर्मोत्सर्जनसूत्राणि ॥

उपाकर्मोत्सर्जनप्रयोगः

आचम्य ममाध्याप्यानां चाधीतानामध्येष्यमाणानां च छंदसां यातयामतानिरासेनाप्यायनद्वारा यक्ष्यमाणदेवताप्रीत्यर्थं वेदानुपाकरिष्ये स्थालीपाकोक्तेतिकर्तव्यतया अग्निप्रतिष्ठापनान्तंकृत्वा समित्त्रयं गृहीत्वा अस्मिन्नन्वाहितेऽग्नौ चक्षुषी आज्येनेत्यन्तमुक्त्वा सावित्रीं ब्रह्माणं श्रद्धां मेधां प्रज्ञां धारणां सदसस्पतिं अनुमतिं छंदास्यृषीन् एता आज्येन अग्निं अप्तृणसूर्यान् अग्निं शकुन्तं अग्निं मित्रावरुणौ अग्निं अपः अग्निं मरुतः अग्निं विश्वान्देवान् अग्निं इंद्रासोमौ इन्द्रं अग्न्यामरुतः पवमानसोमं सोमं अग्निं संज्ञानं एता दधिसक्तुद्रव्येण शेषेण स्विष्टकृतमग्निं प्रायश्चित्तदेवतां प्रजापतिमाज्येन यक्ष्ये इत्यादि पूर्णपात्रस्थापनपूर्वकमाज्यभागान्तं कृत्वा

सावित्र्यै स्वाहा सावित्र्या इदं न मम ब्रह्मणे स्वाहा ब्रह्मण इदं० श्रद्धायै स्वाहा श्रद्धाया इदं० मेधायैस्वाहा मेधाया इदं प्रज्ञायै स्वाहा प्रज्ञाया इदं० धारणायै स्वाहा धारणाया इदं० सदसस्पतये स्वाहा सदसस्पतय इदं० अनुमतये स्वाहा अनुमतय इदं० छंदोभ्यऋषिभ्यः स्वाहा छंदोभ्य ऋषिभ्य इदं० ततोवदानधर्मेणावदाय अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्नधातमं स्वाहा अग्नयइदं० ॥ १ ॥

कुसुंभकस्तदब्रवीद्गिरेः प्रवर्तमानकः वृश्चिकस्यारसंविषमरसं वृश्चिक ते विषं स्वाहा अप्तृणसूर्येभ्य इदं० ॥ २ ॥

त्वमग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि
त्वंवनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः स्वाहा
अग्नयइदं० ॥ ३ ॥

आवदंस्त्वं शकुने भद्रमावदतूष्णीमासीनःसुमतिंचिकिद्धिनः यदुत्पतन्वदसि कर्करिर्यथा बृहद्वदेम विदथे सुवीराः स्वाहा शकुंतायेदं० ॥ ४ ॥

सोमस्य मा तवसं वक्ष्यग्ने वह्निं चकर्थ विदथे यजध्यै
देवाँ अच्छादीद्युंजे अद्रिं शमाये अग्ने तन्वं जुषस्वस्वाहा
अग्नयइदं० ॥ ५ ॥

गृणाना जमदग्निना योनावृतस्य सीदतं पीतं सोममृतावृधास्वाहा
मित्रावरुणाभ्यामिदं० ॥ ६ ॥

त्वां ह्यग्ने सदमित्समन्यवो देवासो देवमरतिं न्येरिर इति क्रत्वान्येरिरे
अमर्त्यं यजत मर्त्येष्वादेवमादेवं जनत प्रचेतसं विश्वमादेवं जनतप्रचेतसं
स्वाहा अग्नयइदं० ॥ ७ ॥

धामं ते विश्वं भुवनमधिश्रितमन्तःसमुद्रे हृद्यं [१] तरायुषि
अपामनीके समिथे य आभृतस्तमश्याम मधुमन्तं तऊर्मिं स्वाहा
अद्भ्य इदं० ॥ ८ ॥

अबोध्यग्निः समिधा जनानां प्रतिधेनुमिवायतीमुषासं
यह्वा इव प्रवयामुज्जिहानाः प्रभानवः सिस्रते नाकमच्छस्वाहा
अग्नयइदं० ॥ ९ ॥

गंता नो यज्ञं यज्ञियाः सुशमिश्रोता हवमरक्षएवया मरुत्
ज्येष्ठासो न पर्वतासो व्योमनि यूयं तस्य प्रचेतसः स्यात दुर्धर्तवोनिदः
स्वाहा मरुद्भ्य इदं० ॥ १० ॥

त्वं ह्यग्ने प्रथमो मनोतास्याधियो अभवो दस्म होता
त्वंसींवृषन्नकृणोर्दुष्टरीतुसहोविश्वस्मै सहसे सहध्यै स्वाहा
अग्नयइदं० ॥ ११ ॥

यो नः स्वो अरणो यश्च निष्टयो जिघांसति देवास्तं सर्वे धूर्वन्तु ब्रह्मवर्म-
ममान्तरं स्वाहा विश्वेभ्यो देवेभ्य इदं ॥ १२ ॥

अग्निं नरो दीधितिभिररण्योर्हस्तच्युती जनयन्त प्रशस्तं
दूरे दृशं गृहपतिमथर्युस्वाहा अग्नयइदं० ॥ १३ ॥

प्रतिचक्ष्व विचक्ष्वेन्द्र च सोम जागृतं
रक्षोभ्यो वधमस्य तमशनिं यातुमद्भ्यःस्वाहा इन्द्रासोमाभ्यामिदं ॥ १४ ॥

माचिदन्यद्विशंसत सखायो मारिषण्यत
इन्द्रमित्स्तोता वृषणं सचा सुते मुहुरुक्था च शंसतस्वाहा
इंद्रायेदं० ॥ १५ ॥

अग्ने याहि मरुत्सखा रुद्रेभिः सोमपीतये
सोभर्या उपसुष्टुतिं मादयस्व स्वर्णरेस्वाहा अग्नामरुद्भयइदं० ॥ १६ ॥

स्वादिष्ठया मदिष्ठया पवस्व सोमधारया
इन्द्राय पातवे सुतःस्वाहा पवमानसोमायेदं० ॥ १७ ॥

यत्ते राजन्छृतं हविस्तेन सोमाभिरक्ष नः
अरातीवामानस्तारीन्मोचनः किंचनाममदिंद्रायेन्दोपरिस्रवस्त्राहा
पवमानाय सोमायेदं ॥ १८ ॥

अग्रेबृहन्नुषसामूर्ध्वो अस्थान्निर्जगन्वान्तमसोज्योतिषागात्
अग्निर्भानुना रुशतास्वंग आजातो विश्वासद्मान्यप्राः स्वाहा
अग्नयइदं० ॥ १९ ॥

समानी व आकूतिः समाना हृदयानि वः
समानमस्तु वो मनो यथा वः सुसहासतिस्वाहा संज्ञानायेदं० ॥ २० ॥

ततः सौविष्टकृतं हुत्वा, दधिसक्तून् प्राश्य ततो मार्जयित्वा अग्नेःपश्चात्प्रागग्रेषु दर्भेपूपविश्य उदपात्रे दर्भान् कृत्वा ब्रह्माञ्जलिकृतो जपेत्

ॐभूर्भुवःस्वःतत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि
धियो यो नः प्रचोदयात् । एवं त्रिरभ्यस्य वेदादिमारभेत

ततःप्रायश्चित्ताहुत्यादि समापयेत् आचम्य

अनेनोपाकर्माख्येन कर्मणा इष्टा देवताः प्रीयन्तां

इत्युपाकर्मप्रयोगः

उत्सर्गेतु—उपाकर्मपदस्थाने, उत्सर्जनमिति पठितव्यम् दधिसक्तुस्थाने, चरु द्रव्यं ग्राह्यं तद्धोमानन्तरं अवगाहनं स्नात्वा, सावित्र्यादिहोमांगदेवतातर्पणं द्वितीयान्तवाक्यमुच्चार्य कार्यम् पूर्ववद्वेदादिमारभ्य, देवर्ष्याचार्यपितॄंश्च ब्रह्मयज्ञाङ्गतर्पणवत्तर्पयेत् इतः परमपि यथागृह्यमनुष्ठेयः प्रयोगः

इत्युत्सर्जनप्रयोगः

सामग्री

स्थालीपाकोक्ता–निर्वापादिवर्जम् ।
दधिसक्तवः–हवनार्थं, भक्षणार्थंच,

दर्भाःसाग्राः–परिस्तरणवेदपटनार्थं च ।
गृह्यसिद्धश्चरुः–हवनार्थं, (उत्सर्जने)

मन्त्रभाष्यम्

ऋङ्मन्त्रास्तावत्तत्तन्मण्डलस्थे, आद्यन्ते ऋचौ ऋग्वेदसायणभाष्ये, अवलोकनीये अन्यत्सर्वं पूर्वसंस्कारमन्त्रभाष्ये गतमेवेत्युपरम्यते।

उपाकर्मोत्सर्जन विचारः

उपाकर्म वेदाध्ययनारम्भः उत्सर्जनं वेदाध्ययनसमाप्तिः । अनध्यायइति यावत् इदं कदा कर्म करणीयमित्यपेक्षायां कालादि सर्वं प्रपञ्चितं सूत्रे तद्वृत्तौ चातो नात्र तद्विषयिण्या विचारणाया अवकाशः । प्रधानमत्र वेदाध्ययनम् इतरदङ्गम् तत्र तावत्सूत्रे यावन्त्यङ्गानि विहितानि तावन्त्येवालमिति मन्वानोऽहं यथासूत्रं प्रयोगंतावदारचयम् । तत्र केषांचिद्विमतम् । सूत्रे तावत् सावित्र्यादिभ्यो आज्यचरुद्रव्यत्यागहोमौ दधिसक्तुत्यागहोमौ प्रतिमण्डलं ऋग्वेदस्यैकैका ऋक् आद्यन्ता इति विंशति ऋचः ततो दधिसक्तुप्राशनम् इत्याद्यङ्गानि अवगाहनस्नानमपि तत्रोक्तम् इदानींतनप्रयोगे तु पंचगव्यप्राशनम् यज्ञोपवीतधारणहवनादि दशविधस्नानादि, यदनुष्ठीयते तत्सूत्रे नास्तीति कृत्वा तस्य अकरणे प्रत्यवायाभावान्नास्ति आवश्यकतेति निश्चिनुमः, मिताक्षरायां, मन्वर्थमुक्तावल्यामपि धर्माब्धौ च यथागृह्यसूत्रोक्तप्रयोगानुष्ठानमेव विधीयते शिष्टानामप्येवमेवाचारः । माध्वादयस्तु क्रामपि पृथगेव कृतिमनुतिष्ठन्ति केचन सूत्राद्बहिर्भूतमपि स्वकल्पनयैव यं कंचन ग्रन्थं पुरस्कृत्य तत्प्रमाणीकृत्यानुतिष्ठन्ति । अतस्तदपेक्षया यथागृह्यमेवानुष्ठानं वरमिति शास्त्रमर्यादा

ये तु मृत्स्नास्नानं गृहएव चिकीर्षन्ति, कुर्वन्ति श्रावण्यां तत्सर्वं तत्प्रमाणभूतग्रंथप्रमाणादेवोपेक्ष्यम् यथा गृह्यपरिशिष्टे, " न च गृहे मृदा स्नायात्, न च शीतोदकेन, मन्त्रविधिं वर्जयेदिति । इदानीं क्रियमाणस्य प्रयोगस्य मूलभूतानि वचनानि प्रयोगपारिजातेअन्यत्र वा विद्यमानानि निबन्धसारे गृहीतानि, वेदारम्भणतः पूर्वमित्यादीनि, तत्तेषां सिद्धिकारकमित्यंतानि, एतानि सर्वाणि कृताकृतानीति सर्वशिष्टप्रवादः अनग्नेर्नात्राधिकार इति कर्कः, तत्तु तच्छारवीयपरमिति ज्ञेयं इदंत्वेकदैवानुष्ठेयं, प्रथमवेदारम्भावसरे इत्यपि केचिदाहुस्तच्चिन्त्यम् युगपदेव उपाकर्मोत्सर्जनयोरनुष्ठानं कुर्वन्ति तदपि सूत्राद्बहिर्भूतम् इत्यलमतिपल्लवितेन

देवयज्ञ, भूतयज्ञ, पितृयज्ञ, मनुष्ययज्ञसूत्राणि ॥

अथातः पञ्चयज्ञाः ॥ १ ॥

उक्तोऽर्थः । अतःशब्दो हेत्वर्थः । यस्मादेतैर्महतो निश्रेयसस्याप्तिस्तस्मात्पञ्चयज्ञा नाम यज्ञा वक्ष्यन्त इत्यर्थः ॥ १ ॥

इमे त इत्याह—

देवयज्ञो भूतयज्ञः पितृयज्ञो ब्रह्मयज्ञो मनुष्ययज्ञ इति ॥ २ ॥

तेषां स्वरूपमाह ॥ २ ॥

तद्यदग्नौ जुहोति स देवयज्ञो यद्बलिं करोति स भूतयज्ञो यत्पितृभ्यो ददाति स पितृयज्ञो यत्स्वाध्यायमधीते स ब्रह्मयज्ञो यन्मनुष्येभ्यो ददाति स मनुष्ययज्ञ इति ॥३॥

वैश्वदेवे त्रयो यज्ञा उक्तास्तत्र यदग्नौ जुहोति दशाहुतीः स देवयज्ञः । यद्बलिं करोति 'अथ बलिहरणम्' [गृ० १।२।३] इति स भूतयज्ञः । यत्पितृभ्यो ददाति 'स्वधा पितृभ्यः' [गृ० १। २। ११] इति स पितृयज्ञः । यत्स्वाध्यायमधीते 'अथ स्वाध्यायविधिः' [गृ० ३। २। १] इत्यनेन विधानेन स ब्रह्मयज्ञः । यन्मनुष्येभ्यो ददाति 'ततोऽतिथीन्भोजयेत्' इति स्मृतिविधानेन स मनुष्ययज्ञः । अपूर्वाणां विधाने सति तद्यदग्नौ जुहोतीति सिद्धवदुपदेशो नोपपद्येत अग्नौ जुहुयादित्येवावक्ष्यत् । अश शास्त्रान्तरसिद्धानामनुवादः । तर्ह्यथ स्वाध्यायविधिरिति ब्रह्मयज्ञविधानमपार्थकं स्यात् तस्यापि तत्र सिद्धत्वात् । अथ इष्टतन्त्रपरिग्रहार्थो ब्रह्मयज्ञस्योपदेशो न तद्युक्तम् । तन्त्रभेदस्यासिद्धत्वात् । पञ्चयज्ञानां हि तैत्तिरीयारण्यकं मूलम् । 'पञ्च वा एते महायज्ञाः' इत्यादि । तन्मूलत्वे च सति कथं तन्त्रभेदसंभवः । तस्माद्वैश्वदेवादय एव पञ्चयज्ञा इति सिद्धम् । मनुनाप्येवमेवोक्तं पितृयज्ञवर्जम् । पितृयज्ञं त्वन्यथोक्तवान् । 'एकमप्याशयेद्विप्रं पित्रर्थे पाञ्चयज्ञिके । न चैवात्राशयेत्कंचिद्वैश्वदेवं प्रति द्विजम् ॥ कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा । पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहन्' [मनु० ३ ८२–८३] इति ॥ ३ ॥

तानेतान्यज्ञानहरहः कुर्वीत॥ ४ ॥

अस्येदं प्रयोजनम् । भोजनार्थात्पाकात्प्रवृत्तिर्वैश्वदेवस्येत्युक्तम् । यस्याग्नौ न क्रियते न तद्भोक्तव्यमिति निषेधात् । अत एव चान्नसंस्कारार्थम् । तत्र यदा

परान्नं भुङ्क्ते उपवसति वा तदा संस्कार्यस्य पाकस्याभावात्संस्कारस्य कर्मणोऽप्यभावः स्यात्तद्व्यावृत्त्यर्थमिदम् । तेन पञ्चयज्ञार्थं सर्वथा पक्तव्यमेवेति सिद्धम् । अनेनाभ्युपायेन वैश्वदेवमपूर्वार्थमपीति साधितं भवति । अपि च सर्वथा पाकासंभवे पुष्पैः फलैरद्भिर्वा कुर्यादित्येवमर्थं च । उक्तं च 'आपन्नमपि दातव्यं आकाष्ठमपि जुहुयात् आऋचमपि ब्रह्मयज्ञं कुर्यात्' इति । 'न चेदुत्पद्यतेऽन्नं तु अद्भिरेनान्समापयेत्' इति च । अकरणे प्रायश्चित्तार्थं च । उक्तंच बौधायनेन । 'एतेभ्यः पञ्चयज्ञेभ्यो यद्येकोऽपि विहीयते । मनस्वत्याहुतिस्तत्र प्रायश्चित्तं विधीयते ॥ व्यहं वापि त्र्यहं वापि प्रमादादकृतेषु तु । तिस्रस्तन्तुमतीर्हुत्वा चतस्रो वारुणीर्जपेत् ॥ दशाहं द्वादशाहं वापि विनिवृत्तेषु सर्वतः । चतस्रो वारुणीर्हुत्वा कार्यस्तन्तुमतश्चरुः ॥' इति । केचिदाशौचदिवसेष्वपि वैश्वदेवं कार्यमित्येवमर्थमिति व्याचख्युः । तद्युक्तम् । 'पञ्चयज्ञविधानं तु न कुर्यान्मृतजन्मनोः' इति निषेधात् ॥ ४ ॥

अथ सायंप्रातः सिद्धस्य हविष्यस्य जुहुयात् ॥ ५ ॥

अथशब्दो विशेषप्रक्रियार्थः । अथ गृह्याण्युच्यन्त इति । अत्र सायंप्रातःशब्दौ लक्षणया अहोरात्रवचनौ । कुत एतत् । स्मृतिदर्शनात् । 'सायंप्रातरशनान्यभिपूजयेत्' इति । अशनं च मध्याह्ने विहितं । 'पूर्वाण्हे देवानां मध्यन्दिने मनुष्याणामपराण्हे पितॄणाम्' इति । वैश्वदेवानन्तरमातिथ्यादेर्विधानाच्च । सिद्धं पक्वम् । सिद्धस्येति दध्नः पयसश्च माभूत् । हविष्यस्येति चणककोद्रवादीनां माभूत् । कथमहविष्यस्य प्राप्नुयात् । अन्नसंस्कारत्वात् । उभयमपि तर्हि नारभ्यम् । दर्शनादेव सिद्धस्य हविष्यस्य च भविष्यति । यथा चतुरश्चतुरो मुष्टीन्निर्वपतीत्युक्ते हविष्यमेव प्रतीयते । सिद्धं च तद्भवति । अनारभ्यमाणे दोषः । अनादिष्टद्रव्यत्वादाज्यं प्रसज्येत । आज्यशेषेण वाऽनक्ति हृदये इति ब्रुवन्ज्ञापयति यत्र द्रव्यं नादिश्यते तत्राज्येन होम इति । तस्मात्तन्निवृत्त्यर्थं सिद्धग्रहणमारभ्यम् । तर्हि हविष्यग्रहणमपार्थकम् । नन्वन्नसंस्कारत्वादहविष्यस्यापि स्यात् । अपूर्वार्थत्वाच्च न स्यात् । तर्हि तन्त्रनिवृत्त्यर्थं हविर्ग्रहणम् । कथं हविष्यस्य होम एव स्यान्न तन्त्रमिति । ननूत्तरत्र विधानान्न तन्त्रं प्राप्नोतीति च शंका न कार्या । तर्हि विवाहेऽपि तन्त्रनिवृत्तिप्रसंगात् । तत्र चेष्यते तन्त्रम् ॥ ५ ॥

होममन्त्रानाह—

अग्निहोत्रदेवताभ्यः सोमायवनस्पतयेऽग्नीषोमाभ्यां द्यावापृथिवीभ्यां धन्वन्तरय इन्द्राय विश्वेभ्यो देवेभ्यो ब्राह्मणे ॥ ६ ॥

अग्निहोत्रदेवताभ्य इति विधायको न मन्त्रः । तथाऽर्थप्रतीतेः । अग्निहोत्रशब्दोऽयं द्रव्ये कर्मणि च वर्तते । तत्राग्निहोत्रदेवताभ्य, इति किं द्रव्यदेवता गृह्यन्ते उत कर्मदेवता इति संशयः । काः पुनर्द्रव्यदेवताः । ‘ रुद्राद्या रौद्रंगविसत् ’ इत्याद्याः श्रुतावुक्तास्ता न संभवन्ति । भक्तिमात्रत्वात् । तेन कर्मदेवता गृह्यन्ते । एवं चेदग्निर्गृहपतिरित्येवमाद्या अपि प्राप्नुवन्तीति शंका न कार्या । तासामनित्यत्वात् । कास्तर्हि । अग्निः सूर्यः प्रजापतिश्चोभयत्र । श्रुतौ चास्य सम्यगुपदेशः । ‘ तस्य वा एतस्याग्निहोत्रस्य ’ इत्यादि । सोमायवनस्पतय इत्येको मन्त्रः । वनस्पतेर्गुणत्वेन दृष्टत्वात् । अग्निर्गृहपतिः सोमो वनस्पतिः ’ इति । समाचारश्चैवमेव । इत्युक्तो देवयज्ञः ॥ ६ ॥

स्वाहेत्यथ बलिहरणम् ॥ ७ ॥

अप्रेषितयागत्वादेव स्वाहाकारे सिद्धे स्वाहाकारवचनं ज्ञापनार्थम् । एतज्ज्ञाप्यते । अन्यत्र बलिहरणे स्वाहाकारो न भवतीति । तेन चैत्यबलौ नमस्कारो भवति । अथशब्द आनन्तर्यार्थः । इतरथा कर्मान्तरत्वात्कालान्तरे वा बलिहरणं स्यात् । ब्रह्मयज्ञस्त्वेषां पूर्वो वा स्यात् । उत्तरो वा । मनुष्ययज्ञस्तूत्तर एव । ‘ वैश्वदेवं कृत्वा अतिथिमाकाङ्क्षेत् ’ इति वचनात् ॥ ७ ॥

एताभ्यश्चैव देवताभ्योऽद्भ्य ओषधिवनस्पतिभ्यो गृहाय गृहदेवताभ्यो वास्तुदेवताभ्यः ॥ ८ ॥

एताभ्यः प्रागुक्ताभ्यो देवताभ्यश्चकाराद्वक्ष्यमाणदेवताभ्यश्च बलिहरणं कार्यम् । एवकारः पौनर्वाचिकः । भूमौ प्राक्संस्थां पङ्क्तिं करोति । ब्रह्मणे स्वाहेति हुत्वाऽन्तरालं मुक्त्वाऽद्भ्य इत्यादिभिर्जुहोति गृहदेवताभ्य इति च । यदि हि विधायकः स्यादुभयवचनमपार्थकं स्यात् । गृहमेव हि वास्त्वित्युच्यते ॥ ८ ॥

इन्द्रायेन्द्रपुरुषेभ्यो यमाय यमपुरुषेभ्यो वरुणाय वरुणपुरुषेभ्यःसोमाय सोमपुरुषेभ्य इति प्रतिदिशम् ॥ ९ ॥

दिग्ग्रहणेन चतस्रो दिशो गृह्यन्ते । यत्रैव प्रधानदेवतास्तत्रैव पुरुषैर्भवितव्यमिति कृत्वा प्रधानानामुत्तरतः पुरुषेभ्यो बलिं हरेत् ॥ ९ ॥

ब्रह्मणे ब्रह्मपुरुषेभ्य इति मध्ये ॥ १० ॥

दिग्देवतानां मध्ये पूर्वोक्ते अन्तराले ॥ १० ॥

विश्वेभ्यो देवेभ्यः ॥ ११ ॥

मध्य एव ॥ १० ॥

देवयज्ञप्रयोगः ॥

आचम्य वक्ष्यमाणदेवताप्रीत्यर्थंप्रातर्देवयज्ञं करिष्ये ।

सूर्याय स्वाहा	सूर्याय इदं न मम ॥
प्रजापतये स्वाहा	प्रजापतय इदं ,,
सोमाय वनस्पतये स्वाहा	सोमाय वनस्पतय इदं०
अग्नीषोमाभ्यां स्वाहा	अग्नीषोमाभ्यामिदं०
इंद्राग्निभ्यां स्वाहा	इंद्राग्निभ्यामिदं०
द्यावापृथिवीभ्यां स्वाहा	द्यावापृथिवीभ्यामिदं०
धन्वन्तरये स्वाहा	धन्वन्तरय इदं०
इन्द्राय स्वाहा	इन्द्रायेदं०
विश्वेभ्यो देवेभ्यः स्वाहा	विश्वेभ्यो देवेभ्य इदं०
ब्रह्मणे स्वाहा	ब्रह्मण इदं०

अनेन देवयज्ञाख्येन कृतेन कर्मणा देवताः प्रीयन्ताम् । आचम्य सूर्यायेत्यस्य स्थाने सायं अग्नये स्वाहेति पठितव्यम् । प्रातः स्थाने सायमिति पठितव्यं शेषं समानम् ॥

भूतयज्ञप्रयोगः ॥

आचम्य वक्ष्यमाणदेवताप्रीत्यर्थंप्रातर्भूतयज्ञं करिष्ये ।

प्राची

१७ इंद्रपुरुषेभ्यः०

१६ इंद्रायस्वाहा
१५ वास्तुदेवताभ्यः० } १
१४ गृहदेवताभ्यः०
१३ गृहायस्वाहा
१२ ओषधिवनस्पति०
११ अद्भ्यः०
२७ सर्वेभ्यो भूतेभ्यो दिवाचारिभ्यः०
२६ विश्वेभ्योदेवेभ्यः०
२४ ब्रह्मणे०
१० ब्रह्मणे०
९ विश्वेभ्योदेवेभ्यः०
८ इन्द्राय०
७ धन्वन्तरये०
६ द्यावापृथिवीभ्यां०
५ इंद्राग्निभ्यां०
४ अग्नीषोमाभ्यां०
३ सोमाय०
२ प्रजापतये०
१ सूर्यायस्वाहा । सूर्यायेदंन-
मम एवंसर्वत्र

उदीची
२५ ब्रह्मपुरुषेभ्यः०
२२ सोमाय०
२३ सोमपुरुषेभ्यः०
२८ रक्षोभ्यः०

दक्षिणा
२९ स्वधापितृभ्यः०
१८ यमाय०
१९ यमपुरुषेभ्यः०

२१ वरुणपुरुषेभ्यः०   २० वरुणाय०

प्रतीची

---

१ वृत्तिकारमतेन गृहदेवताभ्य इति न स्वतन्त्राहुतिः अपि तु वास्तुदेवताभ्य इत्यस्य विशेषणमिति ज्ञेयं तथानुष्ठानेपि न सूत्रविरोधः

अनेनन भूतयज्ञाख्येन कृतेन कर्मणा देवताः प्रीयन्ताम् आचम्य प्रातःस्थाने सायमिति पठित्वा दिवाचारिभ्य इत्यत्र नक्तंचारिभ्य इति सायं पठनीयम् शेषं समानम् ।

पितृयज्ञप्रयोगः ॥

आचम्य पितृदेवताप्रीत्यर्थं प्रातः पितृयज्ञं करिष्ये । प्राचीनावीती स्वधा पितृभ्यः इत्युक्त्वा पराचीनपाणिराहुतिं दक्षिणां दिशं दद्यात् । अनेन पितृयज्ञाख्येन कृतेन कर्मणा पितृदेवताः प्रीयन्ताम् आचम्य प्रातः स्थाने सायमिति विशेषः । शेषं समानम् ।

मन्त्रभाष्यम् ॥

स्वाहेति प्रदानार्थमव्ययम् । इदंनममेति स्वत्वनिवृत्त्यर्थम् । अग्नौ प्रक्षेपः प्रतिपत्तिकर्मत्वात् । उपयुक्तस्य त्यक्तस्य द्रव्यस्यप्रतिपत्तिरूपसंस्कारः इति ।

देवयज्ञादिशास्त्रार्थः

अन्नमभिघार्य स्वाहान्तैः सूर्यादिमंत्रैर्जुहुयात् शुद्धभूमौ प्राक्संस्थां पङ्क्तिं करोति ब्रह्मणे स्वाहेति हुत्वा अन्तरालं प्राक्संस्थमेव अद्भ्य इत्यादिभिर्जुहोति

मनुष्यः साक्षात् भोजयितव्यः वस्तुतस्तु यन्मनुष्येभ्यो ददाति स मनुष्य यज्ञ इति सूत्रकारेण उक्तत्वात् बर्हिर्वेदि यद्दानं तेनापि मनुष्ययज्ञो भवत्येव यत्र तु भोजनमेव आवश्यकं तत्र भोजयेत् इति ब्रूते सूत्रकारः यथा—ब्राह्मणान् भोजयेदिति अष्टकासु। वैश्वदेवादि पंचनाग्नावेवभवति ।

अस्माभिस्तु परिसमूहनाद्यङ्गकलापः देवयज्ञे न गृहीतः तत्र प्रमाणम् गृह्यपरिशिष्टं तथा चोक्तं तत्र " नात्रतंत्रमिति पर्यूहनोक्षणे अपि न कुर्वन्ति केवलं हुत्वोपतिष्ठन्ते " अत्रत्यं केवलं पदं होमोपस्थानव्यतिरिक्तं विध्यन्तं वारयति वृत्तिकारेणाप्युक्तं " इत उत्तरं यानि वक्ष्यन्ते तेषामेव अयं होमविधिर्भवतीति तेन वैश्वदेवः क्वचग्रहणेन प्राप्यमाणो होष्यद्धर्मो न भवतीति ॥ येषां मते अग्नेः प्रतिष्ठापनं तेषां मते स्थण्डिलल्लेखाकरणादि सर्वं कुतो न प्राप्यत इति वक्तव्यं तैः काकबल्यादि सूत्रकारेण नोक्तं अत एव धर्माब्धावपि यथाचारं इति उक्तं अतः येषां आचारः तैस्तु अन्यग्रंथतोऽवगन्तव्यं ॥ सूत्रे नास्तीति नास्माभिः संगृहीतं ॥

---

१ " अग्निवेलायामग्निं । जनयेत्—इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन्—

यावदितिकर्तव्यताकं कर्म स्वगृह्ये उक्तं तावदेव कर्तव्यं इति गृह्यविदां मतं एतेन-अग्न्यायतनालंकारादि व्याख्यातं वेदितव्यं अपि च परिसमूहनादयो भूमिशुद्धर्था इति केचित् तदयुक्तं नहि अशुद्धे देशे अग्नेः स्थापनप्रवृत्तिर्युक्ता तस्मात् अग्न्यर्था एव यत्र यत्र अग्नेः स्थापनं तत्र तत्रैते कर्तव्या इति प्रयोजनं च स्वस्थानास्थित एवाग्नौ क्रियमाणे कर्मणि एते न कर्तव्या इति कर्कादिभिरप्युक्तं नहि देवयज्ञाद्यर्थं अग्नेः स्थापनं उक्तं गृह्यपरिशिष्टे सूत्रे वा अपि तु औपासनं पचनं वेत्युक्तं अतो यथालिखित एव अस्माभिः प्रयोगः साधुः ॥ एते त्रयोपि प्रातः सायं कार्याः न मध्यान्हे नापराण्हे विनापवादं । नात्र शंकनीयं अत्र पितृयज्ञस्य सत्वात् पितृॠणांच अपराण्हकालस्य उक्तवात् कथं प्रातर्भवति पितृयज्ञ इति । सूत्रकारेण विहितत्वा-देव प्रातर्भवतीति ब्रूमः उक्तं चैतत् वृत्तिकारेण शेषं दक्षिणा निनयेत् इति सूत्र-व्याख्यावसरे ॥ यदि दारिद्र्यादिदोषेण अतिथिभोजनादिकं कर्तुं न क्षमते तदा ब्रह्मयज्ञे नित्ययुक्तो भवेत् दैवे कर्मणि अग्नौ होमे च उक्तं चैतन्मनुना—"स्वाध्याये नित्ययुक्तः स्यात् दैवे चैवेह कर्मणि ॥ दैवकर्मणि युक्तो हि बिभर्तीदं चराचरं ।३।९।२ दैवकर्मपरः इदं स्थावरजङ्गमं धारयति । दैवकर्मनाम अग्नये स्वाहेत्यादि दश आहुतयः ॥ देवयज्ञ इति यावत् इममेव देवयज्ञं अभिप्रेत्य । भगवता उक्तं 'यज्ञात् भवति पर्जन्य' इति—मनुरपि पञ्चयज्ञप्रस्तावे एव आह अग्नौ प्रास्ताहुतिः सम्यक् आदित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥ ३।७६ तस्मात् ज्योतिष्टोमादिभिरेव पर्जन्यः पततीति न भ्रमितव्यम् समाख्याप्येतेषां महायज्ञा इति इत्थं चावश्यं प्रत्येकेनैते अनुष्ठेयाः विहितत्वात् दृष्टफलकत्वात् वा एते देवयज्ञादयस्त्रयः आत्मान्नसंस्कारार्थं इति निबन्धग्रन्थे संकल्पे उक्तं तत्रेदं विचार्यते ।

किम एते आत्मसंस्कारार्थं, अन्नसंस्कारार्थं इति. ? उभयार्थमिति वयं ब्रूमः यथा एक एव ज्योतिष्टोमः दुर्ब्राह्मणत्वापनयनाय, परमेश्वरप्रीत्यै च भवति तद्वत् ॥ यत्तु अत्र मिताक्षरायां उक्तं "केचिद्वैश्वदेवाख्यस्य कर्मणः पुरुषार्थत्वं, अन्नसं-स्कारकर्मत्वं चेच्छन्ति अथ सायं प्रातः सिद्धस्य हविष्यस्य जुहुयात् इत्यन्नसंस्कार-कर्मता प्रतीयते । अथातः पञ्चयज्ञा इत्युपक्रम्य तानेतानहरहः कुर्वीत

भाष्यम्—अथ शान्तिकर्मार्थमुपासन इतरः क्रव्यादन्यो जातवेदा जातान-वेदिता जातधनो वा प्रजानन् सर्वैर्विज्ञायमानोग्निरिहैव देशे देवेभ्यो देवार्थं हव्यं हवनयोग्यं हविर्वहतु ।७।६।२१।ऋ० सं० इत्यर्धर्चेन । आ० गृ० ४।६।५ अत्रवृत्तिः—अथाग्निहोत्रविहरणकाले अपराण्हे शमीमयीभ्यामरणीभ्यामग्निं मन्थीय दर्धर्चेन अयं चाग्निः पचनो भवति

इति नित्यत्वाभिधानात् पुरुषार्थत्वं चावगम्यत् इति तदयुक्तं पुरुषार्थत्वे अन्नसंस्कारकर्मत्वानुपपत्तेः । यथा हि द्रव्यसंस्कारकर्मत्वपक्षे अन्नार्थता वैश्वदेवकर्मणः पुरुषार्थत्वे वैश्वदेवकर्मार्थता द्रव्यस्य इति परस्परविरोधात् पुरुषार्थत्वमेव युक्तं " महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः पुरुषार्थत्वे वैश्वदेवाख्यं कर्म न प्रतिपाकं आवर्तनीयं इति " तन्न—वयं न केवलं पुरुषार्थार्थे अन्नसंस्कारार्थे वा एते यज्ञा इति प्रतिपादयामः किंतु उभयार्थे इति पंचविंशतिसंस्कारेषु एतेषां गणनायाः सत्वात् आत्मसंस्कारार्थे यस्य अग्नौ न क्रियते न तद्भोक्तव्यं इति निषेधात् अन्नसंस्कारार्थे तेन भोजनाभावेपि अस्मत्पक्षे कार्या इति भवति मनुना तु पंचसूनाजनितदोषपरिहारार्थे पंचयज्ञा उक्ताः ' तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः । पञ्चक्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनां ॥ नहि येन कर्मणा पुरुषार्थो भवति तेन अन्यत्र भवितव्यं इति शासनं । उक्तं चैतत्पूर्वतंत्रे "एकस्य तूभयत्वे संयोगपृथक्त्वं" इति संयोगपृथक्त्वन्यायेन, आत्मसंस्कारार्थे, अन्नसंस्कारार्थे, तद्द्वारा परमेश्वरप्रीत्यै वा भवंतु सर्वथा पंचयज्ञाः कर्तव्या इति सिद्धम् ॥

संयोगः—विनियोजकं वाक्यं तस्य ।

पृथक्त्वं—भेदः यथा अग्नीषोमीयपशौ खादिरे बध्नाति–खादिरं वीर्यकामस्य यूपं कुर्वीत ॥ अथ वा संयोगः उभयसंबंधबोधकं वाक्यं—यथा ज्योतिष्टोमादि कर्मणां, स्वर्गादि फलकानामपि यज्ञेन दानेन इत्यादि वचनात् ज्ञानार्थत्वं तद्वत् पंचयज्ञानां पुरुषार्थत्वं अन्नसंस्कारार्थत्वं च "ब्राह्मीयं क्रियते तनुः" इत्यादिना पुरुषार्थत्वं यस्य अग्नौ न क्रियते न तद्भोक्तव्यं इत्यादिना अन्नसंस्कारार्थत्वं इति सर्वं अनवद्यम् ॥ एते पञ्चयज्ञाः अहरहः कर्तव्याः नित्यत्वात् यत्पुनरेषां फलश्रवणं तदेषां पावनत्वख्यापनार्थं न काम्यत्वप्रतिपादनाय अन्यदपि बह्वत्र प्रतिपादनीयं परन्तु ग्रंथविस्तरभिया उपरम्यते ॥ अत्र मिताक्षारायां–अथ सायंप्रातरित्यादिना उत्पत्तिप्रयोगौ ॥ " तानेतानहरहः कुर्वीत " इति अधिकार विधिरिति ॥ पञ्चयज्ञविधानं तु जननाशौचे मृताशौचे न कार्यं–इति स्मृत्यंतरं पंचयज्ञविधानं तु अस्मत्सूत्रकारो निषेधत्येवाशौचे दानाध्ययने " दशाहं सपिण्डेषु दानाध्ययनेवर्जयेरन् " इति आ० गृ० ४।४ तेन ज्ञायते तानेतानहरहः कुर्वीत इति सामान्यशास्त्रस्य दशाहं इति सूत्रं अपवाद इति ॥ अत्र यदुक्तं तत्सर्वं प्रधानं, अंगजातस्य अल्पत्वान्नात्र विशेषतो विचार्यते ।

इतिदेवयज्ञादिशास्त्रार्थः ॥

ब्रह्मयज्ञसूत्राणि ॥

अथ स्वाध्यायविधिः ॥ १ ॥

उक्तोऽर्थः । विधिग्रहणं विधिरेव वक्ष्यते न क्रम इत्येवमर्थम् । तेन वैश्वदेवस्य पुरस्तादुपरिष्टाद्वाऽध्येतव्यं न क्रमनियम इति सिद्धम् ॥ १ ॥

प्रग्वोदग्वा ग्रामान्निष्क्रम्याप आप्लुत्य शुचौ देशे यज्ञोपवीत्याचम्याक्लिन्नवासा दर्भाणां महदुपस्तीर्य प्राक्कूलानां तेषु प्राङ्मुख उपविश्योपस्थंकृत्वा दक्षिणोत्तरौ पाणी संधाय पवित्रवन्तौ विज्ञायते अपां वा एष ओषधीनां रसो यद्दर्भाः सरसमेव तद्ब्रह्म करोति द्यावा पृथिव्योः सन्धिमीक्षमाणः संमील्य वा यथा वा युक्तमात्मानं मन्येत तथा युक्तोऽधीयीत स्वाध्यायम् ॥ २ ॥

वाशब्दद्वयमन्यस्यां वाऽनिन्दितायां दिशि कार्यमित्येवमर्थं बहिरसंभवे ग्रामेऽध्येतव्यमित्येवमर्थं च । तथाच श्रुतिः 'ग्रामे मनसा स्वाध्यायमधीयीत' इति । आप्लुत्येति । स्नात्वेत्यर्थः । आ इतिवचनमपोऽवगाह्य स्नायादित्येवमर्थम् । शुचौ देशे इति वचनं शुचौ देशे यत्र काप्यधीयीत न तीरनियम इत्येवमर्थम् । यज्ञोपवीतिग्रहणं नियमेनात्र यज्ञोपवीती स्यादित्येवमर्थम् । तेन दहनकर्मणि प्राचीनावीतित्वं सिद्धम् । आचम्येति वचनं कर्मांगाचमनविधानार्थम् । अक्लिन्नवासा इति अनार्द्रवासा भवेदित्यर्थः । ततः प्राक्कूलानां दर्भाणां महदुपस्तीर्य तेषु प्राङ्मुख उपविश्योपस्थं कृत्वा दक्षिणोत्तरौ पाणी पवित्रवन्तौ संधायेति । महदिति बह्वित्यर्थः । प्राक्कूलानाम् प्रागग्राणामित्यर्थः । प्राङ्मुख इति वचनं नियमेनात्र प्राङ्मुखः स्यादित्येवमर्थम् । तेनान्यत्र क्वचिदुदङ्मुखतापि सिद्धा । दक्षिणोत्तरेणोपस्थं कुर्यात् अपैतृकत्वात् । दक्षिण उत्तरो ययोः पाण्योस्तौ दक्षिणोत्तरौ पाणी । पवित्रे व्याख्याते । सव्यं पाणिं प्रागङ्गुलिमुत्तानं विधाय तस्मिन्प्रागग्रे पवित्रे निधाय दक्षिणं पाणिं न्यञ्चं प्रागङ्गुलिं तेन संदध्यादित्यर्थः । विज्ञायते श्रूयत इत्यर्थः । श्रुत्याकर्षः सर्वमिदं गृह्यशास्त्रं श्रुतिमूलमिति दर्शयितुम् । द्यावापृथिव्योः सन्धिमीक्षमाण इति नोर्ध्वमधस्तिर्यग्वेक्षेतेत्यर्थः । संमील्य वाक्षिणी । अन्येन वा येन प्रकारेणात्मानं समाहितमनसं मन्येत तथा युक्तोऽधीयीत न संधीक्षणसंमीलननियमः । स्वाध्यायवचनं सावित्र्या अपि स्वाध्यायधर्मसिद्ध्यर्थम् । तेन 'सावित्रीमन्वाह' [गृ० ३।२।४] इति सावित्र्या अनुवचने सत्यपि सामिधेनीधर्म ऐकश्रुत्यं ऋगन्ते च प्रणवो न भवतीति सिद्धम् ॥ २ ॥

ॐपूर्वा व्याहृतीः ॥ ३ ॥

प्रणवामादौ सकृदुक्त्वा ततस्तिस्रो व्याहृतीः समस्ता ब्रूयात् । प्रतिव्याहृतिप्रणवशंका नैव कार्या । सकृत्कृतेनैव प्रणवेन ॐपूर्वत्वासिद्धेः । यथा ‘ अध्वर्युमुखाः ’ इत्यत्र एकेनैवाध्वर्युणा सर्वेऽध्वर्युमुखा भवन्ति तद्वदत्रापि । पृथक्कल्पनायां प्रमाणाभावाच्च । ननु चतसृणां सूत्रे व्याहृतिसंज्ञा कृता । सत्यं कृता । होमे तु सा न सर्वत्र । तेनात्र तिसृणामिति सिद्धम् । ‘ भूर्भुवः स्वरित्येता वाव व्याहृतयः ’ इति श्रुतिः । अपि च तैत्तिरीयश्रुतिरेषां मूलमित्युक्तम् । तत्र चैवं श्रूयते । ‘ ॐमिति प्रतिपद्य भूर्भुवः सुवरित्याह । सावित्रीं गायत्रीं त्रिरन्वाह । पच्छोऽर्धर्चशोऽनवानम् । स्वाध्यायमधीयीत । नमो ब्रह्मण इति परिधानीयां त्रिरन्वाह ’ इति । तस्माद्यदुक्तं तत्सम्यक् ॥ ३ ॥

सावित्रीमन्वाह पच्छोऽर्धर्चशः सर्वामिति तृतीयम् ॥ ४ ॥

सर्वामिति अनवानमित्यर्थः । तृतीयवचनमुपकरणेऽपि पच्छोऽर्धर्चशोऽनवानमित्येवं त्रिर्ब्रूयादित्येवमर्थम् ॥ ४ ॥

अथ स्वाध्यायमधीयीत ऋचो यजूंषि समान्यथर्वाङ्गिरसो ब्राह्मणानि कल्पान्गाथा नाराशंसीरितिहासपुराणानीति ॥ ५ ॥

अथशब्दः पूर्वेण संबन्धार्थः । तेन प्रणवादित्रयं स्वाध्यायस्यांगमिति सिद्धम् । स्वाध्यायवचनं ऋगादिरेव स्वाध्यायो न प्रणवादित्रयमित्येवमर्थम् । तेन ऋचमपि ब्रह्मयज्ञं कुर्यादित्यस्मिन्पक्षे सावित्रीपर्यन्तमुक्त्वा ऋचमधीयीत । ततो नम इत्येतया परिदध्यात् । तेन प्रणवादित्रयस्य परिधानीयायाश्च नित्यत्वं साधितं भवति । अधीयीतेति वचनमन्वाहाधिकारनिवृत्त्यर्थम् । तेनानुप्रवचनधर्मो न भवति । सूत्राण्येव कल्पा इत्युच्यन्ते । नन्वनित्यानां सूत्राणां नित्यश्रुत्या उपदेशो न घटते । नन्वनित्यस्य पशोः पशुना यजेतेति विधिर्न घटते । अथ तत्राकृतेर्नित्यत्वादुपपद्यते तदत्राप्यविशिष्टम् । सर्वकल्पेषु कल्पत्वं नामानुवृत्तं नित्यमस्ति । गाथा नाम ऋग्विशेषा इन्द्रगाथादयः । ‘ यदिन्द्रो दशराज्ञे ’ इति इन्द्रगाथाः पञ्चर्चः : नाराशंस्यश्च ऋच एव ‘ इदं जना उपश्रुतम् ’ इत्यादयः । ऋक्त्वादेव सिद्धे पुनर्वचनं फलविशेषसिद्ध्यर्थम् । इतिहासं महाभारतमाहुः । यत्र सृष्टिस्थित्युत्पत्तिप्रलयाः कथ्यन्ते तत्पुराणम् । अनित्यचोद्यं पूर्ववत् । इह हि द्रव्योत्सर्गनिमित्तं फलं दृष्टम् । अतः स्वाध्यायमात्रेणापि फलमस्तीति श्रुतिमुपन्यस्यति ॥ ५ ॥

यदृचोऽधीते पय आहुतिभिरेव तद्देवतास्तर्पयति। यद्यजूंषि घृताहुतिभिः यत्सामानि मध्वाहुतिभिः यदथर्वाङ्गिरसः सोमाहुतिभिः यद्ब्राह्मणानि कल्पान्गाथा नाराशंसीरितिहासपुराणानीत्यमृताहुतिभिः ॥ ६ ॥

ब्रह्मयज्ञाध्ययनेन देवतास्तृप्यन्तीत्युक्तम्। पितरश्च तृप्यन्तीत्याह ॥ ६ ॥

यदृचोऽधीते पयसः कुल्या अस्य पितॄन्स्वधा उपक्षरन्ति। यद्यजूंषि घृतस्य कुल्याः। यत्सामानि मध्वः कुल्याः। यदथर्वाङ्गिरसः सोमस्य कुल्याः। यद्ब्राह्मणानि कल्पान्गाथा नाराशंसीरितिहासपुराणानीत्यमृतस्य कुल्याः।

स्वधेति पितॄणामन्नमुच्यते। पयसो नद्यः स्वधाभूताः पितॄनुपतिष्ठन्तीत्यर्थः। एवमुत्तरत्रापि नेयम् ॥ ७ ॥

स यावन्मन्येत तावदधीत्यैतया परिदधाति। नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः। नमो वाचे नमो वाचस्पतये नमो विष्णवे महते करोमीति ॥८॥

ऋगादिदशकमध्येतव्यमित्युक्तम्। तत्र नियमेन दशानामध्ययने प्राप्ते इदमुच्यते। स यावत्कालमेकाग्रमनसा आत्मानं मन्येत तावत्कालमेवाधीयीत न दशाप्यध्येतव्या इति नियमः। सर्वथा समाहितमनसैवाध्येतव्यम्। नेयत्तानियम इत्यर्थः। एतयेतिवचनं सदैतया परिदध्यादित्येवमर्थम्। तेनास्यापि नित्यत्वं सिद्धम्। एषापि त्रिर्वाच्या। प्रथमायां दृष्टत्वाच्छ्रुतिदर्शनाच्च ॥ ८ ॥

देवतास्तर्पयति। प्रजापतिर्ब्रह्मा वेदा देवा ऋषयः सर्वाणि छन्दांस्योङ्कारो वषट्कारो व्याहृतयः सावित्री यज्ञा द्यावा पृथिवी अन्तरिक्षमहोरात्राणि सांख्याः सिद्धाः समुद्रा नद्यो गिरयः क्षेत्रौषधिवनस्पतिगन्धर्वाप्सरसो नागा वयांसि गावः साध्या विप्रा यक्षा रक्षांसि भूतान्येवमन्तानि ॥

परिधानानन्तरमेता देवतास्तर्पयत्युदकेन। तर्पणे तस्य प्रसिद्धत्वात्। प्रजापतिरित्यारभ्य एकान्नत्रिंशद्वाक्येषु तृप्यतु तृप्येतां तृप्यन्त्विति यथार्थमुक्त्वा तर्पयेत्। एवमन्तानीति पृथङ्मन्त्र एव ॥ ९ ॥

अथ ऋषयः शतर्चिनो माध्यमा गृत्समदो विश्वामित्रो वामदेवोऽत्रिर्भरद्वाजो वसिष्ठः प्रगाथाः पावमान्यः क्षुद्रसूक्ता महासूक्ता इति ॥ १० ॥

अनन्तरं शतर्चिप्रभृतीन्द्वादशर्षींस्तर्पयतिं । प्रत्यृषि वाक्यभेदः पूर्ववत् । ऋषिग्रहणं निवीतिप्राप्त्यर्थम् । ' यज्ञोपवीतशौचेच ' [श्रौ० ११११०] इत्यनेन निवर्तितत्वात् । तीर्थविशेषस्तु स्मृतित एव सिद्धः ॥ १० ॥

प्राचीनावीती ॥ ११ ॥

प्राचीनावीती भूत्वा वक्ष्यमाणांस्तर्पयति । अयमपि प्रतिप्रसव एव ॥ ११ ॥

सुमन्तुजैमिनिवैशम्पायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्या जानन्तिबाहविगार्ग्यगौतमशाकल्यबाभ्रव्यमाण्डूकेया गर्गीवाचक्नवी वडवाप्रातीथेयी सुलभामैत्रेयी कहोळं कौषीतकं महाकौषीतकं पैङ्ग्यं महापैंग्यं सुयज्ञं सांख्यायनमैतरेयं महैतरेयं शाकलं बाष्कलं सुजातवक्त्रमौदवाहिं महौदवाहिं सौजामिं शौनकमाश्वलायनं ये चान्ये आचार्यास्ते सर्वे तृप्यन्त्विति ॥ १२ ॥

त्रयोविंशतिवाक्यानि । तत्र कहोळादिषु अर्थात्तर्पयामिशब्दः कार्यः । सर्वत्र प्रतिवाक्यं तर्पणं कुर्यात् । एकमन्त्राणि कर्माणीति न्यायात् ॥ १२ ॥

प्रतिपुरुषं पितॄंस्तर्पयित्वा गृहानेत्य यद्ददाति सा दक्षिणा ॥१३॥

पितरं पितामहं प्रपितामहं च तर्पयित्वा गृहानेत्य यद्ददात्यतिथिभोजनभिक्षादानादि सा ब्रह्मयज्ञस्य दक्षिणा भवति । यद्ददातीति सिद्धवदुपदेशान्नापूर्वं विधीयत इति गम्यते । अपूर्वविधौ तु गृहानेत्य दद्यादित्यवक्ष्यत् । सदक्षिणत्वं ब्रुवता सोमयागसाम्यं प्रदर्शितं प्रशंसार्थम् । ' क्रतुना तेनास्येष्टं ' इत्यादि प्रशंसा श्रूयते । प्रतिपुरुषवचनं पृथक्पृथक् तर्पयेदित्येवमर्थम् । पूर्वोक्तोपवेशनासंभवेऽप्येवं वा ब्रह्मयज्ञं कुर्यादिति श्रुतिमेवाह ॥ १३ ॥

अथापि विज्ञायते स यदि तिष्ठन्व्रजन्नासीनः शयानो वा यं यं क्रतुमधीते तेन तेन हास्य क्रतुनेष्टं भवतीति ॥ १४ ॥

' न शयानोऽधीयीत नाष्टम्यां इत्यादिनिषेधो नित्यस्वाध्यायस्यैव न ब्रह्मयज्ञस्येति श्रुतिमेवाह ॥ १४ ॥

विज्ञायते तस्य द्वावनध्यायौ यदात्माऽशुचिर्यद्देशः ॥१५॥

तस्य ब्रह्मयज्ञस्य द्वावेवानध्यायौ यदात्माऽशुचिः सूतकेन मृतकेन वा मलादिना वा । यदा च देशोऽशुचिरमेध्यादिना तत्रोभयत्रैवेत्यर्थः । कालस्त्वस्य श्रुतौ श्रूयते । 'मध्यन्दिने प्रबलमधीयीत य एवं विद्वान्महारात्र उषस्युदिते च' इति ॥ १५ ॥

ब्रह्मयज्ञप्रयोगः ।

सर्वोपि प्रयोगः सूत्रे स्पष्ट उक्तः अतोऽत्र न लिख्यते तर्पणप्रयोगमात्रं लिख्यते तत्र क्रियापदसंदिग्धत्वात् अस्माभिरपि एतत्प्रयोगशास्त्रार्थे बिचारः कृतः सोप्यवलोकनीयः सूत्रोक्तक्रमप्राप्ताध्ययनानन्तरं प्रजापतिस्तृप्यतु । ब्रह्मातृप्यतु । वेदास्तृप्यन्तु देवास्तृप्यन्तु ऋषयस्तृप्यंतु सर्वाणि छंदांसि तृप्यन्तु । ॐकारस्तृप्यतु । वषट्कारस्तृप्यतु व्याहृतयस्तृप्यंन्तु । सावित्री तृप्यतु । यज्ञास्तृप्यंन्तु । द्यावापृथिवी तृप्यतां । अंतरिक्षंतृप्यतु । अहोरात्राणि तृप्यतु । सांख्यास्तृप्यंतु । सिद्धास्तृप्यन्तु । समुद्रास्तृप्यंतु । नद्यस्तृप्यंतु । गिरयस्तृप्यंतु । क्षेत्रोषधिवनस्पतिगन्धर्वाप्सरसस्तृप्यंतु । नागास्तृप्यंतु वयांसि तृप्यंतु । गावस्तृप्यंतु । साध्यास्तृप्यंतु । विप्रास्तृप्यंतु यक्षास्तृप्यंतु । रक्षांसि तृप्यन्तु । भूतानि तृप्यन्तु । एवमन्तानि तृप्यन्तु ।

ऋषितर्पणं निवीतिना कार्यं

शतर्चिनस्तृप्यन्तु । माध्यमास्तृप्यन्तु । गृत्समदस्तृप्यतु । विश्वामित्रस्तृप्यतु वामदेवस्तृप्यतु अत्रिस्तृप्यतु । भरद्वाजस्तृप्यतु वसिष्ठस्तृप्यतु प्रगाथास्तृप्यंतु । पावमान्यस्तृप्यंतु । क्षुद्रसूक्तास्तृप्यन्तु । महासूक्तास्तृप्यन्तु ।

अथाचार्यतर्पणं प्राचीनावीती ।

सुमन्तु-जैमिनि-वैशम्पायन-पैल-सूत्रभाष्य-भारत-महा-भारत-धर्माचार्यास्तृप्यन्तु । जानन्ति-बाहवि-गार्ग्य-गौतम-शाकल्य-बाभ्रव्य-मांडव्य-मांडूकेयास्तृप्यंतु गर्गी-वाचक्नवीतृप्यतु । वडवा प्रातीथेयी तृप्यतु । सुलभा मैत्रीयी तृप्यतु । कहोळं तर्पयामि । कौषीतकं तर्पयमि । महाकौषीतकं तर्पयामि पैङ्ग्यं तर्पयामि । महापैङ्ग्यं तर्पयामि । सुयज्ञं तर्पयामि । साङ्ख्यायनं तर्पयामि । ऐतरेयं तर्पयामि महैतरेयं तर्पयामि । शाकलं तर्पयामि । बाष्कलं तर्पयामि । सुजातवक्त्रं तर्पयामि औदवाहिं तर्पयामि । महौदवाहिं तर्पयामि । सौजामिं तर्पयामि । शौनकं तर्पयामि । आश्वलायनं तर्पयामि । येचान्ये आचार्यास्तेसर्वे तृप्यन्तु ॥

पितृतर्पणं

अस्मत्पितरं	अमुकगोत्रं	अमुकनामानं	तर्पयामि
अस्मत्पितामहं	,,	,,	,,
अस्मत्प्रपितामहं	,,	,,	,,

इति ब्रह्मयज्ञप्रयोगःसतर्पणः ॥

मन्त्रभाष्यम्

अत्रत्यमन्त्रभाष्यार्थे वेदभाष्यमेव शरणीकरणीयम् । नह्यत्र संपूर्णसंहिताब्राह्मणादिभाष्यंसंग्रहीतुंपार्यते इति.

१ देवयज्ञः—यदग्नौ जुहोति सः
२ भूतयज्ञः—यद्बलिङ्करोति सः
३ पितृयज्ञः—यत् पितृभ्यो ददाति सः आ. गृ. ३।२।३
५ मनुष्ययज्ञः—यन्मनुष्येभ्यो ददाति सः
४ ब्रह्मयज्ञः—यत्स्वाध्यायमधीते सः

॥ ब्रह्मयज्ञशास्त्रार्थः ॥

ब्रह्मयज्ञशब्दार्थं स्वयमेव आह सूत्रकारः । ' यत्स्वाध्यायमधीते स ब्रह्मयज्ञः । स्वाध्यायो नाम—स्वश्चासौ अध्यायः स्वाध्यायः स्वः स्वीयः स्वस्वपित्रादिक्रमागतवेदभागः शाखामात्रं तस्य अध्ययनं वक्ष्यमाणेन विधिना उच्चारणं इति यावत् । इदमेव मूलं अक्षरग्रहणमेव पुरुषार्थाय अलमिति वदतां शांकरदर्शनानुसारिणां महाभाष्यकारणांच उक्तं च तैः—ब्राह्मणेन निष्कारणो धर्मः षङ्गो वेदोऽध्येयोज्ञेयश्च इति तदेवेदं अध्ययनं ब्रह्मयज्ञत्वेन विहितं वेदस्य अध्ययनमेवात्र प्रधानं न तु तर्पणं—तच्च अंगं अव्यवहितं चैतत्तर्पणं कार्यं प्रतिदिनं नूतनं नूतनं ऋगादि पठनीयं इति सिद्धांतः—इदानीं मूलमात्रं सर्वस्य पठन्ति तत्रमूलं न विद्मः धर्माब्धावपि एकं यजुः साम नवीनतया पठनीयं इत्येवोक्तं न तदेव प्रतिदिनं पठनीयं इति तदाशयः अत एव अस्माभिर्न संगृहीतं अन्यत् तच्छंयोरिति, विद्युदसीति विध्यन्तः सूत्रे नोक्त इति न संग्रहीतः ॥ धर्माब्धावपि नोक्तः स विषयः । अयं ब्रह्मयज्ञः स्नानानंतरं भोजनात् पूर्वं च कार्यः इति उक्तं

भवति धर्माब्धौ तु भट्टोजीवचनं दत्तं मध्यान्हसंध्योत्तरं अनुष्ठेय इति परंतु मध्यान्हसंध्या सूत्रे नोक्ता अतः कुतस्ततो ब्रह्मयज्ञः प्राप्नुयात् सा च मध्यान्ह-संध्या स्मृतितः अवगन्तव्या सूत्रे नोक्ता केवलं सौरमंत्रपाठेनापि सा कृताकृता इत्येके । अतस्तस्या विकल्प एव युक्त इति भाति ॥

अस्य तु अनध्यायौ द्वौ उक्तौ यत् आत्माऽशुचिः सूतकेन मृतकेन वा मलादिना वा यदा च देशः अशुचिः अमेध्यादिना तत्र अनध्यायः नान्यत्रेति सिद्धं मनुरपि 'द्वावेव वर्जयेन्नित्यं अनध्यायौ प्रयत्नतः॥ स्वाध्यायभूमिं चाशुद्धां आत्मानं चाशुचिं द्विजः ४।१२७ ॥ वेदमेवाभ्यसेन्नित्यं यथा कालमतंद्रितः । तंह्यस्याहुः परं धर्मं उपधर्मोऽन्य उच्यते वेदाभ्यासेन सततं शौचेन तपसैव च । अद्रोहेण च भूतानां जातिं स्मरति पौर्विकीम् ४।१४८'' ''पतंजलिरपि स्वाध्या-दिष्टदेवतासंप्रयोगः'' इसि सूत्रयामास तिष्ठन् व्रजन् आसीनः शयानोवाप्यधीयीत इति उक्तं तेन ज्ञायते सर्वथा नित्यं अध्येतव्यं इति सूत्रकृदाशयः इति मनसि कृत्वैव उक्तं वृत्तिकारेण ऋचमपि ब्रह्मयज्ञं कुर्यात् तस्मिन् पक्षे सावित्रीपर्यंतं उक्त्वा ऋचं अधीयीत ततो नम इत्येतया परिदध्यात् पंचमहायज्ञानां आवश्य-कता ऐतरेयब्राह्मणेऽपि अग्निहोत्रोदाहरणेन समाम्नाता यथा '' को नद्धा पुरुष इति न देवान् न पितॄन् मनुष्यान् इति, भाष्यं—यः पुमान् अतिथीनपि न देवान् न पूजयेत, पितॄनपि न पूजयेत मनुष्यान् पूजयेत् तादृशः पुमान् अनद्धपुरुषः-अननुष्ठानेन अनृतो भवेदित्यर्थः । तथा च शाखान्तरेपि श्रूयते जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवाञ्जायते ब्रह्मचर्येण ऋषिभ्यः यज्ञेन देवेभ्यः, प्रजया पितृभ्यः एष वा अनृणो यः पुत्री, यज्वा, ब्रह्मचारीति, अनेनैव अभिप्रायेण ऐतरेयब्राह्मणे यजेति वचनात् श्रुतिरिति श्रुतं—तस्मात् ऋण-त्रयापाकरणाय तद्वारा परमेश्वरप्रीत्यै च देवान् यज, देवयज्ञं कुरु, वेदानधीष्व ब्रह्मयज्ञं कुरु, प्रजाम् उत्पादय उक्तप्रकारेण विवाहं कृत्वेत्यर्थः ॥ इति ॥

पार्वणश्राद्धसूत्राणि ॥

अथातः पार्वणे श्राद्धे काम्य आभ्युदयिक एकोद्दिष्टे वा ॥ १ ॥

अथशब्दोऽधिकारार्थः । इत उत्तरं वक्ष्यमाणो विधिः श्राद्धे वेदितव्य इति । अतःशब्दो हेत्वर्थः । यस्माच्छ्राद्धान्निःश्रेयसप्राप्तिः मूढैरपि च क्रियते तस्माद्व-क्ष्याम इति । पार्वणमिति श्राद्धनाम । अन्वर्थसंज्ञा चेयं पर्वणि भवं पार्वणमिति । तथाप्येकस्मिन्नेव पर्वणि भवत्यमावास्यायां नोभयोः पर्वणोः । कुतः । पिण्डपि-

तृयज्ञेन सह व्यतिषंगदर्शनात् । स्मृतेश्च । ‘ विप्रश्चन्द्रक्षयेऽग्निमान् ’ इति मनुः । ‘ अमावास्यायां पितृभ्यः ’ इति गौतमः । पितॄनुद्दिश्य यद्दीयते ब्राह्मणेभ्यः श्रद्धया तच्छ्राद्धम् । काम्यं श्राद्धं पञ्चम्यां पुत्रकामस्येत्यादि । वृद्धिपूर्तनिमित्तमाभ्युदयिकम् । एकमेवोद्दिश्य यच्छ्राद्धं ‘ श्राद्धमस्मै दद्युरेकादशाहे एकोद्दिष्टम् ’ इत्यादि तदेकोद्दिष्टम् । धर्मभेदात्पृथगुपदेशः । श्राद्धइत्येतावतैव सिद्धे पार्वणादिग्रहणं धर्मभेदप्रदर्शनार्थं कर्तव्यताविध्यर्थं च । धर्मभेदमुपरिष्टाद्वक्ष्यामः ॥ १ ॥

ब्राह्मणाञ्छ्रुतशीलवृत्तसंपन्नानेकेन वा काले ज्ञापितान्स्नातान्कृतपच्छौचानाचान्तानुदङ्मुखान्पितृवदुपवेश्यैकैकमेकैकस्य द्वौ द्वौ त्रींस्त्रीन्वा वृद्धौ फलभूयस्त्वं न त्वेवैकं सर्वेषां ॥ २ ॥

ब्राह्मणग्रहणं क्षत्रियवैश्यादिनिवृत्त्यर्थम् । श्रुतं स्वाध्यायः शीलं स्वभावः शमदमादियुक्तत्वं क्रोधरागादिवर्जितत्वं च । वृत्तं विहितकरणं निषिद्धवर्जनं च । एतैस्त्रिभिर्गुणैर्युक्तानेकेन वा गुणेन युक्तानुपवेश्येत्यनेन संबन्धः । काले ज्ञापितान् । स्मृत्युक्तनिमन्त्रणकाले निमन्त्रितानित्यर्थः । उक्तं च मनुना—‘ पूर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते । निमन्त्रयीत त्र्यवरान्सम्यग्विप्रान्यथोदितान् ’ इति । तेषां चैते नियमा भवन्ति—‘ निमन्त्रितो द्विजः पित्र्ये नियतात्मा भवेत्सदा । न च छन्दांस्यधीयीत यस्य श्राद्धं च तद्भवेत् ॥ ’ इति मनुः । स्नातानिति वचनं नियमेन स्नातान्भोजयेत् । केनचित्कारणेन स्नानाशक्तान् न भोजयेदित्येवमर्थम् । अन्ये स्नातानिति समावृत्तानिति व्याचख्युः । अन्ये स्नानद्रव्यैः स्नातानिति । तच्च स्नानं स्वेन द्रव्येण कारयितव्यमिति व्याचख्युः । प्रक्षाल्य पादौ पाणी चेत्याचमनांगत्वेन विहितं पच्छौचं शुद्धपादस्यानित्यमिति ज्ञापनार्थं कृतपच्छौचवचनम् । तेन शुद्धपादत्वेऽप्यत्र नियमेन पच्छौचं कार्यमित्यर्थः । अन्येतु स्वयमेव तेषां पादान्प्रक्षालयेदित्येवमर्थमिति व्याचख्युः । आचान्तानिति कर्मांगमाचमनं विधीयते । तेन भोजनांगं श्राद्धांगं च द्विराचमेयुः । एवंगुणविशिष्टानुदङ्मुखान्पितॄनुपवेशयेत् । उदङ्मुखवचनं प्राङ्मुखत्वनिवृत्त्यर्थम् । पितृवदिति वचनं ममैते पितर इत्येवं मनसा ध्यायन्नुपवेशयेदित्येवमर्थमित्येके । अन्ये तु पितुर्वृद्धं पितामहाय वृद्धतरं प्रपितामहाय वृद्धतममित्येवं यथावय उपवेशनार्थमिति । एकैकस्यैकैकमुपवेशयेत् । द्वौ द्वौ त्रींस्त्रीन्वा अतोऽपि ब्राह्मणा अधिका भवेयुः । सर्वथा ब्राह्मणाधिक्ये फलाधिक्यमस्त्येव । सर्वथाऽल्पकर्मणो महाकर्मणश्च क्वचिदपि समानफलताशंका न कार्या । महाकर्मविधानानर्थक्यप्रसंगात् । न त्वेवैकं सर्वेषां त्रयाणां भोजयेत् ‘ द्वौ देवे पितृकृत्ये त्रीनेकैकमुभयत्र वा । भोजयेत्सुसमृद्धोऽपि न प्रसज्येत विस्तरे ॥ ’

इति मनुनोक्तस्य एकैकमुभयत्रवेत्यस्य पक्षस्यायं प्रतिषेधः । अस्य प्रतिषेधं कुर्वता मनूक्तमन्यदनुज्ञातं भवति । तेनैतत्सिद्धं भवति । दैवमपि भोजनमत्र कार्यम् । तस्य विधिःस्मृतितोऽवगन्तव्यः । आचार्येण तु पित्र्यस्यैव विधिरुच्यते ॥ अस्मद्गृह्योक्तेतिकर्तव्यतामात्रमेव कार्यं न शास्त्रान्तरं दृष्ट्वा विस्तरः कार्यः । मनुरपि— 'सत्क्रियां देशकालौ च शौचं ब्राह्मणसम्पदम् । पञ्चैतान्विस्तरो हन्ति तस्मान्नेहेत विस्तरम् ॥ बह्वल्पं वा स्वगृह्योक्तं यस्य कर्म प्रकीर्तितम् । तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् ॥' इति गृह्यविदः 'ये स्तेनपतितक्लीबा ये च नास्तिकवृत्तयः इत्याद्याश्च वर्ज्या इति ॥ २ ॥

काममनाद्ये ॥ ३ ॥

आद्यं सपिण्डीकरणम् । त्रीनुद्दिश्य क्रियमाणश्राद्धमध्ये तदेव हि प्रथमम् । तद्वर्जितेषु सर्वेषु श्राद्धेषु कामं त्रयाणामेकं भोजयेत् । सपिण्डीकरणे तु नियमेन त्रयाणां त्रिभिर्भाव्यम् । काममिति वचनमापत्कल्पोऽयमिति ज्ञापनार्थम् । अन्ये त्वनाद्ये पार्वणवर्जित इति व्याचख्युः । तद्धयत्र प्रथमं निर्दिष्टम् । अन्ये त्वनाद्ये अभोजने आमहिरण्ये श्राद्धादाविति । 'आमैर्वा फलमूलैर्वा प्रदानमात्रं हिरण्येन वा प्रदानमात्रं' इति बौधायनः । अन्ये त्वनाद्ये दुर्भिक्ष इति । अन्ये त्वनाद्ये आद्याभावे अन्नाभावे सम्पदभाव इति ॥ ३ ॥

पिण्डैर्व्याख्यातं ॥ ४ ॥

जीवमृतानां पिण्डनिपरणमधिकृत्य ये पक्षाः पिण्डपितृयज्ञे उक्तास्ते श्राद्धेऽपि विज्ञेयाः ॥ ४ ॥

अपः प्रदाय ॥ ५ ॥

उपवेशनादनन्तरं ब्राह्मणपाणिष्वपो ददाति । आग्नेयीमुखः प्राचीनावीती पितृकर्म कुर्यात् ॥ ५ ॥

दर्भान्द्विगुणभुग्नानासनं प्रदाय ॥ ६ ॥

ततो दर्भान्द्विगुणभुग्नानासनेषु ददाति । आसनं प्रदायेति सप्तम्यर्थे द्वितीया । आवेशनस्य प्राक् चोदितत्वात् ॥ ६ ॥

अपः प्रदाय ॥ ७ ॥

ततः पुनरपो ददाति ॥ ७ ॥

---

१ इथं सूत्रयतोऽपि न भोजनात्पूर्वं पिण्डदानमभ्युपेतं भवति ।

तैजसाश्ममयमृण्मयेषु त्रिषु पात्रेष्वेकद्रव्येषु वा दर्भान्तर्हितेष्वप आसिच्य शन्नो देवीरभिष्टय इत्यनुमन्त्रितासु तिलानावपति तिलोऽसि सोमदेवत्यो गोसवे देवनिर्मितः। प्रत्नवद्भिः प्रत्तः स्वधया पितॄन्निमाँल्लोकान्प्रीणयाहि नः स्वधा नम इति ॥ ८ ॥

ततस्तैजसमेकं पात्रमश्ममयमेकं मृण्मयमेकं एतेषु त्रिषु पात्रेषु। त्रिद्रव्यासंभवे एकद्रव्येषु वा त्रिषु पात्रेषु। त्रीण्यपि तैजसानि वा त्रीण्यप्यश्ममयानि वा त्रीण्यपि मृण्मयानि वा तान्याग्नेयीदिक्संस्थानि निधाय तेषु दर्भानन्तर्धाय ततस्तेष्वपो निषिच्य ततः शन्नो देवीरित्यृचा पात्रत्रयस्था आपोऽनुमन्त्रयेत्। सकृदेव शक्यत्वान्नन्मन्त्रावृत्तिः। ततस्त्रिषु पात्रेषु तिलानावपति तिलोऽसीति मन्त्रेण। प्रतिपात्रं मन्त्रावृत्तिः। पितृशब्दस्योहो नास्तीत्युक्तं प्राक्[२]। ततः पात्रेषु गन्धमाल्याद्यावपेत् ॥ ८ ॥

प्रसव्येन ॥ ९ ॥

पित्र्यं कर्म सर्वं प्रसव्येनाप्रदक्षिणेन कार्यम्। अप्रदक्षिणं कार्यमित्यर्थः। तृतीया तु प्रकृत्यादिष्टत्वात्द्रष्टव्या। समेन धावतीतिवत्। 'प्रदक्षिणमुपचार' इत्याभ्युदयिके अपवाददर्शनाद्योगविभागोऽवगतः ॥ ९ ॥

इतरपाण्यङ्गुष्ठान्तरेणोपवीतित्वाद्दक्षिणेन वा सव्योपगृहीतेन पितरिदं ते अर्घ्यं पितामहेदं ते अर्घ्यं प्रपितामहेदंते अर्घ्यमिति ॥ १० ॥

उत्तरत्रोपवीयेति विधानात्सर्वमिदं पित्र्यं प्राचीनावीतिना कार्यमित्युक्तम्। अधुना उपवीतित्वादिति हेतुनिर्देशादत आरभ्यार्वाग्गन्धमाल्यादिदानादि यज्ञोपवीतिना कर्म कर्तव्यमिति गृह्यविदः। इतरस्य सव्यस्य पाणेरङ्गुष्ठान्तरेणार्घ्यं प्रयच्छेत्। उपवीतित्वाद्धेतोः। पित्र्ये तावत्प्राचीनावीतिना भाव्यमयं चोपवीती तस्मादित्यर्थः। येन पाणिना कर्म करोति दक्षिणेन वा सव्येन वा तस्मिन्नंसे यज्ञोपवीते स्थिते प्राचीनावीती भवति। ततोऽन्यस्मिन्नंसे स्थिते उपवीती भवति। अत्र तूपवीतित्वात्प्राचीनावीतित्वसिद्ध्यर्थं सव्यपाणिपितृतीर्थेन दातव्यमित्यर्थः। अथवा सव्यपाणेः शिष्टगर्हितत्वाद्दक्षिणं पाणिं सव्येन पाणिना गृहीत्वा दक्षिणेनैव पाणिनोपवीत्येवार्घ्यं प्रयच्छेत्। पित्रादित्रयाणां त्रिभिर्मन्त्रैर्यथाक्रमं प्रयच्छेत् ॥ १० ॥

---

२ अष्टकासूत्रवृत्तौ।

अप्पूर्वं ॥ ११ ॥

अर्घ्यप्रदानात्पूर्वमन्या अप्यपो दद्यादित्यर्थः ॥ ११ ॥

ताः प्रतिग्राहयिष्यन्सकृत्सकृत्स्वधा अर्घ्या इति ॥ १२ ॥

अर्घ्या इति । निवेदयेदिति शेषः । ता अर्घ्या आपः प्रतिग्राहयिष्यन्प्रतिग्रहणात्पूर्वं सकृत्सकृदर्घ्या अपो निवेदयेत् । स्वधा अर्घ्या इति मन्त्रेण । पित्रर्थे यावन्तो ब्राह्मणास्तेभ्यः प्रथममेकमेव पात्रं सकृन्निवेदयेन्न प्रतिब्राह्मणम् । तथा पितामहार्घ्यानां द्वितीयं सकृदेव । प्रपितामहार्घ्यानां तृतीयं सकृदेवेत्येवमर्थं सकृत्सकृदिति वचनम् । निवेदनस्य सकृन्नियमादन्यासामपां दानं अर्घ्यदानं च अर्घ्यमन्त्राश्च प्रतिब्राह्मणमावर्तन्ते । निवेदनान्योदकदानार्घ्यदानेषु पदार्थानुसमयः काण्डानुसमयो वा द्रष्टव्यः । गन्धादिदाने च तथा । एवमेकैकस्यानेकपक्षे । एकैकपक्षे त्वेकैकं पात्रमेकैकस्य निवेद्यान्या अप ऐककस्य दत्वा अर्घ्या अप एकैकस्य दद्यात् । सर्वेषामेकपक्षे त्रीण्यपि पात्राणि तस्यैव निवेद्य पुनः पुनरन्या अपो दत्त्वा तस्यैव त्रिरर्घ्यं त्रिभिर्मन्त्रैः प्रयच्छेत् ॥ १२ ॥

प्रसृष्टा अनुमन्त्रयेत या दिव्या आपः । पृथिवी संबभूवुर्या अन्तरिक्ष्या उत पार्थिवीर्याः । हिरण्यवर्णा यज्ञियास्ता न आपः शंस्योना भवन्त्विति संस्रवान्समवनीय ताभिरद्भिः पुत्रकामो मुखमनक्ति ॥ १३ ॥

ब्राह्मणैः प्रसृष्टा निर्णीता अर्घ्या अपोऽनुमन्त्रयेत् या दिव्या इत्यनेन मन्त्रेण । प्रसृष्टा इत्यादिकर्मणि क्तप्रत्ययः । भूतकालत्वमात्रे आनर्थक्यप्रसंगात् । तेन प्रतिब्राह्मणं पृथगनुमन्त्रणम् । अर्घ्यं दत्त्वा दत्त्वा निर्णीतास्तदानीमिवानुमन्त्रयेत् । एवंसर्वेषामर्घ्ये दत्ते संस्रवानर्घ्यशेषान्पात्रगतानेकीकरोति । उत्तरे द्वे पात्रे प्रथमपात्रे आसिञ्चतीत्यर्थः । एवं गृह्यविदः ततस्ताभिरेकीकृताभिरद्भिः पुत्रकामश्चेन्मुखमनक्ति । न चेन्नानक्ति ॥ १३ ॥

नोद्धरेत्प्रथमं पात्रंपितॄणामर्घ्यपातितम् । आवृतास्तत्र तिष्ठन्ति पितरः शौनकोऽब्रवीत् ॥ १४ ॥

पितॄणामर्घ्यपातितं पितॄणामर्घ्यशेषा आपो यस्मिन्पात्रे एकीकृता एवंभूतं

३–४ परिशिष्टे [ई] सूत्रे सप्तमे वृत्तौ ।

प्रथमं पात्रं तस्माद्देशान्नोद्धरेत् । समवनयनदेशान्नापनयेदाश्राद्धपरिसमाप्तेः । किमिति नोद्धरेत् । यस्मात्तस्मिन्पात्रेपितरस्तृतीयपात्रेण पिहितास्तिष्ठन्तीति गृह्यज्ञाः । तृतीयेन पात्रेण प्रथमपात्रस्यापिधानमिच्छन्ति । अन्ये तु तत्रेति तृतीयार्थे सप्तमी । तेनायमर्थः । आवृतास्तेन प्रथमेन पात्रेण पितरस्तिष्ठन्तीति । एतदुक्तं भवति । अर्घ्यपातितं प्रथमं पात्रं न्यग्बिलं कुर्यात् । तच्च नोद्धरेत् आसमाप्तेरिति व्याचख्युः । शौनकोऽब्रवीत् शौनक एवमवादीत् । शौनकग्रहणं तस्य पूजार्थम् । न विकल्पार्थम् ॥ १४ ॥

एतस्मिन्काले गन्धमाल्यधूपदीपाच्छादनानां प्रदानम् ॥ १५ ॥

आच्छादनं वस्त्रम् । इदानीं प्राचीनावीती भवेत् । ततो गन्धादीनि पञ्च ब्राह्मणेभ्यो ददाति । एतस्मिन्काल इति वचनं एतस्मिन्काले एतान्येव ददातीत्येवमर्थम् । तेन गोहिरण्यादीनां श्राद्धान्ते प्राक्स्वधावाचनात्प्रदानं कार्यमिति सिद्धम् । ‘ दत्वा तु दक्षिणां शक्त्या स्वधाकारमुदाहरेत् ’ इति स्मृतेः ॥ १५ ॥

उद्धृत्य घृताक्तमन्नमनुज्ञापयत्यग्नौ करिष्ये करवै करवाणीति वा ॥ १६ ॥

अनाहिताग्नेः पिण्डपितृयज्ञस्य च पार्वणस्य व्यतिषंगो भवति । इध्मोपसमाधानान्तं पिण्डपितृयज्ञं कृत्वा ब्राह्मणपच्छौचाद्याच्छादनान्तं पार्वणं कृत्वा ततः पिण्डपितृयज्ञस्थालीपाकादन्नमुद्धृत्य घृताक्तं कृत्वा पित्राद्यर्थान्ब्राह्मणाननुज्ञापयति अग्नौ करिष्ये इति वा अग्नौ करवै इति वा अग्नौकरवाणीति वा ॥ १६ ॥

प्रत्यभ्यनुज्ञा क्रियतां कुरुष्व कुर्विति ॥ १७ ॥

ब्राह्मणैरेवं प्रत्यभ्यनुज्ञा देया क्रियतामिति वा कुरुष्वेति वा कुरु इति यथासंख्यम् ॥ १७ ॥

अथाग्नौ जुहोति यथोक्तं पुरस्तात् ॥ १८ ॥

ततो अग्नौ जुहोति उक्तमार्गेण मेक्षणेनावदायावदानसंपदा जुहुयात् सोमाय पितृमते स्वधा नमोऽग्नये कव्यवाहनाय स्वधा नम इति स्वाहाकारेण वाग्निं पूर्वे यज्ञोपवीती मेक्षणमनुप्रहृत्येति । अथशब्दो होमादर्वाचीनं पिण्डपितृयज्ञांगं पूर्वं कृतमिति ज्ञापनार्थः । तेनानयोर्व्यतिषंगो लब्धः । अग्नौवचनमुत्तरविवक्षार्थम् ॥ १८ ॥

अभ्यनुज्ञायां पाणिष्वेव वा ॥ १९ ॥

अभ्यनुज्ञायामिति यदि ब्राह्मणाः पाणिषु होममभ्यनुजानन्ति । अग्निकार्यकरत्वं यदि स्वेषामभ्युपगच्छन्तीत्यर्थः । तथा सति पाणिषु जुहोति । अनुज्ञावचनं प्रत्यभ्यनुज्ञानवचनं च नैव स्तः । कथं तर्ह्यभ्यनुजानन्ति वा न वेति ज्ञातुं शक्यम् । उच्यते । यत्र पिण्डपितृयज्ञप्राप्तिरस्ति तत्राग्निप्राप्तिसद्भावात्पाणिहोमं नाभ्यनुजानन्ति । यत्र तु पिण्डपितृयज्ञकल्पप्राप्तिर्नास्ति तत्राग्निप्राप्त्यभावात्पाणिहोममभ्यनुजानन्ति । कथं पुनस्तत्रान्यभावः 'गृह्याणि वक्ष्यामः' [१।१।१] इति हि प्रतिज्ञातम् । उच्यते । पाणिमुखाः पितर इति श्रुत्याकर्षादग्निर्निवर्तितः । एवंच कृत्वा विधिवशेन तेषामभ्यनुज्ञा विज्ञेया न तु प्रतिवचनेनेति सिद्धम् । तेनाभ्यनुज्ञायामित्यस्य पिण्डपितृयज्ञकल्पप्राप्त्यभावेनाग्न्यभाव इत्ययमर्थः । ताभ्यामेव मन्त्राभ्यां पाणिषु जुहुयात् । यावन्तो ब्राह्मणाः पित्रादित्रयार्थमुपविष्टास्तेषां सर्वेषां पाणिषु जुहोति । वचनात् । मन्त्रौ च द्वौ । तत्रार्थादेकैकामाहुतिं विगृह्य विगृह्य सर्वेषां दक्षिणपाणिषु जुहोति । मेक्षणानुप्रहरणमर्थाल्लुप्तम् । अन्ये तु प्रतिब्राह्मणं द्वे आहुती ताभ्यमेव मन्त्राभ्यां जुव्हति । विग्रहविध्यभावादारम्भसामर्थ्याच्चेति । एवं पाणौ होमः । अस्मिन्पक्षे पिण्डानिपरणकाले ब्राह्मणानां समीपे पिण्डनिर्वपणं भवति । उच्छिष्टसंनिधौ पिण्डान्दद्याद्वा पितृयज्ञवदिति श्रुतिः । पाणिहोमस्य विषयमुत्तरत्र विस्तरेण विभावयिष्यामः । अनाहिताग्नेः पार्वणे अग्नौकरणमेव, न होमः । पाणिहोमं श्रुत्या द्रढयति ॥ १९ ॥

अग्निमुखा वै देवाः पाणिमुखाः पितर इति हि ब्राह्मणम् ॥२०॥

देवानामग्निमुखत्वादग्नौ होमः पितॄणां पाणिमुखत्वात्पाणौ होमो युक्त एवेत्यर्थः ॥ २० ॥

यदि पाणिष्वाचान्तेष्वन्यदन्नमनुदिशति ॥ २१ ॥

अर्थद्वयमत्र विधातुमिष्टमिति गम्यते । तत्राग्नौ कृत्वा भोजनेषु भोजनार्थमन्यदन्नमनुदिशति ददातीत्येकोऽर्थः । यदि पाणिहोमः कृतस्तदाचान्तेषु अन्यदन्नं ददातीत्यपरः । आचान्त शब्दे विप्रतिपन्नास्तत्र केचिदाहुः । यद्वा पाणिषु होमस्तदा हुतमन्नं भाजनेषु निधाय अभक्षयित्वैव निष्क्रम्याचामेयुः । आचान्तेष्वन्यदन्नं ददाति । ननु यदि भक्षणं न कृतं तर्ह्याचमने विधिर्न घटते । अशुचित्वाभावादिति चेत् वयं पृच्छामः । कृतेऽपि भक्षणे किमित्याचामेयुः । वचनादिति चेत् । तदत्राप्यविशिष्टम् । अत्रापि हि पाणिहोमनिमित्तमाचमनं चोद्यते । नच सर्वमाचमनमशुचित्वनिमित्तम् । कर्मांगनैमित्तिकयोरपि विद्यमानत्वात् । तथाहि पिण्डदानमुक्त्वाह मनुः —' आचम्योदक् परावृत्य त्रिराचम्य शनैरसून् ' इति ।

नैमित्तिकं चेदमशुचित्वाभावात्। तद्वदिदमपि नैमित्तिकम्। पूर्वं प्राशननिषेधश्च दृश्यते 'अन्नं पाणितले दत्तं पूर्वमश्नन्त्यबुद्धयः। पितरस्तेन तृप्यन्ति शेषान्नं न लभन्ति ते ॥ यच्च पाणितले दत्तं यच्चान्नमुपकल्पितम्। एकीभावेन भोक्तव्यं पृथग्भावो न विद्यते ॥' इति। ननु सपिण्डीकरणे दृश्यते। हुतशेषं पितृभ्यः पाणिषु ददातीति तस्यैवायंनिषेधः चोदितत्वात्तस्य। इदं तु जुहोतिचोदितं तस्मान्नास्य निषेध इति चेत्। तत्र ब्रूमः दत्तशब्देन विधितो यत्पाणौ निहितमन्नं तदुच्यते। एवमुदीच्या आहुः। भाष्यकारास्त्वेतन्नेच्छन्ति। चमु भक्षणे। आचान्तेष्विति भक्षितेष्वित्यर्थः। पाणिषु हुतं चेत्तेष्वन्नेषु प्राशितेष्वन्यदन्नं ददाति न तयोर्मिश्रीभावः कार्यः। अथाग्नौकरणपक्षे। 'अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत्। योह्यग्निः स द्विजो विप्रैर्मन्त्रदर्शिभिरुच्यते ॥' इति हि मनुनाग्निसाम्यं दर्शितम्। तत्र प्राशितेष्वाचमनं न कार्यम् अग्नितुल्यत्वदर्शनात्। प्रयोगान्तरस्य च तद्विषयस्याविधानात्। केचित्त्वङ्गुष्ठानिवेशनादिप्रयोगान्तरं कुर्वन्ति तत्पक्षे आचमनं कार्यं न वेति चिन्त्यम्। अन्नं पाणितले दत्तमित्ययं निषेधः सपिण्डीकरण एव। तस्य ददातिचोदितत्वात् अस्य न भवति जुहोतिचोदितत्वात्। तच्छब्दचोदितस्यैव च तद्ग्रहणं युक्तं तस्यैव प्रथमं संप्रत्ययादिति। अत्र युक्तं ज्ञात्वा कार्यम् ॥ २१ ॥

अन्नमन्ने ॥ २२ ॥

हुतशेषमन्नं भोजनार्थेषु पात्रेषु निहितेष्वन्नेषु ददाति अग्निहोमे पाणिहोमे च समानमिदम् ॥ २२ ॥

सृष्टं दत्तमृध्नुकमिति ॥ २३ ॥

सृष्टं प्रभूतं दत्तं ऋध्नुकं ऋद्धिकरणशीलम्। इतिशब्दो हेत्वर्थः तस्मात्प्रभूतमन्नं देयमिति भोजनस्य पर्याप्तमात्रं न देयम्। ततोऽप्यधिकं देयं यथोच्छिष्येतेत्यर्थः ॥ २३ ॥

तृप्तान्ज्ञात्वा मधुमतीः श्रावयेदक्षन्नमीमदन्तेति च ॥२४॥

मधुवाता इति तिस्रो मधुमत्य इति प्रसिद्धाः। अन्नादिनिवृत्तेच्छां ज्ञात्वा ततो मधुमतीति तिस्रोऽक्षन्नित्येकां श्रावयेत् तृप्तेषु श्रावयेदित्येव वक्तव्ये ज्ञात्वेति वचनं ज्ञात्वैताःश्रावयेत् पूर्वं तु भोजनकाले अन्याः श्रावयेदित्येवमर्थम्। मनुनाप्युक्तम्--'स्वाध्यायं श्रावयेत्पित्र्ये धर्मशास्त्राणि चैव हि। आख्यानानीतिहासांश्च पुराणानि खिलानि च इति ॥ २४ ॥

सम्पन्नमिति पृष्ट्वा यद्यदन्नमुपभुक्तं तत्तत्स्थालीपाकेन सह पिण्डार्थमुद्धृत्य शेषं निवेदयेत् ॥ २५ ॥

अथ सम्पन्नमित्यनेन वाक्येन ब्राह्मणान्पृच्छति ते च सम्पन्नमिति प्रत्यूचुः । ततो यद्यदन्नमुपभुक्तं तस्मात्तस्मादन्नादुद्धरन्ति पिण्डार्थम् । तत्तस्थालीपाकेन सहैकीकरोति अन्नप्राकिरणार्थं चार्थादस्मिन्नेव काले सर्वस्माद्भुक्तशेषादुद्धराति । ततो भुक्तोद्धृतशेषं निवेदयेद्ब्राह्मणेभ्यः । इदं शिष्टं किमनेन कर्तव्यमिति । स्थालीपाकेन सहेति नात्रापूर्वः स्थालीपाकश्चोद्यते । सर्वश्राद्धेषु प्रसङ्गात् । अनिष्टं चैतत् । तेनानुवाद एवायम् तेन यत्र स्थालीपाको विहितस्तत्र तेन भुक्तशेषेण च पिण्डनिपरणं भवति । यत्र तु स्थालीपाकविधिर्नास्ति तत्र भुक्तशेषेणैव केवलेन निपरणं भवति । आचार्येणाष्टौ श्राद्धान्युक्तानि—' अन्वष्टक्यं च पूर्वेद्युर्मासि मासि च पार्वणम् । काम्यमभ्युदयेष्टम्यामेकोद्दिष्टमथाष्टमम् ॥ ' तत्र पूर्वेषु चतुर्षु स्थालीपाका दुद्धृत्याग्नौकरणम् । अग्निसमीपे स्थालीपाकेन भुक्तशेषेण च पिण्डनिपरणं पिण्डपितृयज्ञकल्पस्य तेषु विद्यमानत्वात् । तच्च साधितमेव प्राक् । उत्तरेषु चतुर्षु भोजनार्थादन्नादुद्धृत्य घृताक्तं कृत्वा पाणिहोमः । ब्राह्मणसमीपे भुक्तशेषमात्रेण पिण्डनिपरणम् । तेषु स्थालीपाकविध्यभावात्पिण्डपितृयज्ञकल्पप्राप्त्यभावाच्च । तत्रार्थाल्लेखा च तदभ्युक्षणं च सकृदाच्छिन्नावस्तरणं च लेखा त्रिरुदकेनेत्यादिपत्नीप्राशनान्तं भवति । अग्निं प्रत्येयादिति तु न भवति अन्यच्चातिप्रणयनादि सर्वं न भवति ॥ २५ ॥

अभिमतेऽनुमते वा भुक्तवत्स्वनाचान्तेषु पिण्डान्निदध्यात् ॥२६॥

शेषं निवेदितं ब्राह्मणैर्यद्यभिमतं स्वीकर्तुम् अभिप्रेतं तदा तेभ्यो दद्यात् । अथ यद्यनुमतमनुज्ञातमिष्टैः सहोपभुज्यतामिति तदा स्वीकृत्य ज्ञातिभिर्बान्धवैश्च सहोपभुञ्जीत । मनुरपि–' ज्ञातिभ्यः सत्कृतं दत्वा बान्धवानपि पूजयेत् । ' इति । ततोऽनाचान्तेषु पिण्डान्निध्यात्पूर्वोक्तविधिना । अनाचान्तेष्वित्येव सिद्धे भुक्तवत्स्वितिवचनं भुक्तवत्स्वेव निदध्यात् । न पूर्वमित्येवमर्थम् । मनुना भोजनात्पूर्वं निपरणं विहितं तन्न कार्यमिति । अतो ज्ञायते । अन्यस्य मनुप्रोक्तस्याविरुद्धस्याङ्गस्येच्छातः करणमिति ॥ २६ ॥

आचान्तेष्वेके ॥ २७ ॥

आचान्तेषु निपरणमेके इच्छन्ति ॥ २७ ॥

प्रकीर्यान्नमुपवीयों स्वधोच्यतामिति विसृजेत् ॥ २८ ॥

आचमनोत्तरकालमुच्छिष्टानां समीपेषु अन्नं प्रकिरेत् । अनाचान्तेषु पिण्डदानपक्षेपि पिण्डं दत्वा तत उच्छिष्टानां समीपे अन्नं प्रकिरेत् । मुनरपि—' सार्ववार्णिकमन्नाद्यमानीयाप्लाव्य वारिणा । समुत्सृजेद्भुक्तवतामग्रतो विकिरन्भुवि ॥ ' इति । अधुना प्रथमं पात्रं विवृणुयात् । तत उपवीय यज्ञोपवीती भूत्वेत्यर्थः । मनुरपि—' उद्धृते दक्षिणे पाणावुपवीत्युच्यते बुधैः । सव्ये प्राचीनावीती निवीती कण्ठसज्जने ॥ ' इति । ततो दक्षिणां दत्वा ॐ स्वधोच्यतामिति ब्राह्मणान्विसृजेत् अतिसृजेत् । अनुजानीयादुत्थापयेदित्यर्थः । ते च ॐ स्वधेति प्रत्यूचुः ॥२८॥

अस्तु स्वधेति वा ॥ २९ ॥

अस्तु स्वधेति वा विसृजेत् । तथा सति तेच अस्तु स्वधेति प्रत्यूचुः । ' विसृज्य ब्राह्मणांस्तांस्तु नियतो वाग्यतः शुचिः । दक्षिणां दिशमाकांक्षन्याचेतेमान्वरान्पितॄन् ॥ ' ' दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव च । श्रद्धा च नो माव्यगमद्बहुधेयं च नोऽस्त्विति ॥ उच्छेषणं तु तत्तिष्ठेद्यावद्विप्रा विसर्जिताः । ततो गृहबलिं दद्यादिति धर्मो व्यवस्थितः ॥ ' इति मनुः । अष्टौ श्राद्धानीत्युक्तम् । तत्रान्वष्टक्यं च पूर्वेद्युश्च मासि मासि चेति श्राद्धत्रयं द्वितीयेऽध्याये व्यक्तीकृतम् । पार्वणं चानाहिताग्नेर्व्यक्तीकृतमेव । आहिताग्निस्तु पिण्डपितृयज्ञं समाप्य ततः पार्वणं करोति । पितृयज्ञं तु निर्वर्त्येति मनुः । तत्र पाणिहोमः । ब्राह्मणसमीपे भुक्तशेषमात्रेण पिण्डदानं च । काम्ये च पाणिहोमः । भुक्तशेषमात्रेण पिण्डदानं चास्त्येव । मासि श्राद्धस्य पार्वणस्य च एककार्यत्वादन्यतरेणैवालमित्युक्तम् । तत्र मासि श्राद्धं कृतवांश्चेत्पर्वणि केवलं पिण्डपितृयज्ञः कार्य एव । काम्यश्राद्धं कृतं चेत्तेनैवालं न पुनर्मासिश्राद्धपार्वणश्राद्धे । काम्यश्रुतिस्तु तिथिविशेषमपेक्ष्य चरितार्था न पुनरावर्तयितुं शक्नोति । अग्निहोत्रद्रव्यवत् । आभ्युदयिके तु युग्मा ब्राह्मणा अमूला दर्भाः । प्राङ्मुखोपवीती स्यात्प्रदक्षिणमुपचारो यवैस्तिलार्थो गन्धादिदानं द्विर्द्विः ऋजुदर्भानासने दद्यात् । ' यवोऽसि सोमदेवत्यो गोसवे देवनिर्मितः । प्रत्नवाद्भिः प्रत्तः पुष्ट्या नान्दीमुखान्पितॄनिमाँल्लोकान्प्रीणयाहि नः स्वाहा ' इति यवावपनम् । नान्दीमुखाः पितरःप्रीयन्तामित्यर्घ्यनिवेदनं यथालिङ्गम् नान्दीमुखाः पितर इदं वो अर्घ्यमित्यर्घ्यप्रदानमन्त्रो यथालिङ्गम् । अग्नये कव्यवाहनाय स्वाहा । सोमाय पितृमते स्वाहेति होममन्त्रौ । मधुवाता इति तृचस्य स्थाने उपास्मै गायतेति पञ्च मधुमतीः श्रावयेत् । अक्षन्नमीमदन्तेति षष्ठीम् । आचान्तेषु भुक्ताशयान्गोमयेनोपालिप्य तेषु प्राचीनाग्रान्दर्भानास्तीर्य तेषु पृषदाज्यमिश्रेषु भुक्तशेषैकैकस्य द्वौ द्वौ पिण्डौ दद्यात्तेनैव क्रमेण मन्त्रावृत्तिरुक्ता अन्ये तु नान्दीमुखेभ्यः पितृभ्यः स्वाहेति एवं यथालिंगं पिण्डान्निपृणन्ति । सर्पिषि

दध्यानयति एतदेव पृषदाज्यम् । अनुमन्त्रणादि पूर्ववत् । अन्ये त्वनुमन्त्रणादि नेच्छंति । ॐ स्वधोच्यतामित्यस्य स्थाने उपसंपन्नमिति शेषं पूर्ववत् । अष्टमीश्राद्धं काम्यवत् । एकोद्दिष्टे त्वेको विप्र एकमर्घ्यपात्रं न दैवं न धूपो न दीपो न स्वधाशब्दो न पितृशब्दो न नमःशब्दः तिलोऽसीति मन्त्रस्योहः तूष्णीं वा तिलावपनं अर्घ्यनिवेदनं तूष्णीम् । अर्घ्यें दत्ते तत्पात्रं न्युब्जं करोति । भोजनार्थादन्नादुद्धृत्य घृताक्तं कृत्वा अमुष्मै स्वाहेति पाणिहोमः । अमुष्मैशब्दस्य स्थाने प्रेतनाम वाच्यम् । नाभिश्रवणं भुक्तशेषमात्रेणैकं पिण्डं निगृणीयात् । तस्य गोत्रं नाम गृहीत्वा निनयनमन्त्रस्योहः । अनुमन्त्रणादि सर्वं समन्त्रकं भवति पत्नीप्राशनं तु नास्ति । अभिरम्यतामिति विसर्जनम् । एवं नवश्राद्धवर्जितेष्वेकोद्दिष्टेषु । नवश्राद्धेषु तु एकोद्दिष्टेषु सर्वममंत्रकं भवति । ‘ नवश्राद्धममंत्रकम् इति वचनात् । दशाहेषु यानि श्राद्धानि तानि नवश्राद्धानि । नवश्राद्धं दशाहानीति वचनात् यत्र यत्रास्माभिः पाणिहोम उक्तस्तत्र सर्वत्र भाष्यकारः पिण्डदानं नेच्छति । स्थालीपाकेन सह भुक्तशेषेण पिण्डदानं चोद्यते तत्र च स्थालीपाकाभावादिति । ये तु पिण्डदानमिच्छन्ति त एवमाहुः । स्थालीपाकेन सह पिण्डदानं कार्यं न पृथक् स्थालीपाकेन भुक्तशेषेण चेत्ययमर्थः । न तु यत्र स्थालीपाकस्तत्रैव पिण्डदानं कार्यमिति । तेन तेष्वपि केवलेन भुक्तशेषेण पिण्डदानं कार्यमिति ॥ २९ ॥ इति पार्वणश्राद्धसूत्राणि ।

पार्वणश्राद्धप्रयोगः ।

आचम्य, प्राचीनावीती, पितृपितामहप्रपितामहानाम् । अमुकगोत्राणाम् । अमुकनाम्नाम् पार्वणश्राद्धमन्नेन हविषा सद्यः करिष्ये ।

पितुरमुकगोत्रस्य अमुकनाम्नः स्थाने क्षणः करणीयः इति तत्तद्गोत्राद्युच्चार्य पित्रादित्रयार्थं क्षणं दत्त्वा, स्नातान् कृतपच्छौचान्, आचान्तान्, उदङ्मुखानुपवेश्यासनेषु अयुग्मद्विगुणीकृतान्दर्भान्प्रदायापो दत्त्वा अर्घ्यपात्रत्रयमाग्नेयीसंस्थमासाद्य दर्भान्तर्हितेष्वप आसिच्य

शन्नोदेवीरभिष्टय आपो भवन्तु पीतये ।
शंयोरभिस्रवन्तु नः ॥ १ ॥
इतिसकृदनुमन्त्र्य
तिलोसि सोमदेवत्यो गोसवे देवनिर्मितः ।

प्रत्नवद्भिः प्रत्तः स्वधया पितृन्निमाँल्लोकान्प्रीणयाहि नः स्वधा नमः २॥
इति आवृत्त्या प्रतिपात्रं तिलानोप्य

स्वधा अर्घ्याः

इति आवृत्त्या प्रत्येकम्पात्राणि निवेद्यापो दत्त्वोपवीती सव्योपगृहीतदक्षिण-हस्तपितृतीर्थेन

" पितरिदंतेऽर्घ्यम् "

इति पित्रर्थद्विजहस्ते दत्त्वा तद्धस्तात्संस्रवन्तीरपो ' या दिव्या
आपः पृथिवी सम्बभूवुर्या अन्तरिक्ष्या उत पार्थिवीर्याः ।
हिरण्यवर्णा यज्ञियास्ता न आपः शं स्योना भवन्तु ।

इत्यनुमन्त्र्यापो दद्यात् । एवं पितामहेदन्तेऽर्घ्यम्प्रपितामहेदन्तेऽर्घ्यमित्यादिनान्यत्र दत्त्वा पितृतृतीयपात्रद्वितियपात्रगतं जलशेषं प्रथमे आनीय तत्पात्रमासमाप्तेर्न चालयेत् ततो गन्ध माल्य धूप दीपाच्छादनानि, प्रतिपदार्थमाद्यन्तयोरुदकसहितन्दत्त्वा भोजनपात्राण्यासाद्य पाकादुद्धृतमोदनं घृताक्तं स्वयंगृहीत्वा वामहस्तगृहीतेन मेक्षणेन दक्षिणहस्ते उपस्तीर्य ततोऽवदाय पात्रस्थमवत्तं चाभिघार्य पितृस्थानीयविप्रपाणौ

सोमाय पितृमते स्वधा नमः

इति हुत्वा तथैव प्रत्यभिघारणवर्जमवदाय

' अग्नये कव्यवाहनाय स्वधा नमः '

इति हुत्वा पात्राणि परिविष्य

पित्रे, अमुकगोत्राय, अमुकनाम्ने, इदमन्नंदत्तमातृप्तेः स्वधा । एवमन्यत्रापि । तृप्ताञ्ज्ञात्वा मधुमतीः श्रावयेत् ।

मधु वाता ऋतायते मधुक्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ॥
मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः ।
मधुद्यौरस्तु नः पिता ॥
मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः ॥
अक्षन्नमीमदन्त ह्यवप्रिया अधूषत ।

अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजान्विन्द्र ते हरी । सम्पन्नमिति तैः प्रत्युक्तेऽन्नं प्रकीर्योपवीती

ॐ स्वधोच्यताम् ।

इति विप्रान्विसर्जयेत् विप्रास्तु ।

अस्तुस्वधा ।

इति ब्रूयुः । कर्माङ्गत्वाद्दक्षिणापि देया यथाविभवम् । आचम्य । अनेन पार्वणश्राद्धाख्येन कृतेन कर्मणा परमेश्वरः प्रीयताम् ।

सपिण्डकः श्राद्धप्रयोगः ॥

आचम्य, प्राचीनावीती पितृपितामहप्रपितामहानाम्, अमुकगोत्राणाम् । अमुकनाम्नाम् पार्वणश्राद्धमन्नेन हविषा सद्यः करिष्ये । पितुर्गोत्रस्यामुकनाम्नःस्थाने क्षणः करणीयः । इति तत्तङ्गोत्राद्युच्चार्य पित्रादित्रयार्थे क्षणं दत्त्वा, स्नातान्, कृतपच्छौचान् आचान्तान् उदङ्मुखानुपवेश्यासनेषु, अयुग्मान्द्विगुणीकृतान्दर्भान्प्रदायापोदत्त्वाऽर्घ्यपात्रत्रयमाग्नेयीसंस्थमासाद्य दर्भान्तर्हितेष्वप आसिच्य ।

शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ॥

इति सकृदनुमन्त्र्य सम्पन्नमित्यन्तं पूर्वोक्तं कृत्वोपभुक्तात्सर्वस्मादन्नात्किंचित्पिण्डार्थे विकिरार्थे च पृथक्कृत्य शिष्टमन्नं तेभ्यो निवेद्याचान्तेषु कुशमूलेन

अपहता असुरा रक्षांसि वेदिषदः ।

इति लेखामुल्लिख्य तामभ्युक्ष्य सकृदाच्छिन्नैर्दर्भैरवस्तीर्य त्रिषु स्थानेषु ।

शुन्धतां पितरः, शुन्धन्ताम्पितामहाः, शुन्धन्तां प्रपितामहाः इति त्रिरुदकेनोपनयेत् तस्याम्पिण्डान्निपृणीयात्, पराचीनपाणिः, एतत्ते पितर्ये च त्वामत्रानु एवं त्रिर्दत्त्वा पितामह, प्रपितामहेत्यूह्यम् इति ।

अत्र पितरो मादयध्वम् यथाभागमावृषायध्वम् । इति पिण्डाननुमन्त्र्य सव्यवृदुदङ्ङावृत्त्य यथाशक्त्यनुश्वासान्नासित्वाभिपर्यावृत्य ।

अमीमदन्त पितरो यथाभागमावृषायीषत ।

इत्यनुमन्त्र्य पिण्डशेषमाघ्राय पूर्ववच्छुन्धन्ताम्पितर इत्यादिमन्त्रैरुदकनिनयनम्पिण्डेषु कृत्वा

पितरभ्यङ्क्ष्व, पितामहाभ्यङ्क्ष्व, प्रपितामहाभ्यङ्क्ष्व,

इत्यभ्यंजनं दत्वा, पितरङ्क्ष्वेत्यादिनांजनं दत्वा, वासो, दशां, पञ्चाशद्वर्षताया ऊर्ध्वे स्वं लोम वा पिण्डेषु दद्यात्तत्र मन्त्रः ।

एतद्वः पितरोवासोमानोतोन्यत्पितरोयुङ्ध्वम् ।

अथैनानुपतिष्ठेत—

' नमो वः पितर इषे नमो वः पितर ऊर्जे नमो वः पितरः शुष्माय नमो वः पितरो घोराय नमो वः पितरो जीवाय नमो वः पितरो रसाय । स्वधा वः पितरो नमो वः पितरो नम एता युष्माकं पितरः

इमा अस्माकं जीवावो जीवन्त इह सन्तः स्याम ।
मनोन्वाहुवामहे नाराशंसेन सोमेन ॥
पितॄणाञ्च मन्माभिः ॥
आत एतु मनः पुनः क्रत्वे दक्षाय जीवसे ॥
ज्योक्च सूर्यं दृशे ॥
पुनर्नः पितरो मनो ददातु दैव्यो जनः ॥
जीवं व्रातं सचेमहि ॥

अथैनान् पिण्डांश्चालयेत् ।

परेतन पितरः सोम्यासो गम्भीरेभिः पथिभिः पूर्विणोभिः ॥

दत्वायास्मभ्यं द्रविणेह भद्रं रयिं च नः सर्ववीरं नियच्छत ॥ ततोऽन्नं विकीर्य यज्ञोपवीती दक्षिणांदत्वा ।

ॐस्वधोच्यतामितितान्विसृजेत् ।

ॐ स्वधा इति तैः प्रतिवक्तव्यम् । आचम्य, अनेन पार्वणश्राद्धेनकृतेनकर्मणा-परमेश्वरः प्रीयताम् ॥

इति सपिण्डकश्राद्धप्रयोगः ।

श्राद्धीयमन्त्रभाष्यम् ॥

शन्नो देवीरभिष्टय आपो भवन्तु पीतये ॥

शं योरभिस्रवन्तु नः ॥ १ ॥ १०। ११९ । ऋ० सं०

सायणभाष्यं—नोऽस्माकं पापापनोदद्वारेण शं सुखं भवन्तु देवीर्देव्य आपः । अभिष्टयेऽस्मद्यज्ञाय भवन्तु । यज्ञाङ्गभावाय च भवन्त्वित्यर्थः । पीतये पानाय च भवन्तु । तथा शं उत्पन्नानां रोगाणां शमनं योर्यावमुत्पन्नानां । पृथक्करणं च कुर्वन्तु । अपि नोऽस्माकमभ्युपरिस्रवन्तु शुद्धार्थं सिंचतु ॥ आंबरीषः सिन्धुद्वीपः आपोदेवता अनुष्टुप्छंदः श्रौतो विनियोगस्तावदाश्विनशस्त्रयोरुक्तः ।

अत्र श्राद्धकर्मणि सूत्रकारो विनियुंक्ते इमं मंत्र तत्रायं विशेषः, पाकयज्ञान्तर्गतत्वात्पार्वणस्यापि यज्ञशब्दवाच्यत्वं । अब्देवतास्तुतिपूर्वकमेव तासामासेचनं युक्तं ॥

तिलोसि सोमदेवत्यो गोसवे देवनिर्मितः । प्रत्नवद्भिः प्रत्तः स्वधया पितॄन्निमाँल्लोकान् प्रीणयाहि नः स्वधा नमः ।

मन्त्रार्थः—तिलस्त्वमसि किम्भूतः सोमदैवत्यः सोमो देवता अस्येति सोमदेवत्यः, पुनः किम्भूतः गोसवः, गां स्वर्गं सूते यज्ञः तस्मिन् । इति गोसवो तिलो हि दत्तः सन् दातुः पापक्षयं कुर्वाणः स्वर्गं जनयति । अपि किम्भूतः देवनिर्मितः उत्पादितः अपि किम्भूतः अद्भिः पृक्तो जलेन मिश्रिते अथवा परातनैर्दत्तः । यतस्त्वमेवंभूतस्तस्मादस्मा ं पितॄन् लोकान् पितृपितामहप्रभृतीन् प्रत्नं चिरकालं स्वधया स्वधाकारेण प्रीणयाहि प्रीतान् कुरु । स्वधाकारस्तिलप्रक्षेपे । तिलोसीत्यादिस्वधया इत्यन्तेन तिलं स्तुत्वा त्वमस्माकं पितॄन् प्रीतान् कुरु इति याच्मेति वाक्यार्थः ॥ प्रीणाहीति पाठे प्रीधातोर्लोट् सिप्स्वाच्छंदसीति विकल्पेन पित्वे सति मित्वाभावात् तन्निबन्धनइकारो भवति । स्वाहा नम इति पाठे यद्यपि स्वाहादेवहविर्दानइत्यत्र पित्र्ये कर्मणि स्वाहाकारोऽयुक्तस्तथापि कात्यायनेन महर्षिणा स्वाहान्तस्यैव पाठादनुपपत्तिर्नाशङ्कनीया ॥ २ ॥

स्वधा अर्घ्याः ॥

अर्घ्याः आप इमा युष्मभ्यं इति निवेदनं । स्वधेति अव्ययं निवेदनार्थे दानार्थेऽपि विनियुज्यते तथा चामरे स्वाहादेवहविर्दाने श्रौषट् वौषट् वषट् स्वधा । पितृभ्यः स्वधा इति प्रयोगदर्शनात् ।

पितरिदं तेऽर्घ्यम्=

हे पितः इदं तेऽर्घ्यं पूजनीयं जलमस्तु ॥ एवं सर्वत्र ।

या दिव्या आपः पृथिवी संबभूवुर्या अन्तरिक्ष्या उत पार्थिवीर्याः।
हिरण्यवर्णा यज्ञियास्ता न आपः शं स्योना भवन्तु ।

या आपः दिवि संभूताः पृथिव्यां संबभूवुः अथवा पृथिवीरूपेण परिणताः । अद्भ्यः पृथिवीति वचनात् । या च अन्तरिक्ष्याः अन्तरिक्षे भवाः । या च पार्थिवीः पृथिव्यामेव संभूताः । हिरण्यवर्णाः । हिरण्यवर्णाइत्यनेन हिरण्यमिव निर्मलत्वं उच्यते । या च यज्ञियाः यज्ञार्थे अर्हास्ता आपः नः अस्मभ्यं शं अनिष्टशान्तिहेतवो भवन्तु सुखहेतवश्च भवंतु ।

सोमाय पितृमते स्वधा नमः—

सोम एव पितॄणां पतिरित्यस्य पितृमत्त्वं इति तै० ब्रा० १।६ ॥ सोमाय पितृमते पुरोडाशं षट्कपालंनिर्वपतीत्यत्र भाष्ये स्पष्टं ।

अग्नये कव्यवाहनाय स्वधा नमः॥

कव्यं, पैतृकं हविस्तत्तेभ्यः प्रापयतीति कव्यवाहनोग्निः एतद्गुणविशिष्टाग्नये नम एतदस्त्वित्यर्थः ॥

मधु वाता ऋतायते मधुक्षरन्ति सिन्धवः माध्वीर्नः संत्वोषधीः ॥

ऋतं यज्ञमिच्छतीति ऋतायन् तस्मै ऋतायते यजमानाय वाता वायवो मधु मधुमन्तः सुखवन्तो वान्तु । ऋतायत इत्यत्र क्यचि चेति ७।४।३३ प्राप्तस्येत्वस्य निच्छंदस्य पुत्रस्येत्यभावः। ७।४।३५ अश्वाघःस्यात् ७।४।३७ इत्यश्वाघयोरेव क्यच्यात्वविधानात् अकृत्सार्वधातुकयोः ७।४।२५ इत्यात्वमपि न संहितायां तु छान्दसो दीर्घः । मधु मधुमानित्यग्रे मतुप्प्रत्ययदर्शनात् । सर्वत्र मधुशब्दाग्रे मतु-ब्ज्ञेयः । सिन्धवः स्यन्दमाना नद्यः समुद्रा वा मधु मधुमत् उदकं क्षरन्ति स्रव-न्त्वित्यर्थः तिङ्ङतिङः (७।१।३९) इति लोटो लडादेशः । ओषधीः ओषधयो नोऽस्माकं माध्वीः मधुररसोपेताः सन्तु ॥

मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः । मधु द्यौरस्तु नः पिता ॥

नक्तं रात्रिर्नोऽस्माकं मधु मधुमत् मधुररसोपेतमानन्दकरमस्तु । उतापि च उषसो दिवसा अपि मधुमन्तः सन्तु । पार्थिवं रजः पृथिवीलोको मातृभूतो मधु-मन्मधुररसोपेतमस्तु । पिता पितृभूतो द्यौः द्युलोको मधु मधुमान् मधुररसोपे-तोऽस्तु ॥

मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥

वनस्पतिरश्वत्थादिर्नोऽस्माकं मधुमान्रसवान् यज्ञसाधनभूतोऽस्तु । सूर्यो मधुमान् संतापराहित्यलक्षणमाधुर्य रसोपेतोऽस्तु गावः यज्ञसाधनभूता रश्मयो नोऽस्माकं माध्वीः मधुमत्यो रसवत्यो भवन्तु " रसो वै मधु " (७।५।१।४) इति श्रुतेः वातादीनि रसवन्त्यस्माकं भोग्यानि भवन्तीति सर्वोर्थः ॥

अक्षन्नमीमदन्त ह्यवप्रिया अधूषत । अस्तोषत स्वभानवो विप्रान-
विष्ठया मती योजान्विन्द्र ते हरी ॥

पितृयज्ञाख्येकर्मणि ये पितरः सन्ति तेऽस्माभिर्दत्तं हविःस्वरूपमन्नमक्षन् भक्षितवन्तः । कथमेतदवगम्यते हि यस्मादमीमदन्त हर्षं प्राप्ताः अस्मदीयां भक्तिमवगम्य प्रियाः प्रीतियुक्ताः सन्तः अधूषत स्वकीयं शिरः कम्पितवन्तः । यद्वा प्रियास्तनूरवाधूषत । किं च स्वभानवः स्वयं दीप्तियुक्ता विप्राः मेधाविनः सन्तो नविष्ठया नवतमया मती मत्या बुध्या युक्ता अस्तोषत स्तुतिं कृतवन्तः । अहो स्वाद्वन्नं बहु दत्तमहो भक्तिरित्याद्यभिधानं स्तुतिः अतो हे इन्द्र नु क्षिप्रं ते तव हरी एतन्नामकौ हरितवर्णावश्वौ योज रथे योजय । तवाभीष्टा याः पितृतृप्तेः संपन्नत्वात्तैः पितृभिः सह त्वया गन्तव्यमित्यर्थः ॥

अपहता असुरा रक्षांसि वेदिषदः ॥ आ. श्रौ. सू. २।६।९

भाष्यम्ः—सुरविरुद्धानि यानि रक्षांसि राक्षसाः वेदिषदः परिष्कृतायाङ्कर्मभूमावुपविशन्तस्ते अपहता निराकृता इति यावत् ।

एतत्ते पितर्ये च त्वामत्रानु ॥ आश्व. श्रौ. सू. २।६।१५

भाष्यम्—हे पितस्ते तुभ्यमेतत्पिण्डीकृतमन्नन्दत्तं ये चान्येऽत्रं त्वामनु वर्तन्ते तेभ्योप्येतद्दत्तम् । एवं सर्वत्र विभावनयिम् । पठ्यते चायम्मन्त्रः केनचिंदेशेन पृथग्भूय कृ. य. ८।५

" एतत्ते तत ये च त्वामन्वेतत्ते पितामह प्रपितामह ये च
त्वामनु " इति ।

तत्रैवान्यदपि " एतत्ते तत ये च त्वामन्विति तिसृषु स्रक्तीषु निदधाति । तस्मादातृतीयात्पुरुषनाम निगृण्हन्ति । एतावन्तो हीज्यन्ते " तै. ब्रा. १ प्र. ६। अ० ९।

भाष्यम्——यस्मान्मन्त्रेषु तत पितामह प्रपितामहेत्येवं साधारणशब्दनिर्देशः कृतस्तस्माल्लोकेऽप्यातृतीयात्पुरुषात् प्रपितामहपर्यन्तं सम्बन्धविशेषेणैव व्यवहरन्ति न तु तदीयं देवदत्तविष्णुशर्मादिनामोच्चारयन्ति । यस्मात्पार्वणश्राद्धेषु पित्रादयस्त्रय एव पूज्यन्ते न तूपरितनास्तस्मादत्रापि त्रयाणां निर्देशो युक्तः ।

अत्र पितरो मादयध्वं यथाभागमावृषायध्वम् ॥

आ. श्रौ. सू. २।७।१

भाष्यम्——हे पितरोऽत्र स्वाक्तिगतपिण्डेषु स्वस्वभागमनतिक्रम्य हृष्टा भवत । आवृषायध्वम् । कामानां इच्छानां वर्षुका भवत इत्यर्थः ॥

एतद्वः पितरो वासो मा नोतोन्यत्पितरो युङ्ध्वम् ॥

आ. श्रौ. स २।७।६

हे पितरः एतद्वो वस्त्रं हे पितरः अतः अस्मादन्यत् मा युङ्ध्वम् मा नियोजध्वम् । अत्र कृष्णयजुर्वेदे विधानमुपलभ्यते तद्यथा स्थानं विनिवेशयामः ।

" वीरं वा वै पितरः प्रयन्तो हरन्ति । वीरं वा ददति ।
दशां छिनत्ति । हरणभागा हि पितरः । पितॄनेव निरवदयते ॥

तै. ब्रा. १।३।१०

भाष्यम्——पिण्डरूपमन्नं भुक्त्वा यदा पितरः स्वस्थाने प्रयन्ति तदानीमस्य वीरं पुत्रं विद्यमानमपहरन्ति वा अविद्यमानं ददति वा पक्षद्वयमपि सम्भाव्यते वैकल्ये पुत्रम्मारयन्ति । साकल्ये पुत्रं प्रयछन्ति । अत्र वैकल्यस्यदुष्परिहारत्वात्पुत्रप्रत्याम्नायत्वेन वस्त्राग्रमीषत्सूत्रं छित्त्वा पिण्डेषु निदध्यात् । तस्मादपहरणमेव पितरो भजन्ते तस्मात्पितॄन्निःशेषभागदानेन विसर्जयति । तत्रैव कंचिद्विशेषं विधत्ते ।

उत्तर आयुषि लोम छिन्दीत । पितॄणां ह्येतर्हि नेदीयः ।

भाष्यम्——पंचाशत्संवत्सरपरिमितं पूर्वमायुरवशिष्टन्तूत्तरम् तस्मिन्वयसि वस्त्रदशा न छेत्तव्याः किन्तु स्वकीयं लोम च्छित्त्वा तत्र निदध्यात् । यस्मादयमासन्नमरणत्वात्पितॄणामपि समीपवर्ती तस्मात्तस्मिन्वयस्येतदुचितम् । इति ॥

नमो वः पितर इषे नमो वः पितर ऊर्जे नमो वः पितरः
शुष्माय नमो वः पितरो घोराय नमो वः पितरो जवाय नमो वः

पितरो रसाय । स्वधा वः पितरो नमो वः पितरो नम एता युष्माकम्पितर इमा अस्माकं जीवावो जीवन्त इह सन्तः स्याम॥

आश्व. श्रौ. सू. ३।७।७

नमस्काराविधानं हि तैत्तिरीयब्राह्मणे विधीयते ।

नमस्करोति । नमस्कारो हि पितॄणाम् । तै. ब्रा. १।३।१०

इषे, अन्नाय, ऊर्जे, बलवद्रसाय । शुष्मशब्दो बलवाची, घोरो मारणादि व्यापारः, जीवो देहाध्यक्षः । रसाय, युष्माभिर्भुज्यमानः क्षीरादिः, इयं स्वधा वोस्तु । पितरो हि स्वधायाम्प्रीतिङ्कुर्वन्ति हे पितरः पालयितारः । एतानि नमः नमांसि अन्नानि वा नमः शब्दोन्ननामसु पठ्यते। इमा इमानि अवशिष्टानि, अन्नानि अस्माकं जीवा, जीवनसाधनान्यन्नानि वः युष्मदर्थे वयं इह जीवन्तः, प्राणान्धारयन्तः सन्त एव, स्याम, भवेम,। नमः नमस्कारः अन्यत्स्पष्टं 'अभ्यासे भूयांसमर्थमन्यन्ते । इति हि तत्तत्पदानामभ्यासः,

' मनोन्वाहुवामहे नाराशंसेन सोमेन । पितॄणां च मन्मभिः ।

ऋ. सं. मं. १०।४।५८।३

भाष्यम्——वयं सुबन्धुश्रुतबन्ध्वादयो मनः सुबन्धोः सम्बन्धि मायाविभिरपहृतं नु क्षिप्रमाहुवामहे केन साधनेनेति तदुच्यते ॥ नाराशंसेन नाराशंसचमसगतेन सोमेन, अथवा ' नाराशंसेन स्तोमेन येन नराः प्रशस्यन्ते दीर्घायुषः पुत्रवन्तो धनवन्तो भूयासुरित्यादिभिर्गुणैः स नाराशंसः स्तोमः स्तुतिः पितॄणां च मन्मभिर्मननीयैस्तोमैर्मन आहुवामहे। आह्वयामः

आत एतु मनः पुनः क्रत्वे दक्षाय जीवसे । ज्योक्च सूर्यं दृशे ॥

ऋ. मं. १०।४।५८।४

भाष्यम्——हे बुबन्धो ते पुनरैतु मनः । अभिचरतः सकाशात्पुनरागच्छतु । किमर्थमित्युच्यते क्रत्वे कर्मणे लौकिकवैदिकविषयाय दक्षाय बलाय च । यद्वा क्रत्वेऽपानाय दक्षाय प्राणाय ' प्राणो वै दक्षोऽपानः क्रतुरिति हि श्रुतिः ' । जीवसे जीवनाय च ज्योक्च चिरकालं सूर्यं दृशे सूर्यं द्रष्टुं अत्यन्तं चिरजीवनाय चेत्यर्थः ।

पुनर्नः पितरो मनो ददातु दैव्यो जनः । जीवं व्रातं सचेमहि ॥

ऋ. मं. १०।४।५८।५

भाष्यम्—हे पितरः पुनरस्माकं मनो ददातु दैव्यो जनः देवसम्बन्धी जनः। ततस्तेन देवजनदत्तेन मनसा जीवं जीवनवन्तं व्रातम् गणम् पुत्रपश्वादिकं सचेमहि। सेवेमहि सचतिः सेवनार्थः ॥ इतः परं विशेषः अन्यदा प्रदर्शयामः।

इति मन्त्रभाष्यम् ॥

श्राद्धविषयिणी मीमांसा

"उदयतु मानसगगने पित्रोः पदनखसुधाकर-श्रेणी।
अन्तर्गतमपि भूयो या तमसां राशिमुपहन्ति ॥ १ ॥"

अस्ति हि काचन वैदिकमार्गानुयायिनां रूढिः शब्दप्रमाणमङ्गीकृत्य पित्र्युद्देशेन किमप्यनुष्ठेयं ॥ तदिदं श्राद्धं नाम कर्म पार्वणमित्यपि कर्मणोऽस्य नामधेयं। आह च सूत्रकारः "पार्वणे श्राद्धे" ४।७।१ इत्यत्र ॥ पर्वणि भवं पार्वणमिति पर्वशब्देनात्र अमावास्या गृह्यते। हेतुः सूत्रवृत्तौ गत एव। भवति हि तत्र जिज्ञासा। कोसौ कर्मविशेषः, किमत्रप्रधानमङ्गादि, कथं वास्यानुष्ठितिरिति। तदर्थमयं विचारः प्रस्तूयते ॥

श्राद्धं नाम पितॄनुद्दिश्य यद्दीयते ब्राह्मणेभ्यः श्रद्धया तच्छ्राद्धं। नात्र श्रद्धा निमित्तत्वेनोच्यते किंतु यच्छ्राद्धं कुर्वीत स्वकाले तच्छ्रद्धया कुर्वीतेत्यर्थः ॥

अत्र वादिनां बहुविधाः पन्थानः तत्रोदाहरणाय केचन प्रदर्श्यन्ते गोविन्दराजः—

"एकैकमपि विद्वांसं दैवे पित्र्ये च भोजयेत्।
पुष्कलं फलमाप्नोति नामन्त्रज्ञान् बहूनपि ॥ मनु. ३।१२

एवं चात्र फलश्रवणाद्ब्राह्मणभोजनमेव प्रधानं पिण्डदानादिकमङ्गमिति। कुल्लूकभट्टाः।

"पितृयज्ञं तु निर्वर्त्य विप्रश्चेन्दुक्षयेऽग्निमान्।
पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम्'। म. ३।१२२

इति वचनं पुरस्कृत्य पित्र्युद्देशेन द्रव्यत्यागं ब्राह्मणस्वीकारपर्यंतं श्राद्धशब्दवाच्यं प्रधानं ब्रूमः। इति।

आपस्तम्बः—अथैतन्मनुः श्राद्धशब्दं कर्म प्रोवाच ।
प्रजानिःश्रेयसा च (र्थे) आ. ध. सू. २।७।२
तत्र पितरो देवता ब्राह्मणस्त्वाहवनीयार्थे ॥ आ. ध. २।७।३
मासि मासि कार्यमपरपक्षस्य ॥ आ. ध. सू. २।७।४
अपराह्णः श्रेयान् ॥ आ. ध. सू. २।७।५

भाष्यम्---श्राद्धशब्दं श्राद्धमिति शब्दो वाचको यस्य तत्तथा। ब्राह्मणस्त्वाहवनीयार्थे आहवनीयवत्त्यक्तद्रव्यप्रतिपत्तिस्थानत्वात् । पितरो देवतेति नियतपितृदेवताकत्वाच्च श्राद्धस्य देवता श्राद्धादौ श्राद्धशब्दस्तु तद्धर्मप्राप्त्यर्थो गौणः कौण्डपायिनामयनइवाग्निहोत्रशब्दः पुष्कलं फलमाप्नोतीति तु पुष्टतरफलार्थिनो गुणफलविधिः स भोजनस्याङ्गत्वेऽपि तदाश्रयो न विरुद्धः

" आपस्तम्बोऽभ्यधाच्छ्राद्धं कर्मैतत्पितृदैवतम्
मन्वर्थं कथयंस्तस्मान्नेदं ब्राह्मणभोजनम् ॥

मनु. टी. अध्याय ३।१२९

काशीनाथोपाध्यायाः—पित्रादीन्मृतानुद्दिश्य विहितकाले विहिते देशे च पक्वान्नामान्नहिरण्यान्यतमद्रव्यस्य विधिना दानं । तत्राग्नौकरणं, ब्राह्मणभोजनम्, पिण्डदानं प्रधानं,

तदुक्तम् " होमश्च पिण्डदानं च तथा ब्राह्मणभोजनम् ।
श्राद्धशब्दाभिधेयं स्यादेकस्मिन्नौपचारिकम् ॥ ध. सिं.

इति क्वचिद्वचनादशक्त्या वा पिण्डदानाद्यकरणे ब्राह्मणभोजनादिमात्रमपि श्राद्धपदार्थः संपद्यत इति चतुर्थपादार्थः ।

तथा च वचनान्तरम्—

" यजुषां पिण्डदानं तु बह्वृचानां द्विजार्चनम् ।
श्राद्धशब्दाभिधेयं स्यादुभयं सामवेदिनाम् ।

इति सर्वे धर्माब्धौ तृतीयपरिच्छेदोत्तरार्धे ॥

कमलाकरभट्टाः ब्राह्मणस्वीकारान्तश्चतुर्थ्यन्तपदोपनीतपित्राद्युद्देश्यकस्त्यागः-श्राद्ध शब्दार्थः । निमित्तभेदे भोजनस्य पिण्डानं वा निषेधे प्राधान्यं न विरुणद्धि ॥

शूलपाणिः " नित्यश्राद्धमदैवं स्यादूर्ध्वपिण्डविवर्जितम् ॥ "

इति हारीतीये नित्यश्राद्धमघादौ पिण्डनिषेधोऽस्ति न च प्राप्तिंविना सः, नचातिदेशं विना प्राप्तिः, नचाङ्गत्वेन विनातिदेशः, प्रधानस्यानतिदेशात् । सप्तमेऽध्याये पूर्वतन्त्रे उपकारकत्वेनातिदेशोक्तेः । तेन भोजनं प्रधानं, पिण्डोऽङ्गम् । पिण्डदानमात्राविधिस्त्वङ्गभूतात्कर्मान्तरमेव प्रकरणान्तरन्यायात् । इति

मिताक्षरायां विज्ञानेश्वराः—श्राद्धं नामादनीयस्य तत्स्थानीयस्य वा द्रव्यस्य प्रेतोद्देशेन श्रद्धया त्यागः ॥

कर्काचार्याः पिण्डदानस्यैव श्राद्धमिति नामधेयम् । प्रवृत्तेस्तादर्थ्यात् । तत्कुतः स्मृतेः

" अपि नः स कुले भूयाद्यो न दद्यात्त्रयोदशीम् ।
पायसं मधुसर्पिर्भ्यां वर्षासु च मघासु च " ॥

इति प्रार्थना पिण्डदानविषया । तत्र हि तेषां देवतात्वम् ।

" असावेतत्ते " इति मन्त्रवर्णाल्लिङ्गाच्च । पिण्डपितृयज्ञवदुपचार इति वचनात्तत्प्राप्तेः । न भोजनस्य तदर्थता तस्य साक्षाद्ब्राह्मणाग्निसम्बन्धात् पित्रर्थत्वे च प्रमाणभावात् । स्मृत्यन्तराच्च ।

" सह पिण्डक्रियायां तु कृतायामस्य धर्मतः
अनयैवावृता कार्यम्पिण्डनिर्वपणं सुतैः " ॥

इति पिण्डनिर्वपणस्यैवेतिकर्तव्यतां दर्शयति न ब्राह्मणभोजनादेः तथा च स्मृत्यन्तरेप्युक्तम् ॥

" स एव दद्याद्द्वौ पिण्डौ पित्रे मातामहाय च "

सूत्रकारप्रस्थानाच्च । " मासि मासि वोशनम् " इति श्रुतेः । अन्वर्थसंज्ञाकारणाच्चैकोद्दिष्टमिति सर्वप्राधान्ये हि नैक उद्दिश्यते । आभ्युदयिके च तथा दर्शनात् ॥

" पितॄणां रूपमास्थाय देवा अन्नमदन्ति तत् " इति ॥

न च पितॄणामदनं सम्भवति तस्मादनेन प्रकारेण पितृरूपेण देवानां देवतात्वमुच्यते तच्च देवतात्वं पिण्डदानकाले सम्भवति न भोजने । तथा " अनि-

ष्ट्वा तु पितृऋन् श्राद्धे न कुर्यात्कर्म वैदिकम् '' दर्शयति च यथाकथंचिद्-ब्राह्मणभोजनम् ' यद्येकं भोजये, दित्यादिना ब्राह्मणभोजनासम्भवेपि गयादौ पिण्डदानमात्रदर्शनात् । द्वैपायनोपि दर्शयति· पिण्डदानकाले पितृऋणां हस्तोत्थानम् ।

" भीष्मस्य ददतः पिण्डान्हस्तोत्थानं तु शंतनोः '' इति

तस्मात्पिण्डदानस्य प्राधान्यंन्तदङ्गमितरत् ।

चिन्तायाः प्रयोजनं तु पिण्डदानाकरणे अभ्यावृत्तिः (प्रत्यवायः)

पिण्डदाने इति पाठे तु अभ्यावृत्तिर्नामाभ्युदयः ।

एतावता कर्काचार्यमते पिण्डदानमेव प्रधानमिति यावत् श्राद्धशब्दार्थश्च ।

गदाधरः पिण्डदानब्राह्मणभोजनाग्नौकरणत्रयाणाङ्कर्मणांसमुदायस्य श्राद्धमिति नामधेयं । राजसूयवत् ।

इत्थं बहुधात्र विप्रतिपत्तिर्विद्यते अथवा कासौ विप्रतिपत्तिः ? । विचारान्तरमारब्धव्यं चेद्भवति हि भूयान्मतभेदः । अनैयव रीत्या विचारः प्रवर्तयितव्य इति ह्यत्रोदाहृतानीमानि मतान्तराण्यभियुक्तप्रभूणाम् । भगवताह्याश्वलायनाचार्येणाष्टौ श्राद्धान्युक्तानि ॥

" अन्वष्टक्यं च पूर्वेद्युर्मासि मासि च पार्वणम् ।
काम्यमभ्युदयेष्टम्यामेकोद्दिष्टमथाष्टमम् ॥

एतान्यष्टाववश्यमनुष्ठेयानि । अननुष्ठाने प्रत्यवायः । सांवत्सरिकादिश्राद्धमाचार्येणानुक्तमिति कृत्वा अनुष्ठेयमननुष्ठेयं वा प्रतिमासं पार्वणस्त्वनुष्ठेयमेवेति सूत्रकाराणामाशयः सम्मतश्चास्माकं सौत्रः पन्थाः अत इदानीमितिकर्तव्यतापि सांवत्सरिके पार्वणस्यैवोपयुज्यते ये तु प्रतिमासं पार्वणमननुष्ठाय सांवत्सरिकमेवानुतिष्ठन्ति ते सूत्रविरोधादुपेक्ष्या एवेति नूनं । अशक्तश्चेदष्टौ श्राद्धान्यनुष्ठातुमितिचेत्तत्र सूत्रोक्ता विकल्पाएव ग्राह्याः आह च सूत्रकारो· विकल्पान् " अप्यनडुहो यवसमाहरेत् '' आ. गृ. (२।४।८) अत्र वृत्तिः—अपिशब्दो विकल्पार्थः, एतदुक्तं भवति पशुः कार्यस्तस्यासम्भवे स्थालीपाकस्तस्याप्यसम्भवे अनडुहो यवसं प्रयच्छेत् शकटवहनसमर्थो बलीवर्दोनड्वान् (आ. गृ. २।४।८) परं ' नत्वेवानष्टकः स्यात् ' इति सूत्रितत्वादकरणे प्रत्यवाय एवेति निश्चिनुमः इदानींतनास्तु बहून् श्राद्धीयपक्षानवलम्बन्ते । यथा, ब्रह्मार्पणं, सांकल्पिकं, आमश्राद्धम्, हिरण्यश्राद्धम्, चटश्राद्धमित्यादीन् । परं चात्रैकोऽपि न सूत्रकाराभिमतः । सूत्रकारस्य तु पिण्डप्रदानं, ब्राह्मणभोजनं, अग्नौकरणमितित्रयमिष्टम् । सूत्रयति

चेत्थमेव । यथा ' पिण्डैर्व्याख्यातम् '· (आ. गृ. ४।७।४) " पिण्डपितृयज्ञकल्पेन " " स्थालीपाकेन सह पिण्डार्थमुद्धृत्य· शेषं निवेदयेत् " (आ. गृ. ४।८।११) " ब्राह्मणाञ्छ्रुतशीलवृत्तसम्पन्नान् " " वृद्धौ फलभूयस्त्वम् " (आ. गृ. ४।७।२) " सृष्टंदत्तमृध्नुकमिति (आ. गृ. ४।८।९) " तृप्ताञ्ज्ञात्वा " (आ. गृ. ४।८।१०) " अग्नौकरिष्ये " (आ. गृ. ४।८।२) ' पाणिष्वेव वा (आ. गृ. ४।८।५) इत्यनेन त्रीण्यप्येतानीष्टानि । पिण्डनिपरणं, ब्राह्मणभोजनं, अग्नौकरणम् । तत्र तावत्पिण्डपितृयज्ञः श्रोतसूत्रे सूत्रयांबभूव । न तत्र ब्राह्मणभोजनमास्ति । अग्नौकरणं, पिण्डनिपरणं च द्वयमेवास्ति । तत्रापि परेषामाचार्याणां मतान्युद्घाटितानि भगवताचार्येण यथा—

' तस्मै तस्मै य एषां प्रेताः स्युरिति गाणगारिः प्रत्यक्षमितरानर्चे—येत्तदर्थत्वात् (आ. श्रौ. सू. २।६।१६)

वृत्तिः—त्रयाणाम्मध्ये प्रेतानां (परलोकं गतानां) पिण्डदानम्, जीवानां प्रत्यक्षार्चनमिति गाणगारेर्मतं, प्रीत्यर्थत्वात्कर्मण इति ॥

सर्वेभ्य एव निपृणीयादिति तौल्वलिः क्रियागुणत्वात् ॥
(आ० श्रौ० सू० २।६।१७)

वृत्तिः—पित्रादिभ्यस्त्रिभ्यः प्रेतेभ्यो जीवद्भ्यश्च सर्वेभ्यो निपरणं तौल्वलिर्मन्यते । क्रियायामुद्देशकारकत्वेन च गुणभूताः पितरो न तेषां प्रीतिः शास्त्रतो लोकतोवगम्यत इति ॥

' अपि जीवान्त आत्रिभ्यः प्रेतेभ्य एव निपृणीयादिति गौतमः क्रियाह्यर्थकारिता ।
(आ० श्रौ० सू० २।६।१८)

वृत्तिः—आदिमध्यान्तशब्दैः पितृपितामहप्रपितामहा उच्यंते जीवाः अन्तो यस्य स जीवान्तः । अपिशब्देन जीवादिर्जीवमध्य इत्यपि लभ्यते; जीवसर्व-इति च । त्रयाणामेकस्मिन् द्वयोः सर्वेषु वा जीवत्सु यावदर्थं परान् पितॄन् गृहीत्वा प्रेतेभ्यस्त्रिभ्यो दद्यादिति गौतमो मन्यते । क्रियाह्यर्थकारिता मरणपदार्थ-प्रवृत्ता यस्मात्क्रियेत्यर्थः ॥

" उपायविशेषो जीवमृतानाम् " ॥
(आ० श्रौ० सू० २।६।१९)

वृत्तिः—पित्रादीनां जीवानां मृतानांञ्च पिण्डदाने उपायविशेषो वक्ष्यत इत्यर्थः। उपन्यस्तान् पक्षान्दूषयितुमाह।

'न परेभ्योनधिकारात्। न प्रत्यक्षं। न जीवेभ्यो निपृणीयात्'॥
(आ० श्रौ० सू० २।६।२०)

वृत्तिः—गौतमगाणगारितौल्वलीनां क्रमेण दूषणानि।

'न जीवान्तर्हितेभ्यः॥
(आ० श्रौ० सू० २।६।२१)

वृत्तिः—जीवव्यवहितेभ्यो न निपृणीयादित्यर्थः। सर्वपक्षव्यापीदंदूषणम्। सर्वत्रानधिकारादित्ययमेव हेतुः। अनधिकारादयोग्यत्वादित्यर्थः। क्वचिद्विध्यभावात् क्वचिन्निषेधादयोग्यत्वमवगम्यते। अयमुपायविशेष उच्यते॥

"जुहुयाज्जीवेभ्यः"॥
(आ० श्रौ० सू० २।७।२२)

वृत्तिः—जीवेभ्यो जुहुयात्प्रेतेभ्यो निपृणीयादित्यर्थः। 'न जीवन्तमतीयाद्द्यात्' इत्यत्रापि निषेधोस्ति। तेन जीवपितुर्जीवपितामहस्य, जीवोभयस्य वायमपि पक्षो नास्ति॥ तत्र होमान्तमनारम्भो वा।

अथ सर्वेषु जीवत्सु कथमित्याह।

"सर्वहुतं सर्वजीविनः"॥
(आ० श्रौ० सू० २।७।२३)

वृत्तिः—"सर्वहुतमिति सर्वे पिण्डा होतव्या इत्यर्थः। पिण्डहोमो निपरणमन्त्रेण स्वाहाकारान्तेन कर्तव्यः अत्र दूषणीयपक्षाणामुपन्यासे प्रयोजनं सपिण्डीकरणे पितामहे जीवति पितरि मृते संवत्सरादिषु कालेषु तस्यावश्यकर्तव्यत्वात्तत्रैषां पक्षाणामुपयोग इत्येवमर्थम् एवमादीन्यन्यान्यपि प्रयोजनानि चिन्त्यानि इदं सांवत्सरीयश्राद्धादिषु स्मृत्युक्तेषु मानमित्येके इति मतान्तराण्युपाददानेन स्वकाले कथं विचारस्वातन्त्र्यमासीदिति सूचितं, संगृहीताश्च स्वसूत्रे ते पक्षाः एतेन विचारणीयं स्वीयं कर्म अवश्यं च प्रतिपादयितव्यं न तत्र बौद्धिकस्वातन्त्र्यस्य कश्चनापह्नोता एतच्चास्मदीयैरवश्यम्मनसि निधातव्यमित्ययं विचारोत्र संगृहीतः न नवीना इत्येव खण्डयितव्याः। आस्तामनया प्रासङ्गिकलेखनशैल्या। प्रकृतमनुसरामः। येत्विदानीं श्राद्धे पाणिहोममकृत्वा श्राद्धं कुर्वते ते उपेक्ष्याः यत्रय-

त्रास्ति पिण्डपितृयज्ञस्तत्र स्थालीपाकस्तत्र च अग्नौ होमः यत्र च भोजनं तत्र पाणौ होमः। एवं सूत्रकारः सूत्रयति । अन्यच्चैतत्। पिण्डपितृयज्ञानुष्ठाने गार्ह्ये व्यतिषङ्गमनुतिष्ठन्ति, श्रौते तु व्यतिषङ्गाभावः। आहुश्चात्र प्रमाणमिति कृत्वा।

" अथाग्नौ जुहोति यथोक्तं पुरस्तात् " ॥

(आ० गृ० ४।८।४)

वृत्तिः—अथशब्दो होमादर्वाचीनं पिण्डपितृयज्ञाङ्गं पूर्वं कृतमिति ज्ञापनार्थः। तेनानयोर्व्यतिषङ्गो लब्धः इति। श्रौते तु व्यतिषङ्गं न कुर्वन्ति तत्र प्रमाणं न वयं प्रतीमः। अनुक्तत्वात्सूत्रकारेणेति कश्चन हेतुं ब्रूयात् तं प्रतिब्रूयात् निषेधोऽपि सूत्रकारेण नोक्तः अनस्तत्रापि व्यतिषङ्गोनुष्ठेयः यत्तु पूर्वमेव पिण्ड-पितृयज्ञं निर्वर्त्य श्राद्धं कुर्यादिति वृत्तिकारोवीवृतत् तन्न युक्तं कथमिति चेत्।

आहिताग्निस्तु पिण्डपितृयज्ञं समाप्य ततः पार्वणं करोति। 'पितृयज्ञं तु निर्वर्त्येति मनुः तत्र पाणिहोमः ब्राह्मणसमीपे भुक्तशेषमात्रेण पिण्डदानं च। एवं वृत्तिकृता किमुक्तं भवति, अमायां पिण्डदानं द्विधा, अग्नौकरणं द्विधा। प्रमाणं तु मानवं यदीदं प्रमाणं विमतं न स्यात्तर्हि वयमप्यङ्गीकुर्म एतत्। परं चैतत्कर्कादिलापनिकया सह विमतं यथा—कर्काचार्याः—पारस्करगृह्यसूत्रव्या-ख्यावसरे श्राद्धसूत्रे 'तथा च स्मृतिः' पितृयज्ञं तु निर्वर्त्य विप्रश्चेन्दुक्षयेग्निमान्।

पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम् ॥

(मनुः ३।१२२)

पितृयज्ञशब्देनोदकतर्पणादिपञ्चमहायज्ञाख्यङ्कर्मोच्यते । तदेकदेशवचनात्। तत्सम्बन्धित्वादितरेऽपिलक्ष्यन्ते केचित्तु पितृयज्ञन्दार्शिकमभिवदन्ति । तदसत् नहि पितृयज्ञः सः। किन्तर्हि पिण्डपितृयज्ञः सः। तस्मात्पितृयज्ञं निर्वर्त्येति पञ्चमहायज्ञान्कृत्वेत्यर्थः। इति कर्कमतम्। अत्र तु मेधातिथिप्रभृतयः पितृयज्ञ-शब्देन पिण्डपितृयज्ञं गृण्हन्ति। कर्कस्तु पृथगेव पन्थानमनुसरति, वृत्तिकारस्तु मेधातिथीननुसरति वयं तु सूत्रकारमनुसरामः। सूत्रे तु श्रौते व्यतिषङ्गविषय-निषेधो नास्ति गार्ह्ये च व्यतिषंगो लभ्यते अत इतएवाकृष्य श्रौतेऽपि व्यतिषंगो-नुष्ठातव्यः यदि स्यात्केषांचित्सौत्रनिषेधोपलब्धिस्तर्हि ज्ञापनीयावश्यं अथवा तस्मिन्दिने अग्नौकरण पिण्डनिर्वपणस्यनिवृत्तत्वात्केवलं ब्राह्मणा भोजयितव्याः दार्शिकं गार्ह्यं पिण्डपितृयज्ञः श्रौतः कथमेतयोर्व्यतिषंग इति चेत्, पिण्डपितृयज्ञः श्रौतः गार्ह्यं वा कथं व्यतिषंगस्तद्वदेवात्र गृहाण इति यावत्प्रमाणविशेषोपलब्धिः

शास्त्रार्थः। इतः परं चिन्तनीयमेताद्विद्वाद्भिः। यद्यपि पिण्डाभावस्तथापि पाणिहोम आवश्यकः। पिण्डनिपरणाभावः चतुर्षु श्राद्धेषु सूत्रप्रमाणकएव सिध्यति। यथाहुर्वृत्तिकाराः "यत्र यत्रास्माभिः पाणिहोमउक्तस्तत्र सर्वत्र भाष्यकारः पिण्डदानं नेच्छति स्थालीपाकेन सह भुक्तशेषेण पिण्डदानं चोद्यते तत्र च स्थालीपाकाभावादिति। ये तु पिण्डदानमिच्छन्ति त एवमाहु; स्थालीपाकेन सह पिण्डदानं कार्यं न पृथक्स्थालीपाकेन भुक्तशेषेण चेत्ययमर्थः। न तु यत्र स्थालीपाकस्तत्रैव पिण्डदानं कार्यमिति। तेन तेष्वपि केवलेन भुक्तशेषेण पिण्डदानं कार्यमिति।

आ० गृ० सू० ४।८।१५

केवलभोजनेऽपि पाणिहोमः कार्यः केषुचिच्छ्राद्धेषु यः पिण्डाभावः प्रत्यपादि सोऽस्माकं सूत्रमूलकत्वादेव प्रमाणं भवितुमर्हति। कुमारिलभट्टा अपि अष्टमीश्राद्धकारिकासु श्लोकयन्ति—

" चतुर्ष्वेष्वग्निहोमः स्यात्पिण्डांश्चाग्निसमीपतः।
काम्यमभ्युदयेष्टम्यामेकोद्दिष्टमथाष्टमम् ॥ १३ ॥

चतुर्ष्वेषु करे होमः पिण्डदानं द्विजान्तिके।
पिण्डनिर्वपणं केचिन्नेच्छन्त्यस्मिंश्चतुष्टये ॥ १४ ॥

अयमर्थः—अन्वष्टक्ये, पूर्वेद्युःश्राद्धे, मासि मासि श्राद्धे पार्वणे च अस्तिपिण्डनिर्वपणम्। काम्ये आभ्युदये, अष्टम्यां, एकोद्दिष्टे च नास्ति पिण्डानिर्वणम् अयं भाष्यानुयायी पन्थाः। अस्माकं तु उभयमपि प्रमाणं सूत्रकृन्मूलकमिति यथेच्छमनुष्ठानम्। यद्यप्ययं पिण्डनिर्वपणाभावो निर्णयसिंधौ 'सह शाखया, प्रस्तरं प्रहरतीत्युपादाय निराकृतस्तथापि नायं मीमांसारमणीयः अपि तूभावपि पक्षौ सूत्रत एव प्रसरतः। मीमांसया च सिध्यतः दैवं भोजमपि श्राद्धाङ्गत्वेन नास्मत्सूत्रे सूत्रितमतोऽकरणे प्रत्यवायाभावः नहि मनुना यावन्तोङ्गविषयः प्रोक्तास्तावन्तः स्वैर्वेप्यनुष्ठेया इति भगवदाज्ञा। आह च वृत्तिकारोपि। " मनुप्रोक्तस्याविरुद्धस्याङ्गस्येच्छातः करणमिति " नोचेद्व्युत्क्रमोप्यवश्यमङ्गीकरणीय इत्यापतेत् विधत्ते हि मनुर्भोजनं पिण्डनिपरणानन्तरम्। यथा " मनुना भोजनात्पूर्वं निर्वपणं विहितं तन्न कार्यमिति " सस्मार च मनुः।

" पिण्डेभ्यस्त्वल्पिकां मात्रां समादायानुपूर्वशः।
तेनैव विप्रानासीनान्विधिवत्पूर्वमाशयेत् ॥ म. ३।२१९।

भाष्यम्—अन्नाल्पमात्रा अवयवभागाः पिण्डेषूत्पन्नानल्पभागान्पिण्डक्रमेणैव गृहीत्वा तेनैव पित्रादिब्राह्मणान्भोजनकाले भोजनात्पूर्वं भोजयेत् । विधिवत्पिण्डानुष्ठानवत्पितरमुद्दिश्य यः पिण्डो दत्तस्तदवयवं पितृब्राह्मणम्भोजयेत् । एवं पितामहप्रपितामहपिण्डयोरपि ॥

एवं विचार्यमाणे पिण्डपितृयज्ञे, तत्कल्पे वा होमपिण्डदाने प्रधाने, विप्रभोजने तु शेषप्रतिपत्तिः । भोजनानन्तरं पिण्डदानं हि सूत्र्यते पार्वणे तदा होम ब्राह्मणभोजनयोः प्राधान्यं, पिण्डदानं तु शेषप्रतिपत्तिः । अतएवाहतुर्मैथिलवाचस्पती—'शेषनियमात्तदभावे पिण्डनिवृत्तिरिति ॥ एतेन दैवं व्याख्यातम् एवं चैतसिद्धम् । पिण्डनिपरणाभावेऽपि पाणिहोमं कृत्वा ब्राह्मणभोजनं विकिरश्च कार्य इत्यलं बहुलेखनेनेत्यास्तां तावत् ॥ प्रवर्तितश्चायं विचारश्चन्द्रकान्तेन गोभिलसूत्रभाष्यकारेण स एवात्र खलु प्रदर्श्यते 'अथैतस्मिन्कर्माणि किम्प्रधानमित्यस्य निरूपणार्थं संक्षेपतो विचारणां करिष्यामः किम्भवति प्रयोजनम् ? यत्प्रधानन्तावन्मात्रे निर्वृत्ते अतिपतितेप्यन्यस्मिन् कस्याञ्चिदवस्थायाम्पुरुषो न प्रत्यवैष्यतीति तत्रेदन्तावन्नः परीक्ष्यम् । किम्ब्राह्मणनिमन्त्रणादि सर्व्वं प्रधानमुतैषु मध्ये किञ्चिदिति सर्व्वं तावन्न भवति प्रधानम् । किङ्कारणम् ? प्रत्यक्षङ्खल्वेषु कस्यचित्परार्थत्वम् यथा निमन्त्राणादेर्भोजनाद्यर्थत्वम् । रेखाकरणादेश्च पिण्डदानाद्यर्थत्वम् । वचनमत्रार्थे नास्तीतिचेन्मासीद्वचनम्प्रत्यक्षन्तावदेतत् । यच्च परार्थन्नतत्प्रधानम् । शेषः खल्वसौ सूत्रितं च भगवता जैमिनिना "शेषः परार्थत्वात्" इति (पू. मी. ३।१।२) न च सर्वत्र तत्रभवन्तः फलमानन्ति । फलवतः सन्निधौ च यदफलं श्रूयते तत्फलवतो भवत्यङ्गमिति तस्मात्किञ्चिदेषु प्रधानम् न सर्वमिति स्थितम् । एवं स्थिते चिन्ता किम्ब्राह्मणभोजनम्प्रधानमाहोस्वित्पिण्डदानमुताहो उभयम् इति कुतः संशयः ? । उभयत्रैव फलश्रुतिदर्शनात् । ननु शेषेण पिण्डदानाविधानाद्व्यक्तम्प्रतिपत्तिरियम् । नैष दोषः। अर्थकर्मणि प्रतिपादनोपपत्तेः । बलिहरणवत्। यथा खल्वर्थकर्माणि बलिहरणे वैश्वदेवशेषस्य प्रतिपादनम्, तथार्थकर्मणि पिण्डदाने शेषोयं प्रतिपाद्यत इति । कथं ज्ञायते ? फलवादोपपत्तेः पिण्डे फलवादः खल्वेवमुपपत्स्यते । अफलायाम्प्रतिपत्तौ नैतस्यौपपत्तिः । तस्मादर्थकर्मैतत्पिण्डदानमिति पश्यामः । इतश्चैतदेवम्पश्यामः । अभावेपि दर्शनात् शेषस्याभावेऽपि पिण्डदानन्दृश्यते क्व ? । पिण्डपितृयज्ञादौ । ब्राह्मणभोजनं तत्र नास्ति ब्राह्मणभोजनस्य चाभावे कस्य शेषः प्रतिपादयिष्यते । तस्मादर्थकर्मैवासौ न प्रतिपत्तिः । तत्रैव शेषः प्रतिपाद्यते । प्रतिपत्त्यर्थकर्मैवैतत्स्यान्नप्रतिपत्तिरेव । ब्राह्मणभोजनात्पुरस्तादपि केषाञ्चित्पिण्डदानदर्शनाच्चैवमवगच्छामः । तत्रोभयम्प्रधानम् । इति भट्टनारायणप्रभृतयो मन्यन्ते । श्लोकानप्युदाहरन्ति ।

" प्राधान्याम्पिण्डदानस्य केचिदाहुर्मनीषिणः ।
गयादौ पिण्डमात्रस्य दीयमानस्य दर्शनात् ॥१॥
भोजनस्य प्रधानत्वं वदन्त्यन्ये महर्षयः ।
ब्राह्मणस्य परीक्षायाम्महायत्नप्रदर्शनात् ॥ २ ॥
आमश्राद्धविधानस्य विना पिण्डैः क्रियाविधेः ॥
तदालभ्याप्यनध्यायविधानश्रवणादपि ॥ ३ ॥
विद्वन्मतमुपादाय मम त्वेतध्दृदि स्थितम् ।
प्राधान्यमुभयोर्यस्मात्तस्मादेष समुच्चयः ॥ ४ ॥ इति ॥

त इमे श्लोकाश्छन्दोगपरिशिष्टस्यान्तिमे खण्डे पठ्यन्ते । गृह्यसूत्रभाष्ये भट्ट-नारायणेन च पठिताः । परिशिष्टप्रकाशकृता तु नारायणोपाध्यायेन च्छन्दोगपरि-शिष्टस्य तृतीयप्रपाठकस्यान्तिमाः कतिचित्खण्डा न पठिता नच व्याख्यातास्त-दत्रभवन्तो भूमिदेवाः प्रमाणम् । इति हि सामवेदिनाम्मतसङ्क्षेपः प्रदर्शितः । तदेवङ्कस्य चित्पिण्डदानस्य कस्य चिच्च ब्राह्मणभोजनस्य प्राधान्ये स्वरसः । अतो स्मत्सूत्रकारस्य पन्थाः पूर्वप्रदर्शितपरिपाट्यैवानुसर्तव्य इति आचार्याज्ञापरिपाल-नन्तत्रभवतामिति भोजनस्येतिकर्तव्यता तु पार्वणेऽभिहिता पिण्डनिर्वपणस्य तु श्रौतसूत्रे पिण्डपितृयज्ञे अग्नौकरणस्य तूभयत्रेति ज्ञातव्यम् अन्यद्विचारान्तरमष्टकादि-प्रयोगावसरे प्रदर्शयिष्यामः ॥

पार्वणे च पितृपितामहप्रपितामहा एव ग्राह्यास्तथैवास्मत्सूत्रे पितृशब्दस्त्रयी-वाचकः । आहुश्चैके " अस्मत्पितुरित्यादित्रयाणामुद्दिश्य तृप्त्यर्थं पार्वणश्राद्धं करिष्ये । इच्छाचेत्स्मृत्यनुसारेण पित्रादेः सपत्नीकस्येति विशेषणं देयम् । माता-महानामपि सपत्नीकानामिच्छात उच्चारणं स्मृत्यनुसारात् "

इतिश्राद्धविषयकोविचारः ॥

पिण्डपितृयज्ञविचारः

अस्ति हि श्रौतसूत्रे कश्चन सूत्रितः कर्मविशेषः पिण्डपितृयज्ञनामा । पिण्डैरेव तत्र पितृयज्ञो निर्व्वर्त्यते । तदेव कर्म पार्वणादावतिदिश्यते । विज्ञायते ह्ययं यजुर्वेदे उत्पन्न इति । सप्तहविःसंस्थास्वयं गण्यते । यथा च सप्त हविःसंस्थाः—

१. पृणातेः " अन्येभ्यो पिदृश्यते " इति वनिप् प्रत्यये पर्वशब्दनिष्पत्तेः । सच दीयतेऽस्मिन्नित्यधिकरणव्युत्पत्त्या काले मुख्यः भावव्युत्पत्त्याकर्मण्यपि । स्पष्टं चैतत्सर्वं पू. मी. अ. ९ पा. २ सू. ५१ इत्यत्र ।

अग्निहोत्रं, दर्शपूर्णमासौ, आग्रयणम् पिण्डपितृयज्ञः, चातुर्मास्यानि, निरूढपशुबन्धः, सौत्रामणी । इति अनाहिताग्नेरप्यस्य प्राप्तिः । तथा च सूत्रयामासाश्वलायनः, " एवमनाहिताग्निर्नित्ये " (श्रौ. सू. २।७।१८)

वृत्तिः—अनाहिताग्निरप्येवम्पिण्डपितृयज्ञं कुर्यान्नित्ये औपासने इत्यर्थः । पार्वणेप्येतत्कर्म कयाचन रीत्यातिदिश्यते । सूत्र्यते चास्मिन्कर्मणि विशेषः कश्चनैहिकोपि भगवता । ' वीरम्मे दत्त पितर ' (श्रौ. सू. २।७।१२) इति पिण्डानां मध्यमं पत्नीं प्राशयेदाधत्त पितरो गर्भं कुमारम्पुष्करस्रजम् यथायमरपा असत् " इति । अर्थस्तु स्पष्ट एव हे पितरः मे वीरं पुत्रं दत्त । अरपाः—अलं पर्याप्तं पातीत्यरपाः असत् स्यात् । अन्यदपि—" महारोगेण वाभितप्तः प्राश्नीयादन्यतराङ्गतिङ्गच्छति " (आ. श्रौ. सू. २।७।१७)

वृत्तिः—क्षयकुष्ठादिनाशक्यपरिहारेणातिपीडितः प्राश्नीयादित्यर्थः । प्राश्नीयादितिवचनं पूर्वेणास्य सम्बन्धनिवृत्त्यर्थम् । तेनान्यतरामित्यत्रैवभवति । अन्यतराङ्गतिङ्गच्छतीत्यर्थः । अयमर्थः—सद्य एवारोगो भवेन्म्रियेत वेति । अमावास्यायां खल्वयं विहितः । " अमावास्यायामपराण्हे पिण्डपितृयज्ञः "

(आ. श्रौ. सू. २।६।१)

अपराण्हः—अह्न श्चतुर्थो भागोपराण्ह इति गार्ग्यनारायणः । दिवसस्य समं द्वेधा विभक्तस्य द्वितीयो भागोपराण्हः । इति कर्काचार्याः । समन्त्रेधा विभक्तस्य तृतीयइत्यपरे । इदं स्वतंत्रं कर्म न कस्याचिदङ्गमिति जैमिनिः ।

' पितृयज्ञः स्वकालत्वादनङ्गंस्यात् ' ४।४।१२ पू. मी.

कात्यायनस्त्वङ्गमेव दर्शपूर्णमासकर्मण इति प्रतिजानीते । ' अङ्गं वा समभिव्याहारात् " कात्या-यनश्रौतसूत्रे ४।१।३० वैतानिकमिदकङ्र्मेति न प्रपञ्च्यते ।

इति पिण्डपितृयज्ञविचारः ॥

---

१. दार्शिकस्य, पिण्डपितृयज्ञस्य च कदाचित् कालैक्यं भवति कदाचिन्न भवतीत्यन्यदेतत् ।

परिशिष्टम् (अ)

पुनर्गृह्योत्पादनाविचारः ॥

व्याहृत्याहुतिभिः । लाजाहुतिभिः । आनःप्रजामित्याज्याहुतिभिः गृह्याग्निसिद्धिरिति निर्विवादं । अत्र केचित् आश्वलायनसूत्राभिप्रायमजानन्तः प्रत्यवतिष्ठन्ते-" यदि वैवाह्यो न गृहीतो दायविभागकाले गृह्यते । गृहीतोऽपि नष्टो वा द्वादशरात्रमतिक्रान्तः । तत उक्तया क्रियया पश्चाद्गृहीतो भवतीति । तत्र विवाहाज्याहुतयो, लाजाहुतयो, गृहप्रवेशनीयाज्याहुतयश्च होतव्याः ताभिश्चायं गृह्यो भवति । एताश्चाहुतयो न होतव्या इति प्रत्यवास्थितानामाशयः हेतुरप्याख्यायतेत्र तैः—मन्त्रार्थविरोध इति । तत्र ब्रूमः—मन्त्रार्थविरोधमात्रेण नान्यथाविधिर्विधातुं शक्यः नहि मन्त्राः कमप्यर्थं विधातुं पारयंति उक्तश्चेषोऽर्थो भगवता जैमिनिना मन्त्राविधायकत्वाधिकरणे-पू. मी० २।१।६।३०–३१)

पू० सू० **विधिमन्त्रयोरैकार्थ्यमैकशब्द्यात्** । २।१।६।३०।

सन्ति कानिचिदाख्यातानि मन्त्रब्राह्मणगतानि, यच्छब्दमध्यमोत्तमपुरुषयदिशब्दादियुक्तानि । " देवाँश्च याभिर्यजते ददाति च ज्योगित्ताभिः सचते गोपतिः सह इति काम्यपशुयाज्याकाण्डे गोदैवत्यपश्वर्थतया पठितो मन्त्रः । याभिर्गोभिर्देवान् यजति याश्च ददाति ताभिर्गोभिः गोपतिः यजमानः ज्योक्–चिरं सचत इत् समवैत्येवेत्यर्थः " अग्नीदग्नीन् विहर ' इति मन्त्रो ज्योतिष्टोमे प्रैषात्मकः " बर्हिर्देवसदनं दामि " इति दर्शपूर्णमासयोर्बर्हिर्लवनमन्त्रः । तत्रैव "अग्नये जुष्टं निर्वपामि " इति निर्वापमंत्रः सन्ति च ' यस्योभयं हविरार्तिमार्च्छेति ऐन्द्रं पञ्चशरावमोदनं निर्वपेत् ' " यद्याग्रयणेनानिष्ट्वा नवान्नं प्राश्नीयात् वैश्वानरं द्वादशकपालं निर्वपेत् " इत्यादिवाक्यगतानि आख्यातान्तरैकवाक्यतामुपगतानि सर्वाणीमानि विधायकान्यनुवादकानिवेति संशये पूर्वपक्षयति—विधिमन्त्रयोरैकार्थ्यमैकशब्द्यात् । मन्त्रग्रहणमुपलक्षणम् । ' यजेत स्वर्गकामः ' इत्यादिविधौ, देवाँश्च याभिः इत्यादिमन्त्रे, ' यस्योभयम् ' इत्यादिब्राह्मणवाक्ये च श्रुतानामाख्यातानाम् ऐकार्थ्ये, विधानार्थत्वमेव, न तु केषांचिद्विधायकत्वं केषांचिदनुवादकत्वं, इति कुतः ऐकशब्द्यात् " सोमेन यजेत " इत्यादौ," देवांश्च याभिः " इत्यादौ च एक एवाख्यातशब्दः प्रत्यभिज्ञायते तत्र क्वचिद्विधायकः क्वचिदनुवादक इति वैरूप्याश्रयणे प्रमाणं न किंचित्पश्यामः । न च प्रकृतयागाभेदप्रत्यभिज्ञानात्कथं यागान्तरविधिरिति वाच्यम् । सत्यपि प्रकृतेकर्मणि शब्दान्तराभ्यासा-

दिभिः कर्मान्तरत्वावगमसम्भवात् । तस्मात् विधायकान्येवंजातीयकानि आख्यातानि ॥ एवं प्राप्ते सिद्धान्तयति—

सि० सू० **अपि वा प्रयोगसामर्थ्यान्मन्त्रोऽभिधानवाची स्यात्** ॥३१॥

अपिवेति पूर्वपक्षव्यावृत्तौ मन्त्रः मन्त्रादिगतः आख्यातशब्दः न विधायकः किंत्वभिधानवाची कर्मणि ल्युट्, विधायकाख्यातशब्दाभिहितस्य वाचकः अनुवादकः स्यात् । कुतः प्रयोगसामर्थ्यात् । प्रयोगमध्ये प्रयोक्तृपुरुषस्यान्यस्य वा अनुष्ठेयार्थे बोधनीये देवांश्च याभिरित्यादिमन्त्राणां यस्योभयं इत्यादिब्राह्मणवाक्यानां च सामर्थ्यात् विधौ वा सामर्थ्यात् ॥ तथा हि ' देवांश्च याभिर्यजते इति मन्त्रे तावद्यच्छब्देन गोयागस्य गोदानस्य च सिद्धत्वावगमेन विधेयत्वानुपपत्त्या विधिशक्तिप्रतिबंध स्पष्ट एव । एवम् । यस्योभयमित्यादिब्राह्मणवाक्येष्वपि । अपर्यवसन्नत्वाच्च तत्र विधिशक्तिः प्रतिबध्यते । न हि देवांश्च याभिर्यजत इति पर्यवसन्नं वाक्यम् ज्योगित्ताभिः सचते इत्यत्रैव साकाङ्क्षत्वात् । अत एवं जातीयका मन्त्राः प्रयोगमध्य एव प्रयोक्तृपुरुषस्यानुष्ठेयार्थस्मरणाय प्रभवेयुः न तु विधानाय " अग्नीदग्नीन् विहर " बर्हिस्तृणाहि इत्यादिमन्त्रास्तु प्रयोगमध्ये प्रयोक्तृपुरुषेण पुरुषान्तरे स्मारयितव्ये समर्था न तु विधाने ॥ आमन्त्रणविभक्तेरभिमुखार्थप्रत्यायकत्वेन सर्वपुरुषसाधारणविधिप्रत्ययविरोधित्वात् । अनेनैव न्यायेन उत्तमपुरुषस्थलेऽपि विधिशक्तिप्रतिबन्धो द्रष्टव्यः । आत्मनि प्रेरणासम्भवाच्च यदि नवान्नप्राश्नीयात् इत्यादि ब्राह्मणवाक्यानामपि यदि शब्देन विधिशक्तिप्रतिबंधात् वैश्वानरेष्टयादिप्रयोगे निमित्तोपदर्शने सामर्थ्यम् न तु विधाने यत्र च विधिशक्तिप्रतिबन्धकं यच्छब्दादिकं नास्ति तत्रैवाख्यातस्य शब्दान्तराभ्यासादिभिर्भेदकता यच्छन्दादीनां विधिशक्तिप्रतिबन्धकत्वं च मानान्तरप्राप्तार्थत्व एव । अप्राप्तार्थत्वे तु न तेषां विधिशक्तिप्रतिबन्धकता । अन्यथा यदाग्नेयादिवाक्येषु का गतिः ।उक्तं च न्यायसुधायाम्—

" सिद्धत्वद्योतनाद्वक्त्राभिमुख्यासम्भवाद्विधौ ।
आत्मनि प्रेरणाभावान्निमित्तत्वाभिधानतः ॥
विधिशक्तिविहन्तृ स्याद्यच्छब्दादिचतुष्टयम् ।
प्राप्त्ययोगे तु तद्बाधात्क्वचित्स्यादविहन्तृता ॥ इति

तद्बधात् तस्य यच्छब्दादिचतुष्टयस्य स्वार्थत्यागादित्यर्थः । एतावता मन्त्राणां विधायकत्वं नास्तीति सिद्धम् अत एव " अर्यमणं नु देवमित्यादिमन्त्रार्थ विरोधात् गृह्याग्नेः पुनरुत्पादनवेलायां लाजाहुतयो न होतव्या इति वदन्तो व्याख्याता वेदितव्याः । अयं गृह्याग्निर्नित्यो धार्य इति भगवतं आचार्यस्याश्वलायनस्य मतम् ॥

सूत्रितमपितेन । " नित्यानुगृहीतं स्यात् " १।९।२ गमने प्रायश्चित्तिमप्याह " यदि तूपशाम्येत्पत्न्युपवसेदित्येके " १।९।३ इदमत्रेदानीमाशङ्क्यते ॥ यद्ययमेकदा वैवाहिको नष्टः, द्वादशरात्रमतिक्रान्तो वा पुनर्ग्रहणवेलायाम् विवाहहोममारभ्य गृहप्रवेशनीयान्तं कर्म कृत्वा संपादनीयो वा प्रायश्चित्तेनैवसंपादनीय इति । तत्र केचनान्यवेदीया ब्रुवते । विवाहहोमादि अकृत्वैव प्रायश्चित्तं कृत्वा लौकिकमाहृत्य स एव संरक्षणीयः । हेतुमप्याचक्षते मन्त्रार्थविरोध इति अन्ये त्वस्मदीयास्तु उक्तया क्रियया पश्चाद्गृहीतो भवति तत्र विवाहाज्याहुतयो, लाजाहुतयो गृहप्रवेशनीयाज्याहुतयश्च हृदयांजनं च भवति नान्यत् इति व्याचख्युः वयमप्येतदेव युक्तमित्युत्पश्यामः सूत्रकारस्य किमत्र सम्मतं इत्यत्र मीमांसामहे । परिचरणसंस्कारादिकर्म अनुष्ठातुं गृह्याग्नेरावश्यकतेत्यवगतं "पाणिग्रहणादि गृह्यं परिचरेत् " १।९।१ इत्यतः—गृह्याग्निश्च विवाहाहुतीर्विना न सिध्यति तथा च सूत्रम् " विवाहाग्निमुपसमाधाय " इति । विवाहाग्निसिध्यर्थं लाजाहुतयो, विवाहात्पूर्वं " तेषां पुरस्ताचतस्र आज्याहुतीर्जुहुयात् इति सूत्रेण या विहितास्ता मिलित्वा विवाहाग्निर्भवति तमुपसमाधाय, प्रज्वाल्य इति सूत्रितत्वात् यदा यदा गृह्याग्निरुत्पादनीयः तदा तदा अनयैवरीत्या उत्पादनीयः न हि सः केवलं प्रायश्चित्ताहुत्या संपन्नः स्यादिति मन्तव्यं, प्रायश्चित्तिस्तु दोषपरिहाराय नाग्न्युत्पादनाय, सापि द्वादशरात्रमर्यादावच्छिन्ना न तु तदधिकं, प्रायः अग्नेः द्वादशरात्रं वा सा मर्यादा श्रौतादवगता । आश्वलायनोऽपि सूत्रयति " आधानाद्द्वादशरात्रमजस्रमि" ति अस्मत्सूत्रे तु प्रायश्चित्तार्थे उपवास एव पत्न्याः उक्तः अन्यत्र तु यजमानस्य उपवासअयाश्चाग्ने इत्येकामाहुतिं जुहुयादित्येके इत्यादिप्रायश्चित्तिप्रकारा उक्ताः । अग्न्युत्पादनप्रकारस्तु अस्माकं स एव हिरण्यकेशीयेऽपि " द्वादशाहं विच्छिन्नः पुनराधेयः " यदि प्रयायाद्व्याख्यातम् समिधि वा, अरणीकल्पेन इत्यादयः पक्षा बहवः सूत्रिताः । तत्रापि पुनरुत्पादनीयश्चेत् तयैवेतिकर्तव्यतयोत्पादनीयः

आपस्तम्बीयेऽपि—" नित्यो धार्यः, अनुगतो मन्थ्यः, श्रोत्रियागाराद्वाहार्यः उपवासश्चान्यतरस्य भार्यायाः पत्युर्वानुगते, अपि वोत्तरया जुहुयान्नोपवसेत् " इत्यादि सूत्रेषु विवाहे यास्याग्नेर्योनिस्तयैवैष पुनः सम्पादनीय इति साधितं । सर्वेषां समान एवायं नियमः अग्निश्चैकयोनिरित्यपि श्रौतेऽवगतं अस्मत्सूत्रे'एकयोनय' इत्यनेन । इदानीं मन्त्रार्थः प्रस्तूयते—(एकयोनित्वमाहवनीयविषयकम्)

व्याहृत्यर्थस्तु न विमतः। लाजाहुतिमन्त्रास्तु अर्थतो विभिन्ना इति संशेरते तत्संशयापाकरणाय तन्मंत्रार्थमीमांसया भवितव्यम्

अर्यमणं नु देवं कन्या अग्निमयक्षत
स इमां देवो अर्यमा प्रेतो मुञ्चातु नामुतः स्वाहा ॥ १ ॥

इत्यादिषु सर्वत्र इतः अमुतः अनयोरर्थभेदेन अनुपपत्तिं कल्पयन्ति । इतः इत्यत्र अस्माल्लोकात् । अमुत इति परलोकात् अर्यमा देवो न प्रमुञ्चतु इत्यर्थ-कल्पने न कश्चिद्दोषः पुनर्गृह्योत्पादनसामञ्जस्यं च भवति पुनर्गृह्योत्पादनं च कार्यम् वैवाहिकक्रियेतिकर्तव्यतयेति सिद्धम् एतावान् भेदः, हृदयांजनं च न भवति कन्यासंस्कारत्वात् । होमद्वयं चात्र समानतंत्रम् । एतावता सूत्रप्रमाणादेव पुनर्गृह्यो-त्पादनप्रकारः सिद्ध एव ॥

इति पुनर्गृह्योत्पादनप्रकारविचारः ॥

परिशिष्टम् (आ)

क्षौरनिर्णयः ॥

क्षौरनिर्णयविषयेऽस्माभिरिदानीमवश्यं यत्नवद्भिर्भवितव्यं क्षुरस्य कर्मेदं क्षौरं । तत्करणीयं वा नवेति ? करणीयं चेत्कदा ? कथं वा ? इति जिज्ञासा समुत्तिष्ठते ऽतस्तदर्थमवश्यं मीमांसामहे । पूर्वं तावत्करणीयं वा नवेत्यत्र तु सौत्रं प्रमाणं त्रिषु स्थलेषु नियमेन करणीयमित्युपलभ्यते । ' चौलकर्मणि, उपनयने, गोदाने, समावर्तने, इति, चौले केशस्थापनं, उपनयने वापितशिरस्कं कुमारं । समा-वर्तने गोदानेऽपीत्थं आहिताग्निमरणेच एतद्विकृतिभूतेष्वप्यन्यत्रोपलभ्यते नान्यत्र, अन्यत्र क्षौरनिषेध एव स्मृत्यावगम्यते यथा—

प्राग्वयस्कैः सपितृकैर्न कार्यं मुण्डनं सदा ।
मुण्डनस्य निषेधेपि कर्तनं तु विधीयते ॥ इतिधर्माब्धौ तृ. प.

अन्यच—राजकार्यनियुक्तानां नराणां भूपजीविनाम् ।
श्मश्रुलोमनखच्छेदे नास्ति कालविशोधनम् । (तत्रैव)

गदाधरेण पारस्करगृह्यसूत्रव्याख्यात्राप्ययं विचारः प्रास्तावि चौलसंस्कारसूत्र-भाष्यावसरे पारस्करगृह्ये—२ काण्डे—१ कण्डिका । अत्र स्मृत्यन्तरोक्तो वपने विधिर्निषेधश्चोच्यत इत्युक्त्वाह वृथा तु वपनं न कार्यम् तथा च विष्णुः,

प्रयागे तीर्थयात्रायां पितृमातृवियोगतः ॥
कचानां वपनं कुर्याद्वृथा न विकचो भवेत् ।

इति निषेधेपि ' नीचकेशो विप्रः स्यादिति नीचकेशविधानात् कर्तनादिना नीचकेशत्वं सम्पादनीयम् । मुण्डनस्य निषेधेपि कर्तनं तु विधीयत इति वचनात् । आहिताग्नेरपि पाक्षिकं क्षौरं वैकल्पिकं ब्रूते कात्यायनः तथा हि—

केशश्मश्रुवपतेवाशिखम् ॥ २।१।१।९ का. श्रौ. सू.

कर्कभाष्यं—वपते वापयते अन्तर्भूतण्यर्थः । केचिद्वाशब्दमाशिखमित्यनेन सह योजयन्ति अशिखं वा सशिखं वेति तन्मते केशश्मश्रुवपनं नियमेन, सूत्रकारप्रस्थानादप्ययमर्थोऽवसीयते । येनाऽधाने पौर्णमासवद्वपनमित्युक्त्वा ' ऋतु, नक्षत्र,–सम्भार-सामवपनेत्यादिना '' वपनस्य विकल्पमाह यदि पौर्णमासे वपनं विकल्पेन स्यात् तदा पौर्णमासवदित्यनेनैवाधानेपि विकल्पस्य सिद्धत्वात् पुनर्विकल्पो न वक्तव्यः स्यात्, उक्तश्च अत एवं ज्ञायते पौर्णमासे वपनस्य विकल्पो नास्तीति । याज्ञिकदेवपद्धतौ तत्रैव (२।१।१) कशश्मश्रुवपनं शिखां वर्जयित्वा कर्कमते वपनस्य विकल्पः, भर्तृयज्ञमते, वपनं नियमेन, अशिखं वा सशिखंवेति विकल्पः इति इतः परमपि इदं सूत्रं विचारणीयं नात्र तूर्ष्णीभावो वरं मीमांसकानां अत्र सदा बद्धशिखेनेति स्मृतिरनेन सूत्रेण भर्तृयज्ञमते बाध्यते सत्यां शिखायां किल बन्धनं तदेव सदोपवीतिनेत्यत्र विधित्सितं न तु शिखाऽपि वाक्यभेदप्रसङ्गात् ॥ अन्यत्रापि आपस्तम्बधर्मसूत्रे—

न समावृत्ता वपेरन्नित्येके ॥ १।३।१०

इदं सूत्रं तु शावकर्मविधायके प्रकरणे विद्यते । परं वपनशास्त्रार्थं तु समानमेवावान्तरप्रकारं विना–

समावृत्ताः—समावर्तनसंस्कारः कृतो यैस्ते । विहारादन्यत्र तत्रैव योगविभागोऽयम् । विहारो यज्ञदीक्षा तत्र तु वपेरन् नान्यत्र वपनम् ॥ अथापि ब्राह्मणम् । रिक्तो ह वा एषो न पिहितो यन्मुण्डस्तस्यैतदपिधानं यच्छिखेति ॥ १।३।१०

अनेन सर्वेषां केशानां वापने शिखास्थापनं विधीयते ॥ न तु शिखाविधानमात्रेण वपनमप्युच्यते । अन्यच्चैतत् केषुचित्सूत्रेषु शिखाया अपि वपनं यत् । एतेन क्षौरविषये यत्किंचित्प्रलम्पतः प्रत्याख्याता वेदितव्याः यथाकथंचित्करणेऽपि नात्र विशेषत आदरोऽस्माकमिति ॥ प्राग्वयस्काः कारयन्ति तदपि शास्त्रविरुद्धमेव जीवत्पितृकाः कारयन्ति तदपि शास्त्रासंगतमेव तथा च मुहूर्तमार्तंडे १।१२

मुक्ताभ्यक्तोपवासीश्वरजनयुवतिप्राग्वयस्काश्च योगी ।
यात्रायुद्धोन्मुखा ये कृतदिनविधयोऽस्त्यंबकास्ते न मुण्ड्याः

तत्रैव टीकायां—कृताग्न्याधानस्य मुण्डनपक्षांगीकारे इत्यनेन पाक्षिकं (वैकल्पिकं) द्योत्यते

इति, पीयूषधारायामपि, यथामुखशोभनं तथा क्षौरमिष्टमित्यादि उक्तत्वान्नात्र प्राचीनैराग्रहः करणीय इत्यलं बहुलेखनेन ॥ इतोऽग्रेपि विचारःपरस्ताद्भविष्यति

इति क्षौरविचारसंक्षेपः

परिशिष्टम् (इ)

अथ स्वस्त्ययनप्रयोगः ॥

अथ स्वस्त्ययनं वाचयीत ॥ २।८।१५ आ. गृ.

वृत्तिः—ॐ स्वस्ति भवन्तो ब्रुवन्तु । ते च ॐ स्वस्तीति प्रत्यूचुः ॥ स्वस्त्ययनशब्द एवास्मत्सूत्रे रूढः । एतावत्कृतं चेदलमिति मन्वानो वृत्तिकारः ब्राह्मणानाहूय सत्कृत्य औपरिष्टकं स्वस्त्ययनं वाचयित्वा तदङ्गत्वेन विनिमयन्यायेन दक्षिणां दद्यात् इति अभाणीत् ; अहं तु एवं ब्रवीमि ॥ स्वस्तिशब्दवन्ति सूक्तानि ब्राम्हणेभ्यः पाठयित्वा दक्षिणां दद्यात् । गमकं चास्ति अस्यार्थस्य प्रत्यवरोहसूत्रे " स्वस्त्ययनानि जपित्वा " २।३।१२ आ. गृ. तानि च " आनो भद्रा स्वस्तिनोमिमीतां परावतो ये दिधिषन्त आप्यमित्येतानि इदं स्वस्त्ययनं आदावन्ते च माङ्गलिकमिति कार्यम् इदं तु सूत्रकृता विवाहानन्तरमुक्तं अत उत्तराङ्गमेतद्विवाहस्य, । देवकस्थापनं न विवाहाङ्गम् । सूत्रेपि नास्तीति कृत्वा नालिखं ॥ कुलाचारप्राप्तेयं व्यवस्था परमस्माकं कुलाचारस्त्वाचार्येणैव किल सूत्रयितव्यः अकरणे न प्रत्यवाय इत्येवमेव आशयः । केचन आशौचादिव्यवस्थार्थमिति ब्रूयुः तान् प्रति ब्रूयात् । सति संभारे सिद्धे न तावद्दोष इति सैव तत्र भवती स्मृतिरेवमाह ; यथा प्रयोगरत्ने " उपकल्पित बहुसंभारस्यापि संनिहितलग्नान्तराभावेन सम्भारधारणाशक्तौ आशौचाभावम् ' विष्णुस्मृतिरेवमाह ।

तस्मात् कारिकाकारोप्याह ॥ अत्र कुलाचारप्राप्तं किंचिदुच्यते इति उक्त्वा ततो देवकस्थापनादि विचारं लिलेख ॥ ननु कुलधर्मा अपि अवश्यमनुष्ठेया इति भगवानप्याह ॥

" उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ।
नरके नियतं वासो भवतीत्यनुशुश्रुम ॥ भ. गी. १।४३॥

भाष्यम् । किं च जातिधर्मेषु कुलधर्मेषु चोत्सन्नेषु तद्धर्मवर्जितानां मनुष्याणाम् अनधिकृतानां नरकपतनध्रौव्यादनर्थकरमिदमेव हेयमित्याह उत्सन्नेति यथोक्तानां मनुष्याणाम् नरकपातस्यावश्यकत्वे प्रमाणमाहेत्यनुशुश्रुमेति । इत्युक्तत्वात् कथं कुलधर्मास्त्यज्यन्ते इति चेत् ब्रूमः अनवस्थितकुलधर्मविषयकमिदं शासनम् अवस्थितकुलधर्माणां तु सौत्रानुष्ठानरीत्यावश्यमनुष्ठेयतामेवानुवदति वयमपि सौत्रान् कुलाचारान् अनुतिष्ठामः अयं गीताश्लोकोपि स्वधर्मान्नपरावर्तितव्यामित्याह वयमपि तस्मान्नपरावर्तामहे इति नायंगीताविरोधः तस्मात् सूत्रोक्तमेव स्वस्तिवाचनं माङ्गलिके कार्यमिति सिद्धम् ॥

प्रयोगरत्ने अपि अस्य स्वस्त्ययनस्य कर्माङ्गत्वमेव नास्तीति केषांचिन्मत-मुदाहृतं तत्सूत्रविरोधादुपेक्ष्यं आचार्यस्य मते तु विवाहरूपकर्माङ्गत्वमेव तत्प्रयोगद्वैविध्यमपि तत्रैव प्रपंचितं पारिजातानुसारेण एकः प्रयोगः । अन्यस्तु हेमाद्रौ दानकाण्डे बह्वृचगृह्यपरिशिष्टत्वेनउक्तः सकलसाधारणशिष्टाचारप्राप्तश्च पुण्याहवाचनप्रयोगः ॥ एवं विप्रतिपत्तौ अस्मदुक्तसूत्रोक्तप्रयोगएव साध्विति प्रति-जानीमहे ॥ मनुरपि स्वस्त्ययनमेवप्रायुंक्त । स्वस्त्ययनं नाम अभिप्रेतार्थस्याविनाशः स्वस्ति तस्यायनं प्रापकं इति ।

सामग्रीविशेषः

चत्वारो ब्राम्हणाः स्वस्तिशब्दघटितसूक्तपाठकाः ।
तेभ्यो देया दक्षिणा पठनमेवात्र प्रधानमितरदङ्गम् ॥

इति स्वस्त्ययनप्रयोगः

आनो भद्रा० ।

स्वस्तिनो मिमीता० ।

परावतोयेदिधिषन्तआप्यम्० ।

एतानि स्वस्तिशब्दवन्ति सूक्तानि स्वस्त्ययनानीत्युच्यन्ते ॥

परिशिष्टम् (ई)

मधुपर्कसूत्राणि

मधुपर्कमाहरेत् ॥ १ ॥

दद्यादित्यर्थः ॥ १ ॥

स्नातकायोपस्थिताय ॥ २ ॥

उपस्थिताय कृतसमावर्तनाय तस्मिन्नहनि गृहानभ्यागताय विवाहार्थिने च ॥२॥

राज्ञे च ॥ ३ ॥

उपस्थिताय ॥ ३ ॥

आचार्यश्वशुरपितृव्यमातुलानां च ॥ ४ ॥

आचार्यादीनां पूर्वयोरसमासेन निर्देशस्त्वतुल्यत्वज्ञापनार्थः । तेन स्नातकाय तदहरेव देयः । यत्रैनं पूजयिष्यन्तो भवन्तीति वचनात् । विवाहार्थिने च । राज्ञे त्वहरहरभ्यागताय । आचार्यादीनां प्रति वत्सरोषितागतानां शास्त्रान्तरदर्शनाद्विशेषो लब्धः ॥ ४ ॥

अप्रसिद्धत्वान्मधुपर्कस्वरूपमाह—

दधनि मध्वानीय ॥ ५ ॥

आनयतिरत्र सेचनकर्मा । आसिच्येत्यर्थः ॥ ५ ॥

सर्पिर्वा मध्वलाभे ॥ ६ ॥

इदं वचनं मध्वलाभे अयमेव प्रतिनिधिर्भवति नान्यस्तैलादिरित्येवमर्थम् ॥६॥

अल्पत्वाद्धातुः कर्म पूर्वमाह—

विष्टरः पाद्यमर्घ्यमाचमनीयं मधुपर्को गौरित्येतेषां त्रिस्त्रिरेकैकं वेदयन्ते ॥ ७ ॥

विष्टर इत्यासनम् । पाद्यार्थमर्घ्यार्थमाचमनार्थं चोदकं तथोक्तम् । एतेषामिति वचनं एतेषामेव त्रिर्निवेदनं यथा स्यात् भोजनस्य माभूदिति । भोजनं च देयमिति वक्ष्यामः । ऋत्विजां मधुपर्कदाने द्वे गती संभवतः पदार्थानुसमयः काण्डानुसमय इति । तत्र पदार्थानुसमयो नाम सर्वेषां वरणक्रमेण विष्टरं दत्वा ततः

पाद्यं ततोऽर्घ्यमिति । काण्डानुसमयो नाम एकस्यैव विष्टरादिगोनिवेदनान्तं समाप्य ततोऽन्यस्य सर्वं ततोऽन्यस्येति ॥ ७ ॥

अथ ग्रहीतुः कर्माह—

अहं वर्ष्म सजातानां विद्युतामिव सूर्यः । इदं तमधितिष्ठामि यो मा कश्चाभिदासतीत्युदगग्रे विष्टर उपविशेत् । आक्रम्य वा ॥ ८ ॥

पद्भ्यामाक्रम्य वा विष्टरौ । एतयोर्विकल्पः ॥ ८ ॥

पादौ प्रक्षालयीत दक्षिणमग्रे ब्राह्मणाय प्रयच्छेत् ॥ ९ ॥

पश्चात्सव्यं कुतः अग्रेवचनात् ॥ ९ ॥

सव्यं शूद्राय ॥ १० ॥

अग्रे प्रयच्छेत् । पश्चाद्दक्षिणं । क्षत्रियवैश्यौ यदा प्रक्षालयितारौ तदा सव्यं वा पूर्वं दक्षिणं वा नास्ति नियमः ॥ १० ॥

प्रक्षालितपादोऽर्घ्यमञ्जलिना प्रतिगृह्य ॥ ११ ॥

प्रक्षालितपादग्रहणमानन्तर्यार्थम् । प्रक्षालनानन्तरमर्घ्यमेवग्रहणीयादिति । गन्धमाल्यादिसंयुक्तमुदकमर्घ्यमित्युच्यते ॥ ११ ॥

अथाचमनीयेनान्वाचामति अमृतोपस्तरणमसीति ॥ १२ ॥

अथशब्दस्त्वानन्तर्यार्थः । अर्घ्यानन्तरमाचमनीयमेवेति । तेन गन्धमाल्यादीनि परिसमाप्ते कर्मणि दातव्यानि । आचामतीत्युदकं पिबतीत्यर्थः । अत्र शौचार्थमाचमनं न भवति । कुतः । स्मृतेः ' मधुपर्के च सोमे च अप्सु प्राणाहुतीषु च । नोच्छिष्टा भवन्ति ' इति उत्तरत्र विधानाच्च ' आचान्तोदकाय गां ' [गृ० १।२४।२३] इति एवमेके तदयुक्तम् । कुतः । सोमे अनुच्छिष्टविधानाद्यत्राचमनं न प्रतिषेधति तत्र शौचार्थमाचमनं भवतीतिगम्यते । आचान्तोदकवचनमन्यार्थम् ॥ १२ ॥

मधुपर्कमाह्रियमाणमीक्षेत मित्रस्य त्वा चक्षुषा प्रतीक्ष इति ॥ १३ ॥

मधुपर्कमाह्रियमाणमानीयमानमीक्षेत मन्त्रेण ॥ १३ ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां

प्रतिगृह्णामीति तदञ्जलिना प्रतिगृह्य मधुवाता ऋतायत इति तृचेनावेक्ष्यानामिकया चाङ्गुष्ठेन च त्रिः प्रदक्षिणमालोड्य वसवस्त्वा गात्रयेण छन्दसा भक्षयन्त्विति पुरस्तान्निमार्ष्टि ॥ १४ ॥

अनामिकेति केचिन्मध्यमामाहुः । कुतः । देशेनैव समाख्या न तु तस्या नाम विद्यते अङ्गुष्ठादिवत् । अन्ये तूपकनिष्ठिकामाहुः । कुतः । कनिष्ठिकया ह्यसौ व्यपदिश्यते न तु तस्या नामास्तीति । आगमाद्विशेषो ज्ञेयः । तृचेनावेक्ष्य ततः सव्ये पाणौ कृत्वा प्रदक्षिणमालोड्य वसवस्त्वेति पुरस्तान्निमार्ष्टि अङ्गुलिगतं लेपमपनयतीत्यर्थः ॥ १४ ॥

रुद्रास्त्वा त्रैष्टुभेन छन्दसा भक्षयन्त्विति दक्षिणतः आदित्यास्त्वा जागतेन छन्दसा भक्षयन्त्विति पश्चात् विश्वे त्वा देवा आनुष्टुभेन छन्दसा भक्षयन्त्वित्युत्तरतः भूतेभ्यस्त्वेति मध्यात्त्रिरुद्गृह्य ॥ १५ ॥

मन्त्रेण मध्यात्त्रिरुद्गृह्य निमार्ष्टि ऊर्ध्वं त्रिरुत्क्षिपतीत्यर्थः । मन्त्रावृत्तिरुक्ता॥ १५॥ ततो भूमौ निधाय पात्रम् ।

विराजो दोहोऽसीति प्रथमं प्राश्नीयात् विराजो दोहमशीयेति द्वितीयं मयि दोहः पद्यायै विराज इति तृतीयं ॥ १६ ॥

संख्यावचनानि तु सर्वप्राशनपक्षे त्रिभिरेव मन्त्रैर्यथा सर्वं प्राशितं भवति तथा प्राश्नीयादित्येवमर्थानि । एवं भाष्यकारः । अन्ये त्वन्यथा व्याचख्युः । भूतेभ्यस्त्वेति मध्यात्त्रिरुद्गृह्य विराजो दोहोऽसीति प्रथममुद्ग्राहं प्राश्नीयात् । विराजो दोहमशीयेति द्वितीयमुद्ग्राहम् । मयि दोह इति तृतीयमुद्ग्राहम् । तृतीयवचनं सर्वप्राशनपक्षे तृतीयेन प्राशनेन यथा सर्वं प्राशितं भवति तथा प्राश्नीयादित्येवमर्थम् । पद्यायै विराज इत्यत्र विराज इति षष्ठी । कुतः । पूर्वयोस्तथा दृष्टत्वात् । पद्यायै इत्यपि चतुर्थी षष्ठ्यर्थे । तेन तत्सामानाधिकरण्ये सत्यपि षष्ठ्येव युक्ता कल्पयितुम् ॥ १६ ॥

न सर्वं ॥ १७ ॥

प्राश्नीयात् न सर्वं ॥ १७ ॥

न तृप्तिं गच्छेत् ॥ १८ ॥

तृप्तिं च न गच्छेत् ॥ १८ ॥

ब्राह्मणायोदङ्ङुच्छिष्टं प्रयच्छेत् अलाभेऽप्सु ॥ १९ ॥

ब्राह्मणायोच्छिष्टं उद्धृतादवशिष्टमुदङ्मुखो मधुपर्कं प्रयच्छेत् ब्राह्मणालाभेऽप्सु निषिञ्चेत् ॥ १९ ॥

सर्वं वा ॥ २० ॥

प्राश्नीयात् ॥ २० ॥

अथाचमनीयेनान्वाचामति अमृतापिधानमसीति ॥ २१ ॥

यत्तत्पूर्वमाचमनीयं निवेदितं तेनान्वाचामति मन्त्रेण ॥ २१ ॥

सत्यं यशःश्रीर्मयि श्रीः श्रयतामिति द्वितीयं ॥ २२ ॥

द्वितीयग्रहणमाचमनीयप्राप्त्यर्थम् इतरथा मन्त्रस्योत्तरेण संबन्धः स्यात् ॥२२॥

आचान्तोदकाय गां वेदयन्ते ॥ २३ ॥

आचान्तग्रहणं शौचार्थमाचमनं कृत्वा कर्माङ्गमप्याचमनं कुर्यादित्येवमर्थम् । उदकवचनमाचमनीयनिवृत्त्यर्थम् तेनाचमने उदकान्तरं भवति ॥ २३ ॥

हतो मे पाप्मा पाप्मा मे हत इति जपित्वोङ्कुरुतेति कारयिष्यन् ॥ २४ ॥

इमं मन्त्रं जपित्वा ॐ कुरुतेति ब्रूयात् यदि कारयिष्यन्मारयिष्यन्भवति तदा च दाता आलभेत । तत्र देवताः प्रागुक्ताः ॥ २४ ॥

माता रुद्राणां दुहिता वसूनामिति जपित्वोमुत्सृजतेत्यु-त्स्रक्ष्यन् ॥ २५ ॥

यद्युत्स्रक्ष्यन् भवति तदा एतां जपित्वा ॐ मुत्सृजतेति ब्रूयात् ॥ २५ ॥

नामांसो मधुपर्को भवति भवति ॥ २६ ॥

मधुपर्काङ्गभोजनममांसं न भवतीत्यर्थः । कुतः । मांसस्य भोजनांगत्वेन लोके प्रसिद्धत्वात् । अनेनाभ्युपायेन भोजनमप्यत्र विहितं भवति । पशुकरणपक्षे तन्मांसेन भोजनम् । उत्सर्जनपक्षे मांसान्तरेण । अध्यायान्तलक्षणार्थं द्विवचनं मङ्गलार्थं च ॥ २६ ॥

इतिमधुपर्कसूत्राणि

अथ मधुपर्कप्रयोगः ॥

आचम्य कन्यार्थिने गृहागतायास्मै स्नातकाय वराय कन्यादानाङ्गभूतं मधुपर्कं आहरिष्ये इति संकल्प्य आसनं दद्यात् । विष्टरो विष्टरो विष्टर इति त्रिर्निवेद्यासनार्थं वरहस्ते विष्टरं दद्यात् वरस्तु—

अहं वर्ष्म सजातानां विद्युतामिव सूर्यः ।
इदं तमधितिष्ठामि यो मा कश्चाभिदासति ॥ १ ॥

इत्युदगग्रे विष्टरे उपविशेत् ततोर्चकेन । पाद्यं पाद्यं पाद्यं इति त्रिर्निवेदितं पाद्यं वरो गृह्णीयात् ततोर्चकस्तेनोदकेन वरस्य दक्षिणसव्यपादौ क्रमेण क्षालयेत् । ततो वरः पूर्ववत्त्रिर्निवेदितं अर्घ्यम् अञ्जलिना प्रतिगृह्य आचमनीयेनान्वाचामति तत्र मन्त्रः

अमृतोपस्तरणमसि ॥ २ ॥

तत आह्रियमाणं मधुपर्कं इक्षते तत्र मन्त्रः ।

मित्रस्य त्वा चक्षुषा प्रतीक्षे ॥ ३ ॥

ततो मधुपर्को, मधुपर्को, मधुपर्क इति त्रिर्दात्रा निवेदितं मधुपर्कं
देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रति-
गृण्हामि ॥ ४ ॥ इति

तदञ्जलिना प्रतिगृह्य मधुवाता इति तृचेनावेक्षयेत् ।
मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ॥

माध्वीर्नः सन्त्वोषधीः ॥ ५ ॥

मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः
मधुद्यौरस्तु नः पिता ॥ ६ ॥

मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः ॥ ७ ॥

इत्यवेक्ष्यानामिकया चांगुष्ठेन च त्रिः प्रदक्षिणमालोड्य
वसवस्त्वा गायत्रेण छंदसा भक्षयन्तु ॥ ८ ॥

इति पुरस्तान्निमार्ष्टि एवं ॥
रुद्रास्त्वा त्रैष्टुभेन छन्दसा भक्षयन्तु ॥ ९ ॥

इति दक्षिणतो निमार्ष्टि । निक्षिपेदित्यर्थः सर्वत्रानुसंधेयः ॥
आदित्यास्त्वा जागतेन छंदसा भक्षयन्तु ॥ १० ॥

इति पश्चान्निमार्ष्टि
विश्वे त्वा देवा आनुष्टुभेन छन्दसा भक्षयन्तु ॥ ११ ॥

इत्युत्तरतः ततो मध्यात्त्रिर्गृहीत्वा त्रिरूर्ध्वे निक्षिपेत् तत्र मंत्रः
भूतेभ्यस्त्वा । इति ॥ १२ ॥

ततो मधुपर्कप्राशनम् तत्र मन्त्राः ॥
विराजोदोहोसि ॥ १३ ॥

इति प्रथमं प्राश्नीयात्
विराजो दोहमशीय ॥ १४ इति द्वितीयं ।
मयि दोहः पद्यायै विराजः ॥ १५ ॥ इति तृतीयं ॥

अथाचमनीयेनान्वाचामति ।
अमृतापिधानमसि ॥ १६ ॥ इति ।

सत्यं यशः श्रीर्मयि श्रीः श्रयताम् ॥ १७ ॥ इति द्वितीयमाचमनं
ततो दात्रा आचान्तोदकाय गौर्गौर्गौरिति निवेदितां गां
माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः ।
प्रनुवोचं चिकितुषे जनाय मागामनागामदितिं वधिष्ट ॥ १८ ॥

इति जपित्वा ॐ उत्सृजत इति उत्स्रक्ष्यन् ब्रूयात् । मारयिष्यन् चेत् ।
हतो मे पाप्मा पाप्मा मे हतः ॥ १९ ॥

इति जपित्वा ॐ कुरुतेति ब्रूयात् ततो गां निवेद्य वराय भोजनमपि दत्त्वा आचम्य, अनेन मधुपर्काख्येन कृतेन कर्मणा परमेश्वरः प्रीयताम् ॥

सामग्री ॥

विष्टरः—आसनं, उपवेशनार्थम् ।
जलम्—पाद्यार्थम् । अर्घ्यार्थे, आचमनीयम् ।
मधुपर्कः—भक्षणार्थं, प्रतिदिशं निक्षेपार्थम् ।
गौः—निवेदनार्थं जामात्रे, भक्षणार्थं वा
भोजनं—वराय कर्माङ्गम्

मधुपर्कप्रयोगमन्त्रभाष्यम् ॥

अहं वर्ष्म सजातानां विद्युतामिव सूर्यः ॥
इदं तमधितिष्ठामि यो मा कश्चाभिदासति ॥ १ ॥

भाष्यम्—कुलज्ञानाचारवपुर्वयोगुणैरहं सजातानां समानानां मध्ये वर्ष्म श्रेष्ठः ज्येष्ठ इति यावत् । विद्युतां प्रकाशवतां ग्रहनक्षत्रादीनां मध्ये सूर्य इव इदं इमं तम् विष्टरं, अधितिष्ठामि, अभितिष्ठामि, तं पुरुषमुद्दिश्य विष्टरवद्बद्धम् अभिलक्षीकृत्य अभिभूय वा तिष्ठामि, अधः कृत्वा उपर्युपविशामि, यः कश्चन मा माम् अभिदासति, उपक्षीणं कर्तुमिच्छति दसु उपक्षये ।

अमृतोपस्तरणमसि ॥ २ ॥

अमृतस्य उपस्तरणम् आच्छादनमसि, अथवा अमृतं जलरूपम् उपस्तरणं आच्छादनमसि ।

मित्रस्य त्वा चक्षुषा प्रतीक्षे ॥ ३ ॥

मित्रस्य चक्षुषा त्वा त्वां प्रतीक्षे अवलोकयामि मित्राधिष्ठितं चक्षुः अथवा मित्रस्य आदित्यस्य मित्रस्य हि शान्तं चक्षुः । अथवा हे मधुपर्क जगन्मित्रस्य सूर्यस्य चक्षुषा त्वामवलोकयामि न तु वैरिचक्षुषा अनुकूलोयमिति बुध्युत्पादनाय मित्रशब्दप्रयोग इत्याह " मित्रस्य त्वा चक्षुषा प्रेक्ष इत्याह मित्रत्वाय । तै. ब्रा. ३।२।४ प्रेक्षे प्रतीक्षे एतावान् भेदउभयत्र ॥

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ॥ ४ ॥ ऋ. सं. मं. १।१४।९१।६

भाष्यम्—ऋतायते ऋतं यज्ञमात्मन इच्छते यजमानाय वाता वायवो मधु माधुर्योपेतं कर्मफलं क्षरंति वर्षंति प्रयच्छंतीत्यर्थः । तथा सिंधवः स्यन्दनशीला नद्यः समुद्रा वा मधु माधुर्योपेतं स्वकीयं रसं क्षरन्ति, एवं नोऽस्मभ्यमोषधीः फलपाकान्ता ओषधयश्चताश्च माध्वीर्माधुर्योपेताः सन्तु भवन्तु ।

मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः ।
मधुद्यौरस्तु नः पिता ॥ ५ ७ ॥

भाष्यम्—नक्तं रात्रिर्नोस्माकं मधु मधुमती माधुर्योपेतफलप्रदा भवतु । उतापिचोषस उषःकालोपक्षितान्यहानि च मधुमंति भवन्तु । पार्थिवं रजः पृथिव्याः संबन्धी लोकोऽस्माकं मधुमत् माधुर्यविशिष्टफलयुक्तो भवतु । पिता वृष्टिप्रदानेन सर्वेषां पालयिता द्यौर्द्युलोकोऽपि मधु मधुयुक्तो भवतु ।

मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः ॥ ६ ८ ॥

नः अस्माकम् वनस्पतिर्वनानां पालयिता यूपाभिमानी देवो मधुमान् माधुर्योपेतफलवानस्तु । तादृशम् फलमस्मभ्यं प्रयच्छत्वित्यर्थः सूर्यः सर्वस्य प्रेरकः सविता च मधुमानस्तु । गावः अग्निहोत्राद्यर्था धेनवश्च नोऽस्माकं माध्वीर्माधुर्योपेतेन पयसा युक्ता भवंतु ।

वसवस्त्वा गायत्रेण छन्दसा भक्षयन्तु ॥ ७ ॥

वसवः त्वा त्वाम् गायत्रेण छन्दसा भक्षयन्तु । एवं सर्वत्र ॥ ८ ॥

रुद्रास्त्वा त्रैष्टुभेन छन्दसा भक्षयन्तु ॥ ९ ॥

आदित्यास्त्वा जागतेन छन्दसा भक्षयन्तु ॥ १० ॥

विश्वे त्वा देवा आनुष्टुभेन छन्दसा भक्षयन्तु ॥ ११ ॥

भूतेभ्यस्त्वा ॥ १२ ॥

भाष्यम्—भूतेभ्यः प्राणिमात्रेभ्यस्त्वा त्वां उत्क्षिपामीत्यर्थः ॥

विराजो दोहोसि ॥ १३ ॥

भाष्यम्—प्राणधारणादिगुणैः सकलसौहित्येन विविधतया राजत इति विराजन्तस्य विराजो दोहः परिणामसारो रसः स त्वमसि तस्मात्त्वां प्राश्नामीत्यर्थः ।

विराजो दोहमशीय ॥ १४ ॥

हे उदक तं त्वां विराजो दोहं परिणामसारभूतं रसं अशीय अश्नुवे, व्याप्नुयाम् ।

मयि दोहः पद्यायै विराजः ॥ १५ ॥

किञ्च मयि विषये या पद्या पाद्या पादयोः साध्वी सपर्या तस्यै तदर्थम् विराजो दोहः । मन्त्रसंस्कृतं जलम्भवेति शेषः ॥

अमृतापिधानमसि ॥ १६ ॥

अमृतरूपमाच्छादनमसि । तस्मात्वामाचामीत्यर्थः ॥

सत्यं यशः श्रीर्मयि श्रीः श्रयताम् ॥ १७ ॥

भाष्यम्—सत्यं यशः श्रीः मयि श्रयतां, आश्रयं करोत्वित्यर्थ ॥

हतो मे पाप्मा पाप्मा मे हतः ॥ १८ ॥

गोरूपेण मे पाप्मा पापमेव हतमिति मन्ये निश्चयार्थे द्विरुक्तिः गोर्हननरूपेण मे पाप्मा हत इत्यर्थः ॥

माता रुद्राणां दुहिता वसूनां, स्वसादित्यानाममृतस्य नाभिः ।
प्र नु वोचं चिकितुषे जनाय मागामनागामदितिं वधिष्ट ॥ १९ ॥

भाष्यम्—अमृतस्य क्षीरस्य नाभिराश्रयः नु वितर्के छंदसि व्यवहिताश्चेत्युक्ते-रुपसर्गस्य वोचमित्रत्यान्वयः प्रवोचं ब्रवीमि, चिकितुषे, चेतनावते जना यूयं इमाङ्गाम् मा वधिष्ठ मा घ्नताम् किम्भूतां अनागामनपराधाम्, अदितिंदेवमातरं-पयोदानात् मातारुद्राणामित्यादिस्पष्टार्थम् ।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृण्हामि ॥ २० ॥
भाष्यम्—देवस्य त्वाशब्देन मधुपर्क उच्यते, देवस्य सवितुः प्रसवे अभ्यनु-ज्ञायां वर्तमानः देवेन सवित्रा प्रसूतः अश्विनोर्बाहुभ्यां न स्वाभ्याम् अश्विनौ हि देवानामध्वर्यू पूष्णोहस्ताभ्यां न स्वाभ्याम् पूषा हि देवानां भागधुक् भागपूरकः प्रतिगृण्हामि स्वीकरोमि मधुपर्कमिति यावत् ॥

मधुपर्कः—दधिमिश्रितं मधु, दधिमिश्रितं सर्पिर्वा ॥

इति मन्त्रभाष्यम् ॥

शास्त्रार्थः ।

अत्र 'नामांसो मधुपर्को भवतीति सूत्रम् । अत्र निवृत्तानिवृत्तमांसत्वे । व्यवस्था विधेया. उभयथा सूत्रप्रामाण्यं । त्यागमारणपक्षौ हि सूत्रितौ ॥

इति मधुपर्कप्रयोगः ॥

आभ्युदयिकसूत्राणि ॥

युग्मान्वृद्धिपूर्तेषु ॥ १ ॥

'पुंसवनसीमन्तोन्नयनचौलकर्मोपनयनविवाहा इति पञ्चाग्न्याधेयादीनि च श्रौतानि वृद्धिश्राद्धस्य विषयः' इत्येके । 'अन्ये षोडश संस्काराः श्रवणाकर्मा-दयश्च श्रौतानि च' इत्याहुः । 'अनिष्ट्वा तु पितृन्श्राद्धे वैदिकं कर्म नार-भेत्' इति स्मृतेः । वापीकूपतडागारामाद्युद्यापनादिपूर्तश्राद्धस्य विषयः । उभयत्र युग्मान्भोजयेत् ॥ १ ॥

प्रदक्षिणमुपचारो यवैस्तिलार्थः ॥ २ ॥

वृद्धिपूर्तेष्विति शेषः । अत्र प्रदक्षिणमिति वचनादितरश्राद्धेषु प्रसव्यमुपचार इति गम्यते । तिलकार्ये यवान्कुर्यात् । यज्ञोपवीतयुग्मकर्मादीनामुपलक्षणमिदम् ॥ २ ॥

आभ्युदयिकश्राद्धप्रयोगः ।

विशेषस्त्वत्रोच्यतेऽन्यत्सर्वं पार्वणेन समानम् । यच्चावीवृतत् तदेवात्र संगृह्यते । 'आभ्युदयिके तु युग्मा ब्राह्मणाः, अमूला दर्भाः । प्राङ्मुखोपवीती स्यात्प्रदक्षिणमुपचारो यवैस्तिलार्थो गन्धादिदानं द्विर्द्विः ऋजुदर्भानासने दद्यात् ।

'यवोसि सोमदेवत्यो गोसवे देवनिर्मितः । प्रत्नवद्भिः प्रत्तः पुष्ट्या नान्दीमुखान्पितॄनिमाँल्लोकान्प्रीणयाहि नः स्वाहा' इति यवावपनम् ।

नान्दीमुखाः पितरः प्रीयन्तामित्यर्घ्यनिवेदनं यथालिङ्गं नान्दीमुखाः पितरः इदं वो अर्घ्यमित्यर्घ्यप्रदानमन्त्रो यथालिङ्गम् ।

'अग्नये कव्यवाहनाय स्वाहा'।
सोमाय पितृमते स्वाहा । इति होममन्त्रौ ।

मधुवाता इति तृचस्य स्थाने उपास्मै गायतेति पञ्च[1] मधुमतीः श्रावयेत् । अक्षन्नमीमदन्तेति षष्ठीम् । आचान्तेषु भुक्ताशयान्गोमयेनोपलिप्य तेषु प्राचीनाग्रान्दर्भानास्तीर्य तेषु पृषदाज्यमिश्रेषु भुक्तशेषेणैकैकस्य द्वौ द्वौ पिण्डौ दद्यात्तेनैव क्रमेण मन्त्रावृत्तिरुक्ता । अन्ये तु नान्दीमुखेभ्यः पितृभ्यः स्वाहेति एवं यथालिङ्गं पिण्डान्निपृणन्ति । सर्पिषि दध्यानयत्येतदेव पृषदाज्यम् । अनुमन्त्रणादि पूर्ववत् अन्येत्वनुमन्त्रणादि नेच्छन्ति । ॐ स्वधोच्यतामित्यस्य स्थाने उपसम्पन्नमिति शेषम्पूर्ववत् ।

अनेनाभ्युदयिकश्राद्धप्रयोगेण परमेश्वरः प्रीयताम् । इतः परमत्रविचारः अवसरान्तरे प्रपंचयिष्यते ।

---

१. इदं वृत्तिकारमतं सूत्रमूलकंच पार्वणाद्विशेषं वक्तुकामो भगवानाश्वलायनचार्य इदमसूसूचत् । यदीदं सूचनं स्यात्कष्टं तर्हि मधुवातेतिपठतोऽपि नहानिः ।

मन्त्रभाष्यम् ॥

उपास्मै गायता नरः पवमानायेन्दवे ।
अभि देवाँ इयक्षते ॥ ऋ. सं. मं. ९।१।११।१॥

भाष्यम्—हे नरो नेतार ऋत्विजो यज्ञस्य देवानिन्द्रादीनभीयत आभिमुख्येन यष्टुमिच्छते पवमानाय क्षरतेऽस्मा अभिषूयमाणायेन्दवे सोमायोपगायत। उपगानं कुरुत ॥

अभि ते मधुना पयोथर्वाणो अशिश्रियुः ॥
देवं देवाय देवयु । ९।१।११।२

भाष्यम्—हे सोम ते तव देवं देवनशीलं देवयु देवयुं देवकामं रसं देवाय देवनशीलायेन्द्राय मधुना पयोगव्येन पयसाथर्वाण ·ऋषयोभ्यशिश्रयुः। अभ्यश्रीणन्। समस्कुर्वन्नित्यर्थः ।

स नः पवस्व शङ्गवे शं जनाय शमर्वते ।
शं राजन्नोषधीभ्यः । ९।१।११।३॥

भाष्यम्—हे राजन् दीप्यमान सोम स प्रसिद्धस्त्वं नोऽस्माकं गवे शं सुखं पवस्व। क्षर। जनाय पुत्रादये च शं पवस्व अर्वतेऽश्वाय च शं पवस्व ॥ ओषधीभ्यश्च शं पवस्व ॥

बभ्रवे नु स्वतवसेऽरुणाय दिविस्पृशे ।
सोमाय गाथमर्चत ॥ ९।१।११।४॥

भाष्यम्—हे स्तोतारः बभ्रवे बभ्रवर्णाय स्वतवसे स्वबलायारुणाय कदाचिदरुणवर्णाय दिविस्पृशे दिवं स्पृशते सोमाय नु क्षिप्रं गाथं स्तुतिरूपां वाचमर्चत। उच्चारयतेत्यर्थः ।

हस्तच्युतेभिरद्रिभिः सुतं सोमम्पुनीतन ।
मधावाधावतामधु ॥ ९।१।११।५

(मधौ, आ, धावत, मधु,)

भाष्यम्—हे ऋत्विजः हस्तच्युतेभिर्हस्तप्रच्युतैरद्रिभिराभिषवग्रावभिः सुतमभिषुतं सोमं पुनीतन पवित्रे पावयत। अपि च मधौ मदकरे सोमे मधु गव्यं पय आधावत प्राक्षिपत ॥

इति मन्त्रभाष्यम् ॥

इदन्तु सायणभाष्यं सर्वत्र यथास्थितमुदाहृतं परस्तात्तु द्वितीये भागे विनियोगानुसारम्भाष्यमारचय्य प्रकाशयिष्याम इत्यलम् ॥

आभ्युदयिकशास्त्रार्थः ॥

आभ्युदयिकन्तु वृध्यर्थं विहितम् । अभ्युदयो, वृद्धिः, उत्कर्ष इत्यनर्थान्तरम् । अभ्युदयार्थं विहितमाभ्युदयिकम् । अतः समाख्यया न कस्याचित्तदङ्गम् अपि तु प्रधानकर्मैवेति नूनम् । यदा यदा स्यादयमभ्युदयकामस्तदैतत्कुर्यात् । न विवाह एव नापि श्रौतकर्मस्वेव, नापि चौलादावेवेति । ये तु संस्कारेष्वेतत्कार्यमिति वदन्ति तेषामपि विमतं चैतत् यथा पुंसवनादाविति केचन श्रौतादिष्वेवेत्यन्ये । सर्वसंस्कारेष्वेवेत्यपरे । अतोऽभ्युदयनिमित्तमेवैतादिति विचारपदवीङ्गाहते । तत्र-चैकमेव पार्वणन्नाम पितृपितामहप्रपितामहाः । पार्वणस्यैवेतिकर्तव्यतामुपदिशति सूत्रकारो विशेषं विना । इदञ्च सपिण्डकं, सभोजनं वाम्नायते सूत्रे तथैवानुष्ठेयम् । इदानींतनास्तु यदेतद्विवाहादावनुतिष्ठन्ति न तच्छास्त्रसम्मतम् । अतस्तत्सभोजनमेव सपिण्डंवा कार्यमिति वयं सूत्रमूलकं वदामः " अथातः पार्वणे श्राद्धे काम्य आभ्युदयिकएकोद्दिष्टे वा " इति सूत्रम् ।

इत्याभ्युदयिकविचारः ।

इति परिशिष्टानि ॥

प्रशस्तिपत्रिकाः ॥

अयि महाशया धर्मतत्पराः!—

अत्रभवद्भिर्भवद्भिरनुतिष्ठासिते धर्मपथे किंजवडेकरोपाव्हैर्वामनशास्त्रिभिः प्रमाणशास्त्रमितां सुगमतां प्रकटयामि । पश्यत— स्वगृह्योक्तमल्पीयोपि कर्म सूत्रव्याख्यातृभिः प्रयोगकृद्भिश्च फलाधिक्यलिप्सया सूत्रान्तरोदितान्यपि अंगान्यानीय भूय एवाकारि, यद्यपि तेषामियं निर्व्याजा दयैव, तथापि प्रौढेऽस्मिन्कालेये काले " वृद्धिमिष्टवतो मूलमपि नष्टमिति " न्यायेन अहर्निशं प्रयत्यापि शरीरयात्रामेव निर्वोढुमशक्नुवानाः स्पृहयालवश्च प्रायेण धर्मैकसमधिगम्याय स्वःसुखाय सर्वेऽपि जनाः स्वगृह्योक्तांगकलापसहितं प्रधानमपि सम्यगनुष्ठातुं न प्रभवन्ति किमु गृह्यान्तरोक्तांगोपेतम्! । अथ च यावान् स्वस्वगृह्योक्तांगप्रधानकलापः, तावन्तं चेज्जानीयुस्तदा स्वशक्त्यनुरोधेनानुतिष्ठेयुः भवेयुश्च श्रेयोभाजनम् । अतः संक्षिप्तपद्धतिप्रदर्शनस्यैवायमवसरः, किंचान्यत् यच्चसूत्रे अनुक्तमेव कर्म सर्वथा तत्फलावाप्तये सूत्रान्तरोदीरितमपि तत्कर्म काममनुतिष्ठन्तु लभन्तां च तत्फलम् यथा उदकशान्तिः बौधायनैरेवाकथ्यत कुर्वत एवापस्तम्बा आश्वलायनाश्च ॥

यत्तु पुनः स्वगृह्योक्तमेव साङ्गं कर्म, न सहत एव तत् अन्तरा अन्यगृह्योक्तानि अंगानि प्रवेशयितुं उत्पत्तिशिष्टगुणावरुद्धे उत्पन्नशिष्टगुणानां न प्रवेश इति मीमांसान्यायात् । उत्पत्तिविधेश्च प्राबल्यमेव । तथाहि—अंगिबोधकत्वसमानाधिकरणात्यन्ताभावीयवैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगित्वत्वपर्याप्तावच्छेदकताकप्रतियोगिताकाभाववदङ्गबोधकवाक्यनिष्ठनिरूपकतानिरूपितानिरूप्यताशालि—प्राबल्यं इति ॥

पराचक्रमिरे चास्मिन्विषये गोभिलसूत्रभाष्यकाराः. उदाहरणाय तद्भाष्यं किंचिदत्र संगृह्यते ।

" शाखान्तरीयानुष्ठाने परिशिष्टकाराणां कुत्राभ्यनुज्ञा इति नखल्वधिगच्छामि। अनभ्यनुज्ञैव तु विज्ञायते तथा च छन्दोगपरिशिष्टम्—

अक्रिया त्रिविधा प्रोक्ता मुनिभिः कर्मकारिणाम् ।
अक्रिया च परोक्ता च तृतीया चायथाक्रिया ॥ १ ॥

गृह्यासंग्रहेऽपि––

ऊनो वाप्यतिरिक्तो वा यः स्वशास्त्रोक्तमाचरेत् ।
तेन सन्तनुयाद्यज्ञं न कुर्यात्पारतन्त्रिकम् ॥ २ ॥

अन्यत्रापि––

प्रयोगः सूत्रकारोक्तो न समुच्चयमर्हति ।
समुच्चये यतस्तस्य न निष्पत्तिर्न च क्रमः ॥ ३ ॥

गृह्यपरिशिष्टेऽपि––

प्रयोगशास्त्रं गृह्यादि न समुच्चीयते परैः ।
प्रयोगशास्त्रताहानादनारम्भविधानतः ॥ ४ ॥

इति यावती इतिकर्तव्यता स्वशास्त्रोक्ता तावत्यैव यज्ञं तनुयात् न च पारतंत्रिकं कुर्यात् स्वशास्त्रोक्तस्य प्रयोगस्य खल्वन्तरान्तरा पारतंत्रिकस्य विशेषस्याभिनिवेशे यथा खल्वेषोच्यते नैषा तथा भवतीति व्यक्तमयथाक्रियैव संपद्यते तदेवं पारतंत्रिकं अनुतिष्ठन् न स्वशाखाश्रयं विधानमनुतिष्ठसि नापि पारशाखिकं; किन्तु द्वयमप्यन्यथयित्वा नरसिंहाकारमभिनवं प्रयोगान्तरं निर्मिणोषि तच्चानुतिष्ठसि स्वशास्त्रोक्तस्य प्रयोगस्य अन्तरान्तरा परशास्त्रोक्तं विशेषं निवेशयन् व्यक्तं खल्वेतदुभयमेवान्यथयासि । तदनेनाल्पेपि स्वशास्त्रोक्ते कर्मणि कृते सर्वं कृतं भवतीति वचनेन तावन्मात्रकरणस्योपदेशेन च अन्तरेणापि सामान्याश्रयाणां विशेषाणामनुष्ठानं फलसिद्धिर्विज्ञायते, मदनपारिजातोपि––" असमर्थश्चेत्स्वगृह्योक्तमात्रमेव करोति तावतैव तस्य शास्त्रार्थसिद्धेरुक्तत्वादिति " ब्रुवन्नेतदेवाह अशक्यं च सर्वेषां सामान्याश्रयाणां विशेषाणामनुष्ठानं। विक्षिप्ताः खल्वेते भूयःसु प्रदेशेषु प्रभूततराश्च भवन्ति न शक्यन्ते सामस्त्येन ज्ञातुमनुष्ठातुं च न च अशक्यमर्थं कर्तुं शास्त्रमस्मान्प्रेरयति । तथा सति तदेव न प्रमाणं भवेत्, विलुप्यन्ते किल कालवशाच्छास्त्राणि इत्यपि स्मर्तारो भवन्ति, तदेवं सामान्याश्रयाणां विशेषाणां अननुष्ठानेऽपि फलसिद्धिर्भवतीति स्थितम् ।

अथैवं सामान्याश्रया ये प्रयोगविशेषाः पुराणादिषु स्मर्यन्ते तेषामनर्थकत्वं प्राप्नोति, नैष दोषः येषां स्वशाखायां प्रयोगविशेषो नोपदिश्यते तेषां तद्विषयोपपत्तेः, स्वशास्त्रोक्तस्तु प्रयोगः स्वस्याभ्यर्हितः तस्मात्स्वशास्त्रोक्तं प्रयोगमनुष्ठायान्ते कामं सामान्याश्रयोपि प्रयोगोऽनर्थको माभूदिति सोप्यनुष्ठीयताम् न तु तद्व्यपाश्रयेण स्वशास्त्रोक्तः प्रयोगोऽन्यथयितुं युक्तः तदित्थं शास्त्रार्थमनुरुन्धानैरस्माभिः

स्वशास्त्रोक्ते प्रयोगे परोक्तानां सामान्याश्रयप्रयोगान्तरोक्तानां च विशेषाणां समुच्चयादुपारभ्यते ।

पूर्वे तु निबन्धारः एतदननुसन्धानाद्वा पाण्डित्यातिशयख्यापनाद्वा स्वशास्त्रोक्तस्य प्रयोगस्यान्तरान्तरा येभ्यो यावन्तः अरोचन्त तावतः परोक्तान् सामान्याश्रयप्रयोगान्तराभिहितांश्च विशेषानभिन्यवीविशन्त । तथान्यत्रापि प्रयोगान्तरविशेषान् प्रयोगान्तरे समुदचैषुः, तदश्रद्धेयम् ।

यत्पुनर्गृह्यासंग्रहवचनम्—

आत्मतन्त्रेषु यन्नोक्तं तत्कुर्यात्पारतांत्रिकम् ।
विशेषाः खलु सामान्या ये चोक्ता वेदवादिभिः ॥५॥

इति पारतंत्रिकं कर्तव्यमुपदिशति तत् श्रौताभिप्रायम् तथा च कात्यायनः—

यन्नाम्नातं स्वशाखायां परोक्तमविरोधि च ।
विद्वाद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत् ॥ ६ ॥

इति श्रौतमेवाग्निहोत्रादिकं पारशाखिकं कर्तव्यमाह. न च शाखान्तराधिकरणन्यायात्पारतंत्रिकगुणोपसंहारो गृह्याद्युक्तप्रयोगेऽपीति भ्रमितव्यम्. श्रौतविषयत्वात्तस्य; श्रौतेषु हि स्वेषु स्वेषु वेदेषु स्वस्ववेदिनामेव ऋत्विजां कर्म उपदिष्टं न सर्वेषां सर्ववेदिभिश्च ऋत्विग्भिर्यज्ञो निर्वहति न तावन्मात्रैरित्यस्तिविशेषः। गृह्याद्युक्ते तु प्रयोगे नैष विशेषोऽस्ति प्रत्यक्षश्चात्र परिशिष्टकाराणां निषेधः । " ऊनो वा अक्रियेत्यादिः । अथ वा यदात्मतंत्रेषु नोक्तमेव तदेव पारतंत्रिकं कर्तव्यमुपादिशति न पुनः स्वशास्त्रोक्तस्य प्रयोगस्य अन्तरान्तरा परोक्तस्य विशेषस्याभिनिवेशस्तस्यार्थः वचनान्तरेण सुव्यक्तमस्य निषेधात् "—

एतद्भाष्यकाराः गुणोपसंहारं श्रौतेषु अनुमन्यंते न स्मार्तेषु श्रौतेष्वपि नवीनाध्वरमीमांसाचणास्तावदैच्छिकतां ब्रुवते । अपि च तर्केणापि गुणोपसंहारानित्यत्वं सुवचं यथा

श्रौतस्मार्तकर्मभिर्नित्यमनुष्ठितैश्चित्तशुद्धिर्जन्यत इति सुविदितमेव. चित्तशुद्धिजनकतावच्छेदकतापर्याप्त्यधिकरणं च स्वपितृपरम्पराप्राप्तसूत्रविहितांगप्रधानत्वव्यापकसमुदायत्वं ईदृशं समुदायत्वं सूत्रान्तरांगसाधारणं स्वसूत्रोक्तसकलाङ्गवृत्ति च समुदायित्वं । न तु यत्किंचिदङ्गमात्रवृत्तीति न दोषः ये तु सूत्रान्तरोक्तांगकलापसहितस्वसूत्रोक्तांगोपेतप्रधानानुष्ठानादेव चित्तशुद्धिं ब्रुवन्ति तन्मते जनक-

तावच्छेदकतापर्याप्त्यधिकरणं किमिति न जानीमः यदि सूत्रान्तरोक्तांगस्वसूत्रोक्तांगप्रधानत्वव्यापकसमुदायत्वं तादृशं तदा सर्वसूत्रान्तरोक्तसकलांगानुष्ठाने सत्येव चित्तशुद्धिः स्यात् ! अशक्यं च तत् नाभ्युपगम्यते च कैरपि यदि व्यापकत्वं विहाय सूत्रान्तरस्वसूत्रोक्तांगप्रधानवृत्तिसमुदायत्वं तादृशं तर्हि स्वसूत्रीयैकाङ्गसहितप्रधानानुष्ठानादेव फलं भूयादिति आपतति अनुसृते चास्मिन्सप्रमाणे पथि सूत्रान्तरोक्तांगोपसंहारे एव दोषः प्रसज्यते कथं गुणान्तरानुपसंहारः प्रत्यवायं जनयेत् ! एतदननुरुध्यापि नित्यानुष्ठाने यथाशक्ति कर्मानुष्ठेयं । अन्यथा यावज्जीवमनुष्ठेयं, प्रतिबन्धाश्च भूयांसः. सूत्रान्तरोक्तांगानुष्ठान एव यदि शक्तिर्हीयेत प्रधानमेवावशिष्येत स्वगृह्योक्तानि वाङ्गानि. अत इत्थं व्यवस्थेयम् ।

१. यस्तु सूत्रान्तरोक्तानि स्वसूत्रोक्तानि अंगानि प्रधानं चानुष्ठातुं शक्नुयात् स सर्वमनुतिष्ठेत् ।

१. कश्चित्स्वसूत्रोक्तमेवानुष्ठातुं प्रभवति नाधिकं, अधिकं चेत् प्रधानमपि हातव्यमित्यापन्नः स तु स्वसूत्रोक्तांगकलापोपेतं प्रधानमनुतिष्ठेत् ।

१. अपरस्तु–प्रारब्धवशात् महतीमापदमापन्नः कदाचिद्विहिते मुख्ये काले समयातिपातभिया प्रधानमात्रमनुष्ठाय कालान्तरे सर्वं कुर्यात् इति ।

अत एव पाण्डवा रणांगणे ' असावादित्यो ब्रह्मेति प्रधानतमं ध्यानमेवादित्यविशेष्यकाभेदसंसर्गकब्रह्मप्रकारकं संध्यासमये अकार्षुः । ध्यानमात्रमेव प्रधानतमं, अर्घ्यजपोपस्थानानि प्रधानानि । अयं विषयः पराशरमाधवीये विद्यारण्यैः स्फुटीकृतस्तत्र द्रष्टव्यः । एवं सति एतावदिदं प्रधानमेतावन्तीमानिअंगानि, अनुष्ठितिश्चेत्थं इति सूत्रतः एव जानीयुश्चेत् तदानुतिष्ठेयुरास्तिका जनाः न च शक्नुवन्ति सर्व एव स्वस्वसूत्राणि अर्थतो ज्ञातुमनेकप्रतिबन्धादित्यालोच्य सोढ्वापि श्रमं अमुं संस्कारमीमांसाग्रन्थं रचयामासुः सर्वथा एकाग्निसाध्यसंस्कारानेव प्रतिपादयितुं प्रावर्तिषत गृह्यसूत्राणि यतो ह्येवं श्रूयते गृह्यसूत्राणां लक्षणम् स्वेतरविधिविहिताग्निसाध्यत्व, स्वसाध्यत्वोभयसंबधावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्व, स्वसाध्यत्वोभयसम्बन्धेन विधिविहिताग्निविशिष्टकर्मतात्पर्यकत्वम् गृह्यसूत्रत्वम् अत्र प्रथमसंबंधेन श्रौतसूत्रव्यावृत्तिः इतरेण स्मृतिव्यावृत्तिः ।

अस्मिन्ग्रंथे दर्पण इव विषयाः स्फुटं प्रकाशन्ते अतः सर्वैः सादरमाश्रयितामयंग्रन्थ इति सहर्षमावेदयामि ।

न्यायपंचानन,–विद्यावाचस्पति,–ब्रह्मश्री,–विरूपाक्षशास्त्री ।
शृंगगिरिसंस्थानविद्वान् ।
श्रावणसुदि ३।१८३९

श्रीर्विजयतेतराम् ॥

" बह्वल्पं वा स्वगृह्योक्तं यस्य कर्म प्रचोदितम् ।
तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् ॥ १ ॥
(सङ्ग्रहे)

ये स्वमतिपोतवशतः कृत्स्नश्रुतिशास्त्रजलधिमुत्तीर्णाः ।
तेऽत्र विदांकुर्वन्तु प्रेक्षावन्तो विमत्सराः सन्तः ॥ १ ॥

श्रीभगवदाश्वलायनचरणैर्निरमायि परमकारुणिकैः ।
यच्छाकलशाखिकृते सूत्रंऽभीरमिह वरीवर्ति ॥ २ ॥

तत्र क्रियाकलापे गार्ह्ये संस्कारमीमांसा ।
पण्डितवामनशास्त्रिभिरमलतरा विरचिताधुना या च ॥ ३ ॥

तां मीमांसाघटितप्रबन्धसमलंकृतां समुद्वीक्ष्य ।
मोदामहे सकुतुकं ? मोदिष्यन्तेऽपरे च विद्वांसः ॥ ४ ॥

ननु सांप्रदायिकाः ? किं सचकितमुद्वीक्ष्यतेऽत्र युष्माभिः ।
नामूलमत्र किंचिल्लिखितं यच्चाश्वलायनागदितम् ॥ ५ ॥

यावान् हि सूत्रकारैरुपदेशस्तूपदिश्यते सूत्रे ।
कर्तव्यतया तावाननुष्ठितः श्रेयसे भवेन्नूनम् ॥ ६ ॥

इति दुम्दुमायितं चेज्जागर्त्यार्षेयडिण्डिमस्येह ।
तदुपेक्ष्य रोचनायै कोऽभिनिवेशो गुणोपसंहारे ॥ ७ ॥

' सोऽपि स्वीकृत एव प्रयोगकारैर्ननूपसंहारः' ।
इति पृच्छथ चेदद्धा फलभूयस्त्वाय स तु न नियमाय ॥ ८ ॥

किन्त्वस्मिन्कलिकाले कलकलबहुले च पंकिले विषमे ।
अश्रद्दधानलोके सुकृतं दुष्कृतमिवाद्य परिणमति ॥ ९ ॥

पूर्वैर्दयालुहृदयैरुपसंहारः कृतो यमुद्दिश्य ।
सोर्थोनर्थीभूतः कुफलं फलितं ? कुतः फलाधिक्यम् ॥ १० ॥

अधुना प्रधानभावं गमितो बत ? लौकिकः समारम्भः ।
साधनमभूद्विधिरहो ! व्ययबहुलाडम्बरस्य साध्यस्य ॥ ११ ॥

कोमुख्यः ? कोऽमुख्यः कल्प ? इतीयं विचारणास्तमिता ।
" प्रथमं सत्कारविधिर्भवतु यथार्हं " स्थितिः समापतिता ?॥१२॥

आपद्विषये कथितो यस्त्वनुकल्पोऽप्यनापदि क्रियते ।
नान्दीश्राद्धं भवति प्रतिपार्वणमत्र पंचषैः पणकैः ! ॥ १३ ॥

मधुपर्कपूजनादौ भूषणकौशेयवस्त्रभाण्डादि ।
ददति वराय शताधिकरूप्यकमुद्राव्ययेन ! विभवमनु ॥ १४ ॥

न तु लक्षापतिरपि गां सूत्रकृदुक्तां ददाति रूपेण ।
निष्कार्धार्धार्धमिते रजते पर्याप्तमेव गोमूल्यम् ॥ १५ ॥

स्थालीपुलाकनियमादियता वस्तुस्थितिः सुविज्ञेया ।
तदिदं श्राद्धाभावोत्सवपरताशाठ्यमिह समुल्लसति ॥ १६ ॥

आन्ध्यं पारम्पर्यं ननु वा ? सौकर्यशीलता वेयम् ? ।
वामनशास्त्रिभिरित्थं बुद्ध्या सौत्रान्विधीन्प्रवर्तयितुम् ॥ १७ ॥

सौत्री प्रयोगपद्धतिरियमद्य निशातनाय धर्मविधेः ।
विदुषामग्रे निहिता को नु बुधस्तद्गुणे न रज्येत ? ॥ १८ ॥

यश्च न सूत्रविरोधी स भवतु कामं गुणोपसंहारः ।
यद्वत्परिशिष्टोक्तः कन्यादाने यथैव पुण्याहे ॥ १९ ॥

न च यज्ञपार्श्ववचनाच्छ्वशुरगृहे यद्गृहप्रवेशीयः ।
क्रियते स तु प्रशस्तः पूर्वैरुक्तोपि पारिजातादौ ॥ २० ॥

ग्रन्थकृतामिदमेवं मतमप्यनुमीयते मतं तन्नः ।
आशास्महे च विबुधैर्मन्तव्यैषा प्रवर्तितव्या च ॥ २१ ॥

तत्रभवन्तः सन्तो दत्तात्रेयोऽस्मि वोऽद्य विज्ञप्तिः ।
रचयत भोः साहाय्यं सूत्रानुष्ठानपद्धतेः प्रगतौ ॥ २२ ॥

फाल्गुनसुदि १२।१८३८	पणशीकरोपाव्ह—भट्टतुकारामात्मज— भट्ट—दत्तात्रेयशास्त्री । गोमांतकक्षेत्रीयः,

कालेऽस्मिन्बत नानुतिष्ठति जनः कर्म स्वगृह्योदितम् ।
दूरे केवलमन्यसूत्रगदितान्यंगानि मुख्यानि वा ॥
तत् धर्मप्रवणात्मनामुपकृतिर्बह्वी भवेदेतया ।
मन्ये वामनशास्त्रिभी रचितया संस्कारमीमांसया ॥ १ ॥

१८३९ श्रा. शु. ५ भौमे धारवाड श्रीशंकराचार्यसंस्कृतपाठशाला	कृष्णशास्त्री उप्पिन बेट्टगेरी विद्वद्रत्नं महामहोपदेशकः ।

ग्रन्थः संस्कारमीमांसा गृह्यसूत्रप्रमाणतः ।
अनुतिष्ठासुभिर्भाव्यः संस्कारनिचयं सदा ॥ १ ॥

सूत्रं प्रमाणमूर्धन्यमिति यत्स्थापितम्पुरा ।
मीमांसासूत्रकारेण प्रमाणान्वेषणादृतम् ॥ २ ॥

तदेव मन्यमानेन रचितो वामनेन यः ।
भावितः सर्वदा सद्भिर्जीयादाचन्द्रतारकम् ॥ ३ ॥

तस्मिन्त्सर्वैः साम्प्रतं भाव्यमाने संस्कारादिष्वादरानुष्ठितेषु ।
भूत्वा क्षिप्रं पुण्यवन्तश्च युक्ता जाने नित्यं वांछितं तल्लभन्ते ॥४॥

मराठे इत्युपाव्हो वामनशास्त्री ।

ॐभूधरभूजानिर्विजयते ॥

सप्रमोदमावेद्यते यत्तत्रतत्रादर्शि मया संस्कारमीमांसापुस्तकम् । तत्रत्यमनुगतं तत्त्वं यत्सकलसंस्कारा विवाहप्रभृतयः प्रयोगशास्त्रापरनामधेयगृह्यसूत्रानुसारमेवानुष्ठेया द्विजातिभिर्नांशतोऽपि तत्र स्मार्तादिगुणाउपसंहर्तव्या इति तत्सर्वविद्वद्भिः सबहुमानं संमान्यमेव मीमांसाशास्त्रानुमतत्वात् । एवमपि नवीनतरप्रयोगग्रन्थानुसारिभिर्याज्ञिकैस्तद्विरुद्धं संस्कारा विधीयन्ते तत्र तत्र । अत्र च निदानं केवलसूत्रानुसारिप्रयोगप्रदर्शकपुस्तकाभाव एवेति मन्ये । परं पुस्तकेनानेन बहूपकृतं पूर्वोक्तयाज्ञिकेषु । यदत्र सूत्रं तदर्थः प्रयोगपद्धतिर्विभागशः प्रादर्शि सरस्वतीकण्ठाभरणोपाधिभूषणकिञ्जवडेकरवामनशास्त्रिभिः प्रमाणशास्त्रप्रमाणितमतिभिः । अस्मिन् पुस्तके प्रसंगानुसारं मीमांसितं विवाहवयोमर्यादाविषयकं तत्सर्वसंमतं भवेन्नवेति संशीतिं स्पृशति चेतः । यत एतादृशे सूत्राप्रपंचितेंऽशे स्मृतय एव शरणीकरणीया इति मन्मातिः । अस्तु नामायं विवादांशः । तथापि प्रयोगानुष्ठानविषये इदमेकमेव पुस्तकमाश्वलायनसूत्रानुयायिनामादरपदवीं यायात् । शास्त्रशुद्धत्वात् । इति दृढं विश्वसिति ।

विद्वद्वशंवदः
पाठकोपाव्ह श्रीधरशर्मा ।
पुण्यपुरस्थ—डेक्कन कॉलेजाध्यापकः ।

अयि सहृदयाः मीमांसादिशास्त्ररहस्याभिज्ञाः शास्त्रकुशाग्रधिषणाः श्रीमन्तो वामनशास्त्रिणः ? भवत्प्रणीतोयं ग्रन्थो मह्यं परं प्रेम्णा प्रदर्शितस्तेन च मच्चेतसि महानानन्दः समजनि। अत एनं ग्रन्थं निपुणतरमवलोक्य सारासारविचारपात्रतां नीत्वा च विद्वद्वर्याः कर्मानुष्ठातार एतद्ग्रन्थानुरोधेन यथाशक्त्यावश्यकोपयुक्तकर्मानुष्ठानप्रचारेणैतद्ग्रन्थानुमोदनेन च भवतां ग्रन्थप्रणयनपरिश्रमं सफलयान्त्वतीश प्रार्थयते ।

फाल्गुनसुदि ८–१८३८ } पुण्यपत्तनीयः—
आगाशे इत्युपाव्हः काशिनाथशास्त्री

अन्येप्येतस्मिन्विषये बहूनां विदुषामभिप्राया विलसन्ति। दत्ताभिप्रायाणां तेषां महात्मनां कतिपयपण्डितानां नामानि प्रदर्श्यन्ते ।

नित्यानन्दपन्तपर्वतीयः

काशीस्थः, नेपालीयः—

श्रीमच्छ्रौतस्मार्तप्रवीणाः श्रीमहादेवदीक्षिताः ।

ग्वाल्हेर–अलवारपुरीयाः

धूपकरोपाव्हांनततनुजनुषः भट्टवासुदेवशर्माणः ।

गोमांतकीयाः ।

PK 3057 A72V3 1918

Vamana Rama-Chandra Kinjavdekar
Samskaramimamsa

[redacted]

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY